॥ अथ वामनपुराणं प्रारभ्यते ॥

नारद
पुलस्त्यऋषि.
बली
वामन
ऋषिमंडली.

# भूमिका ।

समुपजोषमद्यैतन्मुद्राप्य प्रकाश्यते श्रीमद्वामनपुराणं श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतमेतदिति सुव्यक्तमेव विदाम्पुरः ।

अत्र च श्रीमद्भगवतो विष्णोर्वामनावतारचरितामृतवर्णनमेव प्रायेण सविस्तरमुपनिबबन्ध स महामुनिर्यतस्ततः तत्सहभूतमन्यदपि तदीयशिवमूर्तिमहिमवर्णनादिकमत्रास्तीत्यनुक्रमण्येवावेदयिष्यति ।

यद्यप्येतत्पुस्तकं मूलमात्रं क्वचिदेव सटिप्पणं पुण्यपत्तने जगद्धितेच्छुयन्त्रालये पुरा मुद्राप्य प्रकाशितं तथापि तन्मातृकापुस्तकानामनतिशुद्धतया क्वचित्क्वचित्स्खलनमाकलय्य शोधकसम्पादितवङ्गाक्षरमुद्रितान्यमुद्रितानि च कियन्त्यपि पुस्तकान्यासाद्य बरेलीनिवासित्रिपाठ्युपनामकैः, कान्यकुब्जकुलालङ्कारभूतैः श्यामलालशर्मपण्डितवर्यैः संशोध्य तैरेव हिन्दीभाषाटीकां सामान्यधिषणदिदृक्षुजनसौलभ्याय कारयित्वा लाभमनादृत्य व्ययीकृतद्रव्यमात्रद्रव्यमूल्याधिकग्रहणानभिलाषिणाऽनादिग्रन्थप्रकाशमात्रलिप्सुना मया मूलमात्रं भाषामात्रं भाषाटीकासहितं च पुस्तकत्रयात्मकं पुराणमिदं पृथक्पृथक् अस्मदीये "श्रीवेङ्कटेश्वर" नाम्नि ( स्टीम् ) मुद्राक्षरयन्त्रालये मुद्राप्य प्रकाशमानं जागर्ति ।

प्रार्थयामहे च तदिदं स्वयं संगृह्य तत्पठनादिजनितश्रेयोविशेषाननवरतं संपाद्य कृपया मय्यप्याशिष आशासयद्भिः यद्यत्र बहुधा संशोधितेऽपि सीसकाक्षरयोजकदोषेण शोधकदृष्टिदोषेण वाऽशुद्धिरवशिष्येत तदा तद्विचार्य संशोध्य सन्तोष्टव्यं गुणैकपक्षपातिभिर्दूषणवाचंयमैर्धीरधिषणैः वर्णाश्रमधर्मपरिपालननिष्ठागरिष्ठैः । "यत्नेन गच्छतः क्वापि स्खलनं स्यान्महीयसः । [illegible] समादधति सज्जनाः ।" इति शम् ।



विद्वज्जनकृपाकाङ्क्षी–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" ( स्टीम् ) यन्त्रालयाध्यक्षः–मुंबई.

# अथ वामनपुराणस्य विषयानुक्रमणिका प्रारभ्यते ।

इति वामनपुराणस्य विषयानुक्रमणिका समाप्ता ।



ॐ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ त्रैलोक्यराज्यमाच्छिद्य बलेरिन्द्राय यो ददौ ॥

ॐ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ त्रैलोक्यराज्यमाच्छिद्य बलेरिन्द्राय यो ददौ ॥ नमस्तस्मै सुरेशाय सदा वामनरूपिणे ॥ १ ॥ पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरम् ॥ नारदः परिपप्रच्छ पुराणं वामनाश्रयम् ॥ २ ॥ कथं भगवता ब्रह्मन् विष्णुना प्रभविष्णुना ॥ वामनत्वं धृतं पूर्वं तन्ममाचक्ष्व पृच्छतः ॥ ३ ॥ कथं च वैष्णवो भूत्वा प्रह्लादो दैत्यसत्तमः ॥ त्रिदशैर्युयुधे सार्द्धमत्र मे संशयो महान् ॥ ४ ॥ श्रूयते च द्विजश्रेष्ठ दक्षस्य दुहिता सती ॥ शंकरस्य प्रिया भार्या बभूव वरवर्णिनी ॥ ५ ॥ किमर्थं सा परित्यज्य स्वशरीरं वरानना ॥ जाता हिमवतो गेहे गिरीन्द्रस्य महात्मनः ॥ ६ ॥ पुनश्च देवदेवस्य पत्नीत्वमगमच्छुभा ॥ एतं मे संशयं छिन्धि सर्ववित्त्वं मतोऽसि मे ॥ ७ ॥ तीर्थानां चैव माहात्म्यं दानानां चैव सत्तम ॥ व्रतानां विविधानां च विधिमाचक्ष्व मे द्विज ॥ ८ ॥ एवमुक्तो नारदेन पुलस्त्यो मुनिसत्तमः ॥ प्रोवाच वदतां श्रेष्ठो नारदं तपसो निधिम् ॥ ९ ॥ पुलस्त्य उवाच ॥ पुराणं वामनं वक्ष्ये क्रमान्निखिलमादितः ॥ अवधानं स्थिरं कृत्वा शृणुष्व मुनिसत्तम ॥ १० ॥ पुरा हैमवती देवी मन्दरस्थं महेश्वरम् ॥ उवाच वचनं दृष्ट्वा ग्रीष्मकालमुपस्थितम् ॥ ११ ॥ ग्रीष्मः प्रवृत्तो देवेश न च मे विद्यते गृहम् ॥ यत्र वातातपौ ग्रैष्मौ स्थितयोर्नौ गमिष्यतः ॥ १२ ॥ एवमुक्तो भवान्यैतच्छंकरो वाक्यमब्रवीत् ॥ निराश्रयोऽहं सुदति सदाऽरण्यचरः शुभे ॥ १३ ॥ इत्युक्ता शंकरेणाथ वृक्षच्छायासु नारद ॥ निदाघकालमनयत्समं शर्वेण सा सती ॥ १४ ॥ निदाघान्ते समुद्भूतो निर्जनाचरितोऽद्भुतः ॥ घनान्धकारिताशो वै प्रावृट्कालोऽतिराववान् ॥ १५ ॥

तं दृष्ट्वा दक्षतनुजा प्रावृट्कालमुपस्थितम् ॥ प्रोवाच वाक्यं देवेशं सती सप्रणयं तदा ॥ १६ ॥ सत्युवाच ॥ निवान्ति वाता हृदयावदारणा गर्जन्त्यमी तोयधरा महेश ॥ स्फुरन्ति नीलाभ्रगणेषु विद्युतो वाशन्ति केकारवमेव बर्हिणः ॥ १७ ॥ पतन्ति धारा गगनात्परिच्युता बका बलाकाश्च भजन्ति तोयदान् ॥ कदम्बसर्ज्जार्ज्जुनकेतकीनां पुष्पाणि मुञ्चन्ति च मारुतादिना ॥ १८ ॥ श्रुत्वैव मेघस्य दृढं तु गर्जितं त्यजन्ति हंसाश्च सरांसि तत्क्षणात् ॥ नीचोद्धतान्सत्पुरुषा यथाऽऽश्रयान्प्रवृद्धमूलानपि संत्यजन्ति ॥ ॥ १९ ॥ इमानि यूथानि तथा मृगाणां त्वरन्ति धावन्ति रमन्ति शंभो ॥ धावन्ति दृष्टानि वनस्थलीषु सर्वा भुवस्तोयद संप्रवृद्ध्या ॥ २० ॥ राजन्ति शष्पावृतसस्ययुक्तास्तथाऽचिराभाः सुतरां स्फुरन्ति ॥ रम्येषु नीलेषु घनेषु देव नूनं समृद्धिं मलिनस्य दृष्ट्वा ॥ २१ ॥ चरन्ति शूरास्तरणोद्गमेषु उद्धृत्तवेगाः सहसैव निम्नगाः ॥ जाताः शशाङ्काङ्कितचारुमौले किमत्र चित्रं यदनुज्ज्वलं जनम् ॥ २२ ॥ श्रयन्ति नीचानुगता हि योषितो नीलेषु मेघेषु समाश्रितं नभः ॥ पुष्पेषु सर्ज्जा मुकुलेषु नीपाः फलेषु च श्रीश्च पयस्स्वथापगाः ॥ २३ ॥ पत्रेषु पद्मेषु महासरांसि सुदुस्तरः संप्रति वर्षकालः ॥ इतीदृशे शंकर दुःसहेऽद्भुते काले सुरेन्द्रे ननु ते ब्रवीमि ॥ २४ ॥ गृहं कुरुष्वात्र महाचलोत्तमे सुनिर्वृता येन भवामि शंभो ॥ इत्थं त्रिनेत्रः श्रुतिरामणीयकं श्रुत्वा वचो वाक्यमिदं बभाषे ॥ २५ ॥ न मेऽस्ति वित्तं गृहसंचयार्थे मृगारिचर्मावृतदेहिनः प्रिये ॥ ममोपवीतं भुजगेश्वरः फणी कर्णेऽपि पद्मश्च तथैव पिङ्गलः ॥ २६ ॥ केयूरमेकं मम कम्बलस्त्वन्यो द्वितीयमन्यो भुजगो धनंजयः ॥ नागस्तथैवाश्वतरोऽहिकङ्कणं सव्ये

पद्मश्च तथैव पिङ्गलः ॥ २६ ॥ केयूरमेकं मम कम्बलस्त्वन्निर्द्वितीयमन्यो भुजगो धनंजयः ॥ नागस्तथैवाश्वतरोऽपि ...

तरे तक्षक उत्तरं तथा ॥ नीलोऽपि नीलाञ्जनतुल्यवर्णः श्रोणीतटे राजति सुप्रतिष्ठः ॥२७॥ पुलस्त्य उवाच ॥ इति वचनमथोग्रं शंकरात्सा मृडानी श्रुतमपि तदसत्यं श्रीमदाकर्ण्य भीता ॥ अवनितलमवेक्ष्य स्वामिनो वासकृच्छ्रात्परिवदति सरोषं लज्जयोच्छ्वस्य चोष्णम् ॥ २८ ॥ देव्युवाच ॥ किमेवं संश्रितायास्तु प्रावृट्कालो गमिष्यति ॥ वृक्षमूले स्थितायास्तु सुनयेन वदाव्यय ॥ २९ ॥ शंकर उवाच ॥ घनावस्थितदेहायाः प्रावृट्कालः प्रयास्यति ॥ यथाऽम्बुधारा न तव निपतिष्यन्ति विग्रहे ॥ ३० ॥ पुलस्त्य उवाच ॥ ततो हरस्तद्घनखण्डमुन्नतमारुह्य तस्थौ सह दक्षकन्यया ॥ ततोऽभवन्नाम महेश्वरस्य जीमूतकेतुस्त्विति विश्रुतं दिवि ॥ ३१ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरललिते प्रथमोऽध्यायः ॥ १ ॥

पुलस्त्य उवाच ॥ ततस्त्रिनेत्रस्य गतः प्रावृट्कालो घनोपरि ॥ लोकानन्दकरी रम्या शरत्समभवन्मुने ॥१॥ त्यजन्ति नीलाम्बुधरा नभस्तलं वृक्षांश्च कङ्काः सरितस्तटानि ॥ पद्मानि गन्धं निलयानि वायसा रुरुर्विषाणं कलुषं जलाशयाः ॥ २ ॥ विकासमायान्ति च पङ्कजानि चन्द्रांशवो भान्ति लताः सुपुष्पाः ॥ नन्दन्ति हृष्टान्यपि गोकुलानि सन्तश्च संतोषमनुव्रजन्ति ॥३॥ सरस्सु पद्मं गगने च तारका जलाशयेष्वेव तथा पयांसि ॥ सतां च चित्तं हि दिशां मुखैः समं वैमल्यमायान्ति शशाङ्ककान्तयः ॥ ४ ॥ एतादृशे हरः काले मेघपृष्ठाधिवासिनीम् ॥ सतीमादाय शैलेन्द्रं मन्दरं समुपाययौ ॥ ५ ॥ ततो मन्दरपृष्ठेऽसौ स्थितः समशिलातले ॥ रेमे स शंभुर्भगवान्सत्या सह महाद्युतिः ॥ ६ ॥ ततो गतायां शरदि प्रबुद्धे चैव केशवे ॥ दक्षः प्रजापतिश्रेष्ठो

यष्टुमारभत क्रतुम् ॥ ७ ॥ द्वादशैव स चादित्याञ्छक्रादींश्च सुरोत्तमान् । सकश्यपान्समामन्त्र्य सदस्यान्समचीकरत् ॥ ८ ॥ अरुन्धत्याऽनुसहितं वसिष्ठं शंसितव्रतम् ॥ सहाऽनुसूययाऽत्रिं च सह धृत्या च कौशिकम् ॥ ९ ॥ अहल्यया गौतमं च भरद्वाज ममायया ॥ चन्द्रया सहितं ब्रह्मन्नृषिमङ्गिरसं तथा ॥ १० ॥ आमन्त्र्य कृतवान्दक्षः सदस्यान्यज्ञकर्मणि ॥ सदस्यान्गुणसंपन्ना न्वेदवेदाङ्गपारगान् ॥ ११ ॥ धर्मं च स समाहूय भार्ययाऽहिंसया सह ॥ निमन्त्र्य यज्ञवाटस्य द्वारपालार्थमादिशत् ॥ १२॥ अरिष्ट नेमिनं चक्रे इध्माहरणकारिणम् ॥ चन्द्रया सहितं ब्रह्मन्नृषिमङ्गिरसं तथा ॥ १३ ॥ मृष्टान्नपानसंस्कारे सम्यग्दक्षः प्रयुक्तवान् ॥ भृगुं च सत्रसंस्कारे सम्यग्दक्षः प्रयुक्तवान् ॥ १४ ॥ तथा चन्द्रमसं देवं रोहिण्या सहितं शुचिम् ॥ धनानामाधिपत्ये स युक्त वान्हि प्रजापतिः ॥ १५ ॥ जामातॄन्दुहितॄश्चैव दौहित्रांश्च प्रजापतिः ॥ सशंकरां सतीं मुक्त्वा मखे सर्वान्न्यमन्त्रयत् ॥ १६ ॥ नारद उवाच ॥ किमर्थं लोकपतिना धनाध्यक्षो महेश्वरः ॥ ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि न निमन्त्रितः ॥ १७ ॥ पुलस्त्य उवाच ॥ ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि भगवाञ्छिवः ॥ कपालीति विदित्वेशो दक्षेण न निमन्त्रितः ॥१८॥ नारद उवाच॥ किमर्थं देवताश्रेष्ठः शूलपाणिस्त्रिलोचनः ॥ कपाली भगवाञ्जातः कर्मणा केन शंकरः ॥ १९ ॥ पुलस्त्य उवाच ॥ शृणुष्वाव हितो भूत्वा कथामेतां पुरातनीम् ॥ प्रोक्तां ह्यादिपुराणेषु ब्रह्मणाऽव्यक्तमूर्तिना ॥ २० ॥ पुरा त्वेकार्णवे लोके नष्टे स्थावरजङ्गमे ॥ नष्टचन्द्रार्कनक्षत्रे प्रनष्टपवनानले ॥२१॥ अप्रतर्क्यमविज्ञेयं भावाभावविवर्जितम् ॥ निमग्नवीरुत्सतृणं तमोभूतं सुदुर्दिनम् ॥२२॥

नष्टचन्द्रार्कनक्षत्रं प्रनष्टपवनानलम् ॥२१॥ अप्रतर्क्यमविज्ञेयं ...

तस्मिन्स शेते भगवान्निशां वर्षसहस्त्रकीम् ॥ रात्र्यन्ते सृजते लोकान्राजसं रूपमास्थितः ॥ २३ ॥ रेजे स पञ्चवदनो वेदवेदाङ्गपारगः ॥ स्रष्टा चराचरस्यास्य जगतोऽद्भुतदर्शनः ॥ २४ ॥ तमोमयस्तथैवान्यः समुद्भूतस्त्रिलोचनः ॥ शूलपाणिः कपर्दी च अक्षमालां च दर्शयन् ॥ २५ ॥ ततो महात्मा ह्यसृजदहंकारं सुदारुणम् ॥ येनाक्रान्तावुभौ देवौ तावेव ब्रह्मशंकरौ ॥ २६ ॥ अहंकारावृतो रुद्रः प्रत्युवाच पितामहम् ॥ को भवानिह संप्राप्तः केन सृष्टोऽसि मां वद ॥ २७ ॥ पितामहोऽप्यहंकारी प्रत्युवाचाथ को भवान् ॥ भवतो जनकः कोऽत्र जननी वा तदुच्यताम् ॥ २८ ॥ इत्यन्योन्यं पुरा ताभ्यां ब्रह्मेशाभ्यां किल प्रियः॥ परिवादोऽभवत्तत्र उत्पत्तिर्भवतोऽभवत् ॥२९॥ भवानप्यन्तरिक्षं हि जातमात्रस्तदोत्पतत् ॥ धारयन्नतुलां वीणां कुर्वन्किलकिला ध्वनिम् ॥ ३० ॥ ततो विनिर्जितः शंभुर्मानिना ब्रह्मयोनिना ॥ तस्थावधोमुखो दीनो ग्रहाक्रान्तो यथा शशी ॥ ३१ ॥ पराजिते लोकपतौ देवेन परमेष्ठिना ॥ क्रोधान्धकारितं रुद्रं पञ्चमं मुखमब्रवीत् ॥ ३२ ॥ अहं ते प्रतिजानामि तमोमूर्ते त्रिलोचन ॥ दिग्वासा वृषभारूढो लोकक्षयकरो भवान् ॥ ३३ ॥ इत्युक्तः शंकरः क्रुद्धो ब्रह्माणं घोरचक्षुषा ॥ निर्दग्धुकामस्त्वनिशं ददर्श भगवानजः ॥ ३४॥ ततस्त्रिनेत्रस्य समुद्भवन्ति वक्त्राणि पञ्चाथ सुदुर्दृशानि ॥ सितं च रक्तं कनकावदातं नीलं तथा पिञ्जरकं च रौद्रम् ॥ ३५ ॥ वक्त्राणि दृष्ट्वाऽर्कसमानि सद्यः पितामहो वाक्यमुवाच रुद्रम् ॥ समाहतस्याथ जलस्य बुद्बुदा भवन्ति किं तेषु पराक्रमोऽस्ति ॥ ३६ ॥ तच्छ्रुत्वा क्रोधयुक्तेन शंकरेण महात्मना ॥ नखाग्रेण शिरश्छिन्नं ब्राह्मं परुषवादकम् ॥ ३७॥ तच्छिन्नं

शंकरस्यैव सव्ये करतलेऽपतत् ॥ पतते न कदाचिच्च तदा करतलाच्छिरः ॥ ३८ ॥ अथ क्रोधावृतेनाथ ब्रह्मणाऽद्भुतकर्मणा ॥ सृष्टस्तु पुरुषो धीमान्कवची कुण्डली शरी ॥ ३९ ॥ धनुष्पाणिर्महाबाहुर्बाणशक्तिधरोऽव्ययः ॥ चतुर्भुजो महातूणी आदित्यसमदर्शनः ॥ ४० ॥ स त्वाह गच्छ दुर्बुद्धे मा त्वां शूलिन्निपातये ॥ भवान्पापसमायुक्तः पापिष्ठं को जिघांसति ॥ ४१ ॥ इत्युक्तः शंकरस्तेन पुरुषेण महात्मना ॥ प्रियायुक्तो जगामाथ रुद्रो बदरिकाश्रमम् ॥ ४२ ॥ नरनारायणस्थानं पर्वते हि हिमालये ॥ सरस्वती यत्र पुण्या स्यन्दते सरितां वरा ॥४३॥ तत्र गत्वा च तं दृष्ट्वा नारायणमुवाच ह ॥ भिक्षां प्रयच्छ भगवन्महाकारुणिकोऽसि भोः ॥४४॥ इत्युक्तो धर्मपुत्रस्तु रुद्रं वचनमब्रवीत् ॥ सव्यं भुजं ताडयस्व त्रिशूलेन महेश्वर ॥४५॥ नारायणवचः श्रुत्वा त्रिशूलेन महेश्वरः ॥ सव्यं नारायणभुजं ताडयामास वेगवान् ॥४६॥ त्रिशूलाभिहतान्मार्गात्तिस्रो धारा विनिर्ययुः ॥ एका गगनमाश्रित्य स्थिता ताराभिमण्डितम् ॥ ४७ ॥ द्वितीया न्यपतद्भूमौ तां जग्राह तपोधनः ॥ अत्रिस्तस्मात्समुद्भूतो दुर्वासाः शंकरांशतः ॥ ॥४८॥ तृतीया न्यपतद्धारा कपाले रौद्रदर्शने ॥ तस्माच्छिशुः समभवत्संनद्धः कवची युवा ॥४९॥ श्यामावदातः शरचापपाणिर्गर्जन्यथा प्रावृषि तोयदोऽसौ ॥ इत्थं ब्रुवन्कस्य विनाशयामि स्कन्धाच्छिरस्तालफलं यथैव ॥ ५० ॥ तं शंकरोऽभ्येत्य वचो बभाषे नरं हि नारायणबाहुजातम् ॥ निपातयैनं नर दुष्टवाक्यं ब्रह्मात्मजं सूर्यशतप्रकाशम् ॥ ५१ ॥ इत्येवमुक्तः स तु शंकरेण आद्यं धनुस्त्वाजगवं प्रसिद्धम् ॥ जग्राह तूणानि तथाऽक्षयाणि युद्धाय वीरः स मतिं चकार ॥ ५२ ॥ ततः प्रयुद्धौ सुभृशं महा

बलौ ब्रह्मात्मजो बाहुभवश्च शार्वः ॥ दिव्यं सहस्रं परिवत्सराणां ततो हरेणापि विरञ्चिरूचे ॥ ५३ ॥ जितस्त्वदीयः पुरुषः पितामह नरेण दिव्याद्भुतकर्मणा बली ॥ महापृषत्कैरभिपत्य ताडितस्तदद्भुतं चेह दिशो दशैव ॥ ५४ ॥ ब्रह्मा तमीशं वचनं बभाषे नेहास्य जन्मन्यजितस्य शंभो ॥ पराजितं चैष्यतेऽसौ त्वदीयो नरो मदीयः पुरुषो महात्मा ॥ ५५ ॥ इत्येवमुक्त्वा वचनं त्रिनेत्रं चिक्षेप सूर्ये पुरुषं विरञ्चिः ॥ नरं नरस्यैव तदा स विग्रहे चिक्षेप धर्मप्रभवस्य देवः ॥ ॥ ५६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरललिते नरोत्पत्तिप्रलयो नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥

पुलस्त्य उवाच ॥ ततः करतले रुद्रः कपाले दारुणे स्थिते ॥ संतापमगमद्ब्रह्मंश्चितयाऽऽकुलितेन्द्रियः ॥ १ ॥ ततः समागता रौद्रा नीलाञ्जनचयप्रभा ॥ संरक्तमूर्धजा भीमा ब्रह्महत्या हरान्तिकम् ॥ २ ॥ तामागतां हरो दृष्ट्वा पप्रच्छ विकरालिनीम् ॥ कासि त्वमागता रौद्रे केनाप्यर्थेन तद्वद ॥ ३ ॥ कपालिनमथोवाच ब्रह्महत्या सुदारुणा ॥ ब्रह्महत्याऽस्मि संप्राप्ता मां प्रतीच्छ त्रिलोचन ॥ ४ ॥ इत्येवमुक्त्वा वचनं ब्रह्महत्या विवेश तम् ॥ त्रिशूलपाणिनं रुद्रं संप्रतापितविग्रहम् ॥ ५ ॥ ब्रह्महत्याभिभूतश्च शर्वो बदरिकाश्रमम् ॥ आगच्छन्नो ददर्शाथ नरनारायणावृषी ॥ ६ ॥अदृष्ट्वा धर्मतनयौ चिन्ताशोकसमन्वितः ॥ जगाम यमुनां स्नातुं साऽपि शुष्कजलाऽभवत् ॥ ७ ॥ कालिन्दीं शुष्कसलिलां निरीक्ष्य वृषकेतनः ॥ प्लक्षजां स्नातुमगमदन्तर्द्धानं च सा गता ॥ ८ ॥ ततोऽनुपुष्करारण्यं मागधारण्यमेव च ॥ सैन्धवारण्यमेवासौ गत्वा श्रान्तो यदृच्छया ॥९॥ तथैव निमिषारण्यं धर्मारण्यं तथेश्वरः ॥

वा० पु०

॥ ४ ॥

स्नातो नैव च सा रौद्रा ब्रह्महत्या व्यमुञ्चत ॥ १० ॥ सरित्सु तीर्थेषु तथाऽऽश्रमेषु पुण्येषु देवायतनेषु सर्वतः ॥ समाप्लुतो योगयुतोऽपि पापान्नावाप मोक्षं वृषभध्वजोऽसौ ॥ ११ ॥ ततो जगाम निर्विण्णः शंकरः कुरुजाङ्गलम् ॥ तत्र गत्वा ददर्शाथ चक्रपाणिं खगस्थितम् ॥ १२ ॥ तं दृष्ट्वा पुण्डरीकाक्षं शङ्खचक्रगदाधरम् ॥ कृताञ्जलिपुटो भूत्वा हरः स्तोत्रमुदैरयत् ॥ १३ ॥ हर उवाच ॥ नमस्ते देवतानाथ नमस्ते गरुडध्वज ॥ शङ्खचक्रगदापाणे वासुदेव नमोऽस्तु ते ॥ ॥१४॥ नमस्ते निर्गुणानन्त अप्रतर्क्याय वेधसे ॥ ज्ञानाज्ञाननिरालम्ब सर्वालम्ब नमोऽस्तु ते ॥ १५ ॥ रजोयुक्त नमस्तेऽस्तु ब्रह्ममूर्त्ते सनातन ॥ त्वया सर्वमिदं नाथ जगत्सृष्टं चराचरम् ॥ १६ ॥ सत्त्वाधिष्ठितलोकेश विष्णुमूर्त्ते अधोक्षज ॥ प्रजापाल महाबाहो जनार्दन नमोऽस्तु ते॥१७॥ तमोमूर्त्ते अहं ह्येष त्वदंशक्रोधसंभवः ॥ गुणाभियुक्तो देवेश सर्वव्यापिन्नमोऽस्तु ते ॥ १८ ॥ भूरियं त्वं जगन्नाथ जलमम्बर पावकौ ॥ वायुर्बुद्धिर्मनश्चापि शर्वरी त्वं नमोऽस्तु ते ॥१९॥ धर्मो यज्ञस्तपः सत्यमहिंसा शौचमार्जवम् ॥ क्षमा दानं दया लक्ष्मी ब्रह्मचर्यं त्वमीश्वरः ॥ २० ॥ त्वं साङ्गाश्च चतुर्वेदास्त्वं वेद्यो वेदपारगः ॥ उपवेदो भवानीश सर्वोऽसि त्वं नमोऽस्तु ते ॥ २१ ॥ नमो नमस्तेऽच्युत चक्रपाणे नमोऽस्तु ते वामनमीनमूर्त्ते ॥ लोके भवान्कारुणिको मतो मे त्रायस्व मां केशव पापबन्धात् ॥२२॥ ममाशुभं नाशय विग्रहस्थं यद्ब्रह्महत्याभिभवं बभूव ॥ दग्धोऽस्मि नष्टोऽस्म्यसमीक्ष्यकारी पुनीहि नाथोऽसि नमो नमस्ते ॥ ॥ २३ ॥ पुलस्त्य उवाच ॥ एवं स्तुतश्चक्रधरः शंकरेण महात्मना ॥ प्रोवाच भगवान्वाक्यं ब्रह्महत्याक्षयाय हि ॥ २४ ॥



॥ ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्द्धनीम् ॥ २५ ॥ योऽसौ ब्रह्माण्डके

अ० ३

॥ २

॥ २३ ॥ पुलस्त्य उवाच ॥ एवं स्तुतश्चक्रधरः शंकरेण महात्मना ॥ प्रोवाच भगवान्वाक्यं ...

हरिरुवाच ॥ महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम् ॥ ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्द्धनीम् ॥ २५ ॥ योऽसौ ब्रह्माण्डके पुण्ये मदंशप्रभवोऽव्ययः ॥ प्रयागे वसते नित्यं योगशायीति विश्रुतः ॥ २६॥ चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा ॥ विश्रुता वरणेत्येवं सर्वपापहरा शुभा ॥ २७ ॥ सरिदन्या द्वितीयाच्च आसीरित्येव विश्रुता ॥ ते उभे तु सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ॥ ॥ २८ ॥ तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगशायिनः ॥ त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम् ॥ २९ ॥ तत्तादृशाऽस्ति नगरी पुण्या वाराणसी शुभा ॥ यस्यां हि भोगिनोऽपीश प्रयान्ति भवतो लयम् ॥ ३० ॥ विलासिनीनां रशनास्वनेन श्रुतिस्वरो ब्राह्मण पुङ्गवानाम् ॥ शुचिस्वरत्वं गुरवो निशम्य हास्यान्विताः सन्ति मुहुर्मुहुस्ताः ॥३१॥ व्रजत्सु योषित्सु चतुष्पथेषु पदान्यलक्तारुणि तानि दृष्ट्वा ॥ ययौ शशी विस्मयमेव यस्यां किंस्वित्प्रयाता स्थलपद्मिनीयम् ॥ ३२ ॥ तुङ्गानि यस्यां सुरमन्दिराणि रुन्धन्ति चन्द्रं रजनीमुखेषु ॥ दिवाऽपि सूर्यं पवनान्विताभिर्दीर्घाभिरेवं सुपताकिकाभिः ॥३३॥ भृङ्गाश्च यस्यां शशिकान्तभित्तौ प्रलोभ्य मानाः प्रतिबिम्बितेषु ॥ आलक्ष्य योषिद्विमलाननाब्जेष्वीयुर्भ्रमान्नैव च पुष्पकान्तरम् ॥ ३४ ॥ परिश्रमश्चापि पराजितेषु नरेषु संमोहनखेलनेन ॥ यस्यां जलक्रीडनसंगतासु न स्त्रीषु शंभो गृहदीर्घिकासु॥३५॥ न चैव कश्चित्परमन्दिराणि रुणद्धि शंभो सह मारुतेन ॥ न चाबलानां तरसा पराक्रमं करोति यस्यां सुरतं हि मुक्त्वा ॥३६॥ पाशग्रन्थिर्गजेन्द्राणां दानच्छेदो मदच्युतौ ॥



यस्यां मानमदौ पुंसां करिणां यौवनागमे ॥३७॥ प्रियदोषाः सदा यस्यां कौशिका नेतरे जनाः ॥ तारागणेऽकुलीनत्वं मेघे वृत्त

वा० पु०

॥ ५ ॥

च्युतिर्विभो ॥ ३८ ॥ भूतिलुब्धा विलासिन्यो भुजंगपरिवारिताः ॥ चन्द्रभूषितदेहाश्च यस्यां त्वमिव शंकर ॥ ३९ ॥ ईदृशायां सुरेशान वाराणस्यां मदाश्रमे ॥ वसते भगवाँल्लोलः सर्वपापहरो रविः ॥ ४० ॥ दशाश्वमेधं यत्प्रोक्तं मदंशो यत्र केशवः ॥ तत्र गत्वा सुरश्रेष्ठ पापमोक्षमवाप्स्यसि ॥४१॥ इत्येवमुक्तो गरुडध्वजेन वृषध्वजस्तं शिरसा प्रणम्य ॥ जगाम वेगाद्गरुडो यथाऽसौ वाराणसीं पापविमोचनाय ॥४२॥ गत्वा सुपुण्यां नगरीं सुतीर्थां दृष्ट्वा च लोलं स दशाश्वमेधम् ॥ स्नात्वा च तीर्थेषु विमुक्तपापः स केशवं द्रष्टुमुपाजगाम ॥४३॥ केशवं शंकरो दृष्ट्वा प्रणिपत्येदमब्रवीत् ॥ त्वत्प्रसादाद्धृषीकेश ब्रह्महत्या क्षयं गता ॥ ४४ ॥ नेदं कपालं देवेश मद्धस्तं परिमुञ्चति ॥ कारणं वेद्मि नैवैतत्तन्मे त्वं वक्तुमर्हसि ॥ ४५ ॥ पुलस्त्य उवाच ॥ महादेववचः श्रुत्वा केशवो वाक्यमब्रवीत् ॥ विद्यते कारणं वत्स तत्सर्वं कथयामि ते ॥४६॥ योऽसौ ममाग्रतो दिव्यो ह्रदः पद्मोत्पलैर्वृतः ॥ एष तीर्थवरः पुण्यो देवगन्धर्वपूजितः ॥ ४७ ॥ एतस्मिन्प्रवरे पुण्ये स्नानं शोभनमाचर ॥ स्नातमात्रस्य चाद्यैव कपालं परिमोक्ष्यति ॥४८॥ततः कपाली लोके च ख्यातो रुद्र भविष्यसि॥कपालमोचनेत्येवं तीर्थं चेदं भविष्यति॥४९॥पुलस्त्य उवाच॥एवमुक्तः सुरेशेन केशवेन महेश्वरः ॥ कपालमोचने सस्नौ वेदोक्तविधिना मुने ॥५०॥ स्नातस्य तीर्थे त्रिपुरान्तकस्य परिच्युतं हस्ततलात्कपालम् ॥ नाम्ना बभूवाथ कपालमोचनं तत्तीर्थवर्यं भगवत्प्रसादात् ॥५१॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरललितो नाम तृतीयोऽध्यायः ॥३॥



अ०
३

॥ ६ ॥

पुलस्त्य उवाच ॥ एवं कपाली संजातो देवर्षे भगवान्हरः ॥

देवीं द्रष्टुं गौतमनन्दनी ॥ जया जगाम शैलेन्द्रं मन्दरं चारुकन्दरम् ॥ २ ॥ तामागतां सतीं दृष्ट्वा जयामेकामुवाच ह ॥ किमर्थं विजया नागाज्जयन्ती चापराजिता ॥३॥ सा देव्या वचनं श्रुत्वा उवाच परमेश्वरी ॥ गता निमन्त्रिताः सर्वा मखे मातामहस्य ताः ॥ ४ ॥ समं पित्रा गौतमेन मात्रा चैवाप्यहल्यया ॥ अहं समागता द्रष्टुं त्वां तत्र गमनोत्सुका ॥ ५ ॥ किं त्वं न व्रजसे तत्र तथा देवो महेश्वरः ॥ नामन्त्रिताऽसि तातेन उताहोस्विद्व्रजिष्यसि ॥६॥ गतास्तु ऋषयः सर्वे ऋषिपत्न्यस्तथा सुराः ॥ मातृष्वसः शशाङ्कश्च सपत्नीको गतः क्रतुम् ॥७॥ चतुर्दशसु लोकेषु जन्तवो ये चराचराः ॥ निमन्त्रिताः क्रतौ सर्वे किं वा त्वं न निमन्त्रिता ॥८॥ पुलस्त्य उवाच ॥ जयायास्तद्वचः श्रुत्वा वज्रपातोपमं सती ॥ मन्युनाऽभिप्लुता ब्रह्मन्पञ्चत्वमगमत्तदा ॥ ९ ॥ जया मृतां सतीं दृष्ट्वा क्रोधशोकपरिप्लुता ॥ मुञ्चती वारि नेत्राभ्यां सुस्वरं विललाप ह ॥ १० ॥ आक्रन्दितध्वनिं श्रुत्वा शूलपाणिस्त्रिलोचनः ॥ आः किमेतदितीत्युक्त्वा जयाभ्याशमुपागतः ॥ ११ ॥ आगतो ददृशे देवीं लतामिव वनस्पतेः ॥ कृत्तां परशुना भूमौ श्लथाङ्गीं पतितां सतीम् ॥ १२ ॥ देवीं निपतितां दृष्ट्वा जयां पप्रच्छ शङ्करः ॥ किमियं पतिता भूमौ निकृत्तेव लता सती ॥ १३ ॥ सा शंकरवचः श्रुत्वा जया वचनमब्रवीत् ॥ श्रुत्वा मखे च स्वावज्ञां भगिन्यः पतिभिः सह ॥ १४ ॥ आदित्यास्त्रिषु लोकेषु समं शक्रादिभिः सुरैः ॥ मातृष्वसा विपन्नेयमन्तर्दुःखेन दह्यती ॥ १५ ॥ पुलस्त्य उवाच ॥ तच्छ्रुत्वाऽथ वचो रौद्रं रुद्रः क्रोधाप्लुतो बभौ ॥ क्रुद्धस्य सर्वगात्रेभ्यो निश्चेरुः पावकार्चिषः ॥ १६ ॥ ततः क्रोधात्त्रिनेत्रस्य गात्ररोमोद्भवा मुने ॥ गणाः सिंहमुखा जाता वीरभद्र

पुरोगमाः ॥ १७ ॥ गणैः परिवृतस्तस्मान्मन्दराद्धिमसाह्वयम् ॥ ततः कनखलं तस्माद्यत्र दक्षोऽयजत्क्रतुम् ॥ १८ ॥ ततो गणानामधिपो वीरभद्रो महाबलः ॥ दिशि प्रत्युत्तरायां च तस्थौ शूलधरो मुने ॥ १९ ॥ जया क्रोधाद्गदां गृह्य पूर्वदक्षिणतः स्थिता ॥ मध्ये त्रिशूलभृच्छर्वस्तस्थौ क्रुद्धो महाक्रतौ ॥ २० ॥ मृगारिवदनं दृष्ट्वा देवाः शक्रपुरोगमाः ॥ ऋषयो देवगन्धर्वाः किमिदं त्वित्यचिन्तयन् ॥ २१ ॥ ततस्तु धनुरादाय शरानाशीविषोपमान् ॥ द्वारपालस्तदा धर्मो वीरभद्रमुपाद्रवत् ॥ २२ ॥ तमापतन्तं सहसा धर्मं दृष्ट्वा गणेश्वरः ॥ करेणैकेन जग्राह त्रिशूलं वज्रसन्निभम् ॥ २३ ॥ कार्मुकं च द्वितीयेन तृतीयेनाथ मार्गणान् ॥ चतुर्थेन गदां गृह्य धर्ममभ्यद्रवद्गणः ॥ २४ ॥ ततश्चतुर्भुजं दृष्ट्वा धर्मराजो गणेश्वरम् ॥ तस्थावष्टभुजो भूत्वा नानायुधधरोऽव्ययः ॥२५॥ खड्गचर्म्मगदाप्रासपरश्वधवराङ्कुशैः ॥ चापमार्गणभृत्तस्थौ हन्तुकामो गणेश्वरम् ॥ २६ ॥ गणेश्वरोऽपि संक्रुद्धो हन्तुं धर्म्मं सनातनम् ॥ ववर्ष मार्गणांस्तीक्ष्णान्यथा प्रावृषि तोयदः ॥ २७ ॥ तावन्योन्यं महात्मानौ शरचापधरौ मुने ॥ रुधिरारुणसिक्ताङ्गौ किंशुकाविव रेजतुः ॥२८॥ मृधे वरास्त्रैर्गणनायकेन जितः स धर्मस्तरसा प्रसह्य ॥ पराङ्मुखोऽभूद्विमना मुनीन्द्र स वीरभद्रः प्रविवेश यज्ञम् ॥ २९ ॥ यज्ञवाटं प्रविष्टं तु वीरभद्रं गणेश्वरम् ॥ दृष्ट्वा तु सहसा देवा उत्तस्थुः सायुधा मुने ॥ ३० ॥ वसवोऽष्टौ महाभागा ग्रहा नव सुदारुणाः ॥ इन्द्राद्या द्वादशादित्या रुद्रास्त्वेकादशैव हि ॥ ३१ ॥ विश्वे देवाश्च साध्याश्च सिद्धगन्धर्वपन्नगाः ॥ यक्षाः किंपुरुषा [illegible] [illegible]श्चक्रधरास्तथा ॥ ३२ ॥ नृपा वैवस्वताद्वंशाद्विविधा ये च [illegible] ॥ ३३ ॥ [illegible] ते सर्वेऽप्युद्

देवाश्च साध्याश्च सिद्धगन्धर्वपन्नगाः ॥ यक्षाः किंपुरुषा भूताः ... धरास्तथा ॥ ३२ ॥ नृपा वैवस्वताद्वंशादिविधा ये च
विश्रुताः ॥ सोमवंशोद्भवाश्चान्ये भोजकीर्तिमहीभुजः ॥ ३३ ॥ दितिजा दानवाश्चान्ये येऽन्ये तत्र समागताः ॥ ते सर्वेऽप्युद्र
वन्नौद्रं वीरभद्रमुदायुधाः ॥ ३४ ॥ तानापतत एवाशु बाणचापधरो गणः ॥ अभिदुद्राव वेगेन सर्वानेव शरोत्करैः ॥ ३५ ॥ ते
शस्त्रवर्षमतुलं गणेशाय समुत्सृजन् ॥ गणेशोऽपि वरास्त्रैस्तांश्चिच्छेद च बिभेद च ॥ ३६ ॥ शरैः शस्त्रैश्च सततं वध्यमाना
महात्मना ॥ वीरभद्रेण देवाद्यास्त्ववहारमरोचयन् ॥ ३७ ॥ ततो विवेश गणपो यज्ञमध्यं सुविस्तृतम् ॥ जुह्वाना ऋषयो
यत्र हवींषि प्रत्यबन्धत ॥ ३८ ॥ ततो महर्षयो दृष्ट्वा मृगेन्द्रवदनं गणम् ॥ भीता होत्रं परित्यज्य जग्मुः शरणमच्युतम् ॥ ३९ ॥
तानार्तांश्चक्रभृद्दृष्ट्वा महर्षींस्त्रस्तमानसान् ॥ न भेतव्यमितीत्युक्त्वा समुत्तस्थौ वरायुधः ॥ ४० ॥ समानम्य ततः शार्ङ्गं शराना
शीविषोपमान् ॥ मुमोच वीरभद्राय कायावरणदारणान् ॥ ४१ ॥ ते तस्य कायमासाद्य अमोघा वै हरेः शराः ॥ निपेतुर्भुवि
भग्नाशा नास्तिकादिव याचकाः ॥ ४२ ॥ शरांस्त्वमोघान्मोघत्वमापन्नान्वीक्ष्य केशवः ॥ दिव्यैरस्त्रैर्वीरभद्रं प्रच्छादयितुमुद्यतः
॥ ४३ ॥ तानस्त्रान्वासुदेवेन प्रक्षिप्तान्गणनायकः ॥ वारयामास शूलेन गदया मार्गणैस्तथा ॥ ४४ ॥ दृष्ट्वा विपन्नान्यस्त्राणि
गदां चिक्षेप माधवः ॥ त्रिशूलेन समाहत्य पातयामास भूतले ॥ ४५ ॥ तां गदां विफलां दृष्ट्वा लाङ्गलं प्राक्षिपद्धरिः ॥ लाङ्गलं
च गणेशोऽपि गदया प्रत्यवारयत् ॥ ४६ ॥ मुसलं वीरभद्राय संचिक्षेप हलायुधः ॥ पूर्ववन्मुसलाघातं वीरभद्रो न्यवारयत् ॥
॥ ४७ ॥ मुसलं संहतं दृष्ट्वा लाङ्गलं च निवारितम् ॥ वीरभद्राय चिक्षेप चक्रं क्रोधात्खगध्वजः ॥ ४८ ॥ तमापतन्तं शतसूर्यकल्प

वा॰ पु॰

॥ ७ ॥

सुदर्शनं प्रेक्ष्य गणेश्वरस्तु ॥ शूलं परित्यज्य जगार चक्रं तथा मधुं मीनवपुः सुरेन्द्रः ॥ ४९ ॥ चक्रे निगीर्णे गणनायकेन क्रोधातिरक्ताऽसितचारुनेत्रः ॥ मुरारिरभ्येत्य गणाधिपेन्द्रमुत्क्षिप्य वेगाद्भुवि निष्पिपेष ॥ ५० ॥ हरिबाहूरुवेगेन विनिष्पिष्टस्य भूतले ॥ सहितं रुधिरोद्गारैर्मुखाच्चक्रं विनिर्गतम् ॥ ५१ ॥ ततो निःसृतमालोक्य चक्रं कैटभनाशनः ॥ समादाय हृषीकेशो वीरभद्रं मुमोच ह ॥ ॥ ५२ ॥ हृषीकेशेन मुक्तस्तु वीरभद्रो जटाधरम् ॥ गत्वा निवेदयामास वासुदेवात्पराजयम् ॥ ५३ ॥ ततो जटाधरो दृष्ट्वा गणेशं शोणिताप्लुतम् ॥ निश्वसन्तं यथा नागं क्रोधं चक्रे तदाऽव्ययः ॥ ५४ ॥ ततः क्रोधाभिभूतेन वीरभद्रोऽथ शंभुना ॥ पूर्वोद्दिष्टे तदा स्थाने सायुधस्तु निवेशितः ॥ ५५ ॥ वीरभद्रमथादिश्य भद्रकालीं च शंकरः ॥ विवेश क्रोधताम्राक्षो यज्ञवाटं त्रिशूलभृत् ॥ ५६ ॥ ततस्तु देवप्रवरे जटाधरे त्रिशूलपाणौ त्रिपुरान्तकारिणि ॥ दक्षस्य यज्ञं विशति क्षयंकरे जातो मुनीनां प्रवरो हि साध्वसः ॥ ५७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरललितो नाम चतुर्थोऽध्यायः ॥ ४ ॥

वीरभद्रम्

पुलस्त्य उवाच ॥ जटाधरं हरिर्दृष्ट्वा क्रोधादारक्तलोचनम् ॥ तस्मात्स्थानादपाक्रम्य कुब्जाम्रेऽन्तर्हितः स्थितः ॥१॥ वसवोऽष्टौ हरं दृष्ट्वा सस्रुर्वेगतो मुने ॥ सा तु जाता सरिच्छ्रेष्ठा सीता नाम सरस्वती ॥ २ ॥ एकादश तथा रुद्रास्त्रिनेत्रा वृषकेतनाः ॥ कान्दिशीका लयं जग्मुः समभ्येत्याथ शंकरम् ॥ ३ ॥ विश्वेऽश्विनौ च साध्याश्च मरुतोऽनलभास्कराः ॥ समासाद्य पुरोडाशं

अ॰ ५

॥ ७ ॥

प्रक्षयन्तो महामने ॥ ४ ॥ चन्द्रः समं चर्क्षगणैर्निशां

पाद्याश्च ऋषयो जपन्तः शतरुद्रियम् ॥ पुष्पाञ्जलिपुटा भूत्वा प्रणताः संस्थिता मुने ॥ ६ ॥ असकृद्दक्षदयिता दृष्ट्वा रुद्रं बलाधिकम् ॥ शक्रादीनां सुरेशानां कृपणं विललाप ह ॥ ७ ॥ ततः क्रोधाभिभूतेन शंकरेण महात्मना ॥ तलप्रहारैरमरा बहवो विनिपातिताः ॥ ८ ॥ पादप्रहारैरपरे त्रिशूलेनापरे मुने ॥ दृष्ट्वाऽग्निना तथैवान्ये देवाद्याः प्रलयं गताः ॥ ९ ॥ ततः पूषा हरं वीक्ष्य विनिघ्नन्तं सुरासुरान् ॥ क्रोधाद्बाहू प्रसार्याथ प्रदुद्राव महेश्वरम् ॥ १० ॥ तमापतन्तं भगवान्संनिरीक्ष्य त्रिलोचनः ॥ बाहुभ्यां प्रतिजग्राह करेणैकेन शंकरः ॥ ११ ॥ कराभ्यां प्रगृहीतस्य शंभुनांऽशुमतोऽपि हि ॥ कराङ्गुलिभ्यो निश्चेरुरसृग्धाराः समन्ततः ॥ १२ ॥ ततो वेगेन महता अंशुमन्तं दिवाकरम् ॥ भ्रामयामास सततं सिंहो मृगशिशुं यथा ॥१३॥ भ्रामितस्यातिवेगेन नारदांशुमतोऽपि हि॥ भुजौ ह्रस्वत्वमापन्नौ त्रुटितस्नायुबन्धनौ ॥१४॥ रुधिराप्लुतसर्वाङ्गमंशुमन्तं महेश्वरः॥ सन्निरीक्ष्योत्ससर्जैनमन्यतोऽभिजगाम ह ॥१५॥ ततस्तु पूषा विहसन्दशनानि विदर्शयन् ॥ प्रोवाचैह्येहि कापालिन्पुनः पुनरपीश्वरम् ॥ १६ ॥ ततः क्रोधाभिभूतेन पूष्णो वेगेन शंभुना ॥ मुष्टिनाऽऽहत्य दशनाः पातिता धरणीतले ॥ १७ ॥ भग्नदन्तस्तथा पूषा रुधिराभिप्लुताननः ॥ पपात भुवि निःसंज्ञो वज्राहत इवाचलः ॥ १८ ॥ भगोऽपि वीक्ष्य पतितं पूषणं रुधिरोक्षितम् ॥ नेत्राभ्यां घोररूपाभ्यां वृषभध्वजमैक्षत ॥ १९ ॥ त्रिपुरघ्नस्ततः क्रुद्धस्तलेनाहत्य चक्षुषी ॥ निपातयामास भुवि क्षोभयन्सर्वदेवताः ॥२०॥ ततो दिवाकराः सर्वे पुरस्कृत्य शतक्रतुम् ॥ मरुद्भिश्च हुताशैश्च भयाज्जग्मुर्दिशो दश ॥ २१ ॥ प्रतियातेषु देवेषु प्रह्लादाद्या दितीश्वराः ॥ नमस्कृत्य

ततः सर्वे तस्थुः प्राञ्जलयो मुने ॥ २२ ॥ ततस्तं यज्ञवाटं तु शंकरो घोरचक्षुषा ॥ ददर्श दग्धुं कोपेन सर्वांश्चैव सुरासुरान् ॥ २३ ॥
ततो निलिल्यिरे वीराः प्रणेमुर्दुद्रुवुस्तथा ॥ भयादन्ये हरं दृष्ट्वा गता वैवस्वतक्षयम् ॥ २४ ॥ ततोऽग्नयस्त्रिभिर्नेत्रैर्दुःसमं समवैक्षत ॥
दृष्टमात्रास्त्रिनेत्रेण भस्मीभूता भवन्क्षणात् ॥ २५ ॥ अग्नौ प्रणष्टे यज्ञोऽपि भूत्वा दिव्यवपुर्मृगः ॥ दुद्राव विक्लवगतिर्दक्षिणासहितो
ऽम्बरे ॥ २६ ॥ तमेवानुससारेशश्चापमानम्य वेगवान् ॥ शरं पाशुपतं कृत्वा कालरूपी महेश्वरः ॥ २७ ॥ अर्द्धेन यज्ञवाटान्ते
जटाधर इति श्रुतः ॥ अर्द्धेन गगने शर्वः कालरूपी च कथ्यते ॥ २८ ॥ नारद उवाच ॥ कालरूपी त्वयाऽऽख्यातः शंभुर्गगन
गोचरः ॥ लक्षणं च स्वरूपं च सर्वं व्याख्यातुमर्हसि ॥ २९ ॥ पुलस्त्य उवाच ॥ स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ॥
येनाम्बरं मुनिश्रेष्ठ व्याप्तं लोकहितेप्सुना ॥ ३० ॥ यत्राश्विनी च भरणी कृत्तिकायास्तथांऽशकः ॥ मेषो राशिः कुजक्षेत्रं तच्छिरः
कालरूपिणः ॥ ३१ ॥ आग्नेयांशास्त्रयो ब्रह्मन्प्राजापत्यं कवेर्गृहम् ॥ सौम्यार्द्धं वृषनामेदं वदनं परिकीर्तितम् ॥ ३२ ॥ मृगार्धमा
र्द्राऽदित्यांशास्त्रयः सौम्यगृहं त्विदम् ॥ मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ॥ ३३ ॥ आदित्यांशश्च पुष्यं च आश्लेषा शशिनो
गृहम् ॥ राशिः कर्कटको नाम पार्श्वे मखविनाशिनः ॥ ३४ ॥ पित्र्यर्क्षं भगदैवत्यमुत्तरांशश्च केसरी ॥ सूर्यक्षेत्रं विभोर्ब्रह्मन्हृदयं
परिगीयते ॥ ३५ ॥ उत्तरांशास्त्रयः पाणिश्चित्रार्धं कन्यका त्विदम् ॥ सौमपुत्रस्य सद्मैतद्द्वितीयं जठरं विभोः ॥ ३६ ॥ चित्रांशद्वितयं
स्वातिर्विशाखायांशकत्रयम् ॥ द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ॥ ३७ ॥ विशाखांशमनूराधा ज्येष्ठा भौमगृहं त्विदम् ॥

दृष्ट्वा कृपा कस्य न जायते ॥ विशेषतः पतिं बाले ननु त्वमतिनिर्घृणा ॥ ३९ ॥ त्वयोक्तानि वचांस्येवं पूर्वं मम कृशोदरि ॥ त्वया विना न जीवेयं तदसत्यं त्वया कृतम् ॥ ४० ॥ एह्येहि कामसंततं परिष्वज सुलोचने ॥ नान्यथा नश्यते तापः सत्येनापि शपे प्रिये ॥ ४१ ॥ इत्थं विलप्य स्वप्नान्ते प्रतिबुद्धस्तु तत्क्षणात् ॥ उत्कूजति तथाऽरण्ये मुक्तकण्ठं पुनः पुनः ॥ ॥ ४२ ॥ तं कूजमानं विलपन्तमारात्समीक्ष्य कामो वृषकेतनं हि ॥ विव्याध चापं तरसा विनाम्य संतापनाम्ना सुशरेण भूयः ॥ ४३ ॥ संतापनास्त्रेण तदा स विद्धो भूयः स संतप्ततरो बभूव ॥ संतापयंश्चापि जगत्समस्तं फूत्कृत्य फूत्कृत्य विवाशते स्म ॥ ४४ ॥ तं चापि भूयो मदनो जघान विजृम्भणास्त्रेण ततो विजृम्भे ॥ ततो भृशं कामशरैर्वितुन्नो विजृम्भमाणः परितो भ्रमंश्च ॥ ४५ ॥ ददर्श यक्षाधिपतेस्तनूजं पाञ्चालिकं नाम जगत्प्रधानम् ॥ दृष्ट्वा त्रिनेत्रो धनदस्य पुत्रं पार्श्वं समभ्येत्य वचो बभाषे ॥ भ्रातृव्य वक्ष्यामि वचो यदद्य तत्त्वं कुरुष्वामितविक्रमोऽसि ॥ ४६ ॥ पाञ्चालिक उवाच ॥ यन्नाथ मां वक्ष्यसि तत्करिष्ये सुदुष्करं यद्यपि देवसंघैः ॥ आज्ञापयस्वातुलवीर्य शंभो दासोऽस्मि ते भक्तियुतस्तथेश ॥ ४७ ॥ ईश्वर उवाच ॥ नाशं गतायां वरदाम्बिकायां कामाग्निना प्लुष्टसुविग्रहोऽस्मि ॥ विजृम्भणोन्मादशरैर्विभिन्नो धृतिं न विन्दामि रतिं सुखं च ॥ ४८ ॥ विजृम्भणं पुत्र तथैव तापमुन्मादमुग्रं मदनप्रणुन्नम् ॥ नान्यः पुमान्धारयितुं हि शक्तो मुक्त्वा भवन्तं हि ततः प्रतीच्छ ॥ ४९ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्तो वृषभध्वजेन यक्षः प्रतीच्छन्स विजृम्भणादीन् ॥ तोषं जगामाशु ततस्त्रिशूली तुष्टस्तदेवं वचनं

बभाषे ॥ ५० ॥ हर उवाच ॥ यस्मात्त्वया पुत्र सुदुर्धराणि विजृम्भणादीनि प्रतीच्छितानि ॥ तस्माद्वरं त्वां प्रति पूजनाय दास्यामि
लोकस्य च हास्यकारी ॥ ५१ ॥ यस्त्वां यदा पश्यति चैत्रमासे स्पृशेन्नरो वाऽर्चयते च भक्त्या ॥ वृद्धोऽथ बालोऽथ युवाऽथ
योषित्सर्वे तदोन्मादधरा भवन्ति ॥ ५२ ॥ गायन्ति नृत्यन्ति रमन्ति यक्ष वाद्यानि यत्नादपि वादयन्ति ॥ तवाग्रतो हास्यवचो
ऽभिरक्ता भवन्ति ते योगयुतास्तु ते स्युः ॥ ५३ ॥ ममैव नाम्ना भवितासि पूज्यः पाञ्चालिकेशः प्रथितः पृथिव्याम् ॥ मम
प्रसादाद्वरदो नराणां भविष्यसे पूज्यतमोऽभिगच्छ ॥ ५४ ॥ इत्येवमुक्तो विभुना स यक्षो जगाम देशान्सहसैव सर्वान् ॥
कालञ्जरस्योत्तरतः सुपुण्यो देशो हिमाद्रेरपि दक्षिणस्थः ॥ ५५ ॥ तस्मिन्सुपुण्ये विषये निविष्टो रुद्रप्रसादादपि पूज्यतेऽसौ ॥
तस्मिन्प्रयाते भगवांस्त्रिनेत्रो देवोऽपि विन्ध्यं गिरिमभ्यगच्छत् ॥ ५६ ॥ तत्रापि मदनो गत्वा ददर्श वृषकेतनम् ॥ दृष्ट्वा प्रहर्त्तु
कामश्च ततः प्राद्रुद्रुवे हरः ॥ ५७ ॥ ततो दारुवनं घोरं मदनाभिसृतो हरः ॥ विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः ॥ ५८ ॥
ते चापि ऋषयः सर्वे दृष्ट्वा मूर्ध्ना नताभवन् ॥ ततस्तान्प्राह भगवान्भिक्षा मे प्रतिदीयताम् ॥ ५९ ॥ ततस्ते मौनिनस्तस्थुः सर्व
एव महर्षयः ॥ तदाऽऽश्रमाणि पुण्यानि परिचक्राम नारद ॥ ६० ॥ तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः ॥ प्रक्षोभमगमन्सर्वा
हीनसत्त्वाः समन्ततः ॥ ६१ ॥ ऋते त्वरुन्धतीमेकामनसूयां च भामिनीम् ॥ एतयोर्भर्तृपूजासु तच्चिन्तासु स्थितं मनः ॥ ६२ ॥
ततः संक्षोभिताः सर्वा यत्रायाति महेश्वरः ॥ तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥ ६३ ॥ त्यक्त्वाऽऽश्रमाणि शून्यानि

हीनसत्त्वाः समन्ततः ॥ ६१ ॥ ऋत त्वरुन्धतामेकामनसूयां च भामिनीम् ॥ एतयोर्भर्तृपूजासु तच्चिन्तासु स्थित मनः ॥ ६२ ॥
ततः संक्षोभिताः सर्वा यत्रायाति महेश्वरः ॥ तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥ ६३ ॥ त्यक्त्वाऽऽश्रमाणि



स्वानि ता मुनियोषितः ॥ अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् ॥ ६४ ॥ ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने ॥ क्रोधा न्विताब्रुवन्सर्वे लिङ्गमापततां भुवि ॥ ६५ ॥ ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् ॥ अन्तर्द्धानं जगामाथ त्रिशूली नीललो हितः ॥ ६६ ॥ ततस्तत्पतितं लिङ्गं विभेद्य वसुधातलम् ॥ रसातलं विवेशाथ ब्रह्माण्डे चोर्ध्वतोऽभिनत् ॥ ६७ ॥ ततश्चचाल पृथिवी गिरयः सरितो नगाः ॥ पातालभुवनाः सर्वे जङ्गमाजङ्गमाश्रिताः ॥ ६८ ॥ संक्षुब्धान्भुवनान्दृष्ट्वा भूर्लोकादीन्पितामहः ॥ जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥ ६९ ॥ तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः ॥ उवाच देव भुवनाः किमर्थं क्षुभि ता विभो॥७०॥अथोवाच हरिर्ब्रह्मञ्च्छार्वो लिङ्गो महर्षिभिः ॥ पातितस्तस्य भारार्ता संचचाल वसुंधरा॥७१॥ततस्तदद्भुततमं श्रुत्वा देवः पितामहः ॥ तत्र गच्छाम देवेश एवमाह पुनःपुनः ॥ ७२ ॥ ततः पितामहो देवः केशवश्च जगत्पतिः ॥ आजग्मतुस्त मुद्देशं यत्र लिङ्गं भवस्य तत् ॥ ७३ ॥ ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वाऽऽरुह्य खगेश्वरम् ॥ पातालं प्रविवेशाथ विस्मयान्तरितो विभुः ॥ ७४ ॥ ब्रह्मा हंसविमानेन ऊर्ध्वमाक्रम्य सर्वतः ॥ नैवान्तमलभद्ब्रह्मा विस्मितः पुनरागतः ॥ ७५ ॥ विष्णुर्गत्वाऽथ पातालान्सप्तलोकपरायणः ॥ चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने ॥ ७६ ॥ विष्णुः पितामहश्चोभौ हरलिङ्गं समेत्य ह ॥ कृताञ्जलिपुटौ भूत्वा स्तोत्रं देवौ प्रचक्रतुः ॥ ७७ ॥ हरिब्रह्माणावूचतुः ॥ नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज ॥ जीमूतवाहन कवे शर्व त्र्यम्बक शंकर ॥ ७८ ॥ महेश्वर महेशान सुवर्णाक्ष वृषाकपे ॥ दक्षयज्ञक्षयकर कालरूप नमोऽस्तु ते ॥

॥ ७९ ॥ त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वर ॥ भवानन्तश्च भगवान्सर्वगस्त्वं नमोऽस्तु ते ॥ ८० ॥ पुलस्त्य उवाच ॥ एवं संस्तूयमानस्तु तस्मिन्दारुवने हरः ॥ स्वरूपी ताविदं वाक्यमुवाच वदतां वरः ॥ ८१ ॥ हर उवाच ॥ किमर्थं देवतानाथौ परिभूतक्रमं त्विह ॥ मां स्तुवाते भृशास्वस्थं कामतापितविग्रहम् ॥ ८२ ॥ देवावूचतुः ॥ भवतः पातितं लिङ्गं यदेतद्भुवि शंकर ॥ एतत्प्रगृह्यतां भूयः अतो देव वदावहे ॥ ८३ ॥ हर उवाच ॥ यद्यर्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ ॥ तदेतत्प्रतिगृह्णीयां नान्यथेति कथंचन ॥ ८४ ॥ ततः प्रोवाच भगवानेवमस्त्विति केशवः ॥ ब्रह्मा स्वयं च जग्राह लिङ्गं कनकपिङ्गलम् ॥ ८५ ॥ ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्चने ॥ शास्त्राणि चैषां मुख्यानि नानोक्तविदितानि च ॥ ८६ ॥ आद्यं शैवं परिख्यातमन्यत्पाशुपतं मुने ॥ तृतीयं कालदमनं चतुर्थं च कपालिकम् ॥ ८७ ॥ शिवश्चासीत्स्वयं शक्तिर्वसिष्ठस्य प्रियः सुतः ॥ तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः ॥ ८८ ॥ महापाशुपतश्चासीद्भरद्वाजस्तपोधनः ॥ तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ॥ ८९ ॥ कालास्यो भगवानासीदापस्तम्बस्तपोधनः ॥ तस्य शिष्यो बभूवाथ नाम्ना क्राथेश्वरो मुने ॥ ९० ॥ महाव्रती च धनदस्तस्य शिष्यश्च वीर्यवान् ॥ अर्णोदर इति ख्यातो जात्या शूद्रो महातपाः ॥ ९१ ॥ एवं स भगवान्ब्रह्मा पूजनाय शिवस्य तत् ॥ कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः ॥ ९२ ॥ गते ब्रह्मणि शर्वोऽपि उपसंहृत्य तत्तदा ॥ लिङ्गं चित्रवने सूक्ष्मं प्रति

द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ॥ ३८ ॥ मूलं पूर्वोत्तरांशश्च देवाचार्यगृहं धनुः ॥ ऊर्वोर्युगलमीशस्य अपरार्द्धं प्रगीयते ॥ ३९ ॥ उत्तरांशास्त्रयश्चर्क्षं श्रवणं मकरो मुने ॥ धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ॥ ४० ॥ धनिष्ठार्धं शतभिषा प्रोष्ठपादांशकत्रयम् ॥ सौरेः सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ॥ ४१ ॥ प्रोष्ठपादांशमेकं तु उत्तरा रेवती तथा ॥ द्वितीयं जीवसदनं मीनस्तौ चरणावुभौ ॥ ४२ ॥ एवं कृत्वा कालरूपं त्रिनेत्रो यज्ञं क्रोधान्मार्गणैराजघान ॥ विद्धश्चासौ वेदनाबुद्धिमुक्तः खे संतस्थौ तारकाभिश्चिताङ्गः ॥ ४३ ॥ नारद उवाच ॥ राशयः कथिता ब्रह्मंस्त्वया द्वादश वै मम ॥ तेषां विस्तरतो ब्रूहि लक्षणानि स्वरूपतः ॥ ४४ ॥ पुलस्त्य उवाच ॥ स्वरूपं तव वक्ष्यामि राशीनां शृणु नारद ॥ यादृशा यत्र संचारा यस्मिन्स्थाने वसन्ति च ॥ ४५ ॥ संचरस्थानमेवास्य धान्यरत्नाकरादिषु ॥ नवशाड्वलसंछन्नवसुधायां च सर्वशः ॥ ४६ ॥ नित्यं चरति फुल्लेषु सरसां पुलिनेषु च ॥ मेषः समानमूर्त्तिश्च अजाविकधनादिषु ॥ ४७ ॥ वृषः सदृशरूपेषु चरते गोकुलादिषु ॥ तस्याधिवासभूमिस्तु कृषीवलधराश्रयः ॥ ४८ ॥ स्त्रीपुंसयोः समं रूपं शय्यासनपरिग्रहम् ॥ वीणावाद्यधृङ् मिथुनं गीतनर्त्तनशिल्पिषु ॥ ४९ ॥ स्थितं क्रीडा रतिर्नित्यं विहारं ध्वनिकस्य तु ॥ मिथुनं नाम विख्यातं राशिर्द्वेधाऽऽत्मकः शिवः ॥ ५० ॥ कर्किः कुलीरेण समः सलिलस्थः प्रकीर्त्तितः ॥ केदारवापीपुलिनविविक्तावनिरेव च ॥ ५१ ॥ सिंहस्तु पर्वतारण्यदुर्गकन्दरभूमिषु ॥ वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥ ५२ ॥ व्रीहिप्रदीपिककरा भावारूढा च कन्यका ॥ चरते स्त्रीरतिस्थाने वसते

नड्वलेषु च ॥ ५३ ॥ तुलापाणिश्च पुरुषो वीथ्यापणविचारकः ॥ नगराध्वनि शालासु वसते तत्र नारद ॥ ५४ ॥ श्वभ्रवल्मीकसंचारी वृश्चिको वृश्चिकाकृतिः ॥ विषगोमयकीटादिपाषाणादिषु संस्थितः ॥ ५५ ॥ धनुस्तुरङ्गजघनो दीप्यमानो धनुर्धरः ॥ वाजिशूरास्त्रविद्वीरः स्थायी गजरथादिषु ॥ ५६ ॥ मृगास्यो मकरो नाम वृषस्कन्धेक्षणो गजः ॥ मकरोऽसौ नदीचारी वसते च महोदधौ ॥ ५७ ॥ रिक्तकुम्भश्च पुरुषः स्कन्धचारी जलाप्लुतः ॥ द्यूतशालाचरः कुम्भः स्थायी शौण्डिकसद्मसु ॥ ५८ ॥ मीनद्वयमथासक्तं मीनस्तीर्थाब्धिसंचरः ॥ वसते पुण्यदेशेषु देवब्राह्मणसद्मसु ॥ ५९ ॥ लक्षणा गदितास्तुभ्यं मेषादीनां महामुने ॥ न कस्यचित्त्वयाऽऽख्येयं गुह्यमेतत्पुरातनम् ॥ ६० ॥ एतन्मया ते कथितं सुरर्षे यथा त्रिनेत्रः प्रममन्थ यज्ञम् ॥ पुण्यं पुराणं परमं पवित्रमाख्यातवान्पापहरं शिवं च ॥ ६१ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरललितो नाम पञ्चमोऽध्यायः ॥ ५ ॥

पुलस्त्य उवाच ॥ बह्वृचो ब्राह्मणो योऽसौ धर्मो दिव्यवपुः सदा ॥ तस्य भार्या त्वहिंसा च तस्यामजनयत्सुतान् ॥ १ ॥ हरिं कृष्णं च देवर्षे नरनारायणौ तथा ॥ योगाभ्यासरतौ नित्यं हरिकृष्णौ बभूवतुः ॥ २ ॥ नरनारायणौ चैव जगतो हितकाम्यया ॥ तप्येतां च तपः सौम्यौ पुराणऋषिसत्तमौ ॥ ३ ॥ प्रालेयाद्रिं समागम्य तीर्थे बदरिकाश्रमे ॥ गृणन्तौ तत्परं ब्रह्म गङ्गाया विपुले तटे ॥४॥ नरनारायणाभ्यां च जगदेतच्चराचरम् ॥ तापितं तपसा ब्रह्मन्संक्षोभं परमं ययौ ॥ ५ ॥ संक्षुब्धस्तपसा ताभ्यां क्षोभणाय शतक्रतुः ॥ रम्भामप्सरसां श्रेष्ठां प्रैषयत्स महाश्रमम् ॥६॥ कन्दर्पश्च सुदुर्धर्षश्चूताङ्कुरमहायुधः ॥ समं सहचरेणैव वसन्तेनाश्रु संगत...

॥ ७ ॥ ततो माधवकन्दर्पौ सा चैवाप्सरसां वरा ॥ बदर्याश्रममागम्य विचिक्रीडुर्यथेच्छया ॥ ८ ॥ ततो वसन्ते संप्राप्ते किंशुका ज्वलनप्रभाः ॥ निष्पत्राः सततं रेजुः शोभयन्तो धरातलम् ॥ ९ ॥ शिशिरं नाम मातङ्गं विदार्य नखरैरिव ॥ वसन्तकेसरी प्राप्तः पलाशकुसुमैर्मुने ॥१०॥ मया तुषारैश्च करी निर्जितः स्वेन तेजसा ॥ तमेवमहसच्छोभैर्वसन्तः कुन्दकुड्मलैः ॥११॥ वनानि कर्णिकाराणां पुष्पितानि विरेजिरे ॥ यथा नरेन्द्रपत्राणि कनकाभरणानि वै ॥१२॥ तेषामनु तथा नीपाः किङ्करा इव रेजिरे ॥ स्वामिसंलब्धसंमाना भृत्या राजसुता इव ॥ १३ ॥ रक्ताशोकवना भान्ति पुष्पिताः सहसोज्ज्वलाः ॥ भृत्या वसन्तनृपतेः संग्रामासृक्क्षता इव ॥ १४ ॥ भृङ्गवृन्दाः पिञ्जरिता राजन्ते गहने वने ॥ पुलकाभिवृता यद्वत्सज्जनाः सुहृदागमे ॥ १५ ॥ मञ्जरीभिर्विराजन्ते नदीकूलेषु वेतसाः ॥ वक्तुकामा इवाङ्गुल्या कोऽस्माकं सदृशो नगः ॥१६॥ रक्ताशोककरा तन्वी देवर्षे किंशुकाङ्घ्रिका ॥ नीलाशोककरा श्यामा विकासिकमलानना ॥ १७ ॥ नीलेन्दीवरनेत्रा च ब्रह्मन्बिल्वफलस्तनी ॥ प्रोत्फुल्लकुन्ददशना मञ्जरीकरशोभिता ॥१८॥ बन्धुजीवाधरा शुभ्रसिन्दुवारनवाङ्कुरा ॥ पुंस्कोकिलस्वना दिव्या कङ्कोलवसना शुभा ॥१९॥ बर्हिवृन्दकलापा च सारसस्वरनूपुरा ॥ प्राग्वंशरसना ब्रह्मन्मत्तहंसगतिस्तथा ॥ २० ॥ पुत्रजीवांशुकासङ्गरोमराजिविराजिता ॥ वसन्तलक्ष्मीः संप्राप्ता तस्मिन्बदरिकाश्रमे ॥ २१ ॥ ततो नारायणो दृष्ट्वा आश्रमस्यानवद्यताम् ॥ समीक्ष्य स दिशः सर्वास्ततोऽनङ्गमपश्यत ॥ २२ ॥ नारद उवाच ॥ कोऽसावनङ्गो ब्रह्मर्षे तस्मिन्बदरिकाश्रमे ॥ स ददर्श जगन्नाथो देवो नारायणोऽव्ययः ॥ २३ ॥

इतः प्रभृति वसन्तलक्ष्मी वर्णितम्।

वा० पु०
॥ १० ॥

पुलस्त्य उवाच ॥ कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते ॥ स शंकरेण संदग्धो ह्यनङ्गत्वमुपागतः ॥ २४ ॥ नारद उवाच ॥ किमर्थं कामदेवोऽसौ देवदेवेन शंभुना ॥ दग्धश्च कारणे कस्मिन्नेतद्व्याख्यातुमर्हसि ॥ २५ ॥ पुलस्त्य उवाच ॥ यदा दक्षसुता ब्रह्मन्सती याता यमक्षयम् ॥ विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः ॥ २६ ॥ ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः ॥ अपत्नीकं तदाऽस्त्रेण उन्मादेनाभ्यताडयत् ॥ २७ ॥ ततो हरः शरेणाथ उन्मादेनाशु ताडितः ॥ विचचार तदोन्मत्तः काननानि सरांसि च ॥ २८ ॥ स्मरन्सतीं महादेवस्तथोन्मादेन ताडितः ॥ न शर्म लेभे देवर्षे बाणविद्ध इव द्विपः ॥ २९ ॥ ततः पपात देवेशः कालिन्दीसरितं मुने ॥ निमग्ने शंकरे चापो दग्धाः कृष्णत्वमागताः ॥ ३० ॥ तदा प्रभृति कालिन्द्या भृङ्गाञ्जननिभं जलम् ॥ आस्यन्दत्पुण्यतीर्था सा केशपाश इवावनेः ॥ ३१ ॥ ततो नदीषु पुण्यासु सरस्सु च सरित्सु च ॥ पुलिनेषु च रम्येषु वापीषु नलिनीषु च ॥ ३२ ॥ पर्वतेषु च रम्येषु काननेषु च सानुषु ॥ विचरन्स्वेच्छया नैव शर्म लेभे महेश्वरः ॥ ३३ ॥ क्षणं गायति देवर्षे क्षणं रोदिति शंकरः ॥ क्षणं ध्यायति तन्वङ्गीं दक्षकन्यां मनोरमाम् ॥ ३४ ॥ ध्यात्वा क्षणं स्वपिति च क्षणं स्वप्नायते हरः ॥ स्वप्ने तथेदं गदति दृष्ट्वा दक्षस्य कन्यकाम् ॥ ३५ ॥ निर्घृणे तिष्ठ किं मूढे त्यजसे मामनिन्दिते ॥ मुग्धे त्वया विरहितो दग्धोऽस्मि मदनाग्निना ॥ ३६ ॥ सत्यं प्रकुपिता देवि मा कोपं कुरु सुन्दरि ॥ पादप्रणामावनतमभिभाषितुमर्हसि ॥ ३७ ॥ श्रूयसे दृश्यसे नित्यं स्पृश्यसे वन्द्यसे प्रिये ॥ आलिङ्ग्यसे च सततं किमर्थं नाभिभाषसे ॥ ३८ ॥

अ० ६
॥ १० ॥

॥ ५७ ॥ श्रयसे दृश्यसे नित्यं स्पृश्यसे वन्द्यसे प्रिये ॥ आलिङ्ग्यसे च सततं किमर्थं नाभिभाषसे ॥ ५८ ॥

ष्ठाप्य चचार ह ॥ ९३ ॥ विचरन्तं तदा भूयो महेशं कुसुमायुधः ॥ आरात्स्थित्वाऽग्रतो धन्वी संतापयितुमुद्यतः ॥ ९४ ॥ ततस्तमग्रतो दृष्ट्वा क्रोधाध्मातदृशा हरः ॥ स्मरमालोकयामास शिखाग्राचरणान्तिकम् ॥ ९५ ॥ आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ॥ प्रादह्यत तदा ब्रह्मन्पादादारभ्य कक्षवत् ॥ ९६ ॥ प्रदह्यमानौ चरणौ दृष्ट्वाऽसौ कुसुमायुधः ॥ उत्ससर्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥ ९७ ॥ यदासीन्मुष्टिबन्धे तद्रुक्मपृष्ठं महाप्रभम् ॥ स चम्पकतरुर्जातः सुगन्धाढ्यो महाद्युतिः ॥ ९८ ॥ नाभिस्थानं शुभाकारं यदासीद्वज्रभूषितम् ॥ तज्जातं केसरारण्यं बकुलं नामतो मुने ॥ ९९ ॥ या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ॥ जाता सा पाटला रम्या भृङ्गराजिविभूषिता ॥ १०० ॥ नाहोपरि तथा मुष्टौ स्थानं चन्द्रमणिप्रभम् ॥ पञ्चगुल्माऽभवज्जाती शशाङ्ककिरणोज्ज्वला ॥१०१॥ ऊर्ध्वं मुष्ट्या अधः कोट्योः स्थानं विद्रुमभूषितम् ॥ तस्माद्बहुपुटा मल्ली संजाता विविधा मुने ॥ १०२ ॥ पुष्पोपगानि रम्याणि सुरभीणि च नारद ॥ जातियुक्तानि देवेन स्वयमाचरितानि च ॥ १०३ ॥ मुमोमार्गणान्रम्याञ्छरीरे दह्यति स्मरः ॥ फलोपगानि वृक्षाणि संभूतानि सहस्रशः ॥ १०४ ॥ चूतादीनि सुगन्धीनि स्वादूनि विविधानि च ॥ हरप्रसादाज्जातानि भोज्यान्यपि सुरोत्तमैः ॥ १०५ ॥ एवं दग्ध्वा स्मरं रुद्रः संयम्य स्वतनुं विभुः ॥ पुण्यार्थी शिशिराद्रिं स जगाम तपसेऽव्ययः ॥ १०६ ॥ एवं पुरा देववरेण शंभुना कामस्तु दग्धः सशरः सचापः ॥ ततस्त्वनङ्गेति महाधनुर्द्धरो देवैः स्तुतो देववरैस्तु पूजितः ॥ १०७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे कामदाहो नाम षष्ठोऽध्यायः ॥ ६ ॥

पुलस्त्य उवाच ॥ ततोऽनङ्गं विभुर्दृष्ट्वा ब्रह्मन्नारायणो मुनिः ॥ विहस्यैवं वचः प्राह कन्दर्प इह आस्यताम् ॥ १ ॥ तदक्षुब्धत्वमी
क्ष्यास्य कामो विस्मयमागतः ॥ वसन्तोऽपि महाचिन्तां जगामाशु महामुने ॥२॥ ततश्चाप्सरसो दृष्ट्वा स्वागतेनाभिपूज्य च ॥
वसन्तमाह भगवानेह्येहि स्थीयतामितः ॥३॥ ततो विहस्य भगवान्मञ्जरीं कुसुमावृताम् ॥ आदाय प्राक्सुवर्णाङ्गीमूर्वोर्बालां विनिर्म्ममे
॥ ४ ॥ ऊरूद्भवां स कन्दर्पो दृष्ट्वा सर्वाङ्गसुन्दरीम् ॥ अमन्यत तदाऽनङ्गः किमियं सा प्रिया रतिः ॥५॥ तदेव वचनं चारु स्वक्षिभ्रूकु
टिलालकम् ॥ सुनासावंशाधरोष्ठमालोकनपरायणम् ॥ ६ ॥ तावेव चाप्यविरलौ पीवरौ मग्नचूचुकौ ॥ राजेतेऽस्याः कुचौ पीनौ
सज्जनाविव संहतौ ॥७॥ तदेव तनु चार्वङ्ग्या वलित्रयविभूषितम् ॥ उदरं राजते श्लक्ष्णं रोमावलिविभूषितम् ॥८॥ रोमावली च जघ
नाद्याति स्तनतटद्वयम् ॥ राजते भृङ्गमालेव पुलिनात्कमलाकरम् ॥ ९ ॥ जघनं त्वतिविस्तीर्णं भात्यस्या रसनावृतम् ॥ क्षीरोदमथने
नद्धं भुजंगेनेव मन्दरम् ॥ १० ॥ कदलीस्तम्भसदृशैरूर्ध्वमूलैरथोरुभिः ॥ विभाति सा सुचार्वङ्गी पद्मकिञ्जल्कसन्निभा ॥ ११ ॥ जानुनी
गूढगुल्फे च शुभे जङ्घे त्वरोमशे ॥ विभात्यस्यास्तथा पादावलक्तकसमत्विषौ ॥ १२ ॥ इति संचिन्तयन्कामस्तामनिन्दितलो
चनाम् ॥ कामातुरोऽसौ संजातः किमुतान्यो जनो मुने ॥ १३ ॥ माधवोऽप्युर्वशीं दृष्ट्वा संचिन्तयति नारद ॥ किंस्वित्कामनरे
न्द्रस्य राजधानी स्वयं स्थिता ॥ १४ ॥ अज्ञाता शशिनो नूनमियं कान्तिर्निशाक्षये ॥ रविरश्मिप्रतापार्तिभीता शरणमागता
॥ १५ ॥ इत्थं संचिन्तयन्नेव अवष्टभ्याप्सरोगणम् ॥ तस्थौ मुनिरिव ध्यानमास्थितः स तु माधवः ॥१६॥ ततः स विस्मितान्सर्वा

॥ १५ ॥ इत्थं संचिन्तयन्नेव अवष्टभ्याप्सरोगणम् ॥ तस्थौ मुनिरिव ध्यानमास्थितः स तु माधवः ॥१६॥ ततः स विस्मितान्सर्वा
न्कन्दर्पादीन्महामुने ॥ दृष्ट्वा प्रोवाच वचनं स्मितं कृत्वा शुभव्रतः॥ १७॥ इयं ममोरुसंभूता कामाप्सरसमाधवी ॥ नीयतां सुरलो
काय दीयतां वासवाय च ॥ १८ ॥ इत्युक्ताः कम्पमानास्ते जग्मुर्गृह्योर्वशीं दिवम् ॥ सहस्राक्षाय ते प्रोचू रूपयौवनशालिनीम्
॥ १९ ॥ आचख्युश्चरितं ताभ्यां धर्मज्ञाभ्यां महामुने ॥ देवराजाय कामाद्यास्ततोऽभूद्विस्मयः परम् ॥२०॥ एतादृशं हि चरितं
ख्यातिमग्र्यां जगाम ह ॥ पातालेषु तथा मर्त्ये दिक्ष्वष्टासु जगाम च ॥२१॥ एकदा निहते रौद्रे हिरण्यकशिपौ मुने ॥ अभिषिक्त
स्तदा राज्ये प्रह्लादो नाम दानवः ॥ २२ ॥ तस्मिञ्छासति दैत्येन्द्रे देवब्राह्मणपूजके ॥ मखान्भूम्यां नृपतयो यजन्ते विधिवत्तदा
॥ २३ ॥ ब्राह्मणाश्च तपो धर्मं तीर्थयात्रां च कुर्वते ॥ वैश्याश्च पशुवृत्तिस्थाः शूद्राः शुश्रूषणे रताः ॥२४॥ चातुर्वर्ण्यं ततस्तस्था
वाश्रमे धर्मकर्माणि ॥ अवर्त्तन्त ततो देवा वृत्त्या युक्ताभवन्मुने ॥ २५॥ ततस्तु च्यवनो नाम भार्गवेन्द्रो महातपाः॥ जगाम नर्मदां
स्नातुं तीर्थं वै नाकुलेश्वरम् ॥२६॥ तत्र दृष्ट्वा महादेवं नदीं स्नातुमवातरत् ॥ अवतीर्णं प्रजग्राह नागः केकरलोहितः ॥२७॥ गृहीत
स्तेन नागेन सस्मार मनसा हरिम् ॥ संस्मृते पुण्डरीकाक्षे निर्विषोऽभून्महोरगः ॥ २८ ॥ नीतस्तेनातिरौद्रेण पन्नगेन रसातलम् ॥
निर्विषश्चापि तत्याज च्यवनं भुजगोत्तमः ॥ २९ ॥ संत्यक्तमात्रो नागेन च्यवनो भार्गवोत्तमः ॥ चचार नागकन्याभिः पूज्यमानः
समन्ततः ॥३०॥ विचरन्प्रविवेशाथ दानवानां महत्पुरम् ॥ संपूज्यमानो दैत्येन्द्रैः प्रह्लादोऽथ ददर्श तम् ॥३१॥ भृगुपुत्रो महातेजाः

पूजां चक्रे यथार्हतः ॥ संपूजितोपविष्टश्च पृष्टश्चानामयं प्रति ॥३२॥ स चोवाच महातेजा महातीर्थं महाफलम् ॥ स्नातुमेवागतोऽस्म्यद्य

द्रष्टुं वै नाकुलेश्वरम् ॥३३॥ नद्यामेवावतीर्णोऽस्मि गृहीतश्चाहिना बलात् ॥ समानीतोऽस्मि पाताले दृष्टश्चात्र भवानपि ॥ ३४ ॥ एतच्छ्रुत्वा च वचनं च्यवनस्य दितीश्वरः ॥ प्रोवाच धर्मसंयुक्तं स वाक्यं वाक्यकोविदः ॥ ३५ ॥ प्रह्लाद उवाच ॥ भगवन्कानि तीर्थानि पृथिव्यां कानि चाम्बरे ॥ रसातले च कानि स्युरेतद्वक्तुं त्वमर्हसि ॥ ३६ ॥ च्यवन उवाच ॥ पृथिव्यां नैमिषं तीर्थमन्तरिक्षे च पुष्करम् ॥ चक्रतीर्थं महाबाहो रसातलस्मृतं विदुः ॥ ३७ ॥ पुलस्त्य उवाच ॥ श्रुत्वा तद्भार्गववचो दैत्यराजो महामुने ॥ नैमिषं गन्तुकामोऽभूद्दानवानिदमब्रवीत् ॥३८॥ प्रह्लाद उवाच ॥ उत्तिष्ठध्वं गमिष्यामः स्नातुं तीर्थं हि नैमिषम् ॥ द्रक्ष्यामः पुण्डरीकाक्षं पीतवाससमच्युतम्॥३९॥पुलस्त्य उवाच ॥ इत्युक्ता दानवेन्द्रेण सर्वे ते दैत्यदानवाः ॥ चक्रुरुद्योगमतुलं निर्जग्मुश्च रसातलात् ॥४०॥ ते समभ्येत्य दैतेया दानवाश्च महाबलाः ॥ नैमिषारण्यमागम्य स्नानं चक्रुर्मुदान्विताः ॥४१॥ ततो दितीश्वरः श्रीमान्मृगयां स चचार ह ॥ चरन्सरस्वतीं पुण्यां ददर्श विमलोदकाम् ॥ ४२ ॥ तस्यादूरे महाशाखं सालवृक्षं शरैश्चितम् ॥ ददर्श बाणानपरान्मुखे लग्नान्परस्परम् ॥ ४३ ॥ ततस्तानद्भुताकारान्बाणान्नागोपवीतकान् ॥ दृष्ट्वाऽतुलं तदा चक्रे क्रोधं दैत्येश्वरः किल ॥ ४४ ॥ स ददर्श ततोऽदूरात्कृष्णाजिनधरौ मुनी ॥ समुन्नतजटाभारौ तपस्यासक्तमानसौ ॥ ४५ ॥ तयोश्च पार्श्वयोर्दिव्ये धनुषी लक्षणान्विते ॥ शार्ङ्गमाजगवं चैव अक्षय्यौ च महेषुधी ॥ ४६ ॥ तौ दृष्ट्वाऽमन्यत तदा दाम्भिकाविति दानवः ॥ ततः प्रोवाच वचनं तावुभौ पुरुषोत्तमौ ॥ ४७ ॥ किं भवद्भ्यां समारब्धो दम्भो धर्मविनाशनः ॥ क्व तपः क्व जटाभारः क्व चेमौ प्रवरायुधौ ॥ ४८ ॥

तावुभौ पुरुषोत्तमौ ॥ ४७ ॥ किं भवद्भ्यां समारब्धो दम्भो धर्मविनाशनः ॥ क्व तपः क्व जटाभारः क्व चेमौ प्रवरायधौ ॥ ४८ ॥

अथोवाच नरो दैत्यं का ते चिन्ता दितीश्वर ॥ सामर्थ्ये सति यत्कुर्यात्तत्संपद्येत तस्य हि ॥ ४९ ॥ अथोवाच दितीशस्तौ का शक्ति र्युवयोरिह ॥ मयि तिष्ठति दैत्येन्द्रे धर्मसेतुप्रवर्त्तके ॥ ५० ॥ नरस्तं प्रत्युवाचाथ आवाभ्यां शक्तिरूर्जिता ॥ न कश्चिच्छक्नुया ज्जेतुं नरनारायणौ युधि ॥ ५१ ॥ दैत्येश्वरस्ततः क्रुद्धः प्रतिज्ञामारुरोह च ॥ यथाकथंचिज्जेष्यामि नरनारायणौ रणे ॥ ५२ ॥ इत्येवमुक्त्वा वचनं महात्मा दितीश्वरः स्थाप्य बलं वनान्ते ॥ वितत्य चापं गुणमाविकृष्य तलध्वनिं घोरतरं चकार ॥ ५३ ॥ ततो नरस्त्वाजगवं हि चापमानम्य बाणान्सुबहून्सिताग्रान् ॥ मुमोच तानप्रतिमैः पृषत्कैश्चिच्छेद दैत्यस्तपनीयपुङ्खैः ॥ ५४ ॥ छिन्नान्समीक्ष्याथ नरः पृषत्कान्दैत्येश्वरेणाप्रतिमेन संख्ये ॥ क्रुद्धः समानम्य महाधनुस्ततो मुमोच चान्यान्विविधान्पृषत्कान् ॥ ५५ ॥एकं नरो द्वौ दितिजेश्वरश्च त्रीन्धर्मसूनुश्चतुरो दितीशः ॥ नरस्तु बाणान्प्रमुमोच पञ्च षड् दैत्यनाथो निशितान्पृषत्कान् ॥ ५६ ॥ स चर्षिमुख्यो द्विचतुश्च दैत्ये नरस्तु षट् त्रीणि च दैत्यमुख्यः ॥ षट् सप्त चाष्टौ नव षण्नरेण द्विसप्ततिं दैत्यपतिः ससर्ज्ज ॥ ५७ ॥ शतं नरस्त्रीणि शतानि दैत्यः षड् धर्मपुत्रो दश दैत्यराजः ॥ ततोऽप्यसंख्येयतरान्हि बाणान्मुमोचतुस्तौ सुभृशं हि कोपात् ॥ ५८ ॥ ततो नरो बाणगणैरसंख्यैरवास्तरद्भूमिमथो दिशः खम् ॥ स चापि दैत्यप्रवरः पृषत्कैश्चिच्छेद वेगा त्तपनीयपुङ्खैः ॥ ५९ ॥ ततः पतत्रिभिर्वीरौ सुभृशं नरदानवौ ॥ तदा नरास्त्रैर्युध्येतां घोररूपैः परस्परम् ॥ ६० ॥ ततस्तु दैत्येन

वरास्त्रपाणिना चापे नियुक्तं तु पितामहास्त्रम् ॥ नरस्तु चापे परमायुधे पुनर्युयोज नारायणमस्त्रमुग्रम् ॥ ६१ ॥ दैत्याधिपेनाथ पुनर्महास्त्रमाग्नेयमाजौ युगपत्प्रयुक्तम् ॥ महेश्वरास्त्रं पुरुषोत्तमेन समं समाहत्य निपेततुस्तौ ॥ ६२ ॥ ब्रह्मास्त्रे तु प्रशमिते प्रह्लादः क्रोधमूर्छितः ॥ गदां प्रगृह्य तरसा प्रचस्कन्द रथोत्तमात् ॥ ६३ ॥ गदापाणिं समायान्तं दैत्यं नारायणस्तदा ॥ दृष्ट्वा तत्पृष्ठतश्चक्रे नरं योद्धुमनाः स्वयम् ॥ ६४ ॥ ततो दितीशः सगदः समाद्रवत्सशार्ङ्गबाणं तपसां निधानम् ॥ ख्यातं पुराणर्षिमुदारविक्रमं नारायणं नारद लोकपालम् ॥ ६५ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे प्रह्लादयुद्धं नाम सप्तमोऽध्यायः ॥ ७ ॥ पुलस्त्य उवाच ॥ शार्ङ्गपाणिनमायान्तं दृष्ट्वाऽग्रे दानवेश्वरः ॥ परिभ्राम्य गदां वेगान्मूर्ध्नि साध्यमताडयत् ॥ १ ॥ ताडितस्याथ गदया धर्मपुत्रस्य नारद ॥ नेत्राभ्यामपतद्वारि वह्निवर्षनिभं भुवि ॥ २ ॥ मूर्ध्नि नारायणस्यापि सा गदा दानवार्पिता ॥ जगाम शतधा ब्रह्मञ्छैलशृङ्गे यथाऽशनिः ॥ ३ ॥ ततो निवृत्य दैत्येन्द्रः समास्थाय रथं द्रुतम् ॥ आदाय कार्मुकं वीरस्तूणाद्बाणं समाददे ॥ ४ ॥ आनम्य चापं वेगेन गार्ध्रपत्राञ्छिलीमुखान् ॥ मुमोच साध्याय तदा क्रोधान्धीकृतमानसः ॥ ५ ॥ तानापततएवाशु बाणांश्चन्द्रार्द्धसन्निभान् ॥ चिच्छेद बाणैरपरैर्निर्बिभेद च दानवम् ॥ ६ ॥ ततो नारायणं दैत्यो दैत्यं नारायणः शरैः ॥ आविध्येतां तदाऽन्योऽन्यं मर्मभिद्भिरजिह्मगैः ॥ ७ ॥ ततोऽम्बरे संनिपातो देवानामभवन्मुने ॥ दिदृक्षूणां तदा युद्धं लघु चित्रं च सुष्ठु च ॥ ८ ॥ ततः सुराणां दुन्दुभ्यः ... महास्वनाः ॥ ... दैत्ययोः ॥ ९ ॥ ततः पश्यत्सु





दैत्येषु गगनस्थेषु तावुभौ ॥ अयुध्येतां महेष्वासौ प्रेक्षकप्रीतिवर्द्धनम् ॥ १० ॥ बबन्धतुस्तदाऽऽकाशं तावुभौ शरवृष्टिभिः ॥

दैत्येषु गगनस्थेषु तावुभौ ॥ अयुध्येतां महेष्वासौ प्रेक्षकप्रीतिवर्द्धनम् ॥ १० ॥ बबन्धतुस्तदाऽऽकाशं तावुभौ शरवृष्टिभिः ॥ दिशश्च विदिशश्चैव छादयेतां शरोत्करैः ॥ ११ ॥ ततो नारायणश्चापं समाकृष्य महामुने ॥ बिभेद मार्गणैस्तीक्ष्णैः प्रह्लादं सर्वमर्मसु ॥ १२ ॥ तदा दैत्येश्वरः क्रुद्धश्चापमानम्य वेगवान् ॥ बिभेद हृदये बाह्वोर्वदने च नरोत्तमम् ॥ १३ ॥ततोऽस्यतो दैत्यपतेः कार्मुकं मुष्टिबन्धनात् ॥ चिच्छेदैकेन बाणेन चन्द्रार्धाकारवर्चसा ॥ १४ ॥ अपश्यत धनुश्छिन्नं चापमादाय चापरम् ॥ अधिज्यं लाघवात्कृत्वा ववर्ष निशिताञ्छरान् ॥ १५ ॥ तानप्यस्य शरान्साध्यश्छित्त्वा बाणैरवाकिरत् ॥ कार्मुकं च क्षुरप्रेण चिच्छेद पुरुषोत्तमः ॥ १६ ॥ छिन्नं छिन्नं धनुर्दैत्यस्त्वन्यदन्यत्समाददे ॥ समादत्तं तदा साध्यो मुने चिच्छेद लाघवात् ॥ १७ ॥ संछिन्नेष्वथ चापेषु जग्राह दितिजेश्वरः ॥ परिघं दारुणं दीर्घं सर्वलोहमयं दृढम् ॥१८॥ परिगृह्याथ परिघं भ्रामयामास दानवः ॥ भ्राम्यमाणं स चिच्छेद नाराचेन महामुने ॥ १९॥ छिन्ने तु परिघे श्रीमान्प्रह्लादो दानवेश्वरः ॥ मुद्गरं भ्राम्य वेगेन प्रचिक्षेप नरोत्तमे ॥ २०॥ तमापतन्तं बलवान्मार्गणैर्दशभिर्मुने ॥ चिच्छेद दशधा साध्यः स च्छिन्नो न्यपतद्भुवि ॥२१॥ मुद्गरे वितथे जाते पाशमादाय वेगवान् ॥प्रचिक्षेप नराग्र्याय तं च चिच्छेद धर्मजः ॥२२॥ पाशे छिन्ने ततो दैत्यः शक्तिमादाय चिक्षिपे॥तां च चिच्छेद बलवान्क्षुरप्रेण महातपाः ॥ २३ ॥ छिन्नेषु तेषु शस्त्रेषु दानवोऽन्यन्महद्धनुः ॥ समादाय ततो बाणैरवतस्तार नारद ॥२४ ॥ ततो नारायणो देवो दैत्यनाथं जगद्गुरुः ॥ नाराचेनाजघानाथ हृदयेऽसुरतापनः ॥ २५ ॥ स भिन्नहृदयो ब्रह्मन्देवेनाद्भुतकर्मणा ॥ निपपात रथो

पस्थे तमपोवाह सारथिः ॥ २६ ॥ स संज्ञां त्वचिरेणैव प्रतिलभ्य दितीश्वरः ॥ सुदृढं चापमादाय भूयो योद्धुमुपागतः ॥२७॥ तमागतं सं निरीक्ष्य प्रत्युवाच नराग्रजः ॥ गच्छ दैत्येन्द्र योत्स्यामः प्रातस्त्वाह्निकमाचर ॥ २८ ॥ एवमुक्तो दितीशस्तु साध्येनाद्भुतकर्मणा ॥ जगाम नैमिषारण्यं क्रियां चक्रे तदाऽऽह्निकीम् ॥२९॥एवं युध्यति देवे च प्रह्लादोऽथास्मरन्मुने ॥ रात्रौ चिन्तयते युद्धे कथं जेष्यामि दाम्भिकम् ॥ ३० ॥ एवं नारायणेनासौ सहायुध्यत नारद ॥ दिव्यं वर्षसहस्रं तु दैत्यो देवं न चाजयत् ॥ ३१ ॥ ततो वर्षसहस्रान्ते ह्यजिते पुरुषोत्तमे ॥ पीतवाससमभ्येत्य दानवो वाक्यमब्रवीत् ॥ ३२ ॥ किमर्थं देवदेवेश साध्यं नारायणं हरिम् ॥ विजेतुं नाद्य शक्नोमि एतन्मे कारणं वद ॥ ३३ ॥ पीतवासा उवाच ॥ दुर्जयोऽसौ महाबाहुस्त्वया प्रह्लाद धर्मज्ञः ॥ साध्यो विप्रवरो धीमान्मृधे देवासुरैरपि ॥ ३४ ॥ प्रह्लाद उवाच ॥यद्यसौ दुर्जयो देव मया साध्यो रणाजिरे ॥ तत्कथं यत्प्रतिज्ञातं तदसत्यं भविष्यति ॥ ३५ ॥ हीनप्रतिज्ञो देवेश कथं जीवेत मादृशः ॥ तस्मात्तवाग्रतो विष्णो करिष्ये कायशोषणम् ॥ ३६ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्त्वा वचनं देवाग्रे दानवेश्वरः ॥ शिरःस्नातस्तदा तस्थौ गृणन्ब्रह्म सनातनम् ॥ ३७ ॥ ततो दैत्यपतिं विष्णुः पीतवासाऽब्रवीद्वचः ॥ गच्छ जेष्यसि भक्त्या तं न युद्धेन कदाचन ॥ ३८॥ प्रह्लाद उवाच ॥ असौ यद्यजयो देव त्रैलोक्येष्वपि सुव्रत ॥ न स्थातुं त्वत्प्रसादेन शक्यं किमुत रोषतः ॥ ३९ ॥ मया जितं देवदेव त्रैलोक्यमपि सुव्रत ॥ जितोऽयं त्वत्प्रसादेन शक्रः किमुत धर्मजः ॥ ४० ॥ पीतवासा उवाच ॥ सोऽहं दानवशार्दूल लोकानामनुकम्पया ॥ धर्मप्रवर्त

जितोऽयं त्वत्प्रसादेन शक्रः किमुत धर्मजः ॥ ४० ॥ पीतवासा उवाच ॥ सोऽहं दानवशार्दूल लोकानामनुकम्पया ॥ धर्मप्रवर्त्त-

नार्थाय तपश्चर्यां समास्थितः ॥ ४१ ॥ तस्माद्यदीच्छसि जयं तमाराधय दानव ॥ तं पराजेष्यसे भक्त्या तस्माच्छुश्रूष धर्मजम् ॥ ४२ ॥ पुलस्त्य उवाच ॥ इत्युक्तः पीतवस्त्रेण दानवेन्द्रो महात्मना ॥ अब्रवीद्वचनं हृष्टः समाहूयाऽन्धकं मुने ॥ ४३ ॥ प्रह्लाद उवाच ॥ दैत्याश्च दानवाश्चैव परिपाल्यास्त्वयान्धक ॥ मयोत्सृष्टमिदं राज्यं प्रतीच्छ त्वं महीभुज ॥ ४४ ॥ इत्येवमुक्तो जग्राह राज्यं हैरण्यलोचनः ॥ प्रह्लादोऽपि तदाऽगच्छत्पुण्यं बदरिकाश्रमम् ॥४५॥ दृष्ट्वा नारायणं देवं नरं च दितिजेश्वरः ॥ कृताञ्जलिपुटो भूत्वा ववन्दे चरणौ तयोः ॥ ४६ ॥ तमुवाच महातेजा वाक्यं नारायणोऽव्ययः ॥ किमर्थं प्रणतोऽसीह मामजित्वा महासुर ॥ ४७ ॥ प्रह्लाद उवाच ॥ कस्त्वां जेतुं प्रभो शक्तः कस्त्वत्तः पुरुषोऽधिकः ॥ त्वं हि नारायणोऽनन्तः पीतवासा जनार्दनः ॥४८॥ त्वं देवः पुण्डरीकाक्षस्त्वं विष्णुः शार्ङ्गचापधृक् ॥ त्वमव्ययो महेशान शाश्वतः पुरुषोत्तम ॥ ४९ ॥ त्वां योगिनश्चिन्तयन्ति चार्चयन्ति मनीषिणः ॥ जपन्ति स्नातकास्त्वां च यजन्ति त्वां च याज्ञिकाः ॥ ५० ॥ त्वमच्युतो हृषीकेशश्चक्रपाणिर्धराधरः ॥ महामीनो हयशिरास्त्वमेव वरकच्छपः ॥ ५१ ॥ हिरण्याक्षरिपुः श्रीमान्भगवान्कार्यसूकरः ॥ मत्पितुर्नाशमकरोर्भगवानपि केसरी ॥ ५२ ॥ ब्रह्मा त्रिनेत्रोऽमरराड्ढुताशः प्रेताधिपो नीरपतिः समीरः ॥ सूर्यो मृगाङ्कोऽचलजङ्गमाद्यो भवान्विभो नाथ खगेन्द्रकेतो ॥ ५३ ॥ त्वं पृथ्वी ज्योतिराकाशं जलं भूत्वा सहस्रशः ॥ त्वया व्याप्तं जगत्सर्वं कस्त्वां जेष्यति माधव ॥५४॥ भक्त्या यदि हृषीकेश तोषमेषि जगद्गुरो ॥ नान्यथा त्वं प्रशक्तोऽसि जेतुं सर्वगतोऽव्ययः ॥ ५५ ॥ भगवानुवाच ॥ परितुष्टो

ऽस्मि ते दैत्य स्तवेनानेन सुव्रत ॥ भक्त्या त्वनन्यया चाहं त्वया दैत्य पराजितः ॥५६॥ पराजितश्च पुरुषो दैत्य दण्डं प्रयच्छति॥ दण्डार्थं ते प्रदास्यामि वरं वृणु यमिच्छसि ॥ ५७ ॥ प्रह्लाद उवाच ॥ नारायण वरं याचे यत्त्वं मे दातुमर्हसि ॥ तन्मे पापं लयं यातु शारीरं मानसं तथा ॥ ५८ ॥ वाचिकं च जगन्नाथ यत्त्वया सह युध्यतः ॥ नरेण यद्वाऽप्यभवद्वरमेनं प्रयच्छ मे ॥ ॥ ५९ ॥ नारायण उवाच ॥ एवं भवतु दैत्येन्द्र पापं ते यातु संक्षयम् ॥ द्वितीयं प्रार्थय वरं तं ददामि तवासुर ॥६०॥ प्रह्लाद उवाच ॥ या या जायेत मे बुद्धिः सा सा विष्णो त्वदाश्रिता ॥ देवार्चने च निरता त्वच्चित्ता त्वत्परायणा ॥ ६१ ॥ नारायण उवाच ॥ एवं भविष्यत्यसुर वरमन्यं यमिच्छसि ॥ तं वृणीष्व महाबाहो प्रदास्याम्यविचारयन् ॥ ६२ ॥ प्रह्लाद उवाच ॥ सर्वमेव मया लब्धं त्वत्प्रसादादधोक्षज ॥ त्वत्पादपङ्कजाभ्यां हि रतिरस्तु सदा मम ॥६३॥ नारायण उवाच ॥ एवमस्त्वपरं चास्तु नित्यमेवाक्षयोऽव्ययः ॥ अजरश्चामरश्चापि मत्प्रसादाद्भविष्यसि ॥ ६४ ॥ गच्छ त्वं दैत्यशार्दूल स्वमावासं क्रियारतः ॥ न कर्मबन्धो भवतो मच्चित्तस्य भविष्यति ॥ ६५ ॥ प्रशासयन्नमून्दैत्यान्राज्यं पालय शाश्वतम् ॥ स्वजातिसदृशं दैत्य कुरु धर्ममनुत्तमम् ॥ ६६ ॥ पुलस्त्य उवाच ॥ इत्युक्तो लोकनाथेन प्रह्लादो देवमब्रवीत् ॥ कथं राज्यं समादास्ये परित्यक्तं जगद्गुरो ॥ ६७ ॥ तमुवाच जगत्स्वामी गच्छ त्वं निजमाश्रमम् ॥ हितोपदेष्टा दैत्यानां दानवानां तथा भव ॥६८॥ नारायणेनैवमुक्तः स तदा दैत्यनायकः ॥ प्रणिपत्य विभुं तुष्टो जगाम नगरं निजम् ॥ ६९ ॥ दृष्टः सभाजितश्चापि दानवैरन्धकेन च ॥ निमन्त्रितश्च राज्याय

... निजमाश्रमम् ॥ हितोपदेष्टा दैत्यानां दानवानां तथा भव ॥६८॥ नारायणेनैवमुक्तः स तदा दैत्य
नायकः ॥ प्रणिपत्य विभुं तुष्टो जगाम नगरं निजम् ॥ ६९ ॥ हृष्टः सभाजितश्चापि दानवैरन्धकेन च ॥ निमन्त्रितश्च राज्याय
न प्रत्यैच्छत्स नारद ॥ ७० ॥ राज्यं परित्यज्य महासुरेन्द्रो न्ययोजयत्सत्पथि दानवेन्द्रान् ॥ ध्यायन्स्मरन्केशवमप्रमेयं तस्थौ
तदा योगविशुद्धदेहः ॥७१॥ एवंपुरा नारद दानवेन्द्रो नारायणेनोत्तमपूरुषेण ॥ पराजितश्चापि विमुच्य राज्यं तस्थौ मनो धातरि
सन्निवेश्य ॥ ७२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे प्रह्लादवरप्रदानो नामाष्टमोऽध्यायः ॥८॥ नारद उवाच ॥ नेत्रहीनः
कथं राज्ये प्रह्लादेनान्धको मुने ॥ अभिषिक्तो जानताऽपि राजधर्मं सनातनम् ॥ १ ॥ पुलस्त्य उवाच ॥ लब्धचक्षुरसौ भूयो
हिरण्याक्षेऽपि जीवति ॥ ततोऽभिषिक्तो दैत्येन प्रह्लादेन निजे पदे ॥ २ ॥ नारद उवाच ॥ स च राज्येऽभिषिक्तस्तु किमाचरत
सुव्रत ॥ देवादिभिः सह कथं समास्ते तद्वदाऽऽशु मे ॥ ३ ॥ पुलस्त्य उवाच ॥ राज्येऽभिषिक्तो दैत्येन्द्रो हैरण्याक्षस्तदाऽन्धकः ॥
तपसाऽऽराध्य देवेशं शूलपाणिं त्रिलोचनम् ॥ ४ ॥ अजेयत्वमवध्यत्वं सुरसिद्धर्षिपन्नगैः ॥ अदाह्यत्वं हुताशेन अक्लेद्यत्वं जलेन
च ॥ ५ ॥ एवं स वरलब्धस्तु दैत्यो राज्यमपालयत् ॥ शुक्रं पुरोहितं कृत्वा समध्यास्ते ततोऽन्धकः ॥ ६ ॥ ततश्चक्रे समुद्योगे
देवानामन्धकोऽसुरः ॥ आक्रम्य वसुधां सर्वान्मनुजेन्द्रान्पराजयत् ॥ ७ ॥ पराजित्य महीपालान्सहायार्थं नियोज्य च ॥
ततस्तु मेरुशिखरं जगामाद्भुतदर्शनम् ॥ ८ ॥ शक्रोऽपि सुरसैन्यानि समुद्योज्य महागजम् ॥ समारुह्यामरावत्यां गुप्तिं कृत्वा
पुनर्ययौ ॥ ९ ॥ शक्रस्यानु तथैवान्ये लोकपाला महौजसः ॥ आरुह्य वाहनं स्वं स्वं स्वायुधानि ययुर्बहिः ॥ १० ॥ देवसेनाऽपि
च समं शक्रेणाद्भुतकर्मणा ॥ निजगामातिवेगेन गजवाजिरथादिभिः ॥ ११ ॥ अग्रतो द्वादशादित्याः पृष्ठतश्च त्रिलोचनः ॥

मध्येऽष्टौ वसवो विश्वे साध्याश्विमरुतां गणैः॥यक्षविद्याधराद्याश्च स्वं स्वं वाहनमास्थिताः॥१२॥नारद उवाच॥रुद्रादीनां वदस्वेह वाहनानि च सर्वशः ॥ एकैकस्यापि धर्मज्ञ परं कौतूहलं मम ॥१३॥ पुलस्त्य उवाच ॥ शृणुष्व कथयिष्यामि सर्वेषामपि नारद॥ वाहनानि समासेन एकैकस्यानुपूर्वशः ॥ १४ ॥ दनुहस्ततलोत्पन्नं महासत्त्वं महागजम् ॥ श्वेतवर्णं महावीर्यं देवराजस्य वाहनम् ॥ ॥ १५ ॥ रुद्रौजःसंभवं भीमं कृष्णवर्णं मनोजवम् ॥ पौण्ड्रकं नाम महिषं धर्मराजस्य नारद ॥१६॥ रुद्रकर्णमलोद्भूतं श्यामं जलधिसंज्ञकम् ॥ शिशुमारं दिव्यगतिं वाहनं वरुणस्य च ॥१७॥ रौद्रं शकटचक्राक्षं शैलाकारं नरोत्तमम् ॥ अम्बिकापादसंभूतं वाहनं धनदस्य तु ॥१८॥ एकादशानां रुद्राणां वाहनानि महामुने ॥ गन्धर्वांश्च महावीर्या भुजगेन्द्राः सुदारुणाः ॥ श्वेतानि सौरभेयाणि वृषाण्युग्रजवानि च ॥ १९ ॥ रथं चन्द्रमसश्चार्द्धसहस्रं हंसवाहनम् ॥ हयोष्ट्ररथवाहाश्च आदित्या मुनिसत्तम ॥ २० ॥ कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः ॥ किन्नरा भुजगारुढा हयारुढौ तथाश्विनौ ॥२१॥ सारङ्गाधिष्ठिता ब्रह्मन्मरुतो घोरदर्शनाः ॥ शुकारूढाश्च कवयो गन्धर्वांश्च पदातिनः ॥ २२ ॥ आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः ॥ संनह्य निर्ययुर्हृष्टा युद्धाय सुमहौजसः ॥ २३ ॥ नारद उवाच ॥ गदितानि सुरादीनां वाहनानि त्वया मुने ॥ दैत्यानां वाहनान्येव यथावद्वक्तुमर्हसि ॥ २४ ॥ पुलस्त्य उवाच ॥ शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ॥ कथयिष्यामि तत्त्वेन यथावच्छ्रोतुमर्हसि ॥ २५ ॥ अन्धकस्य रथो दिव्यो युक्तः परमवाजिभिः ॥ कृष्णवर्णः सहस्रारस्त्रिनल्वपरिमाणवान् ॥२६॥ प्रह्रादस्य रथो दिव्यश्चन्द्रवर्णैर्हयोत्तमैः ॥ उह्यमानस्तथा

युक्तः परमवाजिभिः ॥ कृष्णवर्णः सहस्रारश्चिनल्वपरिमाणवान् ॥२६॥ प्रह्लादस्य रथो दिव्यश्चन्द्रवर्णैर्हयोत्तमैः ॥ उह्यमानस्तथा

ऽष्टाभिः श्वेतरुक्ममयः शुभः ॥ २७ ॥ विरोचनस्य च गजः कुजम्भस्य तुरङ्गमः ॥ जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥२८॥ शङ्कुकर्णस्य तुरगो हयग्रीवस्य कुञ्जरः ॥ रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ॥२९॥ शम्बरस्य विमानोऽभूदयः शङ्कोर्मृगाधिपः ॥ बलिवृत्रौ च बलिनौ गदामुसलधारिणौ ॥ ३० ॥ पद्भ्यां दैवतसैन्यानि अभिद्रवितुमुद्यतौ ॥ ततो रणोऽभू त्तुमुलः संकुलोऽतिभयंकरः ॥ ३१ ॥ रजसा संवृतो लोकः पिङ्गवर्णेन नारद ॥ नाज्ञासीच्च पिता पुत्रं न पुत्रः पितरं तथा ॥३२॥ स्वानेवान्ये निजघ्नुर्वै परानन्ये च सुव्रत ॥ अभिद्रुतो महावेगो रथोपरि रथस्तदा ॥३३॥ गजो मत्तगजेन्द्रं च सादी सादिनमन्व गात् ॥ पदातिरपि संक्रुद्धः पदातिनमथोल्वणम् ॥ ३४ ॥ परस्परं च प्रत्यघ्नन्नन्योन्यजयकांक्षिणः ॥ ततस्तु संकुले तस्मिन्युद्धे दैवासुरे मुने ॥ ३५ ॥ प्रावर्तत नदी घोरा शमयन्ती रणे रजः ॥ असृक्तोया रथावर्त्ता योधसंघट्टवाहिनी ॥ ३६ ॥ गजकुम्भ महाकूर्मा शरमीना दुरत्यया ॥ तीव्राग्रप्रासमकरा महासिग्राहवाहिनी ॥ ३७ ॥ अन्त्रशैवालसंकीर्णा पताकाफेनमालिनी ॥ गृध्रकङ्कमहाहंसा श्येनचक्राह्वमण्डिता ॥ ३८ ॥ वरवायसकादम्बा गोमायुश्वापदाकुला ॥ पिशाचमुनिसंकीर्णा दुस्तरा प्राकृ तैर्जनैः ॥ ३९ ॥ रथप्लवैः संतरन्तः शूरास्तां प्रजगाहिरे ॥ आगुल्फाहवमज्जन्तः सूदयन्तः परस्परम् ॥ समुत्तरन्तो वेगेन योधा जयधनेप्सवः ॥ ४० ॥ ततस्तु रौद्रे सुरदैत्यसादने महाहवे भीरुभयंकरेऽथ ॥ रक्षांसि यक्षाश्च सुसंप्रहृष्टाः पिशाचयूथास्त्वभिरे मिरे च ॥ ४१ ॥ पिबन्त्यसृग्गाढतरं भटानामालिङ्ग्य मांसानि च भक्षयन्ति ॥ वसां विलुम्पन्ति च विस्फुरन्ति गर्जन्त्य

थान्योन्यमथो वयांसि ॥ ४२ ॥ मुञ्चन्ति फेत्काररवाञ्शिवाश्च क्रन्दन्ति योधा भुवि वेदनार्त्ताः ॥ शस्त्रप्रतप्ता निपिबन्ति चान्ये युद्धं श्मशानप्रतिमं बभूव ॥ ४३ ॥ तस्मिञ्छिवा घोरतरे प्रवृत्ते सुरासुराणां सुभयंकरे हि ॥ युद्धे बभौ प्राणपणोपविद्धं द्वंद्वेऽतिशास्त्रग्रहगतं दुरोदरम् ॥ ४४ ॥ हिरण्यचक्षोस्तनयो रणेऽन्धको रथे स्थितो वाजिसहस्रयोजिते ॥ मत्तेभपृष्ठस्थितमुग्र तेजसं समेयिवान्देवपतिं शतक्रतुम् ॥ ४५ ॥ समापतन्तं महिषाधिरूढं यमं प्रतीच्छन्बलवान्दितीशः ॥ प्रल्हादनामा तुरगाष्टयुक्तं रथं समास्थाय समुद्यतास्त्रः ॥ ४६ ॥ विरोचनश्चापि जलेश्वरं त्वगाज्जम्भस्त्वथागाद्धनदं बलाढ्यम् ॥ वायुं समभ्यैच्छतन्संचरोऽथ मयो हुताशं युयुधे मुनीन्द्र ॥ ४७ ॥ अन्ये हयग्रीवमुखा महाबला दितेस्तनूजा दनुपुंगवाश्च ॥ सुरान्हुताशार्कवसूरगेश्वरान्द्वन्द्वं समासाद्य महाबलान्विताः ॥ ४८ ॥ गर्जन्त्यथान्योन्यमुपेत्य युद्धे चापानि कर्षन्त्यतिवेगि ताश्च ॥ मुञ्चन्ति नाराचगणान्सहस्रश आगच्छ हे तिष्ठसि किं बिभेषि ॥४९॥ शरैस्तु तीक्ष्णैरभितापयन्तो मन्दाकिनीवेगनिभां वहन्तीम् ॥ प्रावर्त्तयन्तो भयदां नदीं च ह्यस्त्रैरमोघैराभिताडयन्तः ॥५०॥ त्रैलोक्यमाकाङ्क्षिभिरुग्रवेगैः सुरासुरैर्नारद संप्रवृद्धैः ॥ पिशाचरक्षोगणपुष्टिवर्धनीमुत्तर्तुमिच्छद्भिरसृङ्नदी बभौ ॥५१॥ वाद्यन्ति तूर्याणि सुरासुराणां पश्यन्ति खस्था मुनिसिद्धसंघाः ॥ नयन्ति तानप्सरसो रणाग्राद्धता रणे येऽभिमुखास्तु शूराः ॥ ५२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवासुरयुद्धं नाम नवमोऽध्यायः ॥९॥ पुलस्त्य उवाच ॥ ततः प्रवृत्ते संग्रामे भीरूणां भयवर्धने ॥ सहस्राक्षो महाचापमादाय व्यसृजच्छरान् ॥१॥

नवमोऽध्यायः ॥९॥ पुलस्त्य उवाच ॥ ततः प्रवृत्ते संग्रामे भीरूणां भयवर्धने ॥ सहस्राक्षो महाचापमादाय व्यसृजच्छरान् ॥१॥

अन्धकोऽपि महावेगं धनुराकृष्य भास्वरम् ॥ पुरन्दराय चिक्षेप शरान्बर्हिणवाससः ॥२॥ तावन्योन्यं सुतीक्ष्णाग्रैः शरैः संनतपर्वभिः ॥ रुक्मपुङ्खैर्महावेगैराजघ्नतुरुभावपि ॥३॥ ततः क्रुद्धः शतमखः कुलिशं भ्राम्य पाणिना ॥ चिक्षेप दैत्यराजाय तं ददर्श तथाऽन्धकः ॥ ४ ॥ आजघान च बाणौघैरस्त्रैः शस्त्रैः स नारद ॥ तान्भस्मसात्तदा चक्रे नागानिव हुताशनः ॥५॥ ततोऽतिवेगितं वज्रं दृष्ट्वा बलवतां वरः ॥ समाप्लुत्य रथात्तस्थौ भुवि बाहुसहायवान् ॥ ६ ॥ रथं सारथिना सार्धं साश्वध्वजसकूबरम् ॥ भस्म कृत्वाऽथ कुलिशमन्धकं समुपाययौ ॥ ७॥ तमापतन्तं वेगेन मुष्टिनाऽऽहत्य भूतले ॥ पातयामास बलवाञ्जगर्ज च तदाऽन्धकः ॥ ८ ॥ तं गर्जमानं वीक्ष्याथ वासवः सायकैर्दृढम् ॥ ववर्ष तान्वारयितुमभ्ययात्स शतक्रतुम् ॥९॥ आजघान तलेनेभं कुम्भमध्ये तदा करम् ॥ जानुना च समाहत्य विषाणं प्रबभञ्ज च ॥ १० ॥ वाममस्य तथा पार्श्वं समाहत्यान्धकस्त्वरन् ॥ गजेन्द्रं पातयामास प्रहारैर्जर्जरीकृतम् ॥११॥ गजेन्द्रात्पतमानाच्च अवप्लुत्य शतक्रतुः ॥ पाणिना वज्रमादाय प्रविवेशामरावतीम् ॥ १२ ॥ पराङ्मुखे सहस्राक्षे तद्दैवतबलं महत् ॥ पातयामास दैत्येन्द्रः पादमुष्टितलादिभिः ॥ १३ ॥ ततो वैवस्वतो दण्डं परिभ्राम्य द्विजोत्तम ॥ समभ्यधावत्प्रह्लादं हन्तुकामः सुरोत्तमः ॥१४॥ तमापतन्तं बाणौघैर्ववर्ष विनदन्मुहुः ॥ हिरण्यकशिपोः पुत्रश्चापमानम्य वेगवान् ॥ १५ ॥ तां बाणवृष्टिमतुलां दण्डेनाहत्य भास्करिः ॥ शातयित्वा प्रचिक्षेप दण्डं लोकभयंकरम् ॥ १६ ॥ स वायुपथमास्थाय धर्मराजकरे स्थितः ॥ जज्वाल कालाग्निनिभो यद्वद्दग्धुं जगत्त्रयम् ॥१७॥ जाज्वल्यमानमायान्तं दण्डं दृष्ट्वा दितेः सुताः ॥ प्राक्रो

वैवस्वतो यमः

शन्ति हतः कष्टं प्रह्लादोऽयं यमेन हि ॥ १८॥ तमाक्रन्दितमाकर्ण्य हिरण्याक्षसुतोऽन्धकः ॥ प्रोवाच मा भैष्ट मयि स्थिते कोऽयं सुराधमः ॥ १९ ॥ इत्येवमुक्त्वा वचनं वेगेनाभिससार च ॥ जग्राह पाणिना दण्डं सव्यहस्तेन नारद ॥ २० ॥ तमादाय ततो वेगाद्भ्रामयामास चान्धकः ॥ जगर्ज च महानादं यथा प्रावृषि तोयदः ॥२१॥ प्रह्लादं रक्षितं दृष्ट्वा दण्डाद्दैत्येश्वरेण हि ॥ साधुवादं तदा चक्रुर्दैत्यदानवयूथपाः ॥ २२ ॥ भ्रामयन्तं महादण्डं दृष्ट्वा भानुसुतो मुने ॥ दुःसहं दुर्धरं मत्वा अन्तर्धानमगाद्यमः ॥ २३॥ अन्तर्हिते धर्मराजे प्रह्लादोऽपि महामुने ॥ दारयामास बलवान्देवसैन्यं समन्ततः ॥ २४ ॥ वरुणः शिशुमारस्थो बद्धा पाशैर्महासुरान् ॥ गदया दारयामास तमभ्यागाद्विरोचनः ॥ २५ ॥ तोमरैर्वज्रसंस्पर्शैः शक्तिभिर्मार्गणैरपि ॥ जलेशं ताडयामास मुद्गरैर्वज्रसन्निभैः ॥ २६ ॥ ततस्तं गदयाऽभ्येत्य पातयित्वा धरातले ॥ अभिद्रुत्य बबन्धाशु पाशैर्मत्तगजं बली ॥ २७ ॥ तान्पाशाञ्छतधा चक्रे वेगाच्च दनुजेश्वरः ॥ वरुणं च समभ्येत्य मध्ये जग्राह नारद ॥ २८ ॥ ततो दन्ती च दन्ताभ्यां प्रचिक्षेप तथाऽव्ययः ॥ ममर्द च तथा पद्भ्यां सगदं सलिलेश्वरम् ॥ २९ ॥ तं वध्यमानं वीक्ष्याथ शशाङ्कः शिशिरांशुमान् ॥ अभ्येत्य ताडयामास मार्गणैः कायदारणैः ॥ ३० ॥ संमर्द्यमानः शिशिरांशुबाणैरवाप पीडां परमां गजेन्द्रः ॥ क्लिष्टश्च वेगात्पयसामधीशं मुहुर्मुहुः पादतलैर्ममर्द ॥ ३१ ॥ संमर्द्यमानो वरुणो गजेन्द्रं पद्भ्यां सुगाढं जगृहे महर्षे ॥ पादेषु भूमिं करयोः स्पृशंश्च मूर्द्धानमुच्छ्रास्य बलान्महात्मा ॥ ३२ ॥ गृह्याङ्गुलीभिश्च गजस्य पुच्छं कृत्वेह बन्धं भुजगेश्वरेण ॥ उत्पाट्य

त्पयसामधीशो मुहुर्मुहुः पादतलैममर्द ॥ ३१ ॥ [illegible]
स्पृशंश्च मूर्द्धानमुद्धास्य बलान्महात्मा ॥ ३२ ॥ गृह्याङ्गुलीभिश्च गजस्य पुच्छं कृत्वेह बन्धं भुजगेश्वरेण ॥ उत्पाट्य
चिक्षेप विरोचनं हि स कुञ्जरं खे सनियन्तृवाहम् ॥ ३३ ॥ क्षितो जलेशेन विरोचनस्तु स कुञ्जरो भूमितले पपात ॥ स्वर्गा
त्स्वयन्त्राऽर्गलहर्म्यभूमिपुरं सुकेशेरिव भास्करेण ॥ ३४ ॥ ततो जलेशः सगदः सपाशः समभ्यधावद्दितिजं निहन्तुम् ॥ ततः
समाक्रन्दमनुत्तमं तैर्मुक्तं हि दैत्यैर्घनरावतुल्यम् ॥ ३५ ॥ हाहा हतोऽसौ वरुणेन वीरो विरोचनो दानवसैन्यपालः ॥ प्रह्लाद
हे जम्भकुजम्भकाद्याः रक्षध्वमभ्येत्य सहान्धकेन ॥ ३६ ॥ अहो महात्मा बलवाञ्जलेशः संचूर्णयन्दैत्यभटान्सवाहान् ॥
पाशेन बद्ध्वा गदया निहन्ति यथा पशून्वाजिमखे महेन्द्रः ॥ ३७ ॥ श्रुत्वाऽथ शब्दं दितिजैः समीरितं जम्भप्रधाना दिति
जेश्वरास्ततः ॥ समभ्यधावंस्त्वरिता जलेश्वरं यथा पतङ्गा ज्वलितं हुताशनम् ॥ ३८ ॥ तानागतान्वै प्रसमीक्ष्य देवः प्राह्लादि
मुत्सृज्य वितत्य पाशम् ॥ गदां समुद्भ्राम्य जलेश्वरस्तु दुद्राव ताञ्जम्भमुखानरातीन् ॥ ३९ ॥ जम्भं च पाशेन तथा विहत्य
तारं तलेनाशनिसंनिभेन ॥ पादेन वृत्रं तरसा कुजम्भं निपातयामास बलं च मुष्ट्या ॥ ४० ॥ तेनार्दिता देववरेण दैत्याः
संप्राद्रवन्दिक्षु विमुक्तशस्त्राः ॥ ततोऽन्धकः सुत्वरितोऽभ्युपेयाद्रणाय योद्धुं जलनायकेन ॥ ४१ ॥ तमापतन्तं गदया जघान
पाशेन बद्ध्वा वरुणोऽसुरेशम् ॥ तं पाशमाविद्ध्य गदां प्रगृह्य चिक्षेप दैत्यः स जलेश्वराय ॥ ४२ ॥ तमापतन्तं प्रसमीक्ष्य
पाशं गदां च दाक्षायणिनन्दनस्तु ॥ विवेश वेगात्पयसां निधानं ततोऽन्धको देवबलं ममर्द ॥ ४३ ॥ ततो हुताशः
सुरशत्रुसैन्यं ददाह रोषात्पवनावधूतः ॥ तमभ्ययाद्दानवविश्वकर्मा मयो महाबाहुरुदग्रवीर्यः ॥ ४४ ॥ तमापतन्तं सह शम्बरेण

समीक्ष्य वह्निः पवनेन सार्द्धम् ॥ शक्त्या मयं शम्बरमेत्य कण्ठे संताड्य जग्राह बलान्महर्षे ॥४५॥ शक्त्या सकोपं वरणे विदारि
ते स भिन्नदेहो न्यपतत्पृथिव्याम् ॥ मयः प्रजज्वाल च शम्बरोऽपि कण्ठे विलग्ने ज्वलने प्रदीप्ते ॥ ४६ ॥ स दह्यमानो दितिजो
ऽग्निनाऽथ सुविस्तरं घोररवं रुराव ॥ सिंहाभिपन्नो विपिने यथैव मतङ्गजः क्रन्दति वेदनार्त्तः ॥ ४७ ॥ तं शब्दमाकर्ण्य च शम्ब
रस्य दैत्येश्वरः क्रोधविरक्तदृष्टिः ॥ आः किं किमेतन्ननु केन युद्धे जितो मयः शम्बरदानवश्च ॥ ४८ ॥ ततोऽब्रुवन्दैत्यभटा दितीशं
प्रदह्यतेऽनेन हुताशनेन ॥ रक्षस्व चाभ्येत्य न शक्यते भो हुताशनो वारयितुं रणाग्रे ॥ ४९ ॥ इत्थं स दैत्यैरभिनोदितस्तु हिरण्य
चक्षोस्तनयो महर्षे ॥ उद्यम्य वेगात्परिघं हुताशं समाद्रवत्तिष्ठ इति ब्रुवन्हि ॥ ५० ॥ श्रुत्वाऽन्धकस्यापि वचोऽव्ययात्मा संक्रुद्ध
चित्तस्त्वरितो हि दैत्यम् ॥ उत्पाट्य भूम्यां च विनिष्पिपेष ततोऽन्धकः पावकमाससाद ॥ ५१ ॥ समाजघानाथ हुताशनं हि
वरायुधेनाथ वराङ्गमध्ये ॥ समाहतोऽग्निः परिमुच्य शम्बरं तथाऽन्धकं स त्वरितोऽभ्यधावत् ॥ ५२ ॥ तमापतन्तं परिघेण
भूयः समाहनन्मूर्ध्नि तदाऽन्धकोऽपि ॥ स ताडितोऽग्निर्दितिजेश्वरेण भयात्प्रदुद्राव रणाजिराद्बहिः ॥ ५३ ॥ ततोऽन्धको मारुत
चन्द्रभास्करान्साध्यान्वसूनश्विमरुन्महोग्रान् ॥ यान्याञ्छरेण स्पृशते पराक्रमी पराङ्मुखांस्तान्कृतवान्रणाजिरात् ॥ ५४ ॥
ततो विजित्यामरसैन्यमुग्रं सेन्द्रं सरुद्रं सयमं ससोमम् ॥ संपूज्यमानो दनुपुंगवैस्तु तदाऽन्धको भूमिमुपाजगाम ॥ ५५ ॥ आ
साद्य भूमिं करदान्नरेन्द्रान्कृत्वा वशे स्थाप्य चराचरं च ॥ जगत्समस्तं प्रविवेश धीमान्पातालमग्र्यं पुरमश्मकाह्वम् ॥ ५६ ॥ तत्र

ततो विजित्यामरसैन्यमुग्रं सेन्द्रं सरुद्रं सयमं ससोमम् ॥ संपूज्यमानो दनुपुंगवैस्तु तदाऽन्धको भूमिमुपाजगाम ॥ ५५ ॥ आ
साद्य भूमिं करदान्नरेन्द्रान्कृत्वा वशे स्थाप्य चराचरं च ॥ जगत्समस्तं प्रविवेश धीमान्पातालमध्यं पुरमश्मकाह्वम् ॥ ५६॥ तत्र
स्थितस्यापि महासुरस्य गन्धर्वविद्याधरसिद्धसंघाः ॥ सहाप्सरोभिः परिचारणाय पातालमभ्येत्य समावसन्स्म ॥ ५७ ॥ इति
श्रीवामनपुराणे पुलस्त्यनारदसंवादे अन्धकविजयो नाम दशमोऽध्यायः ॥१०॥ नारद उवाच ॥ यदेतद्भवता प्रोक्तं सुकेशिपुरम
म्बरात् ॥ पातितं भुवि सूर्येण तदाचक्ष्व द्विजोत्तम ॥१॥ सुकेशीति च कश्चासौ केन दत्तवरश्च सः ॥ किमर्थं पातितो भूम्यामाकाशा
द्भास्करेण हि ॥२॥ पुलस्त्य उवाच ॥ शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् ॥ यथा श्रुतां मया पूर्वं कथ्यमानां महामुने ॥३॥
आसीन्निशाचरपतिर्विद्युत्केशीति विश्रुतः ॥ तस्य पुत्रो गुणज्येष्ठः सुकेशिरभवन्मुने ॥ ४ ॥ तस्य तुष्टस्तथेशानः पुरमाकाशचारियत्
प्रादादजेयत्वमपि शत्रुभिश्चाप्यवध्यताम् ॥ ५ ॥ स चापि शंकरात्प्राप्य वरं गगनगं पुरम् ॥ रेमे निशाचरैः सार्द्धं सदा धर्मपथे
स्थितः ॥६॥ स कदाचिद्गतोऽरण्यं मागधं दानवेश्वरः ॥ तत्राश्रमांस्तु ददृशे ऋषीणां भावितात्मनाम् ॥७॥ महर्षीन्स तदा दृष्ट्वा प्रणिप
त्याभिवाद्य च ॥ प्रत्युवाच ऋषीन्सर्वान्कृतासनपरिग्रहः ॥ ८ ॥ सुकेशिरुवाच ॥ प्रष्टुमिच्छामि भवतः संशयोऽयं हृदि स्थितः ॥
कथयन्तु भवन्तो मे न चैवं ज्ञापयाम्यहम् ॥९॥ किंस्विच्छ्रेयः परे लोके किमुचेह द्विजोत्तमाः ॥ केन पूज्यस्तथा सत्सु केनासौ
सुखमेधते ॥ १० ॥ पुलस्त्य उवाच ॥ इत्थं सुकेशिवचनं निशम्य परमर्षयः ॥ प्रोचुर्विमृश्य श्रेयोऽर्थमिह लोके परत्र च ॥११॥
ऋषय ऊचुः ॥ श्रूयतां कथयिष्यामस्तव राक्षसपुंगव ॥ यद्धि श्रेयो भवेद्वीर इह चामुत्र चाव्ययम् ॥ १२ ॥ श्रेयो धर्मः परे
लोके इह च क्षणदाचर ॥ तस्मिन्समाश्रिते सत्सु पूज्यस्तेन सुखी भवेत् ॥१३॥ सुकेशिरुवाच ॥ किंलक्षणो भवेद्धर्मः किमा

५

चरणसत्क्रियः ॥ यमाश्रित्य न सीदन्ति देवाद्यास्तु तदुच्यताम् ॥ १४ ॥ ऋषय ऊचुः ॥ देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः ॥ स्वाध्यायतत्त्ववेदित्वं विष्णुपूजा इति श्रुतिः ॥ १५ ॥ दैत्यानां बाहुशालित्वं मात्सर्यं युद्धसत्क्रियाः ॥ वन्दनं नीतिशास्त्राणां हरभक्तिरुदाहृता ॥ १६ ॥ सिद्धानामुदितो धर्मो योगसिद्धिरनुत्तमा ॥ स्वाध्यायो ब्रह्मविज्ञानं भक्तिर्विष्णौ हरे तथा ॥ १७ ॥ उत्कृष्टोपासनं ज्ञेयं नृत्यवाद्येषु वेदिता ॥ सरस्वत्यां स्थिरा भक्तिर्गान्धर्वो धर्म उच्यते ॥ १८ ॥ विद्याधारित्वमतुलं विज्ञानं पौरुषे मतिः ॥ विद्याधराणां धर्मोऽयं भवान्यां भक्तिरेव च ॥ १९ ॥ गान्धर्वविद्यावेदित्वं भक्तिर्भानौ तथा स्थिरा ॥ कौशल्यं सर्वशिल्पानां धर्मः कैम्पुरुषः स्मृतः ॥ २० ॥ ब्रह्मचर्यममानित्वं योगाभ्यासरतिर्दृढा ॥ सर्वत्र कामचारित्वं धर्मोऽयं पैतृकः स्मृतः ॥ २१ ॥ ब्रह्मचर्यं सदा सत्यं जप्यं ज्ञानं च राक्षस ॥ नियमो धर्मवेदित्वमार्षो धर्मः प्रचक्षते ॥ २२ ॥ स्वाध्यायो ब्रह्मचर्यं च दानं यजनमेव च ॥ अकार्पण्यमनायासो दयाऽहिंसाक्षमादयः ॥ २३ ॥ जितेन्द्रियत्वं शौचं च माङ्गल्यं भक्तिरच्युते ॥ शंकरे भास्करे देव्यां धर्मोऽयं मानवः स्मृतः ॥ २४ ॥ धनाधिपत्यं भोगाश्च स्वाध्यायः शंकरार्चनम् ॥ अहंकारमशौण्डीर्यं धर्मोऽयं गुह्यकेष्विति ॥ २५ ॥ परदारावमर्शित्वं पारक्यार्थे च लोलुपाः ॥ स्वाध्यायस्त्र्यंबके भक्तिर्धर्मोऽयं राक्षसः स्मृतः ॥ २६ ॥ अविवेकस्तथाऽज्ञानं शौचहा निरसत्यता ॥ पिशाचानामयं धर्मः सदा चामिषगृध्नुता ॥ २७ ॥ योनयो द्वादशैवैतास्तासु धर्माश्च राक्षस ॥ ब्रह्मणा कथिताः पुण्या द्वादशैव गतिप्रदाः ॥ २८ ॥ सुकेशिरुवाच ॥ भवद्भिरुक्ता ये धर्माः शाश्वता द्वादशाव्ययाः ॥ तत्र ये मानवा धर्मास्ता

निरसत्यता ॥ पिशाचानामयं धर्मः सदा चामिषगृध्नुता ॥ २७ ॥ योनयो द्वादशवतास्तासु धर्माश्च राक्षस ॥ ब्रह्मणा कथिताः
पुण्या द्वादशैव गतिप्रदाः ॥ २८ ॥ सुकेशिरुवाच ॥ भवद्भिरुक्ता ये धर्माः शाश्वता द्वादशाव्ययाः ॥ तत्र ये मानवा धर्मास्ता
न्भूयो वक्तुमर्हथ ॥२९॥ ऋषय ऊचुः ॥ शृणुष्व मनुजादीनां धर्मांस्तु क्षणदाचर ॥ ये वसन्ति महीपृष्ठे नरा द्वीपेषु सप्तसु
॥ ३० ॥ योजनानां प्रमाणेन पञ्चाशत्कोटिरायता ॥ जलोपरि महीयं हि नौरिवास्ते सरिज्जले ॥ तस्योपरि च देवेशो
ब्रह्मा शैलेन्द्रमुत्तमम् ॥ ३१ ॥ कर्णिकाकारमत्युच्चं स्थापयामास सत्तमः ॥ स चेमां निर्ममे पुण्यां प्रजां देवश्चतुर्दिशम् ॥
॥ ३२ ॥ स्थानानि द्वीपसंज्ञानि कृतवांश्च प्रजापतिः ॥ तत्र मध्ये च कृतवाञ्जम्बूद्वीपमिति श्रुतम् ॥ ३३ ॥ तल्लक्षं योज
नानां च प्रमाणेन निगद्यते ॥ ततो जलनिधिः क्षारो बाह्यतो द्विगुणः स्थितः ॥ ३४ ॥ तस्यापि द्विगुणः प्लक्षो बाह्यतः
संप्रतिष्ठितः ॥ ततस्त्विक्षुरसोदश्च बाह्यतो वलयाकृतिः ॥ ३५ ॥ द्विगुणः शाल्मलिद्वीपो द्विगुणोऽस्य महोदधिः ॥ सुरोदो
द्विगुणस्तस्य तस्माच्च द्विगुणः कुशः ॥३६॥ घृतोदो द्विगुणश्चैव कुशद्वीपात्प्रकीर्तितः ॥ घृतोदाद् द्विगुणः क्रौञ्चो दध्योदो द्विगुण
स्ततः ॥ ३७ ॥ समुद्राद्द्विगुणः शाकः शाकाद्दुग्धाब्धिरुत्तमः ॥ द्विगुणः संस्थितो यत्र शेषपर्यङ्कगो हरिः ॥ ३८ ॥ तस्माच्च
पुष्करद्वीपः स्वादूदस्तदनन्तरम् ॥ एते च द्विगुणाः सर्वे परस्परमवस्थिताः ॥ ३९ ॥ चत्वारिंशदिमाः कोट्यो लक्षाश्च नवतिः
स्मृताः ॥ योजनानां राक्षसेन्द्र पञ्च चातिसुविस्तृताः ॥ ४० ॥ जम्बूद्वीपात्समारभ्य यावत्क्षीराब्धिरन्ततः ॥ कोट्य
श्चतस्रो लक्षाणां द्वौ पञ्चाशच्च राक्षस ॥ ४१ ॥ पुष्करद्वीपमानोऽयं तावानन्ते महोदधिः ॥ लक्षमण्डकटाहेन समन्ता
दभिपूरितम् ॥ ४२ ॥ एवं द्वीपास्त्विमे सप्त पृथग्धर्माः पृथक् क्रियाः ॥ गदिष्यामस्तव वयं शृणुष्व त्वं निशाचर

॥ ४३ ॥ प्लक्षादिषु नरा वीर ये वसन्ति सनातनाः ॥ शाकान्तेषु न तेष्वस्ति युगावस्था कथंचन ॥ ४४ ॥ मोदन्त देववत्तेषां धर्मो दिव्य उदाहृतः ॥ कल्पान्ते प्रलयस्तेषां निगद्येत महाभुज ॥ ४५ ॥ ये जनाः पुष्करद्वीपे वसन्ते रौद्रदर्शने ॥ पैशाचमाश्रिता धर्मं कर्मान्ते ते विनाशिनः ॥ ४६ ॥ सुकेशिरुवाच ॥ किमर्थं पुष्करद्वीपो भवद्भिः समुदाहृतः ॥ दुर्दर्शः शौचरहितो घोरः कर्मार्थनाशकृत् ॥ ४७ ॥ ऋषय ऊचुः ॥ तस्मिन्निशाचर द्वीपे नरकाः सन्ति दारुणाः ॥ रौरवाद्यास्ततो रौद्रः पुष्करो घोरदर्शनः ॥ ४८ ॥ सुकेशिरुवाच ॥ कियन्त्येतानि रौद्राणि नरकाणि तपोधनाः ॥ कियन्मात्राणि मार्गेण का च तेषु स्वरूपता ॥ ४९ ॥ ऋषय ऊचुः ॥ शृणुष्व राक्षसश्रेष्ठ प्रमाणं लक्षणं तथा ॥ सर्वेषां रौरवादीनां संख्या या त्वेकविंशतिः ॥ ५० ॥ द्वे सहस्रे योजनानां ज्वलिताङ्गारविस्तृतः ॥ रौरवो नाम नरकः प्रथमः परिकीर्त्तितः ॥५१॥ तप्तताम्रमयी भूमिरधस्ताद्वह्नितापिता॥ द्वितीयो द्विगुणस्तस्मान्महारौरव उच्चते ॥ ५२ ॥ ततोऽपि विस्तृतश्चान्यस्तामिस्रो नरकः स्मृतः ॥ अन्धतामिस्रको नाम चतुर्थो द्विगुणः परः ॥ ५३ ॥ ततस्तु कालसूत्रेति पञ्चमः परिगीयते ॥ अप्रतिष्ठं तथा षष्ठं घटीयन्त्रं च सप्तमम् ॥ ५४ ॥ असिपत्रवनं चान्यत्सहस्राणि द्विसप्ततिः ॥ योजनानां परिख्यातमष्टमं नरकोत्तमम् ॥ ५५ ॥ नवमं तप्तकुम्भं च दशमं कूटशाल्मलिः॥ करपत्रस्तथैवोक्तस्तथाऽन्यः श्वानभोजनः ॥५६॥ संदंशो लोहपिण्डश्च करम्भसिकता तथा ॥ घोरा क्षारनदी चान्या तथाऽन्या कृमिभोजना ॥ तथाऽष्टादशमी प्रोक्ता घोरा वैतरणी नदी ॥ ५७ ॥ तथाऽपरः शोणितपूयभोजनः क्षुराग्रधारो निशितश्च चक्रकः ॥

करपत्रस्तथवाऽसिस्तथाऽन्यः श्वानभोजनः ॥ ८६ ॥ संदंशो लोहपिण्डश्च करम्भसिकता तथा ॥ घोरा क्षारनदी चान्या तथाऽन्या ॥ २३
कृमिभोजना ॥ तथाऽष्टादशमी प्रोक्ता घोरा वैतरणी नदी ॥ ८७ ॥ तथाऽपरः शोणितपूयभोजनः क्षुराग्रधारो निशितश्च चक्रकः ॥

संशोषणो नाम तथापि चान्ते प्रोक्तास्तवैते नरकाः सुकेशिन् ॥ ८८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे पुष्करद्वीपवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ सुकेशिरुवाच ॥ कर्मणा नरकानेतान्केन गच्छन्ति वै कथम् ॥ एतद्वदत विप्रेन्द्राः परं कौतूहलं मम ॥ १ ॥ ऋषय ऊचुः ॥ कर्मणा येन येनेह यान्ति शालकटंकट ॥ स्वकर्म फलभोगार्थं नरकान्मे शृणुष्व तान् ॥ २ ॥ देववेदद्विजातीनां यैर्निन्दा सततं कृता ॥ ये पुराणेतिहासार्थान्नाभिनन्दन्ति पापिनः ॥ ३ ॥ गुरुनिन्दाकरा ये च मखविघ्नकराश्च ये ॥ दातुर्निवारका ये च तेषु ते निपतन्ति हि ॥ ४ ॥ सुहृद्दम्पतिसोदर्यस्वामिभृत्यपितासुतैः ॥ याज्याध्यापकयोश्चैव कृतो भेदोऽधमैर्मिथः ॥ ५ ॥ कन्यामेकस्य दत्त्वा च ददत्यन्यस्य येऽधमाः ॥ करपत्रेण पाट्यन्ते ते द्विधा यमकिंकरैः ॥ ६ ॥ परोपतापजनकाश्चन्दनोशीरहारिणः ॥ बालव्यजनहर्त्तारः करम्भसिकताश्रिताः ॥ ७ ॥ निमन्त्रितोऽन्यतो भुङ्क्ते श्राद्धे दैवेऽथ पैतृके ॥ स द्विधाऽऽकृष्यते मर्त्यस्तीक्ष्णतुण्डैः खगोत्तमैः ॥ ८ ॥ मर्माणि यस्तु साधूनां तुदन्वाग्भिर्निकृन्तति ॥ तस्योपरि तुदन्तस्तु तुण्डैस्तिष्ठन्ति पत्रिणः ॥ ९ ॥ यः करोति च पैशुन्यं साधूनामन्यथामतिः ॥ वज्रतुण्डनिभा जिह्वामाकर्षन्तेऽस्य वायसाः ॥ १० ॥ पितृमातृगुरूणां च येऽवज्ञां चक्रुरुद्धताः ॥ मज्जन्ति पूयविण्मूत्रे त्वप्रतिष्ठे ह्यधोमुखाः ॥ ११ ॥ देवतातिथिभृत्येषु भूतेष्वभ्यागतेषु च ॥ अभुक्तवत्सु येऽश्नन्ति बालपित्रग्निमातृषु ॥ १२ ॥ दुष्टासृक्पूयनिर्यासं भुञ्जते त्वधमा इमे ॥ सूचीमुखाश्च जायन्ते क्षुधार्त्ता गिरिविग्रहाः ॥ १३ ॥ एकपङ्क्त्युपविष्टानां विषमं भोजयन्ति ये ॥ विड्भोजनं राक्षसेन्द्र नरकं ते व्रजन्ति च ॥ १४ ॥

॥ २४ ॥

एकसार्थप्रयाताश्च पश्यन्तश्चार्थिनं नराः ॥ असंविभज्य भुञ्जन्ति ते यान्ति श्लेष्मभोजनम् ॥ १५॥ गोब्राह्मणाग्नयः स्पृष्टा यैरुच्छि
ष्टैश्च कामतः ॥ क्षिप्यन्ते हि करास्तेषां तप्तकुम्भे सुदारुणे ॥ १६ ॥ सूर्येन्दुतारका दृष्टा यैरुच्छिष्टैश्च कामतः ॥ तेषां नेत्रगतो
वह्निर्धम्यते यमकिंकरैः ॥ ॥ १७ ॥ मित्रजायाऽथ जननी ज्येष्ठो भ्राता पिता स्वसा ॥ जामयो गुरवो वृद्धा यैः संस्पृष्टाः पदा
नृभिः ॥ १८ ॥ बद्धाङ्घ्रयस्ते निगडैर्लोहैर्वह्निप्रतापितैः ॥ क्षिप्यन्ते रौरवे घोरे ह्याजानुपरिदाहिनः ॥ १९ ॥ पायसं कृशरं मांसं वृथा
भुक्तानि यैर्नरैः ॥ तेषामयोगुडास्तप्ताः क्षिप्यन्ते वदनेऽद्भुताः ॥ ॥ २० ॥ गुरुदेवद्विजातीनां वेदानां च नराधमैः ॥ निन्दाऽनिशं
श्रुता यैस्तु पापानामभिकुर्वताम् ॥ २१ ॥ तेषां लोहमयाः कीला वह्निवर्णाः पुनः पुनः ॥ श्रवणेषु निखन्यन्ते धर्म
राजस्य किंकरैः ॥ २२ ॥ प्रपादेवकुलारामविप्रवेश्मसभामठान् ॥ वापीकूपतडागांश्च भङ्क्त्वा विध्वंसयन्ति ये ॥
॥ २३ ॥ तेषां विलपतां चर्म देहतः क्रियते पृथक् ॥ कर्त्तरीभिः सुतीक्ष्णाभिः सुरौद्रैर्यमकिंकरैः ॥ २४ ॥ गोब्राह्मणार्कमग्निं च ये हि मेहन्ति
मानवाः ॥ तेषां गुदेभ्यश्चान्त्राणि विनिष्कृन्तन्ति वायसाः ॥ २५ ॥ स्वपोषणपरो यस्तु परित्यजति मानवः ॥ पुत्रभृत्यकलत्रादिबन्धु
वर्गमकिंचनम् ॥ दुर्भिक्षे संभ्रमे चापि स श्वयोनौ निपात्यते ॥ २६ ॥ शरणागतं ये त्यजन्ति ये च बन्धनपालकाः ॥ पतन्ति
यन्त्रपीठे ते ताड्यमानास्तु किंकरैः ॥ २७ ॥ क्लेशयन्ति हि विप्रादीन्याज्यकर्मसु पापिनः ॥ ते पेष्यन्ते शिलायां वै शोष्यन्तेऽपि
च शोषकैः ॥ २८ ॥ न्यासापहारिणः पापा बध्यन्ते निगडैरपि ॥ क्षुत्क्षामाः शुष्कताल्वोष्ठाः पात्यन्ते वृश्चिकाशने ॥ २९ ॥





॥ २४ ॥

च शोषकैः ॥२८॥ न्यासापहारिणः पापा बध्यन्ते निगडैरपि ॥ क्षुत्क्षामाः शुष्कताल्वोष्ठाः पात्यन्ते वृश्चिकाशने ॥ २९ ॥
पर्वमैथुनिनः पापाः परदाररताश्च ये ॥ ते वह्नितप्तां कूटाग्रामालिङ्गन्ते च शाल्मलीम् ॥ ३० ॥ उपाध्यायमधःकृत्य यैरधीतं द्विजा
धमैः ॥तेषामध्यापको यश्च स शिलां शिरसा वहेत् ॥३१॥मूत्रश्लेष्मपुरीषाणि यैरुत्सृष्टानि वारिणि ॥ते पात्यन्ते च विण्मूत्रे दुर्गन्धे
पूयपूरिते ॥ ३२ ॥ श्राद्धे तिथियमन्योन्यं यैर्भुक्तं भुवि मानवैः ॥ परस्परं भक्षयन्ति ते स्वमांसानि बालिशाः ॥ ३३ ॥ वेदवह्निगु
रुत्यागी मातापित्रोस्तथैव च ॥ गिरिशृङ्गादधःपातं पात्यन्ते यमकिङ्करैः ॥३४॥ पुनर्भूपतयो ये च कन्याविध्वंसकाश्च ये ॥ तद्ग
र्भस्रावकृद्यश्च कृमीन्भक्षेत्पिपीलिकाः ॥ ३५ ॥चण्डालादन्त्यजाद्वाऽपि प्रतिगृह्णाति दक्षिणाम् ॥ याजको यजमानश्च स स्यादश्म
नि कीटकः ॥३६ ॥ पृष्ठमांसाशिनो मूढास्तथैवोत्कोपजीविनः ॥ क्षिप्यन्ते वृकभक्षे ते नरके रजनीचर ॥ ३७ ॥ स्वर्णस्तेयी च
ब्रह्मघ्नः सुरापो गुरुतल्पगः ॥ तथा गोभूमिहर्त्तारो गोस्त्रीबालहताश्च ये ॥ ३८ ॥ एते नरा द्विजा ये च गोषु विक्रयिणस्तथा ॥
सोमविक्रयिणो ये च वेदविक्रयिणस्तथा ॥ ३९ ॥ कूटसत्यास्त्वशौचाश्च नित्यनैमित्तनाशकाः ॥ कूटसाक्षिप्रदा ये च ते महा
रौरवे स्थिताः ॥ ४० ॥ दशवर्षसहस्राणि तावत्तामिस्रके स्थिताः ॥ तावच्चैवान्धतामिस्रे असिपत्रवने ततः ॥ ४१ ॥ तावच्चैव
घटीयन्त्रे तप्तकुम्भे ततः परम् ॥ प्रपातो हि भवेत्तेषां यैरिदं दुष्कृतं कृतम् ॥ ४२ ॥ ये त्वेते नरका रौद्रा रौरवाद्यास्तवोदिताः ॥
ते सर्वे क्रमशः प्रोक्ताः कृतघ्ने लोकनिन्दिते ॥ ४३ ॥ यथा सुराणां प्रवरो जनार्दनो यथा गिरीणामपि शैशिराद्रिः ॥ यथाऽऽयु



१ आकारलोप आर्षः ।

धानां प्रवरं सुदर्शनं यथा खगानां विनतातनूजः ॥ महोरगाणां प्रवरोऽप्यनन्तो यथा च भूतेषु मही प्रधाना ॥४४॥ नदीषु गङ्गा
जलजेषु पद्मं सुरारिमुख्येषु हराङ्घ्रिभक्तः ॥ क्षेत्रेषु यद्वत्कुरुजाङ्गलं वरं तीर्थेषु यद्वत्प्रवरं पृथूदकम् ॥ ४५ ॥ सरःसु चैवोत्तरमा
नसं यथा वनेषु पुण्येषु हि नन्दनं यथा ॥ लोकेषु यद्वत्सदनं विरञ्चेः सत्यं यथा धर्मविधिक्रियासु ॥ ४६ ॥ यथाऽश्वमेधः प्रवरः
क्रतूनां पुत्रो यथा स्पर्शवतां वरिष्ठः ॥ तपोधनानामपि कुम्भयोनिः श्रुतिर्वरा यद्वदिहागमेषु ॥ ४७ ॥ मुख्यं पुराणेषु यथैव
मात्स्यं स्वायंभुवोक्तिस्त्वपि संहितासु ॥ मनुः स्मृतीनां प्रवरो यथैव तिथीषु दर्शो विबुधेषु वासवः ॥ ४८ ॥ तेजस्विनां च
प्रवरोऽर्क उक्त ऋक्षेषु चन्द्रो जलधिर्ह्रदेषु ॥ भवान्यथा राक्षससत्तमेषु पाशेषु नागस्तिमितेषु बन्धः ॥४९॥ धान्येषु शालिर्द्विपदेषु
विप्रश्चतुष्पदे गौश्च यथा मृगेन्द्रः ॥ पुष्पेषु जाती नगरेषु काञ्ची नारीषु रम्भाऽऽश्रमिणां गृहस्थः ॥ ५० ॥ कुशस्थली श्रेष्ठतमा पुरेषु
देशेषु सर्वेषु च मध्यदेशः ॥ फलेषु चूतो मुकुलेष्वशोकः सर्वौषधीनां प्रवरा च पथ्या ॥५१॥ मूलेषु कन्दः प्रवरो यथोक्तो व्याधि
ष्वजीर्णं क्षणदाचरेन्द्र ॥ श्वेतेषु दुग्धं प्रवरं यथैव कार्पासिकं प्रावरणे हि यद्वत् ॥ ५२ ॥ कलासु मुख्या गणितज्ञता च विज्ञान
मुख्यं तु यथेन्द्रजालम् ॥ शाकेषु मुख्या त्वपि काचमाची रसेषु मुख्यं लवणं यथैव ॥ ५३ ॥ फलेषु तालो नलिनीषु पम्पा
वनौकसेष्वेव च ऋक्षराजः ॥ महीरुहेष्वेव यथा वटश्च यथा हरो ज्ञानवतां वरिष्ठः ॥ ५४ ॥ यथा सतीनां हिमवत्सुता
हि यथाऽर्जुनीनां कपिला वरिष्ठा ॥ यथा नृपाणामपि नीलवर्णस्तथैव सर्वेष्वपि दुःसहेषु ॥ ५५ ॥ दुर्गेषु रौद्रेषु निशाचरेश यथा
[illegible] ॥ ५६ ॥ ब्रह्मघ्नगोघ्नादिषु निष्कृतिर्हि विद्यते

वनौकसेष्वव च ऋक्षराजः ॥ महीरुहेष्वव यथा वटश्च यथा हरौ ज्ञानवती वरिष्ठः ॥ ५४ ॥ यथा सतीनां हिमपर्वतसुता ॥
ऽपि यथार्जुनीनां कपिला वरिष्ठा ॥ यथा नृपाणामपि नीलवर्णस्तथैव सर्वेष्वपि दुःसहेषु ॥ ५५ ॥ वर्गेषु रौद्रेषु निशाचरेश यथा

नदी वैतरणी प्रधाना ॥ पापीयसां यद्वदिह कृतघ्नः सर्वेषु पापेषु निशाचरेन्द्र ॥ ५६ ॥ ब्रह्मघ्नगोघ्नादिषु निष्कृतिर्हि विद्येत नैवास्य तु दुष्टचारिणः ॥ न निष्कृतिश्चापि कृतघ्नवृत्तेः सुहृत्कृतं नाशयतोऽब्दकोटिभिः ॥ ५७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे कर्मविपाको नाम द्वादशोऽध्यायः ॥ १२ ॥ सुकेशिरुवाच ॥ भवद्भिरुदिता घोरा पुष्करद्वीपसंस्थितिः ॥ जम्बूद्वीपस्य संस्थानं कथयन्तु महर्षयः ॥ १ ॥ ऋषय ऊचुः ॥ जम्बूद्वीपस्य संस्थानं कथ्यमानं निशामय ॥ नवभेदं सुविस्तीर्णं स्वर्गमोक्षफलप्रदम् ॥ २ ॥ मध्ये त्विलावृतो वर्षो भद्राश्वः पूर्वतोऽद्भुतः ॥ पूर्वदक्षिणतो वर्षो हिरण्मान्राक्षसेश्वर ॥ ३ ॥ भारतो दक्षिणे प्रोक्तो हरिर्दक्षिणपश्चिमे ॥ पश्चिमे केतुमालश्च चम्पकः पश्चिमोत्तरे ॥ ४ ॥ उत्तरेण कुरोर्वर्षः कल्पवृक्षसमावृतः ॥ पूर्वमुत्तरतो रम्यो वर्षः किंपुरुषः स्मृतः ॥ ५ ॥ पुण्या रम्या नवैवैते वर्षाः सालकटंकट ॥ इलावृताद्याश्चैवाष्टौ वर्षं मुक्त्वैव भारतम् ॥ ६॥ न तेष्वस्ति युगावस्था जरा मृत्युभयं न च ॥ तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः ॥ ७ ॥ विपर्ययो न तेष्वस्ति नोत्तमाधममध्यमाः ॥ यदेतद्भारतं वर्षं नवद्वीपं निशाचर ॥ ८॥ सागरान्तरिताः सर्वे अगम्याश्च परस्परम् ॥ इन्द्रद्वीपः कशेरूणास्ताम्रपर्णो गभस्तिमान् ॥ ९ ॥ नागद्वीपः कटाहश्च सिंहलो वारुणस्तथा ॥ अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ १० ॥ कुमाराख्यः परिख्यातो द्वीपोऽयं दक्षिणोत्तरः ॥ पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ॥ ११ ॥ आन्ध्रा दक्षिणतो वीर तुरुष्कास्त्वपि चोत्तरे ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तरवासिनः ॥ १२ ॥ इज्यायुद्धवणिज्याद्यैः

कर्मभिः कृतपावनाः ॥ तेषां संव्यवहारश्च एभिः कर्मभिरिष्यते ॥१३॥ स्वर्गापवर्गप्राप्तिश्च पुण्यं पापं तथैव च ॥ महेन्द्रो मलयः
सह्यः शक्तिमानृक्षपर्वतः ॥ १४ ॥ विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ तथाऽन्ये शतसाहस्रा भूधरा मध्यवासिनः ॥१५॥
विस्तारोच्छ्रायिणो रम्या विपुलाः शुभसानवः ॥ कोलाहलश्च वैभ्राजो मन्दरो दुर्धराचलः ॥ १६॥ वातधूमो वैद्युतश्च मैनाकः सरस
स्तथा ॥ तुङ्गप्रस्थो नागगिरिस्तथा गोवर्धनाचलः ॥ १७॥ उज्जयन्तः पुष्पगिरिरर्बुदो रैवतस्तथा ॥ ऋष्यमूकः सगोमन्तश्चित्रकूटः
कृतस्मरः ॥ १८ ॥ श्रीपर्वतः कोकणकः शतशोऽन्येऽपि पर्वताः ॥ तैर्विमिश्रा जनपदा म्लेच्छाश्चार्याश्च भागशः ॥ १९ ॥
तैः पीयन्ते सरिच्छ्रेष्ठा याः सम्यक्ता निशामय ॥ सरस्वती पञ्चरूपा कालिन्दी च हिरण्वती ॥ २० ॥ शतद्रुश्चन्द्रिका नीला
वितस्तेरावती कुहूः ॥ मधुरा हाररावी च उशीरा धातकी रसा ॥ २१ ॥ गोमती धूतपापा च बाहुदा सा दृषद्वती ॥
निःस्वरा गण्डकी चित्रा कौशिकी च वधूसरा ॥ २२ ॥ सरयूश्च सलौहित्या हिमवत्पादनिःसृताः ॥ वेदस्मृतिर्वेदसिनी वृत्रघ्नी
सिन्धुरेव च ॥ २३ ॥ पर्णासा नन्दिनी चैव पावनी च मही तथा ॥ शरा चर्मण्वती लूपी विदिशा वेणुमत्यपि ॥ २४ ॥
चित्रा ह्योघवती रम्या पारियात्रोद्भवाः स्मृताः ॥ शोणो महानदी चैव नर्मदा सुरसा क्रिया ॥ २५ ॥ मन्दाकिनी दशार्णा च
चित्रकूटा हि देविका ॥ चित्रोत्पला वै तमसा करतोया पिशाचिका ॥ २६ ॥ तथाऽन्या पिप्पलश्रेणी विपाशा वञ्जुलावती ॥
सत्सन्तजा शक्तिमती चक्रिणी त्रिदिवा वसुः ॥ २७ ॥ ऋक्षपादप्रसूता च तथाऽन्या वल्गुवाहिनी ॥ शिवा पयोष्णी निर्विन्ध्या

सत्सन्तजा शक्तिमती चक्रिणी त्रिदिवा वसुः ॥ २७ ॥ ऋक्षपादप्रसूता च तथाऽन्या वल्गुवाहिनी ॥ शिवा पयोष्णी निर्विन्ध्या

तापी सनिषधावती ॥ २८ ॥ वेणा वैतरणी चैव सिनीबाहुः कुमुद्वती ॥ तोया रेवा महागौरी दुर्गन्धा वाशिला तथा ॥ २९ ॥ विन्ध्यपादप्रसूताश्च नद्यः पुण्यजलाः शुभाः ॥ गोदावरी भीमरथी कृष्णा वेण्या सरिद्वती ॥ ३० ॥ विशमद्री सुप्रयोगा वाह्या कावेरिरेव च ॥ दुग्धोदा नलिनी चैव वारिसेना कलस्वना ॥ ३१ ॥ एताश्चापि महानद्यः सह्यपादविनिर्गताः ॥ कृतमाला ताम्रपर्णी बञ्जुला चोत्पलावती ॥ ३२ ॥ शुनी चैव सुदामा च शक्तिमत्प्रभवास्त्विमाः ॥ सर्वाः पुण्याः सरस्वत्यः पापप्रश मनास्तथा ॥ ३३ ॥ जगतो मातरः सर्वाः सर्वाः सागरयोषितः ॥ अन्याः सहस्रशश्चात्र क्षुद्रनद्यो हि राक्षस ॥ ३४ ॥ सदाकाल वहाश्चान्याः प्रावृट्कालवहास्तथा ॥ मध्यदेशोद्भवा एताः पिबन्ति स्वेच्छया शुभाः ॥ ३५ ॥ यत्स्थाः कुशूद्राः किल वृकाः शका बर्बरकौग्वाश्च कलिङ्गवङ्गाङ्गजनास्तथैते ॥ ३६ ॥ मर्भका कुण्डलाश्च पञ्चालकाश्चैव सह कौशिकैश्च ॥ मध्यदेशीया आभीराः शाढ्यधानकाः ॥ बाह्लीका वाटधानाश्च आभीराः कालतोयदाः ॥ ३७ ॥ अपरान्तास्तथा शूद्राः पह्ल वाश्च सखेटकाः ॥ गान्धारा यवनाश्चैव सिन्धुसौवीरभद्रकाः ॥ ३८ ॥ शातद्रुश्च ललित्थाश्च पारावतसमूषकाः ॥ माठरोद कधाराश्च कैकेया दशनास्तथा ॥ ३९ ॥ क्षत्रियाः प्रति वैश्याश्च तथा शूद्रकुलानि च ॥ काम्बोजा दरदाश्चैव बर्बराश्चा ङ्गलोकिकाः ॥ ४० ॥ वेणाश्चैव तुषाराश्च बहुधा बाह्यतोदराः ॥ आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ॥ ४१ ॥ लम्प



१ उच्छिदा—उद्भिदा, इति पुस्तकान्तरपाठः ।

कास्तावकारामाश्चूडिकास्तङ्गणैः सह ॥ अलसाश्चालिभद्राश्च किरातानां च जातयः ॥ ४२ ॥ तामसाः कर्ममार्गाश्च सुपार्श्वा गणकास्तथा ॥ कुलूताः कुहिकाश्चूर्णास्तूर्णपादाः सकुक्कुटाः ॥ ४३ ॥ माण्डव्याः पाणवीयाश्च उत्तरापथवासिनः ॥ अङ्गा वङ्गा मद्गुरवाः स्वन्तार्गिरिबहिर्गिराः ॥ ४४ ॥ तथा प्रवङ्गा वाङ्गेया मांसादा बलदन्तिकाः ॥ ब्रह्मोत्तराः प्राविजया भार्गवाङ्गेयमर्षकाः ॥ ४५ ॥ प्राग्ज्योतिषाः पृषध्राश्च विदेहास्ताम्रलिप्तकाः ॥ मालामगधमानन्दाः प्राच्या जनपदास्त्विमे ॥ ४६ ॥ पुण्ड्राश्च केरलाश्चैव चौडाः कुल्याश्च राक्षस ॥ जानुका मूषिकादाश्च कुमारादा महाशकाः ॥ ४७ ॥ महाराष्ट्रा माहिषिकाः कालिङ्गाश्चैव सर्वशः ॥ आभीराः सहवैसक्या आरण्याः शबराश्च ये ॥ ४८ ॥ पुलिन्दा विन्ध्यशैलेया वैदर्भा दण्डकैः सह ॥ पौरिकाः सारिकाश्चैव अश्मका भोगवर्द्धनाः ॥ ४९ ॥ नैमिकाः कुन्दला आन्ध्राः उलिदा नलकारकाः ॥ दाक्षिणात्या जनपदास्त्विमे शालकटंकट ॥ ५० ॥ शूर्पारका वारिधाना दुर्गाश्चालीकटैः सह ॥ पुलीयाश्चासिनीलाश्च तापसास्तामसास्तथा ॥ ५१ ॥ कारस्करास्तुभमिनो नासिकान्ताः सुनर्मदाः ॥ दारुकच्छाः सुमाहेयाः सह सारस्वतैरपि ॥ ५२ ॥ वात्सीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्बुदैः सह ॥ इत्येते पश्चिमामाशां स्थिता जानपदा जनाः ॥ ५३ ॥ कारूषाश्चैकलव्याश्च मेकलाश्चोत्कलैः सह ॥ उत्तमर्णा दशार्णाश्च गोप्ताः किकरवैः सह ॥ ५४ ॥ तोशलाः कोशलाश्चैव त्रैपुराः खेल्लिशास्तथा ॥ तुरगास्तुम्बराश्चैव वहेला नैषधैः सह ॥ ५५ ॥ अनूपास्तण्डिकेराश्च वीतहोत्रास्त्ववन्तयः ॥ सुकेशे विन्ध्यमूलस्थास्त्विमे जनपदाः स्मृताः ॥ ५६ ॥





... ये ॥ निराहारा हंसमार्गाः कुपथास्तङ्गणाः खशाः ॥ ५७ ॥ कुथप्रावरणाश्चैव

नैषधैः सह ॥ ५५ ॥ अनूपास्तुण्डिकेराश्च वीतहोत्रास्त्ववन्तयः ॥ सुकेशे विन्ध्यमूलस्थास्त्विमे जनपदाः स्मृताः ॥ ५६ ॥

आद्यान्देशान्प्रवक्ष्यामः पर्वताश्रयिणस्तु ये ॥ निराहारा हंसमार्गाः कुपथास्तङ्गणाः खशाः ॥ ५७ ॥ कुथप्रावरणाश्चैव
ऊर्णाप्लुष्टाः सुहूहुकाः ॥ त्रिगर्त्ताश्च किराताश्च तोमराः शशिखाद्रिकाः ॥ ५८ ॥ इमे तवोक्ता विषयाः सुविस्तराद्दीपे कुमारे
रजनीचरेश ॥ एतेषु देशेषु च देशधर्मान् संकीर्त्यमानाञ्छृणु तत्त्वतो हि ॥ ५९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे
भुवनकोशवर्णने त्रयोदशोऽध्यायः ॥ १३ ॥ ऋषय ऊचुः ॥ अहिंसा सत्यमस्तेयं दानं क्षान्तिर्दमः शमः ॥ अकार्पण्यं
च शौचं च तपश्च रजनीचर ॥ १ ॥ दशाङ्गो राक्षसश्रेष्ठ धर्मोऽसौ सार्ववर्णिकः ॥ ब्राह्मणस्यापि विहिता चातुराश्रम्य
कल्पना ॥ २ ॥ सुकेशिरुवाच ॥ विप्राणां चातुराश्रम्यं विस्तरान्मे तपोधनाः ॥ आचक्षध्वं न मे तृप्तिः शृण्वतः प्रतिपद्यते
॥ ३ ॥ ऋषय ऊचुः ॥ कृतोपनयनः सम्यग्ब्रह्मचारी गुरौ वसेत् ॥ तत्र धर्मोऽस्य यस्तं त्वं कथ्यमानं निशामय ॥ ४ ॥
स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनं तथा ॥ गुरोर्निवेद्य तच्चाद्यमनुज्ञातेन सर्वथा ॥ ५ ॥ गुरोः कर्मणि सोद्योगः सम्यक्प्री
त्युपपादनम् ॥ तेनाहूतः पठेच्चैव तत्परो नान्यमानसः ॥ ६ ॥ एकं द्वौ सकलान्वाऽपि वेदान्प्राप्य गुरोर्मुखात् ॥ अनुज्ञातो वरं
दत्त्वा गुरवे दक्षिणां ततः ॥ ७ ॥ गृहस्थाश्रमकामस्तु गार्हस्थ्याश्रममावसेत् ॥ वानप्रस्थाश्रमं वाऽपि चतुर्थं स्वेच्छयाऽऽत्मनः
॥ ८ ॥ तत्रैव वा गुरोर्गेहे द्विजो निष्ठामवाप्नुयात् ॥ गुरोरभावे तत्पुत्रे तच्छिष्ये तत्सुतां विना ॥ ९ ॥ शुश्रूषन्निरभिमानो ब्रह्म
चर्याश्रमं वसेत् ॥ एवं जयति मृत्युं स द्विजः सालकटंकट ॥ १० ॥ उपावृत्तस्तु तस्मात्तु गृहस्थाश्रमकाम्यया ॥ असमानार्षकु

लजा कन्योद्वाह्या निशाचर ॥११॥ स्वकर्मणा धनं लब्ध्वा पितृदेवाऽतिथीनपि ॥ सम्यक्संप्रीणयेद्भक्त्या सदाचाररतो द्विजः ॥ १२ ॥ सुकेशिरुवाच ॥ सदाचारेति गदितं युष्माभिर्मम सुव्रताः ॥ लक्षणं श्रोतुमिच्छामि कथयध्वं तदद्य मे ॥ १३ ॥ ऋषय ऊचुः ॥ सदाचारो निगदितस्तव योऽस्माभिरादरात् ॥ लक्षणं तस्य वक्ष्यामस्तच्छृणुष्व निशाचर॥१४॥ गृहस्थेन सदा कार्यमाचारपरिपालनम् ॥ न ह्याचारविहीनस्य भद्रमत्र परत्र च ॥ १५ ॥ यज्ञदानतपांसीह पुरुषस्य न भूतये ॥ भवन्ति यः समुल्लङ्घ्य सदाचारं प्रवर्त्तते ॥ १६ ॥ दुराचारो हि पुरुषो नेह नामुत्र नन्दते ॥कार्यो यत्नः सदाचार आचारो हन्त्यलक्षणम् ॥१७॥ तस्य स्वरूपं वक्ष्यामः सदाचारस्य राक्षस ॥ शृणुष्वैकमनास्त्वं च यदि श्रेयोऽभिवाञ्छसि ॥ १८ ॥ धर्मोऽस्य मूलं धनमस्य शाखाः पुष्पं च कामः फलमस्य मोक्षः ॥ असौ सदाचारतरुः सुकेशिन्संसेवितो येन स पुण्यभोक्ता ॥१९॥ ब्राह्मे मुहूर्ते प्रथमं विबुध्येदनुस्मरेद्देववरान्महर्षीन् ॥ प्राभातिकं मङ्गलमेव वाच्यं यदुक्तवान्देवपतिस्त्रिनेत्रः ॥ २० ॥ सुकेशिरुवाच ॥ किं तदुक्तं सुप्रभातं शंकरेण महात्मना ॥ प्रभाते यत्पठन्मर्त्यो मुच्यते पापबन्धनात् ॥ २१ ॥ ऋषय ऊचुः ॥ श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ॥ श्रुत्वा स्मृत्वा पठित्वा च सर्वपापैः प्रमुच्यते ॥ २२ ॥ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ॥ गुरुश्च शुक्रः सह भानुजेन कुर्वन्तु सर्वे मम सुप्रभातम् ॥ २३ ॥ भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहः सगौतमः ॥ रैभ्यो मरीचिश्च्यवनो



ऋभुश्च कुर्वन्तु सर्वे मम सुप्रभातम् ॥ २४ ॥ सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च ॥ सप्त स्वराः सप्त रसा

...लाश्च कुर्वन्तु सर्वे मम सुप्रभातम् ॥२५॥ पृथ्वी सगन्धा सरसास्तथाऽऽपः सस्पर्शवायुर्ज्वलनः सुतेजाः ॥ नभः सशब्दं महता

रिमश्च कुर्वन्तु सर्वे मम सुप्रभातम् ॥ २४ ॥ सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च ॥ सप्त स्वराः सप्त रसा

तलाश्च कुर्वन्तु सर्वे मम सुप्रभातम् ॥२५॥ पृथ्वी सगन्धा सरसास्तथाऽऽपः सस्पर्शवायुर्ज्वलनः सुतेजाः ॥ नभः सशब्दं महता
सहैव यच्छन्तु सर्वे मम सुप्रभातम्॥ २६ ॥ सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवराश्च सप्त ॥ भूरादयः सप्त तथैव लोका
यच्छन्तु सर्वे मम सुप्रभातम् ॥ २७ ॥ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च भक्त्या ॥ दुःस्वप्ननाशोऽनघ सुप्रभातं भवेच्च
सत्यं भगवत्प्रसादात् ॥ २८॥ ततः समुत्थाय विचिन्तयेत धर्मं तथार्थं च विहाय शय्याम् ॥ उत्थाय पश्चाद्धरिरित्युदीर्य गच्छे
त्तदोत्सर्गविधिं हि कर्त्तुम् ॥ २९ ॥ न देवगोब्राह्मणवह्निमार्गे न राजमार्गे न चतुष्पथे च ॥ कुर्यादथोत्सर्गमपीह गोष्ठे पूर्वां परां नैव
समाश्रितो गाम् ॥३०॥ ततस्तु शौचार्थमुपाहरेन्मृदं गुदे त्रयं पाणितले दशैव ॥ तथोभयोः सप्त तथैव पादयोर्लिङ्गे तथैकां मृदमा
हरेत ॥३१॥ नान्तर्जलाद्राक्षस मूषकस्य बिलाच्च शौचाचरणागतान्यैः ॥वाल्मीकमृच्चैव हि शुद्धये सदा ग्राह्या सदाचारविदा नरेण॥
॥ ३२ ॥ उदङ्मुखः प्राग्वदनोऽपि विद्वान्प्रक्षाल्य पादौ भुवि संनिविष्टः ॥ समाचमेदद्भिरफेनिलाभिर्मुखं त्रिरादौ परिमृज्य च द्विः
॥ ३३ ॥ ततः स्पृशेत्खानि शिरः करेण संध्यामुपासीत ततः क्रमेण ॥ केशांश्च संशोध्य च दन्तधावनं कृत्वा तथा दर्पणदर्शनं च
॥३४॥ कृत्वा शिरःस्नानमथाह्निकं वा संपूज्य तोयेन पितॄन्सदेवान् ॥ होमं च कृत्वाऽऽलभनं शुभानां कृत्वा बहिर्निर्गमनं प्रश
स्तम् ॥३५॥ दूर्वां दधिं सर्पिरथोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णम् ॥ मृद्गोमयं स्वस्तिकमक्षतानि लाजा मधु ब्राह्मणकन्यकाश्च२६॥
श्वेतानि पुष्पाणि च शोभनानि हुताशनं चन्दनमर्कबिम्बम् ॥ अश्वत्थवृक्षं च समालभेत ततस्तु कार्यो निजजातिधर्मः ॥ ३७ ॥

॥ २९ ॥



देशानुशिष्टं कुलधर्ममग्र्यं स्वगोत्रधर्मं न हि संत्यजेत ॥ तेनार्थसिद्धिं समुपाचरेत नासत्प्रलापं न च सत्यहीनम् ॥ ३८ ॥
न निष्ठुरं नागमशास्त्रहीनं वाक्यं वदेत्साधुजनेन येन ॥ निन्द्यो भवेन्नैव च धर्मभेदी सङ्गं न चासत्सु नरेषु कुर्यात् ॥३९॥ संध्यासु
वर्ज्यं सुरतं दिवा च सर्वासु योनीषु पराबलासु ॥ सर्वान्ययोनिष्वपराबलासु रजस्वलास्वेव जलेषु वीर ॥ ४० ॥ वृथाऽटनं
वृथा दानं वृथा च पशुमारणम् ॥ न कर्त्तव्यं गृहस्थेन वृथा दारपरिग्रहः ॥ ४१ ॥ वृथाऽटनान्नित्यहानिर्वृथा दानाद्धनक्षयः ॥
वृथा पशुघ्नः प्राप्नोति पातकं नरकार्थि यत् ॥ ४२ ॥ संतत्या हानिरश्लाघ्या वर्णसंकरतो भयम् ॥ भेतव्यं च भवेल्लोके वृथादारपरि
ग्रहात् ॥ ४३ ॥ परस्वे परदारेषु न कार्या बुद्धिरुत्तमैः ॥ परस्वं नरकायैव परदाराश्च मृत्यवे ॥ ४४ ॥ नेक्षेत्परस्त्रियं नग्नां न
संभाषेत तस्करान् ॥ उदक्या दर्शनं स्पर्शं संभाषां च विवर्जयेत् ॥ ४५ ॥ नैकासने तथा स्थेयं सोदर्या परजायया ॥ तथा
सापत्नमातुश्च तथा स्वदुहितृष्वपि ॥ ४६ ॥ न च स्नायीत वै नग्नो न शयीत कदाचन ॥ दिग्वाससोऽपि न तथा परिभ्रमण
मिष्यते ॥ ४७ ॥ भिन्नांश्च शय्यासनभाजनादीञ्छुद्धचै रतः संपरिवर्जयेत्तान् ॥ नन्दासु नाभ्यङ्गमुपाचरेत क्षौरं च रिक्तासु जयासु
मांसम् ॥ ४८ ॥ पूर्णासु योषित्परिवर्जनीया भद्रासु सर्वाणि समाचरेच्च ॥ नाभ्यङ्गमर्के न च भूमिपुत्रे क्षौरं च शुक्रे रविजे च
मांसम् ॥ ४९ ॥ बुधेषु योषिन्न समाचरेत शेषेषु सर्वाणि सदैव कुर्यात् ॥ चित्रासु हस्ते श्रवणे न तैलं क्षौरं विशाखास्वभिजित्सु

॥ २९ ॥



... सदैव वर्ज्यं शयने उदक्छिरस्तथा प्रतीच्यां रजनी
... नैवेह च दक्षिणामुखो न च प्रतीचीमभि भोजनीयम् ॥ देवालयं चैत्यतरुं चतुष्पथं विद्याधिकं चापि

चरेश ॥ ५१ ॥ भुञ्जीत नैवेह च दक्षिणामुखो न च प्रतीचीमभि भोजनीयम् ॥ देवालयं चैत्यतरुं चतुष्पथं विद्याधिकं चापि गुरुं प्रदक्षिणम् ॥ ५२ ॥ माल्यान्नपानं वसनानि यत्नतो धृतानि चान्यैर्न हि धारयेद् बुधः ॥ स्नायाच्छिरःस्नानतया च नित्यं निष्कारणं नैव महानिशासु ॥ ५३ ॥ ग्रहोपरागे स्वजनापघाते मुक्त्वा च जन्मर्क्षगते शशाङ्के ॥ नाभ्यङ्गितं कायमुपस्पृशेच्च स्नातो न केशान्विधुनीत चापि ॥ ५४ ॥ गात्राणि नैवाम्बरपाणिना च स्नातो विमृज्याद्रजनीचरेश ॥ वसेत्सुदेशेषु सुराजकेषु सुसंहितेष्वेव जनेषु नित्यम् ॥ ५५ ॥ अक्रोधना न्यायपरा विमत्सराः कृषीवला ह्यौषधिजातयश्च ॥ स्वापस्तु वैद्यो धनिकश्च यत्र सच्छ्रोत्रियस्तत्र वसेत नित्यम् ॥५६ ॥ न तेषु देशेषु वसेत बुद्धिमान्सदा नृपो दण्डरुचिस्त्वशक्तः ॥ जनोऽपि नित्योत्सव बद्धवैरः सदा जिगीषुश्च निशाचरेन्द्र ॥ ५७ ॥ यच्च वर्ज्यं महाबाहो सदा धर्मस्थितैर्नरैः ॥ यद्भोज्यं च समुद्दिष्टं कथयिष्यामहे वयम् ॥ ५८ ॥ भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम् ॥ अस्नेहा व्रीहयः श्लक्ष्णा विकाराः पयसस्तथा ॥ ५९ ॥ शशकः शल्यको गोधा समेधा मत्स्यकच्छपौ ॥ तद्वद्विदलकादीनि भोज्यानि मनुरब्रवीत् ॥ ६० ॥ मणिवज्रप्रवालानां तद्वन्मुक्ताफलस्य च ॥ शैल दारुमयानां च तृणमूलौषधान्यपि ॥ ६१ ॥ शूर्पधान्यतृणानां च संहतानां च वाससाम् ॥ वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते ॥ ६२ ॥ सस्नेहानामथोष्णेन तिलकल्केन चाविकम् ॥ कार्पासिकानां वस्त्राणां शुद्धिः स्याद्बहिरम्बुना ॥ ६३ ॥ नागदन्तास्थि शृङ्गाणां तत्क्षणाच्छुद्धिरिष्यते ॥ पुनः पाकेन भाण्डानां मृन्मयानां च मेध्यता ॥ ६४ ॥ शुचि भैक्षं कारुहस्तः पण्ययोषिन्मुखं

तथा ॥ रथ्यागतमविज्ञातं दासवर्गेण यत्कृतम् ॥ ६५ ॥ वाक्यपूतं चिरानीतमनेकान्तरितं लघु ॥ चेष्टितं बालवृद्धानां बालस्य तु मुखं शुचि ॥ ६६ ॥ कर्मान्ताङ्गारशालास्तु स्तनंधयसुताः स्त्रियः ॥ वाग्विप्रुषो द्विजेन्द्राणां संतप्ताश्चाम्बुबिन्दवः ॥ ६७ ॥ भूमिर्विशुद्ध्यते खातदाहमार्जनगोक्रमैः ॥ लेपादुल्लेखनात्सेकाद्वेश्मसंमार्जनार्चनात् ॥ ६८ ॥ केशकीटावपन्नेऽन्ने गोघ्राते मक्षिकान्विते ॥ मृदम्बुभस्मक्षाराणि प्रक्षेप्तव्यानि शुद्धये ॥ ६९ ॥ औदुम्बराणां चाम्लेन क्षारेण त्रपुसीसयोः ॥ भस्माद्भिश्चैव कांस्यानां शुद्धिः प्लावो द्रवस्य च ॥ ७० ॥ अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च ॥ अन्येषामपि तद्द्रव्यैः शुद्धिर्गन्धापहारतः ॥७१॥ मातुः प्रस्रवणे वत्सः शकुनिः फलपातने ॥ गर्दभो भारवाहित्वे श्वा मृगग्रहणे शुचिः ॥७२॥ रथ्याकर्दमतोयानि गावः पथि तृणानि च॥ मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च॥७३॥पक्वं द्रोणाधिकं चान्नममेध्याभिप्लुतं भवेत्॥ अग्रमुद्धृत्य संत्याज्यं शेषस्य प्रोक्षणं स्मृतम् ॥ ७४ ॥ उपवासस्त्रिरात्रं वा दूषितान्नस्य भोजने ॥ अज्ञातज्ञातपूर्वे वा नैव शुद्धिर्विधीयते ॥ ७५ ॥ उदक्यास्नातनग्नांश्च सूतिकान्त्यावसायिनः ॥ स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥७६॥ सस्नेहमस्थि संपृश्य सवासा जलमाविशेत् ॥ आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥७७॥ न लङ्घयेन्नरं नासृक्शरीरोद्वर्तनानि च ॥ गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः ॥ ७८ ॥ पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि ॥ स्नायीत देवखातेषु सरःसु च सरित्सु च ॥ ॥ ७९ ॥ नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन ॥ नालपेज्जनविद्विष्टं वीरहीनां तथा स्त्रियम् ॥ ८० ॥ देवतापितसच्छास्त्र

विण्मूत्रपादाम्भांसि क्षिपेद्बहिः ॥ ७८ ॥ पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि ॥ स्नायात देवखातेषु सरःसु च सरित्सु च ॥ ॥ ३७
॥ ७९ ॥ नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन ॥ नालपेज्जनविद्विष्टं वीरहीनां तथा स्त्रियम् ॥ ८० ॥ देवतापितृसच्छास्त्र

यज्ञसत्रादिनिन्दकैः ॥ कृत्वा तु स्पर्शमालापं शुद्ध्यतेऽर्कविलोकनात् ॥ ८१ ॥ अभोज्याः सूतिकाः षण्डो मार्जाराखू च कुक्कुटाः ॥ पतितापविद्धनग्नाश्चण्डालाद्याधमाश्च ये ॥ ८२ ॥ सुकेशिरुवाच ॥ भवद्भिः कीर्तिता भोज्या य एते सुतिकादयः ॥ अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि हि ॥ ८३ ॥ ऋषय ऊचुः ॥ ब्राह्मणी ब्राह्मणश्चैव यावच्छेषत्रमागतौ ॥ तावुभौ सूतिके त्युक्तौ तयोरन्नं विगर्हितम् ॥ ८४ ॥ न जुहोत्युचिते काले न स्नाति न ददाति च ॥ पितृदेवार्चनाद्धीनः स षण्डः परिगीयते ॥ ८५ ॥ दम्भार्थं जपते यश्च तप्यते पठते तथा ॥ न परत्रार्थमुद्युक्तो मार्जारः परिकीर्तितः ॥ ८६ ॥ विभवे सति नैवाश्नाति न ददाति जुहोति न ॥ तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति ॥ ८७ ॥ सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ॥ तमाहुः कुक्कुटं देवास्त स्याप्यन्नं विगर्हितम् ॥ ८८ ॥ स्वधर्मं यः समुत्सृज्य परधर्मं समाचरेत् ॥ अनापदि स विद्वद्भिः पतितः परिकीर्त्यते ॥ ८९ ॥ देवत्यागी पितृत्यागी गुरुवद्भुभ्नकस्तथा[1] ॥ गोब्राह्मणस्त्रीवधकृदपविद्धः प्रकीर्त्यते ॥ ९० ॥ येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् ॥ ते नग्नाः कीर्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥ ९१ ॥ आशार्तानामदाता च दातुश्च प्रतिषेधकः ॥ शरणागतं यस्त्यजति स चण्डालोऽधमो जनः ॥ ९२ ॥ यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ॥ कुण्डाशी यश्च तस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥ ९३ ॥ यो नित्यकर्मणो हानिं कुर्यान्नैमित्तिकस्य च ॥ भुक्त्वाऽन्नं तस्य शुध्येत त्रिरात्रोपोषितो नरः ॥ ९४ ॥ नित्यस्य कर्मणो



१ गुरुत्यागी तथैव चेति बहुत्र पाठः ।

हानिः केवलं मृतजन्मसु ॥ न तु नैमित्तिकोच्छेदः कर्त्तव्यो हि कथंचन ॥ ९५ ॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥ मृते च सर्वबन्धूनामित्याह भगवान्भृगुः ॥ ९६ ॥ प्रेताय सलिलं देयं बहिर्दग्ध्वा तु गोत्रजैः ॥ प्रथमेऽह्नि चतुर्थे वा सप्तमे वाऽस्थिसंचयम् ॥ ९७ ॥ ऊर्ध्वं संचयनात्तेषामङ्गस्पर्शो विधीयते ॥ सोदकैस्तु क्रिया कार्या अशुद्धैस्तु सपिण्डकैः ॥ ९८ ॥ नृपोद्वन्धनशस्त्राम्बुवह्निपातमृतेषु च ॥ बाले प्रव्राजि संन्यासे देशान्तरमृते तथा ॥९९॥ सद्यःशौचं भवद्वीर तच्चाप्युक्तं चतुर्विधम् ॥ गर्भस्रावे तदेवोक्तं पूर्वकाले न वै चरेत् ॥१००॥ ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् । षड्रात्रं चैव वैश्यानां शूद्राणां द्वादशाह्निकम् ॥ १ ॥ दशद्वादशमासार्द्धमाससंख्यैर्दिनैर्गतैः ॥ स्वाः स्वाः काले क्रियाः कुर्युः सर्वे वर्णा यथाक्रमम् ॥२॥ प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं विधानतः ॥ सपिण्डीकरणं कार्यं प्रेत आवत्सरान्नरैः ॥३॥ ततः पितृत्वमापन्ने दर्शपूर्णादिभिर्दिनैः ॥ प्रीणनं तस्य कर्त्तव्यं यथाश्रुतिनिदर्शनात् ॥ ४ ॥ पितुरर्थं समुद्दिश्य भूमिदानादिकं स्वयम् ॥ कुर्याद्येनास्य सुप्रीताः पितरो यान्ति राक्षस ॥ ५ ॥ यद्यदिष्टतमं किंचिद्यच्चास्य दयितं गृहे ॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ६ ॥ अध्येतव्यास्त्रयो नित्यं वेदाश्च विदुषा सदा ॥ धर्मतो धनमाहार्यं यष्टव्यं चापि शक्तितः ॥ ७ ॥ यच्चापि कुर्वतो नात्मा जुगुप्सामेति राक्षस ॥ तत्कर्तव्यमशङ्केन यन्न गोप्यं महाजने ॥ ८ ॥ एवमाचरतो लोके पुरुषस्य गृहे सतः ॥ धर्मार्थकामसंप्राप्तिः परत्रेह च शोभना ॥ ९ ॥ एष तूद्देशतः प्रोक्तो गृहस्थाश्रम उत्तमः ॥ वानप्रस्थाश्रमं धर्मं प्रवक्ष्यामोऽवधार्यताम् ॥ ११० ॥ अपत्यसंततिं दृष्ट्वा प्राज्ञो देहस्य चानतिम् ॥ वानप्रस्थाश्रमं गच्छे

॥ ८ ॥ एवमाचरतो लोके पुरुषस्य गृहे सतः ॥ धर्मार्थकामसंप्राप्तिः परत्रेह च शोभना ॥ ९ ॥ एष तूद्देशतः प्रोक्तो गृहस्थाश्रम
उत्तमः ॥ वानप्रस्थाश्रमं धर्मं प्रवक्ष्यामोऽवधार्यताम् ॥ ११० ॥ अपत्यसंततिं दृष्ट्वा प्राज्ञो देहस्य चानतिम् ॥ वानप्रस्थाश्रमं गच्छे

दात्मनः शुद्धिकारणम् ॥ ११ ॥ तत्रारण्योपभोगैश्च तपोभिश्चात्मदर्शनम् ॥ भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रियाः ॥ १२ ॥ होमस्त्रिषवणस्नानं जटावल्कलधारणम् ॥ वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥ १३ ॥ सर्वसङ्गपरित्यागो ब्रह्मचर्यममानिता ॥ जितेन्द्रियत्वमावासे नैकस्मिन्वसते चिरम् ॥ १४ ॥ अनारम्भस्तथाऽऽहारो भिक्षान्नं नातिकोपिता ॥ आत्मज्ञानावबोधेच्छा तथा चात्मावबोधनम् ॥ १५ ॥ चतुर्थे चाश्रमे धर्मास्तेऽस्माभिः परिकीर्तिताः ॥ वर्णधर्मास्तथा चान्यान्निशामय निशाचर ॥ १६ ॥ गार्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थं त्रयोऽश्रमाः ॥ क्षत्रियस्यापि गदितो य आचारो द्विजस्य हि ॥ १७ ॥ वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः ॥ गार्हस्थमाश्रमं त्वेकं शूद्रस्य क्षणदाचर ॥ १८ ॥ स्वान्स्वान्वर्णाश्रमप्रोक्तान्स्वधर्मान्नैव हापयेत् ॥ स्वधर्मक्षपणादन्यविधानाद्यो द्विजत्रयीम् ॥ संतापयति तस्यासौ परिकुप्यति भास्करः ॥ १९ ॥ कुपितः कुलनाशाय देहरोगविवृद्धये ॥ भानुर्वै यतते तस्य नरस्य क्षणदाचर ॥ १२० ॥ तस्मात्स्वधर्मं नहि संत्यजेच्च न हापयेच्चापि हि चात्मवंशम् ॥ यः संत्यजेच्चापि निजं हि धर्मं तस्मै प्रकुप्येत दिवाकरस्तु ॥ २१ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्तो मुनिना सुकेशी प्रणम्य तान्ब्रह्मनिधीन्महर्षीन् ॥ जगाम चोत्पत्य पुरं स्वकीयं मुहुर्मुहुर्धर्ममवेक्षमाणः ॥ १२२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सुकेश्यनुशासनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ पुलस्त्य उवाच ॥ ततः सुकेशी देवर्षे गत्वा पुरम



१ आकारस्य ह्रस्व आर्षः ।

नुत्तमम् ॥ समाहूयाब्रवीत्सर्वान्राक्षसान्धार्मिकं वचः ॥ १ ॥ अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः ॥ दानं दया च क्षान्तिश्च ब्रह्मचर्यममानिता ॥ २ ॥ शुभा सत्या च मधुरा वाङ्नित्यं सत्क्रियारतिः ॥ सदाचारनिषेवित्वं परलोकप्रदायकाः ॥ ३ ॥ इत्यूचुर्मुनयो मह्यं धर्ममाद्यं पुरातनम् ॥ सोऽहमाज्ञापये सर्वान्क्रियतामविकल्पतः ॥ ४ ॥ पुलस्त्य उवाच ॥ ततः सुकेशिवचनात्सर्व एव निशाचराः ॥ त्रयोदशांशतो धर्मं चक्रुर्मुदितमानसाः ॥ ५ ॥ ततः प्रवृद्धिं सुतरामगच्छंस्ते निशाचराः ॥ पुत्रपौत्रार्थसंयुक्ताः सदाचारसमन्विताः ॥ ६ ॥ ततस्तु तेजसा तेषां राक्षसानां महात्मनाम् ॥ गन्तुं नाशक्नुवन्सूर्यो नक्षत्राणि न चन्द्रमाः ॥ ७ ॥ ततस्त्रिभुवने ब्रह्मन्निशाचरपुरं विभो ॥ दिवा सूर्यस्य सदृशं क्षणदायां च चन्द्रवत् ॥ ८ ॥ न ज्ञायते गतिर्व्योम्नि भास्करस्य ततोऽम्बरे ॥ शशाङ्कमिव तेजस्त्वादमन्यन्त पुरोत्तमम् ॥ ९ ॥ स्वं विकासं विमुञ्चन्ति निशामिति व्यचिन्तयन् ॥ कमलाकरे च कमला मित्रमित्यभिगम्य हि ॥ रात्रौ विकसिता ब्रह्मन्विभूतिं दातुमीप्सिताम् ॥ १० ॥ कौशिका रात्रिसमयं बुद्ध्वा निरगमन्किल ॥ तान्वायसास्तदा ज्ञात्वा दिवा निघ्नन्ति कौशिकान् ॥ ११ ॥ स्नातकास्त्वापगास्वेव स्नानजप्यपरायणाः ॥ आकण्ठमग्नास्तिष्ठन्ति रात्रिं ज्ञात्वाऽथ वासरम् ॥ १२ ॥ न व्ययुज्यन्त चक्राह्वास्तदा वै पुरदर्शने ॥ मन्यमानास्तु दिवसमिदमुच्चैर्ब्रुवन्ति च ॥ १३ ॥ नूनं कान्ताविहीनेन केनचिच्चक्रपत्रिणा ॥ उत्सृष्टं जीवितं शून्ये फूत्कृत्य सरितस्तटे ॥ १४ ॥ ततोऽनु कृपयाऽऽविष्टो विवस्वांस्तीव्ररश्मिभिः ॥ संतापयञ्जगत्सर्वं नास्तमेति कथंचन ॥ १५ ॥ अन्ये वदन्ति चक्राह्वा नूनं

दिवसमिदमुचैर्ब्रुवन्ति च ॥ १२ ॥ नूनं कान्ताविहीनेन केनचिच्चक्रपत्रिणा ॥ उत्सृष्टं जीवितं शून्ये फूत्कृत्य सरितस्तटे ॥ १४ ॥
ततोऽत्र कृपयाऽऽविष्टो विवस्वांस्तीव्ररश्मिभिः ॥ संतापयञ्जगत्सर्वं नास्तमेति कथंचन ॥ १५ ॥ अन्ये वदन्ति चक्राह्वः
कश्चिन्मृतोऽभवत् ॥ तत्कान्तया तपस्तप्तं भर्तृशोकार्त्तया ततः ॥ १६ ॥ आराधितस्तु भगवांस्तपसा वै दिवाकरः ॥ तेनासौ शशिनं जित्वा नास्तमेति रविर्ध्रुवम् ॥ १७ ॥ यज्वानो होमशालासु सहर्त्विग्भिरथाध्वरे ॥ प्रावर्तयन्त कर्माणि रात्रावपि महाद्युते ॥ १८ ॥ महाभागवताः पूजां विष्णोः कुर्वन्ति भक्तितः ॥ रवौ शशिनि चैवान्ये ब्रह्मणोऽन्ये हरस्य च ॥ १९ ॥ कामिनश्चाप्यमन्यन्त साधु चन्द्रमसा कृतम् ॥ यदियं रजनी रम्या कृता सततकौमुदी ॥२०॥ अन्येऽब्रुवँल्लोकगुरुरस्माभिश्चक्रभृद्ध्रुवी ॥ निर्व्याजेन महागन्धैरर्चितः कुसुमैः शुभैः ॥ २१ ॥ सह लक्ष्म्या महायोगी नभस्यादिचतुर्ष्वपि ॥ अशून्यशयना नाम द्वितीया सर्वकामदा ॥ २२ ॥ तेनासौ भगवान्प्रीतः प्रादाच्छयनमुत्तमम् ॥ अशून्यं च महाभोगैरनस्तमितशेखरम् ॥ २३ ॥ अन्येऽब्रुवन्ध्रुवं देव्या रोहिण्याः शशिनः क्षयम् ॥ दृष्ट्वा तप्तं तपो घोरं रुद्राराधनकाम्यया ॥ २४ ॥ पुण्यायामक्षयाष्टम्यां वेदोक्तविधिना स्वयम् ॥ तुष्टेन शम्भुना दत्तो वरश्चास्मै यदृच्छया ॥ २५ ॥ अन्येऽब्रुवंश्चन्द्रमसा ध्रुवमाराधितो हरिः ॥ व्रतेनेह त्वखण्डेन तेनाखण्डः शशी दिवि ॥ २६ ॥ अन्येऽब्रुवन्छशाङ्केन ध्रुवरक्षा कृताऽऽत्मनः ॥ पदद्वयं समभ्यर्च्य विष्णोरमिततेजसः ॥ ॥ २७ ॥ तेनासौ दीप्तिमांश्चन्द्रः परिभूय दिवाकरम् ॥ अस्माकमानन्दकरो दिवा तपति सूर्यवत् ॥ २८ ॥ लक्ष्यते कारणै रम्यैर्बहुभिः सत्यमेव हि ॥ शशाङ्कनिर्जितः सूर्यो न विभाति यथा पुरा ॥ २९ ॥ यथा पद्माकराः श्लक्ष्णा रणद्भृङ्गगणाकुलाः ॥ विकचाः प्रतिभासन्ते जातः सूर्योदयो ध्रुवम् ॥ ३० ॥ यथा चान्ये विभाव्यन्ते विकचाः कुमुदाकराः ॥ अतो विज्ञायते चन्द्र उदितश्च

प्रतापवान्॥ ३१॥ एवं संभाषतां तत्र सूर्यो वाक्यानि नारद ॥ अमन्यत किमतद्धि लोको वक्ति शुभाशुभम् ॥ ३२॥ एवं संचिन्त्य
भगवान्दध्यौ ध्यानं दिवाकरः ॥ आसमन्ताज्जगद्ग्रस्तं त्रैलोक्यं रजनीचरैः॥३३॥ततस्तु भगवाञ्ज्ञात्वा तेजसोऽप्यसहिष्णुताम्॥
निशाचरस्य वृद्धिं तामचिन्तयत योगवित् ॥ ३४ ॥ ततो ज्ञात्वा च तान्सर्वान्सदाचाररताञ्छुचीन् ॥ देवब्राह्मणपूजासु संसक्ता
न्धर्मसंयुतान् ॥ ३५ ॥ ततस्तु रक्षःक्षयकृत्तिमिरद्विपकेसरी ॥ महांशुनखरः सूर्यस्तद्विघातमचिन्तयत् ॥ ३६ ॥ ज्ञातवांश्च तत
श्छिद्रं राक्षसानां दिवस्पतिः ॥ स्वधर्मविच्युतिर्नाम सर्वधर्मविघातकृत् ॥ ३७ ॥ ततः क्रोधाभिभूतेन भानुना रिपुभेदिना ॥
तद्वीतं राक्षसपुरं तन्नष्टं च यथेच्छया ॥ ३८ ॥ स भानुना तदा दृष्टः क्रोधाध्मातेन चक्षुषा ॥ निपपाताम्बराद्भ्रष्टः क्षीणपुण्य
इव ग्रहः ॥ ३९ ॥ एवमेतत्समालोक्य पुरं शालकटंकटः ॥ नमो हराय शर्वाय इदमुच्चैरुदैरयत् ॥ ४० ॥ तदाक्रन्दितमाकर्ण्य
चारणा गगनेचराः ॥ हाहेति चुक्रुशुः सर्वे हरभक्तः पतत्यसौ ॥ ४१ ॥ तच्चारणवचः शर्वः श्रुतवान्सर्वगोऽव्ययः ॥ श्रुत्वा संचि
न्तयामास केनासौ पात्यते भुवि ॥ ४२ ॥ ज्ञातवान्देवपातिना सहस्रकिरणेन तत् ॥ पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः ॥४३॥
क्रुद्धस्तु भगवाञ्छंभुर्भानुमन्तमपश्यत ॥ दृष्टमात्रस्त्रिणेत्रेण निपपात ततोऽम्बरात् ॥४४॥ गगनात्स परिभ्रष्टः पथि वायुनिषेविते॥
यदृच्छया निपतितो यन्त्रमुक्तो यथोपलः ॥ ४५ ॥ ततो वायुपथान्मुक्तः किंशुकोज्ज्वलविग्रहः ॥ निपपातान्तरिक्षात्स वृतः

यदृच्छया निपतितो यन्त्रमुक्तो यथोपलः ॥ ४६ ॥ ततो वायुपथान्मुक्तः किंशुकोज्ज्वलविग्रहः ॥ निपपातान्तरिक्षात्स भूतः ॥ २३

निपतस्व हरिक्षेत्रे यदि श्रेयोऽभिवाञ्छसि ॥ ततोऽब्रवीत्पतन्नेव विवस्वांस्तांस्तपोधनान् ॥ ४८ ॥ किं तत्क्षेत्रं हरेः पुण्यं वदध्वं शीघ्रमेव मे ॥ तमूचुर्मुनयः सूर्यं शृणु क्षेत्रं महाफलम् ॥४९॥ साम्प्रतं वासुदेवस्य भावितं शंकरस्य च ॥ योगशायिनमारभ्य यावत्के शवदर्शनम् ॥ एतत्क्षेत्रं हरेः पुण्यं नाम्ना वाराणसी पुरी ॥ ५० ॥ तच्छ्रुत्वा भगवान्भानुर्भवनेत्राभितापितः ॥ वरणायास्तथैवा स्यास्त्वन्तरे निपपात ह ॥५१॥ भानौ ततः प्रदह्यति निमज्ज्यास्यां लुलद्रविः ॥ वरणायां समभ्येत्य निमज्जति यथेच्छया ॥५२॥ भूयोऽसीं वरणां भूयो भूयोऽपि वरणामसीम् ॥ लुलंस्त्रिणेत्रवह्न्यार्त्तो भ्रमतेऽलातचक्रवत् ॥ ५३ ॥ एतस्मिन्नन्तरे ब्रह्मन्नृषयो यक्ष राक्षसाः ॥ नागा विद्याधराश्चापि पक्षिणोऽप्सरसस्तथा ॥ ५४ ॥ यावन्तो भास्कररथे भूतप्रेतादयः स्थिताः ॥ तावन्तो ब्रह्म सदनं गता वेदयितुं मुने ॥ ५५ ॥ ततो ब्रह्मा सुरपतिः सुरैः सार्द्धं समभ्ययात् ॥ रम्यं महेश्वरावासं मन्दरं रविकारणात् ॥ ५६ ॥ गत्वा दृष्ट्वा च देवेशं शंकरं शूलपाणिनम् ॥ प्रसाद्य भास्करार्थाय वाराणस्यामुपानयन् ॥५७॥ ततो दिवाकरं भूयः पाणिनाऽऽदाय शंकरः ॥ कृत्वा नामास्य लोलेति रथमारोपयत्पुनः ॥ ५८ ॥ आरोपिते दिनकरे ब्रह्माऽभ्येत्य सुकेशिनम् ॥ सबान्धवं सन गरं पुनरारोपयद्दिवि ॥ ५९ ॥ समारोप्य सुकेशिं च परिष्वज्य च शंकरः ॥ प्रणम्य केशवं देवं वैराजं स्वगृहं गतः ॥ ६० ॥ एवं पुरा नारद भास्करेण पुरं सुकेशेर्भुवि सन्निपातितम् ॥ दिवाकरो भूमितले भवेन क्षिप्तस्तु दृष्ट्वाऽनलसंप्रदग्धः ॥ ६१ ॥ आरो पितो भूमितलाद्भवेन भूयोऽपि भानुः प्रतिभासनाय ॥ स्वयंभुवा चापि निशाचरेन्द्रस्त्वारोपितः खे सपुरः सबन्धुः ॥ ६२ ॥

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सुकेशिचरिते लोलार्कजननं नाम पञ्चदशोऽध्यायः ॥ १६ ॥ नारद उवाच ॥ यान्ये तान्भगवानाह कामिभिः शशिनं प्रति ॥ आराधनाय देवाभ्यां हरीशाभ्यां वदस्व तान् ॥ १ ॥ पुलस्त्य उवाच ॥ शृणुष्व कामिभिः प्रोक्तान्व्रतान्पुण्यान्कलिप्रिय ॥ आराधनाय शर्वस्य केशवस्य च धीमतः ॥ २ ॥ यदाऽऽषाढीं रविः प्राप्य व्रजते चोत्तरायणात् ॥ तदा स्वपिति देवेशो भोगिभोगे श्रियः पतिः ॥३॥ प्रतिसुप्ते विभौ तस्मिन्देवगन्धर्वगुह्यकाः ॥ देवानां मातरश्चापि प्रसुप्ताश्चाप्यनुक्रमात् ॥४॥ नारद उवाच ॥ कथयस्व सुरादीनां शयने विधिमुत्तमम् ॥ सर्वाननुक्रमेणैव पुरस्कृत्य जनार्दनम् ॥५॥ पुलस्त्य उवाच ॥ मिथुनाभिमुखे सूर्ये शुक्लपक्षे तपोधन ॥ एकादश्यां जगत्स्वामी शयनं परिकल्पते ॥६॥ शेषाहिभोगपर्यङ्कं कृत्वा संपूज्य केशवम् ॥ कृत्वा पवित्रकं चैव सम्यक्संपूज्य वै द्विजान् ॥७॥ अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ॥ लब्ध्वा पीताम्बरधरः स्वस्थो निद्रां समानयन् ॥ ८ ॥ त्रयोदश्यां ततः कामः स्वपते शयने शुभे ॥ कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते ॥९॥ चतुर्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले ॥ सौवर्णपङ्कजकृते सुखास्तीर्णोपधानके ॥ १० ॥ पूर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ॥ वैयाघ्रे च जटाभारं समुद्ग्रन्थ्यान्यचर्मणा ॥ ११ ॥ ततो दिवाकरो राशिं संप्रयाति च कर्कटम् ॥ ततोऽमराणां रजनी भवते दक्षिणायनम् ॥ १२ ॥ ब्रह्मा तथा प्रतिपदि नीलोत्पलमयेऽनघ ॥ तल्पे स्वपिति लोकानां दर्शयन्मार्गमुत्तमम् ॥ १३ ॥ विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता ॥ विनायकश्चतुर्थ्यां तु [illegible]

भवते दक्षिणायनम् ॥ १२ ॥ ब्रह्मा तथा प्रतिपदि नीलोत्पलमयेऽनघ ॥ तल्पे स्वपिति लोकानां दर्शयन्मार्गमुत्तमम् ॥ १३ ॥
विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता ॥ विनायकश्चतुर्थ्यां तु [illegible]

भगवान्रविः ॥ कात्यायनी तथाऽष्टम्यां नवम्यां कमलालया ॥ १५ ॥ दशम्यां भुजगेन्द्राश्च स्वपन्ते वायुभोजनाः ॥ एकादश्यां तु कृष्णायां साध्या ब्रह्मन्स्वपन्ति च ॥ १६ ॥ एष क्रमस्ते गदितो नभादौ स्वपतां मुने ॥ स्वपत्सु तत्र देवेषु प्रावृट्कालः समाययौ ॥१७॥ बकाः समं बलाकाभिरारोहन्ति नगोत्तमान् ॥ वायसाश्चापि कुर्वन्ति नीडानि ऋषिपुङ्गव ॥ १८ ॥ वायस्यश्च स्वपन्त्येवमृतौ गर्भभरालसाः ॥ यस्यां तिथौ प्रस्वपिति विश्वकर्मा प्रजापतिः ॥ १९ ॥ द्वितीया सा शुभा पुण्या सुपुण्या शयनोदिता ॥ तस्यां तिथावर्चयित्वा श्रीवत्साङ्कं चतुर्भुजम् ॥२०॥ पर्यङ्कस्थं समं लक्ष्म्या गन्धपुष्पादिभिर्मुने ॥ ततो देवाय शय्यायां फलानि प्रक्षिपेत्सुधीः ॥ सुरभीणि निवेद्येत्थं विज्ञाप्यो मधुसूदनः ॥२१॥ यथा हि लक्ष्म्या न वियुज्यसे त्वं त्रिविक्रमानन्त जगन्निवास ॥ तथा त्वशून्यं शयनं सदैव त्वस्माकमेवेह तव प्रसादात् ॥२२॥ यथा त्वशून्यं तव देव लब्धं समं हि लक्ष्म्या शयनं सुरेश ॥ सत्येन तेनामितवीर्य्य विष्णो गार्हस्थ्यनाशो न ममास्तु देव ॥२३॥ इत्युच्चार्य च देवेशं प्रसाद्य च पुनः पुनः ॥ नक्तं भुञ्जीत देवर्षे तैलक्षारविवर्जितम् ॥२४॥ द्वितीयेऽह्नि द्विजाग्र्याय फलं दद्याद्विचक्षणः ॥ लक्ष्मीधरः प्रीयतां मे इत्युच्चार्य निवेदयेत् ॥२५॥ अनेन तु विधानेन चातुर्मास्यव्रतं चरेत् ॥ यावद् वृश्चिकराशिस्थः प्रतिभाति दिवाकरः ॥२६॥ ततो विबुध्यन्ति सुराः क्रमशः क्रमशो मुने॥ तुलास्थे तु हरिः पूर्वं कामः पश्चाद्विबुध्यते ॥ २७ ॥ तत्र दानं द्वितीयायां मूर्तिर्लक्ष्मीधरस्य च ॥ शय्या चास्तरणोपेता यथा

१ वन्धितारपंः।

वा० पु०

३९ ॥

विभवमात्मनः ॥ २८ ॥ एष व्रतस्तु प्रथमः प्रोक्तस्तव महामुने ॥ यस्मिंश्चीर्णे वियोगस्तु न भवेदिह कस्यचित् ॥ २९ ॥ नभस्ये मासि च तथा या सा कृष्णाष्टमी शुभा ॥ युक्ता मृगशिरेणैव सा तु कालाष्टमी स्मृता ॥ ३० ॥ तस्यां सर्वेषु लिङ्गेषु तिथौ स्वपिति शंकरः ॥ वसते सन्निधाने तु तत्र पूजाऽक्षया स्मृता ॥ ३१ ॥ तत्र स्नायीत वै विद्वान्गोमूत्रेण जलेन च ॥ स्नातः संपूजयेत्पुष्पैर्धत्तूरस्य त्रिलोचनम् ॥ ३२ ॥ धूपं केसरनिर्यासं नैवेद्यं मधुसर्पिषी ॥ प्रीयतां मे विरूपाक्षस्त्वित्युच्चार्य च दक्षिणाम् ॥ ३३ ॥ विप्राय दद्यान्नैवेद्यं सहिरण्यं द्विजोत्तम ॥ तद्वदाश्वयुजे मासि उपवासी जितेन्द्रियः ॥ ३४ ॥ नवम्यां गोमयस्नानं कुर्यात्पूजां तु पङ्कजैः ॥ धूपयेत्सर्जनिर्यासैर्नैवेद्यं मधुमोदकैः ॥ ३५ ॥ कृत्वोपवासमष्टम्यां नवम्यां स्नानमाचरेत् ॥ प्रीयतां मे हिरण्याक्षो दक्षिणा सतिला स्मृता ॥ ३६ ॥ कार्त्तिके पयसा स्नानं करवीरेण चार्चनम् ॥ धूपं श्रीवासनिर्यासं नैवेद्यं मधुपायसम् ॥ ३७ ॥ सनैवेद्यं च रजतं दातव्यं दानमग्रजे ॥ प्रीयतां भगवान्स्थाणुरिति वाच्यमनिष्ठुरम् ॥ ३८ ॥ कृत्वोपवासमष्टम्यां नवम्यां स्नानमाचरेत् ॥ मासि मार्गशिरे स्नानं रुद्रार्चा दधिजा स्मृता ॥ ३९ ॥ धूपं श्रीवृक्षनिर्यासं नैवेद्यं मधुनौदनम् ॥ सन्निवेद्यारक्तशालिर्दक्षिणा परिकीर्तिता ॥ ४० ॥ नमोऽस्तु प्रीयतां शर्व इति वाच्यं च पण्डितैः ॥ पौषे स्नानं च हविषा पूजा स्यात्तगरैः शुभैः ॥ ४१ ॥ धूपो मधुकनिर्यासो नैवेद्यं मधुसक्तुकैः ॥ समुद्गा दक्षिणा प्रोक्ता प्रीणनाय जगद्गुरोः ॥ ४२ ॥ वाच्यं नमस्ते देवेश त्र्यम्बकेति प्रकीर्तयेत् ॥ माघे कुशोदकस्नानं कमदेन शिवार्चनम् ॥ ४३ ॥ धूपः कदम्बनिर्यासो नैवेद्यं सतिलौदनम् ॥



अ०

१६

॥ ३९

शुभैः ॥ ४१ ॥ धूपो मधुक निर्यासो नैवेद्यं मधुसक्तुकैः ॥ समुद्रा दक्षिणा प्रोक्ता प्रीणनाय जगद्गुरोः ॥ ४२ ॥ वाच्यं नमस्ते
देवेश त्र्यम्बकेति प्रकीर्तयेत ॥ माघे कुशोदकस्नानं कमृदेन शिवार्चनम ॥ ४३ ॥ धूपः कदम्बनिर्यासो नैवेद्यं सतिलौदनम् ॥

पयोभक्तं तु नैवेद्यं सरुक्मं प्रतिपादयेत् ॥ ४४ ॥ प्रीयतां मे महादेव उमापतिरितीरयेत् ॥ एवमेव समुद्दिष्टं षड्भिर्मासैस्तु पारणम् ॥ पारणान्ते त्रिणेत्रस्य स्नपनं कारयेत्क्रमात् ॥ ४५ ॥ गोरोचनायुक्तगुडेन चैव देवं समालभ्य च पूजयेत्तु ॥ प्रीयस्व दीनोऽस्मि भवांस्त्वमीश मच्छोकनाशं प्रकुरुष्व योग्यम् ॥ ४६ ॥ ततस्तु फाल्गुने मासि कृष्णाष्टम्यां यतव्रतैः ॥ उपवासं समुदितं कर्त्तव्यं द्विजसत्तम ॥ ४७ ॥ द्वितीयेऽह्नि ततः स्नानं पञ्चगव्येन कारयेत् ॥ पूजयेत्कुन्दकुसुमैर्धूपयेच्चन्दनेन च ॥ ४८ ॥ नैवेद्यं सघृतं दद्यात्ताम्रपात्रे गुडौदनम् ॥ दक्षिणां च द्विजातिभ्यो नैवेद्यैः सहितां मुने ॥ ४९ ॥ वासोयुगं प्रीणयेच्च रुद्रमुच्चार्य नामतः ॥ चैत्रे चौदुम्बरजलैः स्नानं मन्दारकार्चनम् ॥ ५० ॥ गुग्गुलुं महिषाख्यं च घृताक्तं धूपयेद् बुधः ॥ समोदकं तथा सर्पिः प्रीणनं विनिवेदयेत् ॥ ५१ ॥ दक्षिणा च सनैवेद्या मृगाजिनमुदाहृतम् ॥ नागेश्वर नमस्तेऽस्तु इदमुच्चार्य नारद ॥ ५२ ॥ प्रीगनं देवनाथाय कुर्याच्छ्रद्धासमन्वितः ॥ वैशाखे स्नानमुदितं सुगन्धकुसुमाम्भसा ॥ ५३ ॥ पूजनं शंकरस्योक्तं चूतमञ्जरिभिर्विभोः ॥ धूपः सर्ज्जस्य निर्यासो नैवेद्यं सफलं घृतम् ॥ ५४ ॥ नाम जप्यमपीशस्य शालेशेति विपश्चिता ॥ जलकुम्भान्सनैवेद्यान्ब्राह्मणाय निवेदयेत् ॥ ५५ ॥ सवस्त्रांश्चैव सान्नाद्यांस्तच्चित्तैस्तत्परायणैः ॥ ज्येष्ठे स्नानं चामलकैः पूजाऽर्ककुसुमैस्तथा ॥ ५६ ॥ पूजयेद्रुद्रनेत्रं च वृषाङ्कं व्युष्टिकारकम् ॥ सक्तूंश्च सघृतान्देवे दद्यात्कालविनिवेदयेत् ॥ ५७ ॥ उपानद्युगलं छत्रं दानं दद्याच्च



१ क्लीबत्वमार्षम् ।

भक्तिमान् ॥ नमस्ते भगनेत्रघ्न पूष्णो दशननाशन ॥ ५८ ॥ इदमुच्चारयेद्भक्त्या प्रीणनाय जगत्पतेः ॥ आषाढे स्नानमुदितं
श्रीफलैरर्चनं तथा ॥ ५९ ॥ धत्तूरकुसुमैः शुक्लैर्धूपयेत्सल्लिके तथा ॥ नैवेद्यं सघृताः पूपाः दक्षिणा सघृता यवाः ॥ ६० ॥ नमस्ते
दक्षयज्ञघ्न इदमुच्चैरुदीरयेत् ॥ श्रावणे भृङ्गराजेन स्नानं कृत्वाऽर्चयेद्धरम् ॥ ६१ ॥ श्रीवृक्षपत्रैः सफलैर्धूपं दद्यात्तथाऽगुरुम् ॥
नैवेद्यं सघृतं दद्याद्दधिपूर्वांश्च मोदकान् ॥ ६२ ॥ दध्योदनं सकृसरं माषधानाः सशष्कुलीः ॥ दक्षिणां श्वेतवृषभं धेनुं च कपिलां
शुभाम् ॥ ६३ ॥ कनकं रक्तवसनं प्रदद्याद्ब्राह्मणाय हि ॥ गङ्गाधरेति जप्तव्यं नाम शंभोश्च पण्डितैः ॥ ६४ ॥ अमीभिः षड्भि
रपरैर्मासैः पारणमुत्तमम् ॥ एवं संवत्सरं पूर्णं संपूज्य वृषभध्वजम् ॥ ६५ ॥ अक्षयाँल्लभते लोकान्महेश्वरवचो यथा ॥ इदमुक्तं
व्रतं पुण्यं सर्वपापहरं शुभम् ॥ स्वयं रुद्रेण देवर्षे तत्तथा न तदन्यथा ॥ ६६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे अशून्य
शयनद्वितीयाकालाष्टमीव्रतवर्णनं नाम षोडशोध्यायः ॥ १६ ॥ पुलस्त्य उवाच ॥ मासि चाश्वयुजि ब्रह्मन्यदा पद्मं प्रजापतेः ॥
नाभ्या नियाति हि तदा देवेष्वानान्यथाऽभवन् ॥ १ ॥ कन्दर्पस्य कराग्रे तु कदम्बश्चारुदर्शनः ॥ तेन तस्य परा प्रीतिः
कदम्बेन विवर्द्धते ॥ २ ॥ यक्षाणामधिपस्यापि मणिभद्रस्य नारद ॥ वटवृक्षः समभवत्तस्मिंस्तस्य रतिः सदा ॥ ३ ॥ महेश्वर
स्य हृदये धत्तूरविटपः शुभः ॥ संजातः स च शर्वस्य रतिकृत्तस्य नित्यशः ॥ ४ ॥ ब्रह्मणो मध्यतो देहाज्जातो मरकतप्रभः ॥
खदिरः कण्टकी श्रेयानभवद्विश्वकर्मणः ॥ ५ ॥ गिरिजायाः करतले कुन्दगुल्मस्त्वजायत ॥ गणाधिपस्य कुम्भस्थो राजते

स्य हृदये धत्तूरविटपः शुभः ॥ संजातः स च शर्वस्य रतिकृत्तस्य नित्यशः ॥ ४ ॥ ब्रह्मणो मध्यतो देहाज्जातो मरकतप्रभः ॥
खदिरः कण्टकी श्रेयानभवद्विश्वकर्मणः ॥ ५ ॥ गिरिजायाः करतले कुन्दगुल्मस्त्वजायत ॥ गणाधिपस्य कुम्भस्थो राजते

सिन्धुवारकः ॥ ६ ॥ यमस्य दक्षिणे पार्श्वे पालाशो दक्षिणोत्तरे ॥ कृष्णोदुम्बरको रौद्रो जातः क्षोभकरोऽव्ययः ॥ ७ ॥ स्कन्द
स्य बन्धुजीवश्च रवेरश्वत्थ एव च ॥ कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत् ॥८॥ नागानां मुखतो ब्रह्मञ्छरस्त
म्बो व्यजायत ॥ वासुकेर्विस्तृते पुच्छे पृष्ठे दूर्वा सितासिता ॥ ९ ॥ साध्यानां हृदये जातो वृक्षो हरितचन्दनः ॥ एवं जातेषु
सर्वेषु तेन तत्र रतिर्भवेत् ॥ १० ॥ तत्र रम्ये शुभे काले या शुक्लैकादशी भवेत् ॥ तस्यां संपूजयेद्विष्णुं तेनाखण्डोऽयमूर्ज्जते
॥ ११ ॥ पत्रैः पुष्पैः फलैर्वाऽपि गन्धवर्णरसान्वितैः ॥ ओषधीभिश्च मुख्याभिर्यावत्स्याच्छरदागमः ॥ १२ ॥ घृतं तिला
व्रीहियवा हिरण्यं कनकादि यत् ॥ मणिमुक्ताप्रवालानि वस्त्राणि विविधानि च ॥ १३ ॥ रसानि स्वादुकट्वम्लकषायलव
णानि च ॥ तिक्तानि च निवेद्यानि तान्यखण्डानि यानि च ॥ १४ ॥ तत्पूजार्थं प्रदातव्यं केशवाय महात्मने ॥ यावत्सं
वत्सरं पूर्णमखण्डं प्रभवेद्गृहे ॥ १५ ॥ कृतोपवासो देवर्षे द्वितीयेऽहनि संयतः ॥ स्नानेन येन स्नायीत तेनाखण्डं हि
वत्सरम् ॥ १६ ॥ सिद्धार्थकैस्तिलैर्वाऽपि तेनैवोद्वर्त्तनं स्मृतम् ॥ हविषा पद्मनाभस्य स्नानमेवं समाचरेत् ॥ १७ ॥ होमस्तेनैव
गदितो दाने शक्तिर्निजा द्विज ॥ पूजयेद्वाऽथ कुसुमैः पादादारभ्य केशवम् ॥ १८ ॥ धूपयेद्विविधं धूपं येन स्याद्वत्सरं परम् ॥
हिरण्यरत्नवासोभिः पूजयेच्च जगद्गुरुम् ॥ १९ ॥ रागखण्डवचोष्याणि हविष्याणि निवेदयेत् ॥ ततः संपूज्य देवेशं पद्मनाभं
जगद्गुरुम् ॥ २० ॥ विज्ञापयेन्मुनिश्रेष्ठ मन्त्रेणानेन सुव्रत ॥ नमोऽस्तु ते पद्मनाभ पद्माधव महाद्युते ॥ २१ ॥ धर्मार्थकाम

० पु०
२६॥

भक्तिमान् ॥ नमस्ते भगनेत्रघ्न पूष्णो दशननाशन ॥ ५८ ॥ इदमुच्चारयेद्भक्त्या प्रीणनाय जगत्पतेः ॥ आषाढे स्नानमुदितं श्रीफलैरर्चनं तथा ॥ ५९ ॥ धत्तूरकुसुमैः शुक्लैर्धूपयेत्सल्लिके तथा ॥ नैवेद्यं सघृताः पूपाः दक्षिणा सघृता यवाः ॥ ६० ॥ नमस्ते दक्षयज्ञघ्न इदमुच्चैरुदीरयेत् ॥ श्रावणे भृङ्गराजेन स्नानं कृत्वाऽर्चयेद्धरम् ॥ ६१ ॥ श्रीवृक्षपत्रैः सफलैर्धूपं दद्यात्तथाऽगुरुम् ॥ नैवेद्यं सघृतं दद्याद्दधिपूर्वांश्च मोदकान् ॥ ६२ ॥ दध्योदनं सकृसरं माषधानाः सशष्कुलीः ॥ दक्षिणां श्वेतवृषभं धेनुं च कपिलां शुभाम् ॥ ६३ ॥ कनकं रक्तवसनं प्रदद्याद्ब्राह्मणाय हि ॥ गङ्गाधरेति जप्तव्यं नाम शंभोश्च पण्डितैः ॥ ६४ ॥ अमीभिः षड्भिरपरैर्मासैः पारणमुत्तमम् ॥ एवं संवत्सरं पूर्णं संपूज्य वृषभध्वजम् ॥ ६५ ॥ अक्षयाँल्लभते लोकान्महेश्वरवचो यथा ॥ इदमुक्तं व्रतं पुण्यं सर्वपापहरं शुभम् ॥ स्वयं रुद्रेण देवर्षे तत्तथा न तदन्यथा ॥ ६६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे अशून्यशयनद्वितीयाकालाष्टमीव्रतवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ पुलस्त्य उवाच ॥ मासि चाश्वयुजि ब्रह्मन्यदा पद्मं प्रजापतेः ॥ नाभ्या निर्याति हि तदा देवोद्यानान्यथाऽभवन् ॥ १ ॥ कन्दर्पस्य कराग्रे तु कदम्बश्चारुदर्शनः ॥ तेन तस्य परा प्रीतिः कदम्बेन विवर्द्धते ॥ २ ॥ यक्षाणामधिपस्यापि मणिभद्रस्य नारद ॥ वटवृक्षः समभवत्तस्मिंस्तस्य रतिः सदा ॥ ३ ॥ महेश्वरस्य हृदये धत्तूरविटपः शुभः ॥ संजातः स च शर्वस्य रतिकृत्तस्य नित्यशः ॥ ४ ॥ ब्रह्मणो मध्यतो देहाज्जातो मरकतप्रभः ॥ खदिरः कण्टकी श्रेयानभवद्विश्वकर्मणः ॥ ५ ॥ गिरिजायाः करतले कुन्दगुल्मस्त्वजायत ॥ गणाधिपस्य कुम्भस्थो राजते

अ०
१७

॥ २६

स्य हृदये धत्तूरविटपः शुभः ॥ सजातः स च शर्वस्य रतिकृत्तस्य नित्यशः ॥ ४ ॥ ब्रह्मणो मध्यतो देहाज्जातो मरकतप्रभः ॥
खदिरः कण्टकी श्रेयानभवद्विश्वकर्मणः ॥ ५ ॥ गिरिजायाः करतले कुन्दगुल्मस्त्वजायत ॥ गणाधिपस्य कुम्भस्थो राजते
सिन्धुवारकः ॥ ६ ॥ यमस्य दक्षिणे पार्श्वे पालाशो दक्षिणोत्तरे ॥ कृष्णोदुम्बरको रौद्रो जातः क्षोभकरोऽव्ययः ॥ ७ ॥ स्कन्द
स्य बन्धुजीवश्च रवेरश्वत्थ एव च ॥ कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत् ॥८॥ नागानां मुखतो ब्रह्मञ्छरस्त
म्बो व्यजायत ॥ वासुकेर्विस्तृते पुच्छे पृष्ठे दूर्वा सितासिता ॥ ९ ॥ साध्यानां हृदये जातो वृक्षो हरितचन्दनः ॥ एवं जातेषु
सर्वेषु तेन तत्र रतिर्भवेत् ॥ १० ॥ तत्र रम्ये शुभे काले या शुक्लैकादशी भवेत् ॥ तस्यां संपूजयेद्विष्णुं तेनाखण्डोऽयमूर्ज्जते
॥ ११ ॥ पत्रैः पुष्पैः फलैर्वाऽपि गन्धवर्णरसान्वितैः ॥ ओषधीभिश्च मुख्याभिर्यावत्स्याच्छरदागमः ॥ १२ ॥ घृतं तिला
व्रीहियवा हिरण्यं कनकादि यत् ॥ मणिमुक्ताप्रवालानि वस्त्राणि विविधानि च ॥ १३ ॥ रसानि स्वादुकट्वम्लकषायलव
णानि च ॥ तिक्तानि च निवेद्यानि तान्यखण्डानि यानि च ॥ १४ ॥ तत्पूजार्थं प्रदातव्यं केशवाय महात्मने ॥ यावत्सं
वत्सरं पूर्णमखण्डं प्रभवेद्गृहे ॥ १५ ॥ कृतोपवासो देवर्षे द्वितीयेऽहनि संयतः ॥ स्नानेन येन स्नायीत तेनाखण्डं हि
वत्सरम् ॥ १६ ॥ सिद्धार्थकैस्तिलैर्वाऽपि तेनैवोद्वर्त्तनं स्मृतम् ॥ हविषा पद्मनाभस्य स्नानमेवं समाचरेत् ॥ १७ ॥ होमस्तेनैव
गदितो दाने शक्तिर्निजा द्विज ॥ पूजयेद्वाऽथ कुसुमैः पादादारभ्य केशवम् ॥ १८ ॥ धूपयेद्विविधं धूपं येन स्याद्वत्सरं परम् ॥
हिरण्यरत्नवासोभिः पूजयेच्च जगद्गुरुम् ॥ १९ ॥ रागखण्डवचोष्याणि हविष्याणि निवेदयेत् ॥ ततः संपूज्य देवेशं पद्मनाभं
जगद्गुरुम् ॥ २० ॥ विज्ञापयेन्मुनिश्रेष्ठ मन्त्रेणानेन सुव्रत ॥ नमोऽस्तु ते पद्मनाभ पद्माधव महाद्युते ॥ २१ ॥ धर्मार्थकाम

वा० पु०
॥ ३७ ॥

मोक्षा मे ह्यखण्डाः सन्तु केशव ॥ विकासिपद्मपत्राक्ष यथाऽखण्डोऽसि सर्वतः॥२२॥तेन सत्येन धर्माद्यास्त्वखण्डाः सन्तु केशव॥
एवं संवत्सरं पूर्णं सोपवासो जितेन्द्रियः ॥ २३ ॥ अखण्डं पारयेद्व्रह्मंस्तं व्रतं सर्ववस्तुषु ॥ अस्मिंश्चीर्णे हि व्यक्तं तु परितुष्य
न्ति देवताः ॥ २४ ॥ धर्मार्थकाममोक्षाद्यास्त्वक्षयाः संभवन्ति हि ॥ एतानि ते मयोक्तानि व्रतान्युक्तानि कामिभिः ॥ २५ ॥
प्रवक्ष्याम्यधुना त्वेतद्वैष्णवं पञ्जरं शुभम् ॥ नमो नमस्ते देवेश चक्रं गृह्य सुदर्शनम् ॥ २६ ॥ प्राच्यां रक्षस्व मां विष्णो त्वामहं
शरणं गतः ॥ गदां कौमोदकीं गृह्य पद्मनाभामितद्युते ॥ २७ ॥ याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ॥ पद्ममादाय
सगदं नमस्ते पुरुषोत्तम ॥ २८ ॥ प्रतीच्यां रक्ष मां विष्णो त्वामहं शरणं गतः ॥ मुसलं शातनं गृह्य पुण्डरीकाक्ष रक्ष माम्
॥ २९ ॥ उत्तरस्यां जगन्नाथ भवन्तं शरणं गतः ॥ शार्ङ्गमादाय च धनुरस्त्रं नारायणं हरे ॥ ३० ॥ नमस्ते रक्ष रक्षोघ्न
ईशान्यां शरणं गतः ॥ पाञ्चजन्यं महाशङ्खमनुबोध्य च पङ्कजम् ॥ ३१ ॥ प्रगृह्य रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर ॥
चर्मसूर्यशतं गृह्य खड्गं चर्मसमं तथा ॥ ३२ ॥ नैर्ऋत्यां मां च रक्षस्व दिव्यमूर्ते नृकेसरिन् ॥ वैजयन्तीं प्रगृह्य त्वं श्रीवत्सं
कण्ठभूषणम् ॥ ३३ ॥ वायव्यां रक्ष मां देव अश्वशीर्ष नमोऽस्तु ते ॥ वैनतेयं समारुह्य अन्तरिक्षे जनार्दन ॥ ३४ ॥ मां त्वं
रक्षाजित सदा नमस्ते त्वपराजित ॥ विशालाक्षं समारुह्य रक्ष मां त्वं रसातले ॥ ३५ ॥ अकूपार नमस्तुभ्यं महामीन नमोऽस्तु
ते ॥ करशीर्षाद्यङ्घ्रिसर्वेषु तथाऽष्टबाहुपञ्जरम् ॥ ३६ ॥ कृत्वा रक्षस्व मां देव नमस्ते पुरुषोत्तम ॥ एतदुक्तं भगवता वैष्णवं पञ्जरं

रक्षाजित सदा नमस्ते त्वपराजित ॥ विशालाक्ष समारुह्य रक्ष मां त्वं रसातले ॥ ३५ ॥ अकूपार नमस्तुभ्यं महामीन नमोऽस्तु
ते ॥ [illegible] ॥ ३६ ॥ कृत्वा रक्षस्व मां देव नमस्ते पुरुषोत्तम ॥ एतदुक्तं भगवता वैष्णवं पञ्जरं

महत् ॥ ३७ ॥ पुरा रक्षार्थमीशेन कात्यायन्यै द्विजोत्तम ॥ नाशयामास सा यत्र दानवं महिषासुरम् ॥ नमरं रक्तबीजं च तथा
ऽन्यान्सुरकण्टकान् ॥ ३८ ॥ नारद उवाच ॥ कश्चासौ महिषो नाम रक्तबीजादयश्च के ॥ काऽसौ कात्यायनी नाम या जघ्ने
महिषासुरम् ॥ ३९ ॥ नमरं रक्तबीजं च तथाऽन्यान्सुरकण्टकान् ॥ कश्चासौ महिषो नाम क्वास्ते जातश्च कस्य सः ॥ ४० ॥
कश्चासौ रक्तबीजाख्यो नमरः कस्य चात्मजः ॥ एतद्विस्तरतस्तात यथावद्वक्तुमर्हसि ॥ ४१ ॥ पुलस्त्य उवाच ॥ श्रूयतां संप्रव
क्ष्यामि कथां पापप्रणाशनीम् ॥ सर्वदा वरदा दुर्गा येयं कात्यायनी मुने ॥ ४२ ॥ पुराऽसुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ॥
रम्भश्चैव करम्भश्च द्वावास्तां सुमहाबलौ ॥ ४३ ॥ तावपुत्रौ च देवर्षे पुत्रार्थं तेपतुस्तपः ॥ बहून्वर्षगणान्दैत्यौ स्थितौ पञ्चनदे
जले ॥ ४४ ॥ तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमः ॥ करम्भश्चैव रम्भश्च यक्षं मालवटं प्रति ॥ ४५ ॥ एकं निमग्नं
सलिले ग्राहरूपेण वासवः ॥ चरणाभ्यां समादाय निजघान यथेच्छया ॥ ४६ ॥ ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ॥
वह्नौ स्वशीर्षं संछिद्य होतुमैच्छन्महाबलः ॥ ४७ ॥ ततः प्रगृह्य केशेषु खड्गं च रविसप्रभम् ॥ छेत्तुकामो निजं शीर्षं वह्निना
प्रतिषेधितः ॥ ४८ ॥ उक्तश्च मा दैत्यवर नाशयात्मानमात्मना ॥ दुस्तरा परवध्याऽपि स्ववध्याऽप्यतिदुस्तरा ॥ ४९ ॥
यच्च प्रार्थयसे वीर तद्ददामि यथेप्सितम् ॥ मा म्रियस्व मृतस्येह नष्टा भवति वै कथा ॥ ५० ॥ ततोऽब्रवीद्वचो रम्भो



१ कुत्रचिल्लामरमित्यपि पाठो दृश्यते ।

वा०पु०

॥ ३८ ॥

वरं चेन्मे ददासि हि ॥ त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाऽधिकः ॥ ५१ ॥ अजेयो देवतैः सर्वैर्युधि दैत्यश्च पावक ॥ महाबलो वायुरिव कामरूपी कृतास्त्रवित् ॥ ५२ ॥ तं प्रोवाच कविर्ब्रह्मन्बाढमेवं भविष्यति ॥ यस्यां चित्तं समालम्ब्य मरिष्यति ततोऽसुरः ॥५३॥ इत्येवमुक्तो देवेन वह्निना दानवो ययौ ॥ द्रष्टुं मालवटं यक्षं यक्षैश्च परिवारितम् ॥५४॥ तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः ॥ गजाश्च महिषाश्चाश्वा गावोऽजा विपरिप्लुताः ॥५५॥ तान्दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः ॥ महिष्यां भावयुक्तायां त्रिहायण्यां तपोधन ॥५६॥ सा समागाच्च दैत्येन्द्रं कामयन्ती तरस्विनी ॥ स चापि गमनं चक्रे भवितव्यप्रचोदितः ॥ ५७ ॥ तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः ॥ पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥ ५८ ॥ पृष्टश्च दानवैः सर्वैः परित्यक्तश्च बन्धुभिः ॥ अकार्यकारी चेत्येवं भूयो मालवटं गतः ॥ ५९॥ साऽपि तेनैव पतिना महिषी चारुदर्शना ॥ समं जगाम तत्पुण्यं यक्षमण्डलमुत्तमम् ॥ ६० ॥ ततस्तु वसतस्तस्य श्यामा साधुवने मुने॥ अजीजनत्सुतं शुभ्रं महिषं कामरूपिणम् ॥ ६१ ॥ एतामृतुमतीं जातां महिषोऽन्यो ददर्श ताम् ॥ सा चाभ्यगाद्दितिवरं रक्षन्ती शीलमात्मनः ॥६२॥ तमुन्नामितनासं च महिषं वीक्ष्य दानवः ॥ खड्गं निष्कृष्य तरसा महिषं तमुपाद्रवत् ॥ ६३ ॥ तेनापि दैत्यस्तीक्ष्णाभ्यां शृङ्गाभ्यां हृदि ताडितः ॥ निर्भिन्नहृदयो भूमौ पपात च ममार च ॥ ६४ ॥ मृते भर्तरि सा श्यामा यक्षाणां शरणं गता ॥ रक्षिता गुह्यकैः सार्धं निवार्य महिषं ततः ॥ ६५ ॥ ततो निवारितो यक्षैर्हयारिर्मदनातुरः ॥ निपपात सरो दिव्यं ततो दैत्योऽभवन्मृतः ॥ ६६ ॥ नमरो नाम विख्यातो महा

दया भूमौ पपात च ममार च ॥ ६४ ॥ मृतं भर्त्तारं सा श्यामा यक्षाणां शरणं गता ॥ रक्षिता गुह्यकैः साध्वी निवार्य महिषं ततः
॥ ६५ ॥ ततो निवारितो यक्षैर्हयारिर्मदनातुरः ॥ निपपात सरो दिव्यं ततो दैत्योऽभवन्मृतः ॥ ६६ ॥ नमरो नाम विख्यातो महा
बलपराक्रमः ॥ यक्षानाश्रित्य तस्थौ सा कालं गमयती वने ॥ ६७ ॥ स च दैत्येश्वरो यक्षैर्मालवटपुरस्सरैः ॥ चितामारोपितः सा
च श्यामा तं चारुहत्पतिम् ॥ ६८ ॥ ततोऽग्निमध्यादुत्तस्थौ पुरुषो रौद्रदर्शनः ॥ व्यद्रावयत्स तान्यक्षान्खड्गपाणिर्भयंकरः ॥ ६९ ॥
ततो हतास्तु महिषाः सर्व एव महात्मना ॥ विना संरक्षितारं हि महिषं रम्भनन्दनम् ॥ ७० ॥ स नामतः स्मृतो दैत्यो रक्तबीजो महा
मुने ॥ योऽजयत्सर्वतो देवान्सेन्द्ररुद्रार्कमारुतान् ॥ ७१ ॥ एवंप्रभावो दनुपुंगवोऽसौ तेजोऽधिकस्तत्र बभौ हयारिः ॥ राज्येऽभि
षिक्तश्च महासुरेन्द्रैर्विनिर्जितैः शम्बरतारकाद्यैः ॥ ७२ ॥ अशक्नुवद्भिः सहितैश्च देवैः सलोकपालैः सहुताशभास्करैः ॥ स्थानानि
मुक्तानि शशीन्द्रभास्करैस्तमश्च दूरे प्रतियोजितं च ॥ ७३ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे महिषासुरोत्पत्ति
र्नाम सप्तदशोऽध्यायः ॥ १७ ॥ पुलस्त्य उवाच ॥ ततस्तु देवा महिषेण निर्जिताः स्थानानि संत्यज्य सवाहनायुधाः ॥
जग्मुः पुरस्कृत्य पितामहं ते द्रष्टुं गदाचक्रधरं श्रियः पतिम् ॥ १ ॥ गत्वा त्वपश्यंश्च मिथः सुरोत्तमौ स्थितौ खगेन्द्रासनशंकरौ
हि ॥ दृष्ट्वा प्रणम्यैव च सिद्धिसाधकौ न्यवेदयंस्तन्महिषारिचेष्टितम् ॥ २ ॥ प्रभोऽश्विसूर्येन्द्रनिलाग्निवेधसां जलेशशक्रादि
सुराधिकारान् ॥ आक्रम्य नाकात्तु निराकृता वयं कृतावनिस्था महिषासुरेण ॥ ३ ॥ एतद्भवन्तौ शरणागतानां श्रुत्वा वचो
ब्रूत हितं सुराणाम् ॥ न चेद् व्रजामोऽद्य रसातलं हि संकाल्यमाना युधि दानवेन ॥ ४ ॥ इत्थं मुरारिः सह शंकरेण श्रुत्वा
वचो विप्लुतचेतसां हि ॥ दृष्ट्वाऽत्र चक्रे सहसैव कोपं कालाग्निकल्पो हरिरव्ययात्मा ॥ ५ ॥ ततोऽनु कोपान्मधुसूदनस्य सशंक

रस्यापि पितामहस्य ॥ तथैव शक्रादिषु दैवतेषु महद्धि तेजो वदनाद्विनिःसृतम् ॥ ६ ॥ तच्चैकतां पर्वतकूटसन्निभं जगाम तेजः प्रवराश्रमे मुने ॥ कात्यायनस्याप्रतिमेन तेजसा महर्षिणा तेज उपाकृतं च ॥ ७ ॥ तेनर्षिसृष्टेन च तेजसा वृतं ज्वलत्प्रकाशार्क सहस्रतुल्यम् ॥ तस्माच्च जाता तरलायताक्षी कात्यायनी योगविशुद्धदेहा ॥ ८ ॥ माहेश्वराद्वक्त्रमथो बभूव नेत्रत्रयं पावकतेजसा च ॥ याम्येन केशा हरितेजसा च भुजास्तथाऽष्टादश संप्रजज्ञिरे ॥ ९ ॥ सौम्येन युग्मं स्तनयोः सुसंहितं मध्यं तथैन्द्रेण च तेजसाऽभवत् ॥ उरूरुजङ्घे च नितम्बसंयुतौ जातौ जलेशस्य तु तेजसा हि ॥ १० ॥ पादौ च लोकप्रपितामहस्य पद्माभिकोशप्रतिमौ बभूवतुः ॥ दिवाकराणामपि तेजसाऽङ्गुलीः कराङ्गुलीर्वासवतेजसा च ॥ ११ ॥ प्रजापतीनां दशनाश्च तेजसा याक्षेण नासाश्रवणौ च मारुतात् ॥ साध्येन च भ्रूयुगलं सुकान्तिमत्कन्दर्पबाणासनसन्निभं बभौ ॥ १२ ॥ तच्चापि तेजोत्तममुत्तमं महन्नाम्ना पृथिव्यामभवत्प्रसिद्धा ॥ कात्यायनीत्येव तदा बभौ सा नाम्ना च तेनैव जगत्प्रसिद्धा ॥ १३ ॥ ददौ त्रिशूलं वरदस्त्रिशूली चक्रं मुरारिर्वरुणश्च शङ्खम् ॥ शक्तिं हुताशः श्वसनश्च चापं तूणं तथाऽक्षय्यशरौ विवस्वान् ॥ १४ ॥ वज्रं तथेन्द्रः सह घण्टया च यमोऽथ दण्डं धनदो गदां च ॥ ब्रह्माऽक्षमालां सकमण्डलुं च कालोऽसिमुग्रं सह चर्मणा च ॥ १५ ॥ हारं च सोमः सह चामरेण मालां समुद्रो हिमवान्मृगेन्द्रम् ॥ चूडामणिं कुण्डलमर्द्धचन्द्रं प्रादात्कुठारं सुरशिल्पकर्त्ता ॥ १६ ॥ गन्धर्वराजो रजतानुलिप्तं पानस्य पूर्णं सदृशं च भाजनम् ॥ भुजङ्गहारं भुजगेश्वरोऽपि अम्लानपुष्पामृतवः स्रजं च ॥ १७ ॥ तदाऽतितुष्टा सुरसत्तमा सा अट्टाट्टहासं मुमुचे

... ॥ १८ ॥ नमोऽस्तु देव्यै सुरपूजितायै या संस्थिता

न्मृगेन्द्रम् ॥ चूडामणिं कुण्डलमर्द्धचन्द्रं प्रादात्कुठारं सुरशिल्पकर्त्ता ॥ १६ ॥ गन्धर्वराजो रजतानुलिप्तं पानस्य पूर्णं सदृशं

च भाजनम् ॥ भुजङ्गहारं भुजगेश्वरोऽपि अम्लानपुष्पामृतवः स्रजं च ॥ १७ ॥ तदाऽतितुष्टा सुरसत्तमा सा अट्टाट्टहासं मुमुचे

त्रिनेत्रा ॥ तां तुष्टुवुर्देववराः सहेन्द्राः सविष्णुरुद्रेन्दुनिलाग्निभास्कराः ॥ १८ ॥ नमोऽस्तु देव्यै सुरपूजितायै या संस्थिता

योगविशुद्धदेहा ॥ निद्रास्वरूपेण महीं वितत्य तृष्णात्रपाक्षुद्भयदा च कान्तिः ॥ १९ ॥ श्रद्धा स्मृतिः पुष्टिरथो क्षमा च छाया

च शक्तिः कमलालया च ॥ मेधा स्मृतिः क्षान्तिरथेह माया नमोऽस्तु देव्यै भवितव्यतायै ॥ २० ॥ ततः स्तुता देववरैर्मृगेन्द्र

मारुह्य देवी प्रगता वनाद्यम् ॥ विन्ध्यं महापर्वतमुच्चशृङ्गं चकार यं निम्नतरं त्वगस्त्यः ॥ २१ ॥ नारद उवाच ॥ किमर्थमद्रिं

भगवानगस्त्यस्तं निम्नशृङ्गं कृतवान्महर्षिः ॥ कस्मै कृते केन च कारणेन एतद्वदस्वामलसत्त्ववृत्ते ॥ २२ ॥ पुलस्त्य उवाच ॥

पुरा हि विन्ध्येन दिवाकरस्य गतिर्निरुद्धा गगनेचरस्य ॥ रविस्ततः कुम्भभवं समेत्य होमावसाने वचनं बभाषे ॥ २३ ॥

समागतोऽहं द्विज दूरतस्त्वां कुरुष्व विश्वोद्धरणं मुनीन्द्र ॥ ददस्व दानं मम यन्मनीषितं चरामि येन त्रिदिवेषु निर्वृतः ॥ २४ ॥

इत्थं दिवाकरवचो गुणसंप्रयोगि श्रुत्वा तदा कलशजो वचनं बभाषे ॥ दानं ददामि तव यन्मनसस्त्वभीष्टं नार्थी प्रयाति

विमुखो मम कश्चिदेव ॥ २५ ॥ श्रुत्वा वचोऽमृतमयं कलशोद्भवस्य प्राह प्रभुः करतलं विनिधाय मूर्ध्नि ॥ एषोऽद्य मे गिरिवरः

प्ररुणद्धि मार्गं विन्ध्यश्च निम्नकरणे भगवन्यतस्व ॥ २६ ॥ इति रविवचनादथाह कुम्भजन्मा कृतमिति विद्धि मया हि

नीचशृङ्गम् ॥ तव किरणजितो भविष्यति महीध्रो मम चरणसमाश्रितस्य का व्यथा ते ॥ २७ ॥ इत्येवमुक्त्वा कलशो

द्भवस्तु सूर्यं हि संस्तूय विनम्रभक्त्या ॥ जगाम संत्यज्य हि दण्डकारण्यं तु श्रितस्त्वाचलं वृद्धवपुर्महर्षिः ॥ २८ ॥ गत्वा वच

आह मुनिर्महीध्रं याम्ये महातीर्थवरं सुपुण्यम् ॥ वृद्धोऽस्म्यशक्तश्च तवाधिरोढुं तस्माद्भवान्नीचतरोऽस्तु सद्यः ॥२९॥ इत्येवमुक्तो मुनिसत्तमेन स नीचशृङ्गस्त्वभवन्महीध्रः ॥ समाक्रमंश्चापि महर्षिमुख्यः प्रोल्लङ्घ्य विन्ध्यं त्विदमाह शैलम् ॥ ३० ॥ यावन्न भूयो निजमाव्रजामि महाश्रमं धौतवपुः सुतीर्थात् ॥ त्वया न तावत्त्विह वर्धितव्यं न चेद्विशप्स्येऽहमवज्ञया ते ॥ ३१ ॥ इत्येवमुक्त्वा भगवाञ्जगाम दिशं स याम्यां सहसाऽन्तरिक्षम् ॥ आक्रम्य तस्थौ सहितां तदाशां काले व्रजाम्यत्र यदा मुनीन्द्रः॥३२॥ तत्राश्रमं रम्यतरं हि कृत्वा संशुद्धजाम्बूनदतोरणान्तम् ॥ तत्राथ निक्षिप्य विदर्भपुत्रीं स्वमाश्रमं सौम्यमुपाजगाम ॥ ३३ ॥ ऋतावृतौ पर्वदिनेषु नित्यं तमम्बरे ह्याश्रममावसत्सः ॥ शेषं हि कालं स हि दण्डकास्थस्तपश्चचारामित कान्तिमान्मुनिः ॥३४॥ विन्ध्योऽपि दृष्ट्वाऽऽगमने महाश्रमं वृद्धिं न यात्येव भयान्महर्षेः ॥ नासौ निवृत्तेति मतिं विधाय स संस्थितो नीचतराग्रशृङ्गः ॥ ३५ ॥ एवं त्वगस्त्येन महाचलेन्द्रः स नीचशृङ्गो हि कृतो महर्षे ॥ तस्योर्ध्वशृङ्गे मुनिसंस्तुता सा दुर्गा स्थिता दानवनाशनार्थम् ॥ ३६ ॥ देवाश्च सिद्धाश्च महोरगाश्च विद्याधरा भूतगणाश्च सर्वे ॥ सर्वाप्सरोभिः प्रतिरामयन्तः कात्यायनीं तस्थुरपेतशोकाः ॥ ३७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमाहात्म्येऽष्टादशोऽध्यायः ॥ १८ ॥ पुलस्त्य उवाच ॥ ततस्तु तां तत्र तदा वसन्तीं कात्यायनीं शैलवरस्य शृङ्गे ॥ अपश्यतां दानवसत्तमौ द्वौ चण्डश्च मुण्डश्च तपस्विनीं भृशम् ॥१॥ दृष्ट्वैव शैलादवतीर्य शीघ्रमाजग्मतुः स्वं भवनं सुरारी ॥ दृष्टेः चतस्तौ महिषासुरस्य दूताविदं चण्डमुण्डौ दितीशम् ॥ २ ॥ स्वस्थो भवान्किंत्वसुरेन्द्र

वसन्ती कात्यायनी शैलवरस्य शृङ्गे ॥ अपश्यतां दानवसत्तमौ ...
शीघ्रमाजग्मतुः स्वं भवनं सुरारी ॥ दृष्ट्वा चतुस्तौ महिषासुरस्य दूताविदं चण्डमुण्डौ दितीशम् ॥ २ ॥ स्वस्थो भवान्किन्त्वसुरेन्द्र

साम्प्रतमागच्छ पश्याम च तत्र विन्ध्यम् ॥ तत्रास्ति देवी सुमहानुभावा कन्या सुरूपा सुरसुन्दरीणाम् ॥ ३॥ जितस्तया तोयध
रोऽलकैर्हि जितः शशाङ्को वदनेन तन्व्या ॥ नेत्रैस्त्रिभिस्त्रीणि हुताशनानि जितानि कण्ठेन जितस्तु शङ्खः ॥४॥ स्तनौ सुवृत्तावथ
निम्नचूचुकौ स्थितौ विजित्यैव गजस्य कुम्भौ ॥ त्वां सर्वजेतारमिति प्रतर्क्य कुचौ स्मरेणैव कृतौ सुदुर्गौ ॥ ५ ॥ पीनाः सश
स्त्राः परिघोपमाश्च भुजास्तथाऽष्टादश भान्ति तस्याः ॥ पराक्रमं वै भवतो विदित्वा कामेन यन्त्रा इव ते कृतास्तु ॥ ६ ॥ मध्यं
च तस्यास्त्रिवलीतरङ्गं विभाति दैत्येन्द्र सुरोमराजि ॥ भयात्तवारोहणकातरस्य कामेन सोपानमिव प्रयुक्तम् ॥ ७ ॥ सा रोमराजी
नितरां हि तस्या विराजते पीनकुचावलग्ना ॥ आरोहणे त्वद्भयकातरस्य स्वेदप्रवाहोऽसुर मन्मथस्य ॥ ८ ॥ नाभिर्गभीरा नितरां
विभाति प्रदक्षिणाऽस्याः परिवर्तमाना ॥ तस्यैव लावण्यगृहस्य मुद्रा कन्दर्पराज्ञा स्वयमेव दत्ता ॥ ९ ॥ विभाति रम्यं जघनं
मृगाक्ष्याः समन्ततो मेखलयाऽवघृष्टम् ॥ मन्ये ह्यहं कामनराधिपस्य प्राकारगुप्तं नगरं सुदुर्गम् ॥१०॥ वृत्तावरोमौ च मृदू कुमार्याः
शोभेत ऊरू समनुत्तमौ हि ॥ आवासनार्थं मकरध्वजेन जनस्य देशाविव सन्निविष्टौ ॥ ११ ॥ तज्जानुयुग्मं महिषासुरेन्द्र ह्यत्यु
न्नतं भाति तथैव तस्याः ॥ सृष्ट्वा विधाता हि निरूपणाय श्रान्तस्तथा हस्ततलौ ददौ हि ॥ १२ ॥ जङ्घे सुवृत्तेऽपि च रोमहीने
शुभे च दैत्येश्वर ते तदीये ॥ आनम्य लोकानिव निर्मिते येऽस्तूपं विजित्यैव कृते वरे हि ॥ १३ ॥ पादौ च तस्याः कमलो
दराभौ प्रयत्नतस्तौ हि कृतौ विधात्रा ॥ आज्ञाथि तस्या नखरत्नमाला नक्षत्रमाला गगने यथैव ॥ १४ ॥ एवं स्वरूपा दनुनाथ कन्या

महोग्रशस्त्राणि च धारयन्ती ॥ दृष्टा यथेष्टं न च वेद्मि का सा सुता तथा कस्यचिदेव बाला ॥ १५ ॥ तद्भूतले रत्नमनुत्तमं स्थितं स्वर्गं परित्यज्य महासुरेन्द्र ॥ गत्वाऽथ विन्ध्ये स्वयमेव पश्य कुरुष्व यत्तेऽभिमतं क्षमं च ॥ १६ ॥ श्रुत्वैव ताभ्यां महिषासुरस्तु देव्याः प्रवृत्तिं कमनीयरूपाम् ॥ चक्रे मतिं नात्र विचार्यमस्ति इत्येवमुक्त्वा महिषो महर्षे॥ १७ ॥ प्रागेव पुंसस्तु शुभाशुभानि स्थाने विधात्रा प्रतिपादितानि ॥ यस्मिन्यथा याति च सोऽथ विप्र स नीयते वा व्रजति स्वयं वा ॥ १८ ॥ ततोऽनु मुण्डं नमरं सचण्डं विडालनेत्रं कपिलं सबाष्कलम् ॥ उग्रायुधं विक्षुररक्तबीजौ समादिदेशाथ महासुरेन्द्रः ॥ १९ ॥ आहत्य भेरीं रणकर्कशास्ते स्वर्गं परित्यज्य महीधरं तु ॥ आगम्य मूले शिबिरं निवेश्य तस्थुश्च सज्जा दनुनन्दनास्ते ॥ २० ॥ ततस्तु दैत्यो महिषासुरेण संप्रेषितो दानवयूथपालः ॥ मयस्य पुत्रो रिपुसैन्यमर्दी स दुन्दुभिर्दुन्दुभिनिःस्वनस्तु ॥ २१ ॥ अभ्येत्य देवीं गगनस्थितोऽपि स दुन्दुभिर्वाक्यमुवाच विप्र ॥ कुमारि दूतोऽस्मि महासुरस्य रम्भात्मजस्याप्रतिमस्य युद्धे॥२२॥ कात्यायनी दुन्दुभिमित्युवाच एह्येहि दैत्येन्द्र भयं विमुञ्च ॥ वाक्यं च यद्रम्भसुतो बभाषे वदस्व तत्सत्यमपेतमोहः ॥ २३ ॥ ततस्तु वाक्याद्दितिजः शिवायास्त्यक्त्वाऽम्बरं भूमितले निषण्णः ॥ सुखोपविष्टः परमासने च रम्भात्मजेनोक्तमुवाच वाक्यम् ॥ २४ ॥ दुन्दुभिरुवाच ॥ एवं समाज्ञापयते सुरारिस्त्वां देवि दैत्यो महिषासुरस्तु ॥ यथाऽमरा हीनबलाः पृथिव्यां भ्रमन्ति युद्धे विजिता मया ते॥२५॥ स्वर्गो मही वायुपथाश्च वश्याः पातालमन्ये च महीश्वराद्याः ॥ इन्द्रोऽस्मि रुद्रोऽस्मि दिवाकरोऽस्मि



[illegible] बाले ॥ २६ ॥ न सोऽस्ति नाके न महीतले वा स्वर्गेऽपि पातालतलेऽपि युद्धे ॥ सर्वाणि मामद्य

॥ २४ ॥ दुन्दुभिरुवाच ॥ एवं समाज्ञापयत सुरारिस्त्वां देवि दैत्यो महिषासुरस्तु ॥ यथाऽमरा हीनबलाः पृथिव्यां भ्रमन्ति
युद्धे विजिता मया ते॥२५॥ स्वर्गो मही वायुपथाश्च वश्याः पातालमन्ये च महीश्वराद्याः ॥ इन्द्रोऽस्मि रुद्रोऽस्मि दिवाकरोऽस्मि

सर्वेषु लोकेष्वधिपोऽस्मि बाले ॥ २६ ॥ न सोऽस्ति नाके न महीतले वा स्वर्गेऽपि पातालतलेऽपि युद्धे ॥ सर्वाणि मामद्य
समागतानि वीर्यार्जितानीह विशालनेत्रे ॥ २७ ॥ स्त्रीरत्नमग्र्यं भवती च कन्या प्राप्तोऽस्मि शैलं तव कारणेन ॥ तस्मा
द्भजस्वैव जगत्पतिं मां पतिस्तवार्होऽस्मि विभुः प्रभुश्च ॥ २८ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ता दितिजेन दुर्गा कात्यायनी प्राह
मयस्य पुत्रम् ॥ सत्यं प्रभुर्दानवराट् पृथिव्यां सत्यं च युद्धे विजितामरश्च ॥ २९ ॥ किन्त्वस्ति दैत्येश कुलेऽस्मदीये
धर्मो हि शुल्काख्य इति प्रसिद्धः ॥ तं चेत्प्रदद्यान्महिषो ममाद्य भजामि सत्येन पतिं हयारिम् ॥ ३० ॥ श्रुत्वाऽथ
वाक्यं मयजोऽब्रवीच्च शुल्कं वदस्वायतपत्रनेत्रे ॥ दद्यात्स्वमूर्धानमपि त्वदर्थे किन्नाम शुल्कं च यदस्त्यलभ्यम् ॥ ३१ ॥
पुलस्त्य उवाच ॥ इत्येवमुक्ता दनुनायकेन कात्यायनी सस्वनमुन्नदित्वा ॥ विहस्य चैतद्वचनं बभाषे हिताय सर्वस्य
चराचरस्य ॥ ३२ ॥ श्रीदेव्युवाच ॥ कुलेऽस्मदीये शृणु दैत्य शुल्कं कृतं हि यत्पूर्वतरैः प्रसह्य ॥ यो जेष्यतेऽस्मत्कुलजां
रणाग्रे तस्याः पतिः सोऽपि भविष्यतीति ॥ ३३ ॥ पुलस्त्य उवाच ॥ तच्छ्रुत्वा वचनं देव्या दुन्दुभिर्दानवेश्वरः ॥ गत्वा
निवेदयामास महिषाय यथातथम् ॥ ३४ ॥ स चाभ्यगान्महातेजाः सर्वदैत्यपुरस्सरः ॥ आगत्य विन्ध्यशिखरं योद्धुकामः
सरस्वतीम् ॥३५॥ ततः सेनापतिर्दैत्यो चिक्षुरो नाम नारद ॥ सेनाग्रगामिनं चक्रे नमरं नाम दानवम् ॥३६॥ स चापि तेनाधिकृत
श्चतुरङ्गं समूर्जितम् ॥ बलैकदेशमादाय दुर्गां दुद्राव वेगवान् ॥३७॥ तमापतन्तं वीक्ष्याथ देवा ब्रह्मपुरोगमाः ॥ ऊचुर्वाक्यं महादेवीं

वा॰ पु॰

। ४२ ॥

वर्मबन्धनमाश्रय ॥३८॥ अथोवाच सुरान्दुर्गा न बध्नामि च देवताः ॥ कवचं कोऽत्र संतिष्ठेन्ममाग्रे दानवाधमः ॥३९॥ यदा न देव्या कवचं कृतं शस्त्रनिवारणम् ॥ तदा रक्षार्थमस्यास्तु विष्णुपञ्जरमुक्तवान् ॥४०॥ सा तेन रक्षिता ब्रह्मन्दुर्गा दानवसत्तमम् ॥ अवध्यं दैवतैः सर्वैर्महिषं प्रत्यपेषयत् ॥४१॥ एवं पुरा देववरेण शंभुना तद्वैष्णवं पञ्जरमायताक्ष्याः ॥ प्रोक्तं तया चापि हि पादघातैर्निषूदितोऽसौ महिषासुरेन्द्रः ॥४२॥ एवंप्रभावो द्विज विष्णुपञ्जरः सर्वासु रक्षास्वधिको हि गीतः ॥ कस्तस्य कुर्याद्युधि दर्पहानिं यस्य स्थितश्चेतसि चक्रपाणिः ॥४३॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमाहात्म्यपरिकीर्त्तनं नामैकोनविंशोऽध्यायः ॥१९॥ नारद उवाच ॥कथं कात्यायनी देवी सानुगं महिषासुरम् ॥ सवाहनं हतवती तथा विस्तरतो वद ॥ १ ॥ अयं च संशयो ब्रह्मन्हृदि मे परिवर्त्तते ॥ विद्यमानेषु शस्त्रेषु यत्पद्भ्यां तममर्दयत् ॥२॥ पुलस्त्य उवाच ॥ शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् ॥ वृत्तां देवयुगस्यादौ पुण्यां पापभयापहाम् ॥ ३ ॥ स एवमसुरः क्रुद्धः समापतत वेगवान् ॥ सगजाश्वरथो ब्रह्मन्दृष्टो देव्या यथेच्छया ॥ ४ ॥ ततो देवगणैर्दैत्यान्समानम्याथ कार्मुकम् ॥ ववर्ष देवी बाणौघैर्द्योरिवाम्बुदवृष्टिभिः ॥ ५ ॥ तद्धनु दानवे सैन्ये दुर्गया नमितं बलात् ॥ सुवर्णपुष्पं विबभौ विद्युदम्बुधरेष्विव ॥६॥बाणैः सुररिपूनन्यांस्ताडयामास सुव्रत ॥ गदया मुसलेनान्यान्स्वस्थानेभ्यो न्यपातयत ॥ ७ ॥ प्रकोष्ठ्यमसौ बहून्दैत्यान्केसरी कालसन्निभः ॥ विधुन्वन्केसरसटा निषूदयति दानवान् ॥ ८ ॥ कुलिशाभिहता दैत्याः शक्त्या निर्भिन्नवक्षसः ॥ लाङ्गलैर्दारितग्रीवा द्विधा कृताः परश्वधैः ॥९॥ [illegible]

[illegible] ॥ चेलुः पेतुश्च मत्ताश्च तत्यजुश्चापरे रणम् ॥ १० ॥ ते वध्यमाना रुद्रास्या दुर्गया दैत्यदानवाः ॥

अ

२०

॥ ४२

दानवान् ॥ ८ ॥ कुलिशाभिहता दैत्याः शक्त्या निर्भिन्नवक्षसः ॥ लाङ्गलैर्दारितग्रीवा द्विधा कृताः परश्वधैः ॥९॥ दण्डनिर्भि

न्नशिरसश्चक्रविच्छिन्नबन्धनाः ॥ चेलुः पेतुश्च मत्ताश्च तत्यजुश्चापरे रणम् ॥ १० ॥ ते वध्यमाना रुद्रास्या दुर्गया दैत्यदानवाः ॥ कालरात्रिं मन्यामाना दुद्रुवुर्भयपीडिताः ॥ ११ ॥ सेनान्यं भग्नमालोक्य दुर्गामग्रे तथा स्थिताम् ॥ दृष्ट्वा जगाम नमरो मत्तद्विरद संस्थितः ॥ १२ ॥ समागम्य च वेगेन देव्यां शक्तिं मुमोच ह ॥ त्रिशूलमपि सिंहाय प्राहिणोदानवो रणे ॥ १३ ॥ तावायान्तौ ततो देव्या हुङ्कारेणाथ भस्मसात् ॥ कृतौ ततो गजेन्द्रेण गृहीतो मध्यतो हरिः ॥ १४ ॥ अथोत्पत्य च वेगेन तलेनाहत्य दानवम् ॥ गतासुं कुञ्जरस्कन्धात्क्षिप्य देव्यै निवेदितः ॥ १५ ॥ गृहीत्वा दानवं युद्धे ब्रह्मन्कात्यायनी रुषा ॥ सव्येन पाणिनाऽऽभ्राम्य वादयत्पटहं यथा ॥ १६ ॥ ततोऽट्टहासं मुमुचे तादृशे वाद्यतां गते ॥ हास्यात्समुद्भवंस्तस्या भूता नानाविधाः क्रमात् ॥ १७ ॥ केचिद्व्याघ्रमुखा रौद्रा वृकाकारास्तथाऽपरे ॥ हयास्या महिषास्याश्च वराहवदनाः परे ॥ १८ ॥ आखुकुक्कुटवक्त्राश्च गोजाविकमुखास्तथा ॥ नानावक्त्राक्षिचरणा नानायुधधरास्तथा ॥ १९ ॥ गायन्त्यन्ये हसन्त्यन्ये क्रीडन्त्यन्ये तु संहताः ॥ वादयन्त्यपरे तत्र स्तुवन्त्यन्ये तथाम्बिकाम् ॥ २० ॥ सा तैर्भूतगणैर्देवी सार्धं तद्दानवं बलम् ॥ शातयामास चङ्क्रम्य यथा तृण्यां महाशनिः ॥ २१ ॥ सेनान्ये निहते तस्मिंस्तथा सेनाग्रगामिभिः ॥ चिक्षुरः सैन्यपालस्तु योधयामास देवताः ॥ २२ ॥ कार्मुकं दृढमाकर्णमाकृष्य रथिनां वरः ॥ ववर्ष शरजालानि यथा मेघो वसुन्धराम् ॥ २३ ॥ तान्दुर्गा स्वशरैश्छित्त्वा शरसंघान्सुपर्वभिः ॥ सौवर्णपुङ्खानपरान्छराञ्जग्राह षोडश ॥ २४ ॥ ततश्चतुर्भिश्चतुरस्तुरङ्गानपि भामिनी ॥ हत्वा सारथिमेकेन ध्वजमेकेन चिच्छिदे ॥ २५ ॥

ततस्तु सशरं चापं चिच्छेदैकेषुणाम्बिका ॥ छिन्ने धनुषि खड्गं च चर्म चाददवान्बली ॥ २६ ॥ तं खड्गं चर्मणा सार्द्धं दैत्यस्याधुन्वतो बलात् ॥ शरैश्चतुर्भिश्चिच्छेद ततः शूलं समाददे ॥२७॥ समुद्यम्य महाशूलं प्राद्रवत्स तथाऽम्बिकाम् ॥ क्रोष्टुको मुदितोऽरण्ये मृगराजवधूं यथा ॥ २८ ॥ तस्याभिपततः पादौ करौ शीर्षं च पञ्चभिः ॥ शरैश्चिच्छेद संक्रुद्धा न्यपतत्स हतोऽसुरः ॥ २९ ॥ तस्मिन्सेनापतौ क्षुण्णे तदोग्रास्यो महासुरः ॥ समाद्रवत वेगेन करालास्यास्तु दानवाः ॥ ३० ॥ बाष्कलश्चोद्धतश्चैव उग्रास्योऽथोग्रकार्मुकः ॥ दुर्द्धरो दुर्मुखश्चैव बिडालनयनोऽपरः ॥ ३१ ॥ एतेऽन्ये च महात्मानो दानवा बलिनां वराः ॥ कात्यायनीमाद्रवन्त नानाशस्त्रास्त्रपाणयः ॥ ३२ ॥ तान्दृष्ट्वा लीलया दुर्गा वीणां जग्राह पाणिना ॥ वादयामास हसती तथा डमरुकं वरम् ॥ ३३ ॥ यथा यथा वादयते देवी वाद्यानि तानि च ॥ तथा तथा भूतगणा नृत्यन्ति च हसन्ति च ॥ ३४ ॥ ततोऽसुराः शस्त्रधराः समभ्येत्य सरस्वतीम् ॥ अभ्यघ्नंस्तांश्च सा देवी जग्राह परमेश्वरी ॥ ३५ ॥ प्रगृह्य केशेषु महासुरांस्तानुत्पत्य सिंहात्तु नगस्य सानुम् ॥ ननर्त्त वीणां परिवादयन्ती पपौ च पानं जगतां जनित्री ॥ ३६ ॥ ततस्तु देव्या बलिनो महासुरा दोर्दण्डनिर्धूतविशीर्णदर्पाः ॥ विशस्त्रवस्त्रा व्यसवश्च जातास्ततस्तु तान्वीक्ष्य महासुरेन्द्रान् ॥ ३७ ॥ देव्या महौजा महिषासुरस्तु व्यद्रावयद्भूतगणान्खुराग्रैः ॥ तुण्डेन पुच्छेन तथौजसाऽन्यान्निःश्वासवातेन च भूतसंघान् ॥ ३८ ॥ विषाणकोट्या च परान्प्रमथ्य दुद्राव सिंहं प्रतिहन्तुकामः ॥ ततोऽम्बिका क्रोधवशं जगाम चिक्षेप [illegible] लीलया ॥ ३९ ॥ ततः स [illegible]

[illegible]गणान्खुराग्रैः ॥ तुण्डेन पुच्छेन तथौजसाऽन्यान्निःश्वासवातेन च भूतसंघान् ॥ ३८ ॥ विषाणकोट्या च परान्प्रमथ्य
दुद्राव सिंहं प्रतिहन्तुकामः ॥ ततोऽम्बिका क्रोधवशं जगाम [illegible] ॥ ३९ ॥ [illegible]

शृङ्गः क्षिप्रं गिरीन्भूमिमशीर्णयच्च ॥ संक्षोभयंस्तोयनिधीन्घनांश्च विध्वंसयन्प्राद्रवताथ दुर्गाम् ॥ ४० ॥ सा चाथ पाशेन बबन्ध
दुष्टं स चाप्यभूच्छिन्नकटः करीन्द्रः ॥ करं प्रचिच्छेद च हस्तिनोऽग्रं स चापि भूयो महिषोऽभिजातः ॥ ४१ ॥ ततोऽस्य शूलं
व्यसृजद्भवानी स शीर्णमूलो न्यपतत्पृथिव्याम् ॥ शक्तिं प्रचिक्षेप हुताशदत्तां सा कुण्ठिताग्रा न्यपतन्महर्षे ॥ ४२ ॥ चक्रं हरे
र्दानवचक्रहन्तुः क्षिप्तं च वक्रत्वमुपागतं हि ॥ गदां समाविध्य धनेश्वरस्य क्षिप्ताऽऽशु भग्ना न्यपतत्पृथिव्याम् ॥४३॥ जलेशपा
शोऽपि महासुरेण विषाणतुण्डाग्रखुरप्रणुन्नः ॥ निरस्यता कोपितया च मुक्तो दण्डस्तु याम्यो बहुखण्डतां गतः ॥ ४४ ॥ वज्रं
सुरेन्द्रस्य च विग्रहेऽस्य मुक्तं सुसूक्ष्मत्वमुपाजगाम ॥ संत्यज्य सिंहं महिषासुरस्य दुर्गाधिरूढा सहसैव पृष्ठम् ॥ ४५ ॥ पृष्ठ
स्थितायां महिषासुरोऽपि पोप्लूयते वीर्यमदान्मृडान्याम् ॥ सा चापि पद्भ्यां मृदुकोमलाभ्यां ममर्द तं क्लिन्नमिवाजिनं हि ॥४६॥
स मृद्यमानो धरणीधराभो देव्या बली हीनबलो बभूव ॥ ततोऽस्य शूलेन बिभेद कण्ठं तस्मात्पुमान्खड्गधरो विनिर्गतः ॥ ४७ ॥
निष्क्रान्तमात्रं हृदये पदा तमाहत्य संगृह्य कचेषु कोपात् ॥ शिरः प्रचिच्छेद वरासिनाऽस्य हाहाकृतं दैत्यबलं तदाऽभूत् ॥४८॥
सचण्डमुण्डाः समयाः सताराः सहासिलोम्ना भयकातराक्षाः॥ संताड्यमानाः प्रमथैर्भवान्याः पातालमेवाविविशुर्भयार्ताः॥४९॥
देव्या जयं देवगणा विलोक्य स्तुवन्ति देवीं स्तुतिभिर्महर्षे ॥ नारायणीं सर्वजगत्प्रतिष्ठां कात्यायनीं घोरमुखीं सुरूपाम् ॥५०॥

संस्तूयमाना सुरसिद्धसंघैः कात्यायनी सा हरपादमूले ॥ भूयो भविष्याम्यमरार्थमेव मुक्त्वा सुरांस्तान्प्रविवेश दुर्गा ॥ ५१ ॥

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमाहात्म्ये महिषासुरवधो नाम विंशतितमोऽध्यायः ॥ २० ॥ नारद उवाच ॥ पुलस्त्य कथ्यतां तावद्भूयो देव्याः समुद्भवः ॥ महत्कौतूहलं मेऽद्य विस्तराद्ब्रह्मवित्तम ॥ १ ॥ पुलस्त्य उवाच ॥ श्रूयतां कथयिष्यामि भूयोऽस्याः संभवं मुने ॥ शुम्भासुरवधार्थाय लोकानां हितकाम्यया ॥२॥ या सा हिमवतः पुत्री भवेनोढा तपोधन ॥ उमा नाम्ना च तस्याः सा कोशाज्जाता तु कौशकी ॥३॥ संभूय विन्ध्यं गत्वा च भूयो भूतगणैर्वृता ॥ शुम्भं चैव निशुम्भं च वधिष्यति वरायुधैः ॥४ ॥ नारद उवाच ॥ ब्रह्मंस्त्वया ममाख्याता मृता दक्षात्मजा सती ॥ संजाता हिमवत्पुत्रीत्येवं मे वक्तुमर्हसि ॥५॥ यथा हि पार्वती कोशात्समुद्भूता हि कौशिकी ॥ यथा हतवती शुम्भं निशुम्भं च महासुरम् ॥६॥ कस्य चेमौ सुतौ वीरौ ख्यातौ शुम्भनिशुम्भकौ ॥ एतन्मे तत्त्वतः सर्वं यथावद्वक्तुमर्हसि ॥७॥ भगवंस्त्वत्प्रसादेन देव्याश्चरितमुत्तमम् ॥ श्रुतं विस्तरतो ब्रूहि पार्वत्याः संभवं मुने ॥८॥ पुलस्त्य उवाच ॥ दिष्ट्या संकथयिष्यामि पार्वत्याः संभवं मुने ॥ शृणुष्वावहितो भूत्वा स्कन्दोत्पत्तिं च शाश्वतीम् ॥ ९ ॥ रुद्रः सत्यां प्रनष्टायां ब्रह्मचारिव्रते स्थितः ॥ निराश्रमत्वमापन्नस्तपस्तप्तुं व्यवस्थितः ॥ १० ॥ स चासीद्देवसेनानीर्दैत्यदर्पविनाशनः ॥ शिवरूपत्वमास्थाय सैनापत्यं समुत्सृजत् ॥ ११ ॥ ततो विनाकृता देवाः सेनानाथेन शंभुना ॥ दानवेन्द्रेण विक्रम्य निशुम्भेन पराजिताः ॥१२॥ ततो जग्मुः सुरेशानं द्रष्टुं चक्रगदाधरम् ॥ श्वेतद्वीपे महाहंसं प्रपन्नाः शरणं हरिम् ॥ १३ ॥ तानागतान्सुरान्दृष्ट्वा ततः शक्रपुरोगमान् ॥ विहस्य मेघगम्भीरं प्रोवाच पुरुषोत्तमः ॥ १४ ॥ किं जिताः स्थ सुरेन्द्रेण निशुम्भेन दुरात्मना ॥ येन सर्वे

गिता: ॥ १२॥ ततो जग्मुः सुरेशानं द्रष्टुं चक्रगदाधरम् ॥ श्वेतद्वीपं महाहंसं प्रपन्नाः शरणं हरिम् ॥ १३ ॥ तानागतान्सुरान्दृष्ट्वा ततः शक्रपुरोगमान् ॥ विहस्य मेघगम्भीरं प्रोवाच पुरुषोत्तमः ॥ १४ ॥ किं जिताः स्थ सुरेन्द्रेण निशुम्भेन दुरात्मना ॥ येन सर्वे

समेत्यैव मम पार्श्वमुपागताः ॥ १५ ॥ तद्युष्माकं हितार्थाय यद्वदामि सुरोत्तमाः ॥ तत्कुरुध्वं जयो यद्धि समाश्रित्य भवेत्ततः ॥ ॥ १६ ॥ य एते पितरो देवास्त्वग्निष्वात्तेति विश्रुताः ॥ अमीषां मानसी कन्या मेना नाम्नाऽस्ति देवता॥ १७ ॥ तामाराध्य महा तिथ्यां श्रद्धया परयाऽमराः ॥ प्रार्थयध्वं सतीमेनां प्रालेयाद्रिमहार्थतः ॥१८॥ तस्यां सा रूपसंयुक्ता भविष्यति तपस्विनी ॥ दक्ष कोपाद्यया मुक्तं मलवज्जीवितं प्रियम् ॥१९॥सा शंकरात्सतेजोंऽशं जनयिष्यति यं सुतम् ॥ स हनिष्यति दैत्येन्द्रं शुम्भं च सपदा नुगम् ॥२०॥ तस्माद्गच्छत पुण्यं तत्कुरुक्षेत्रं महाफलम् ॥ तत्र पृथूदके तीर्थे पूज्यन्तां पितरोऽव्ययाः ॥ २१ ॥ महातिथ्यां महापु पुण्ये यदि शत्रुपराभवम् ॥ भवनाथात्मना सर्वे इच्छथ क्रियतामिति ॥ २२ ॥ पुलस्त्य उवाच ॥ इत्युक्त्वा वासुदेवेन देवाः शक्रपुरोगमाः ॥ कृताञ्जलिपुटा भूत्वा पप्रच्छुः परमेश्वरम् ॥ २३ ॥ देवा ऊचुः ॥ किं तत्कुरुक्षेत्रमिति यत्र पुण्यं पृथूदकम् ॥ उद्भ वं तस्य तीर्थस्य भगवान्प्रब्रवीतु नः ॥ २४ ॥ केयं प्रोक्ता महापुण्या तिथीनामुत्तमा तिथिः ॥ यस्यां हि पितरो दिव्या अद्भिः पूज्याः प्रयत्नतः ॥ २५ ॥ ततः सुराणां वचनान्मुरारिः कैटभार्दनः ॥ कुरुक्षेत्रोद्भवं पुण्यं प्रोक्तवांस्तां तिथीमपि ॥ २६ ॥ श्रीभग वानुवाच ॥ सोमवंशोद्भवो राजा ऋक्षो नाम महाबलः ॥ कृतस्यादौ समभवदृक्षात्संवरणोऽभवत् ॥ २७ ॥ स च पित्रा निजे राज्ये बाल एवाभिषेचितः ॥ बाल्येऽपि धर्मनिरतो मद्भक्तश्च सदाऽभवत् ॥ २८ ॥ पुरोहितस्तु तस्यासीद्वसिष्ठो वरुणात्मजः ॥ स तमध्यापयामास साङ्गान्वेदानुदारधीः ॥ २९ ॥ ततो जगाम चारण्यं त्वनध्याये नृपात्मजः ॥ सर्वकर्मसु निक्षिप्य वसिष्ठं

तपसां निधिम् ॥ ३० ॥ ततो मृगस्य व्याक्षेपादेकाकी वाजिना वनम् ॥ वैभ्राजं स जगामाथ मनोन्मादेन तन्मुने ॥३१॥ ततस्तु कौतुकाविष्टः सर्वर्तुकुसुमे वने ॥ अवितृप्तः सुगन्धस्य समन्ताद्व्यचरद्वनम् ॥३२॥ स वनान्तं ददर्शाथ फुल्लकोकनदावृतम् ॥ कह्लारपद्मकुमुदैः कमलेन्दीवरैरपि ॥ ३३ ॥ तत्र क्रीडन्ति सततमप्सरोऽमरकन्यकाः ॥ तासां मध्ये ददर्शाथ कन्यां संवरणोऽधिकाम् ॥ ३४ ॥ दर्शनादेव स नृपः काममार्गणपीडितः ॥ तथा सा तं समीक्ष्यैव कामबाणातुराऽभवत् ॥ ३५॥ उभौ तौ पीडितौ मोहं जग्मतुः काममार्गणैः ॥ राजा चलासनो भूम्यां निपपात तुरङ्गमात् ॥३६॥ तमभ्येत्य महात्मानो गन्धर्वाः कामरूपिणः ॥ सिषिचुर्वारिणा तेन लब्धसंज्ञोऽभवत्क्षणात् ॥ ३७ ॥ सा चाप्सरोभिरुत्पाट्य नीता पितृकुलं निजम् ॥ ताभिराश्वासिता चापि मधुरैर्वचनाम्बुभिः ॥ ३८ ॥ स चाप्यारुह्य तुरगं प्रतिष्ठानं पुरोत्तमम् ॥ गतस्तु मेरुशिखरं कामचारी यथाऽमरः ॥३९॥ यदा प्रभृति सा दृष्टा चक्षुषा तपती गिरौ ॥ तदा प्रभृति नाश्नाति दिवा स्वपिति वा निशि ॥ ४० ॥ ततः सर्वविदव्यग्रो विदित्वा वरुणात्मजः ॥ तपतीतापितं वीरं पार्थिवं तपसां निधिः ॥४१॥ समुत्पत्य महायोगी गगनं रविमण्डलम् ॥ विवेश देवं तिग्मांशुं ददर्श स्यन्दने स्थितम् ॥ ४२ ॥ तं दृष्ट्वा भास्करं देवं ननाम द्विजसत्तमः ॥ प्रतिप्रणमितश्चासौ भास्करेणाप्यसावृषिः ॥ ४३ ॥ ज्वलज्जटाकलापोऽसौ दिवाकरसमीपगः ॥ शोभते वारुणिः श्रीमान्द्वितीय इव भास्करः ॥ ४४ ॥ ततः संपूजितोऽर्घाद्यैर्भास्करेण तपोधनः ॥ पृष्टश्चागमने हेतुं प्रत्युवाच दिवाकरम् ॥ ४५ ॥ समायातोऽस्मि देवेश याचितुं त्वां महाद्युते ॥

स्करेण तपोधनः ॥ पृष्टश्चागमने हेतुं प्रत्युवाच दिवाकरम् ॥ ४५ ॥ समायातोऽस्मि देवेश याचितुं त्वां महाद्युते ॥

सुतां संवरणस्यार्थे त्वं च तां दातुमर्हसि ॥ ४६ ॥ ततो वसिष्ठाय दिवाकरेण निवेदिता सा तपती तनूजा ॥
गृहागताय द्विजपुंगवाय राज्ञोऽर्थतः संवरणस्य चैव ॥४७॥ सावित्रमासाद्य वचो वसिष्ठः स्वमाश्रमं पुण्यमुपाजगाम ॥ सा चापि
संस्मृत्य नृपात्मजं तं कृताञ्जलिर्वारुणिमाह देवी ॥ ४८ ॥ तपत्युवाच ॥ ब्रह्मन्मयाखेदमुपेत्य यो हि सहाप्सरोभिः परिचा
रिकाभिः ॥ दृष्टो ह्यरण्येऽमरगर्भतुल्यो नृपात्मजो लक्षणतोऽपि जाने ॥४९॥ पादौ शुभौ चक्रगदासिचिह्नौ जङ्घे तथोरू करिहस्त
तुल्यौ ॥ कटिर्यथा केसरिणस्तथैव क्षामं च मध्यं त्रिवलीनिबद्धम् ॥ ५० ॥ ग्रीवास्य शङ्खाकृतिमादधाति भुजौ च पीनौ कठिनौ
सुदीर्घौ॥ हस्तौ तथा पद्मदलोद्भवाङ्कौ छत्राकृतिस्तस्य शिरो विभाति ॥५१॥ नीलाश्च केशाः कुटिलाश्च तस्य कर्णौ समांसौ सुसमा
च नासा ॥ दीर्घाश्च तस्याङ्गुलयः सुपर्वाः पद्मां कराभ्यां दशनाश्च शुभ्राः ॥५२॥ ससुन्नतः षड्भिरुदारवीर्यस्त्रिभिर्गभीरस्त्रिषु च
प्रलम्बः ॥ रक्तस्तथा सप्तसु राजपुत्रः कृष्णश्चतुर्भिस्त्रिभिरानतोऽपि ॥ ५३ ॥ द्वाभ्यां च शुक्लः सुरभिश्चतुर्भिः सन्त्येव पद्मानि
दशैव चास्य ॥ वृतः स भर्त्ता भगवन्हि पूर्वं तं राजपुत्रं परमं विचिन्त्य ॥ ५४ ॥ ददस्व मां नाथ तपस्विमुख्य गुणोपपन्नाय
समीहिताय ॥ स्नेहात्प्रकामं प्रवदन्ति सन्तो दातुं तथाऽन्यस्य विभो क्षमस्त्वम् ॥ ५५ ॥ देवदेव उवाच ॥ इत्येवमुक्तः सवि
तुश्च पुत्र्या ऋषिस्तदा ध्यानपरो बभूव ॥ जाने तमेवर्क्षसुतं सकामं मुदा श्रुतो वाक्यमिदं जगाद ॥ ५६ ॥ स एव पुत्रि क्षिति
पात्मजस्त्वया दृष्टः पुरा कामयसे यमद्य ॥ स एव चायाति ममाश्रमं वै ऋक्षात्मजः संवरणो हि नाम्ना ॥ ५७ ॥ अथाजगामैव

नृपस्य पुत्रस्तदाश्रमं ब्राह्मणपुंगवस्य ॥ दृष्ट्वा वसिष्ठं प्रणिपत्य मूर्ध्ना स्थितां त्वपश्यत्तपतीं नरेन्द्रः ॥ ५८ ॥ दृष्ट्वा च तां पद्मविशालनेत्रां संदृष्टपूर्वेयामिति व्यचिन्तयत् ॥ पप्रच्छ केयं ललना द्विजेन्द्र स वारुणिः प्राह नराधिपेन्द्रम् ॥ ५९ ॥ इयं विवस्वद्दुहिता नरेन्द्र नाम्ना प्रसिद्धा तपती पृथिव्याम् ॥ मया तवार्थाय दिवाकरोऽर्थितः प्रादान्मया त्वाश्रममापितेयम् ॥६०॥ तस्मात्समुत्तिष्ठ नरेन्द्र देव्याः पाणिं तपत्या विधिवद्गृहाण ॥ इत्येवमुक्तो नृपतिः प्रहृष्टो जग्राह पाणिं विधिवत्तपत्याः ॥ ६१ ॥ सा तं पतिं प्राप्य मनोऽभिरामं सूर्यात्मजा शक्रसमप्रभावम् ॥ रेमे च तेनैव गृहोत्तमेषु यथा महेन्द्रेण पुलोमजा दिवि ॥ ६२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे तापत्ये उमासंभवो नामैकविंशोऽध्यायः ॥ २१ ॥ देवदेव उवाच ॥ तस्यां तपत्यां नरसत्तमेन जातः सुतः पार्थिवलक्षणस्तु ॥ स जातकर्मादिभिरेव संस्कृतो ह्यवर्धताज्येन हुतो यथाऽग्निः ॥ १ ॥ कृतं च चूडाकरणं तु देवा विप्रेण मित्रावरुणात्मजेन ॥ नवाब्दिकस्य व्रतबन्धनं च वेदे च शास्त्रे विधिपारगोऽभूत् ॥२॥ ततश्चतुः षड्भिरपीह वर्षैः सर्वज्ञतामभ्यगमत्ततोऽसौ ॥ ख्यातः पृथिव्यां पुरुषोत्तमोऽसौ नाम्ना कुरुः संवरणस्य पुत्रः ॥ ३ ॥ ततो नरपतिर्दृष्ट्वा पुत्रं तं षोडशाब्दिकम् ॥ दारक्रियार्थमकरोद्यत्नं शुभकुले ततः ॥ ४ ॥ सौदाम्नीं च सुदाम्नस्तु सुतां रूपाधिकां नृपः ॥ कुरोरर्थाय वृतवान्स प्रादात्कुरवेऽपि ताम् ॥ ५ ॥ स तां नृपसुतां लब्ध्वा स्वधर्मानविरोधयन् ॥ रेमे तन्व्या सह तया पौलोम्या मघवानिव ॥ ६ ॥ ततो नरपतिः पुत्रं राज्यभारक्षमं बली ॥ विदित्वा यौवराज्याय विधानेनाभ्यषेचयत् ॥ ७ ॥ ततो राज्येऽभिषिक्तस्तु कुरुः

ततो नरपतिः पुत्रं राज्यभारक्षमं बली ॥ विदित्वा यौवराज्याय विधानेनाभ्यषेचयत ॥ ७ ॥ ततो राज्येऽभिषिक्तस्तु कुरुः पित्रा निज पदे ॥ स पालयामास महीं पुत्रवच्च प्रजाः स्वयम् ॥ ८ ॥ स एव क्षेत्रपालोऽभूत्पशुपालः स एव हि ॥ स एव राजपालश्च अजापालो महाबलः ॥ ९ ॥ ततोऽस्य बुद्धिरुत्पन्ना ह्यस्मिँल्लोके गरीयसी ॥ यावत्कीर्तिः सुसंस्था हि तावद्वासस्तया सह ॥ १० ॥ अस्त्वेवं नृपतिश्रेष्ठो याथातथ्यममन्यत ॥ विचचार महीं सर्वां कीर्त्यर्थं तु नराधिपः ॥ ११ ॥ ततो द्वैतवनं नाम पुण्यं लोकचरो वशी ॥ तदाऽसावतिसंतुष्टो विवेशाभ्यन्तरं ततः ॥ १२ ॥ तत्र देवीं ददर्शाथ पुण्यां पापविमोचिनीम् ॥ प्लक्षजां ब्रह्मणः पुत्रीं हरिजिह्वां सरस्वतीम् ॥ १३ ॥ सुदर्शनस्य जननीं ह्रदं कृत्वा सुविस्तृतम् ॥ तस्यास्तज्जलमासाद्य स्नात्वाप्रीतोऽभवन्नृपः ॥ १४ ॥ समाजगाम च पुनर्ब्रह्मणो वेदिमुत्तराम् ॥ स्यमन्तपञ्चकं नाम धर्मस्थानमनुत्तमम् ॥ १५ ॥ आसमन्ताद्योजनानि पञ्च पञ्च च सर्वतः ॥ देवा ऊचुः ॥ किमन्या वेदयो देव ब्रह्मणः पुरुषोत्तम ॥ १६ ॥ येनोत्तरतया वेदी गदिता सर्वपञ्चके ॥ हरिरुवाच ॥ वेदयो लोकनाथस्य पञ्चधर्मस्य सर्वतः ॥ १७ ॥ यासु चेष्टं सुरेशेन लोकनाथेन शंभुना ॥ प्रयागो मध्यमा वेदिः पूर्वा वेदिर्गया शिरः ॥ १८ ॥ विरजा दक्षिणा वेदिरनन्तफलदायिनी ॥ प्रतीची पुष्करा वेदिस्त्रिभिः कुण्डैरलंकृता ॥ १९ ॥ स्यमन्तपञ्चके चोक्ता वेदिरेवोत्तरा तथा ॥ तदमन्यत राजर्षिरिदं क्षेत्रं महाफलम् ॥ २० ॥ करिष्यामि कृषिष्यामि सर्वान्कामान्यथेप्सितम् ॥ इति संचिन्त्य मनसा त्यक्त्वा स्यन्दनमुत्तमम् ॥ २१ ॥ चक्रे कीर्त्यर्थमतुलं स्थानं तत्पार्थिवर्षभः ॥ कृत्वा सीरं ससौवर्णं गृह्य रुद्रवृषं प्रभुः ॥ २२ ॥ वोढारं याम्यमहिषं स्वयं कर्षितुमुद्यतः ॥ तं कर्षन्तं नरवरं समभ्येत्य शतक्रतुः ॥ २३ ॥ प्रोवाच

अ० पु०
राजन्किमिदं भवान्कर्तुमिहोद्यतः ॥ राजाऽब्रवीत्सुरवरं तपः सत्यं क्षमां दयाम् ॥ २४ ॥ कृषामि शौचदाने च योगं च ब्रह्मचारि
ताम् ॥ तं चोवाच हरिर्देवः कस्माद्बीजं नरेश्वर ॥ २५ ॥ लब्धं त्वयेति सहसा ह्यवहस्य गतस्ततः ॥ गतेऽपि शक्रे नृपतिरहन्य
हनि सीरधृक् ॥ २६ ॥ कृषतेऽन्यत्समन्ताच्च सप्त क्रोशान्महीपतिः ॥ ततोऽहमब्रुवं गत्वा कुरो किमिदमित्यथ ॥ २७ ॥ तदा
ऽष्टाङ्ग महाधर्मं समाख्यातं नृपेण हि ॥ ततो मयाऽस्य गदितं नृप बीजं क तिष्ठति ॥ २८ ॥ स चाह मम देहस्थं बीजं तमह
मब्रुवम् ॥ देह्यहं वापयिष्यामि सीरं कृषतु वै भवान् ॥ २९ ॥ ततो नृपतिना बाहुर्दक्षिणः प्रसृतः कृतः ॥ प्रसृतं तं भुजं दृष्ट्वा
महाचक्रेण वेगतः ॥ ३० ॥ सहस्रधा प्रचिच्छेद यस्मादेकभुजोऽभवत् ॥ ततः सव्यो भुजो राज्ञा दत्तश्छिन्नोऽप्यसौ मया ॥ ३१ ॥
तथैवोरुयुगं प्रादान्मया च्छिन्नौ च तावुभौ ॥ ततः स मे शिरः प्रादात्तेन प्रीतोऽस्मि तस्य च ॥ ३२ ॥ वरदोऽस्मीत्यथेत्युक्ते
कुरुर्वरमयाचत ॥ कुरुरुवाच ॥ यावदेतन्मया कृष्टं धर्मक्षेत्रं तदस्तु वः ॥ ३३ ॥ स्नातानां च मृतानां च महापुण्यफलं
त्विह ॥ उपवासश्च दानं च स्नानं जप्यं च माधव ॥ ३४ ॥ होमयज्ञादिकं चान्यच्छुभं वाऽप्यशुभं विभो ॥ त्वत्प्रसादाद्धृषी
केश शङ्खचक्रगदाधर ॥ ३५ ॥ अक्षयं प्रवरे क्षेत्र भवत्वत्र महाफलम् ॥ तथा भवान्सुरैः सार्द्धं समं देवेन शूलिना ॥ ३६ ॥
वसात्र पुण्डरीकाक्ष मन्नामव्यञ्जकेऽच्युत ॥ इत्येवमुक्तस्तेनाहं राज्ञा बाढमुवाच तम् ॥ ३७ ॥ तथा च त्वं दिव्यवपुर्भव भूयो

महीपते ॥ तथान्तकाले मय्येव लयमेष्यसि सुव्रत ॥ ३८ ॥ शाश्वती तव कीर्तिश्च भविष्यति न संशयः ॥ तत्र वै याजको
॥ तस्य क्षेत्रस्य रक्षार्थं ददौ स पुरुषोत्तमः ॥ यक्षं च चन्द्रनामानं वासुकिं

महीपते ॥ तथान्तकाले मय्येव लयमेष्यसि सुव्रत ॥ ३८ ॥ शाश्वती तव कीर्तिश्च भविष्यति न संशयः ॥ तत्र वै याजको

यज्ञान्यजिष्यसि सहस्रशः ॥ ३९ ॥ पुलस्त्य उवाच ॥ तस्य क्षेत्रस्य रक्षार्थं ददौ स पुरुषोत्तमः ॥ यक्षं च चन्द्रनामानं वासुकिं चापि पन्नगम् ॥ ४० ॥ विद्याधरं शङ्कुकर्णं सुकेशं राक्षसेश्वरम् ॥ अजावनं च नृपतिं महादेवं च पावकम् ॥ ४१ ॥ एतानि सर्वतोऽभ्येत्य रक्षन्ति कुरुजाङ्गलम् ॥ अमीषां बलिनोऽन्ये च भृत्याश्चैवानुयायिनः ॥ ४२ ॥ अष्टौ सहस्राणि धनुर्द्धराणां निवारयन्तीह सुदुष्कृतान्वै ॥ स्नातुं न यच्छन्ति महोग्ररूपास्त्वन्यस्य ते वीर चराचराणाम् ॥ ४३ ॥ तस्यैव मध्ये बहुपुण्ययुक्तं पृथूदकं पापहरं शिवं च ॥ पुण्या नदी प्राङ्मुखतां प्रयाता जलौघयुक्तस्य सुता जलाढ्या ॥ ४४ ॥ पूर्वं नदीयं प्रपितामहेन सृष्टा समं भूतगणैः समस्तैः ॥ मही जलं वह्निसमीरमेव खं त्वेवमादौ विबभौ पृथूदकम् ॥ ४५ ॥ सर्वे तथाऽतोयधयो महान्तस्तीर्थानि नद्यः स्रवणाः सरांसि ॥ संनिर्मितानीह महाभुजेन सदेवमार्गः सलिलं हि तेषु ॥ ४६ ॥ सरस्वतीदृषद्वत्योरन्तरे कुरुजाङ्गले ॥ मुनिप्रवरमासीनं पुराणं लोमहर्षणम् ॥ अपृच्छन्त द्विजवराः प्रभवं सुरसत्तमाः ॥ ४७ ॥ ऋषय ऊचुः ॥ प्रमाणं सरसो ब्रूहि तीर्थानां च विशेषतः ॥ देवतानां च माहात्म्यमुत्पत्तिं वामनस्य च ॥ ४८ ॥ एतच्छ्रुत्वा वचस्तेषां तान्द्विजाँल्लोमहर्षणः ॥ प्रणिपत्य पुराणर्षिमिदं वचनमब्रवीत् ॥ ४९ ॥ लोमहर्षण उवाच ॥ ब्रह्माणमीशं कमलासनस्थं विष्णुं च लक्ष्मीसहितं तथैव ॥ रुद्रं च देवं प्रणिपत्य मूर्ध्ना तीर्थं वरं ब्रह्मसरः प्रवक्ष्ये ॥ ५० ॥ रन्तुकादौजसं चापि पावनाच्च चतुर्मुखम् ॥ सरः सन्निहितं प्रोक्तं ब्रह्मणा पूर्वमेव तु ॥ ५१ ॥ कलिद्वापरयोर्मध्ये व्यासेन

च महात्मना ॥ सरः प्रमाणं यत्प्रोक्तं तच्छृण्वन्तु द्विजोत्तमाः ॥ ९२ ॥ विश्वेश्वराद्धस्तिपुरं तथा कन्या जरद्गवी ॥ यावदो
घवती प्रोक्ता तावत्संनिहितं सरः ॥ ५३ ॥ मया श्रुतं प्रमाणं तु कथ्यमानं तु वामनम् ॥ तच्छृण्वन्तु द्विजश्रेष्ठाः
पुण्यं वृद्धिकरं महत् ॥ ५४ ॥ विश्वेश्वराद्देववरात्पावनी च सरस्वती ॥ सरः सन्निहितं प्रोक्तं समन्तादर्द्धयोजनम् ॥ ५५ ॥
एतदाश्रित्य देवाश्च ऋषयश्च समागताः ॥ सेवन्ते मुक्तिकामार्थं स्वर्गार्थं चापरे स्थिताः ॥ ५६ ॥ ब्रह्मणा सेवितमिदं सृष्टि
कामेन योगिना ॥ विष्णुना स्थितिकामेन हरिरूपेण सेवितम् ॥ ५७ ॥ रुद्रेण च सरोमध्यं प्रविष्टेन महात्मना ॥ सेव्य तीर्थं
महातेजाः स्थाणुत्वं प्राप्तवान्हरः ॥ ५८ ॥ आद्यैषा ब्रह्मणो वेदिस्ततो रामह्रदः स्मृतः ॥ कुरुणा च यतः कृष्टं कुरुक्षेत्रं ततः
स्मृतम् ॥ ५९ ॥ तरन्तुकारन्तुकयोर्यदन्तरं यदन्तरं रामह्रदस्य पञ्चकात् ॥ एतत्कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते
॥ ६० ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये द्वाविंशोऽध्यायः ॥ २२ ॥ ऋषय ऊचुः ॥ ब्रूहि वामन
माहात्म्यमुत्पत्तिं च विशेषतः ॥ यथा बलिर्नियमितो दत्तं राज्यं शतक्रतोः ॥ १ ॥ लोमहर्षण उवाच ॥ शृण्वन्तु मुनयः
प्रीता वामनस्य महात्मनः ॥ उत्पत्तिं च प्रभावं च निवासं कुरुजाङ्गले ॥ २ ॥ तथैव वंशं दैत्यानां शृण्वन्तु द्विज
सत्तमाः ॥ यस्मिन्वंशे समभवद्बलिर्वैरोचनिः पुरा ॥ ३ ॥ दैत्यानामादिपुरुषो हिरण्यकशिपुर्भवत् ॥ तस्य पुत्रो महातेजाः
प्रह्लादो नाम दानवः ॥ ४ ॥ तस्माद्विरोचनो जज्ञे बलिर्जज्ञे विरोचनात् ॥ हते हिरण्यकशिपौ देवानस्मान्मर्वतः ॥ ५ ॥

सत्तमाः ॥ यस्मिन्वंशे समभवद्वालवीराचनिः पुरा ॥ ३ ॥ दैत्यानामादिपुरुषो हिरण्यकशिपुर्भवत् ॥ तस्य पुत्रो महातेजाः प्रह्लादो नाम दानवः ॥ ४ ॥ तस्माद्विरोचनो जज्ञे बलिर्जज्ञे विरोचनात् ॥ हते हिरण्यकशिपौ देवानुत्सार्य सर्वतः ॥ ५ ॥



राज्यं कृतं च तेनेष्टं त्रैलोक्ये सचराचरे ॥ कृतयज्ञेषु दैत्येषु त्रैलोक्ये दैत्यतां गते ॥ ६ ॥ जये तथा बलवतो मयशम्बरयोस्तथा ॥ शुद्धासु दिक्षु सर्वासु प्रवृत्ते धर्मकर्मणि ॥ ७ ॥ संप्रवृत्ते दैत्यपथे अयनस्थे दिवाकरे ॥ प्रह्लादशम्बरमयैरनुरागेण चैव हि ॥८॥ दिक्षु सर्वासु गुप्तासु गगने दैत्यपालिते ॥ वेदेषु मखशोभां च स्वर्गस्थां दर्शयत्सु च ॥ ९ ॥ प्रकृतिस्थे ततो लोके वर्त्तमाने च सत्पथे ॥ अभावे सर्वपापानां धर्मभावे सदोत्थिते ॥ १० ॥ चतुष्पादे स्थिते धर्मे ह्यधर्मे पादविग्रहे ॥ प्रजापालनयुक्तेषु भ्राजमानेषु राजसु ॥ स्वधर्मयुक्तेषु तथा सर्वेष्वाश्रमवासिषु ॥ ११ ॥ अभिषिक्तोऽसुरैः सर्वैर्दैत्यराज्ये बलिस्तदा ॥ हृष्टेष्वसुरसंघेषु नदत्सु मुदितेषु च ॥ १२ ॥ अथाभ्युपगता लक्ष्मीर्बलिं पद्मान्तरप्रभा ॥ पद्मोद्यतकरा देवी वरदा सुप्रवेशिनी ॥ १३ ॥ श्रीरुवाच ॥ बले बलवतां श्रेष्ठ दैत्यराज महाद्युते ॥ प्रीताऽस्मि तव भद्रं ते देवराजपराजये ॥ १४ ॥ यत्त्वया युधि विक्रम्य देवराजः पराजितः ॥ दृष्ट्वा ते परमं सत्त्वं ततोऽहं स्वयमागता ॥ १५ ॥ नाश्चर्यं दानवव्याघ्र हिरण्यकशिपोः कुले ॥ प्रसूतस्यासुरेन्द्रस्य तव कर्मेदमीदृशम् ॥ १६ ॥ विशेषितस्त्वया राजन्दैत्येन्द्रः प्रपितामहः ॥ येन भुक्तं हि निखिलं त्रैलोक्यमिदमव्ययम् ॥ १७ ॥ एवमुक्त्वा तु सा देवी लक्ष्मीर्दैत्यनृपं बलिम् ॥ प्रविष्टा वरदा सेव्या सर्वदेवमनोरमा ॥ १८ ॥ तुष्टाश्च देव्यः प्रवरा ह्रीः कीर्तिर्द्युतिरेव च ॥ प्रभा धृतिः क्षमा शक्तिर्ऋद्धिर्दिव्या महामतिः ॥ १९ ॥ श्रुतिर्विद्या स्मृतिः कीर्तिः शान्तिः पुष्टिस्तथा क्रिया ॥ सर्वाश्चाप्सरसो दिव्या नृत्तगीतविशारदाः ॥ २० ॥ प्रपद्यन्ते तु दैत्येन्द्रं त्रैलोक्यं सचराचरम् ॥ प्राप्तमैश्वर्यमतुलं

विष्णुना

लभेत् ॥ २९ ॥ पितामहस्य पिबतो ह्यमृतं पूर्वमेव हि ॥ उद्गारात्सुरभिर्जाता सा च पातालमाश्रिता ॥ ३० ॥ तस्याः सुरभयो जाता मातरो लोकमातरः ॥ ताभिस्तत्सकलं व्याप्तं पातालं सुनिरन्तरम् ॥ ३१ ॥ पितामहस्य यजतो दक्षिणार्थमुपाहृताः ॥ आहूता ब्राह्मणास्ते च विभ्रान्ता विवरेण हि ॥ ३२ ॥ तस्मिन्विवरद्वारे तु स्थितो गणपतिः स्वयम् ॥ यं दृष्ट्वा सकलान्कामान्प्राप्नोति नियतेन्द्रियः ॥ ३३ ॥ सङ्गिनीं तु समासाद्य तीर्थं मुक्तिसमाश्रयम् ॥ देव्यास्तीर्थे नरः स्नात्वा लभते रूपमुत्तमम् ॥ ३४ ॥ अनन्तां श्रियमाप्नोति पुत्रपौत्रैः समन्वितः ॥ भोगांश्च विपुलाँल्लब्ध्वा प्राप्नोति परमं पदम् ॥ ३५ ॥ ब्रह्मावर्ते नरः स्नात्वा ब्रह्मज्ञानसमन्वितः ॥ जायते नात्र संदेहः प्राणान्मुञ्चति चेच्छया ॥ ३६ ॥ ततो गच्छेद्धि विप्रेन्द्रा द्वारपालं च रन्तुकम् ॥ तत्र तीर्थे सरस्वत्या यक्षेन्द्रस्य महात्मनः ॥ ३७ ॥ तत्र ज्ञानं समासाद्य ह्युपवासपरायणः ॥ यक्षस्य च प्रसादेन लभते कामिकं फलम् ॥ ३८ ॥ ततो गच्छेद्धि विप्रेन्द्रा ब्रह्मावर्तं मुनिस्तुतम् ॥ ब्रह्मावर्ते नरः स्नात्वा ब्रह्म चाप्नोति निश्चितम् ॥ ३९ ॥ ततो गच्छेच्च विप्रेन्द्राः सुतीर्थकमनुत्तमम् ॥ तत्र सन्निहिता नित्यं पितरो दैवतैः सह ॥ ४० ॥ तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ॥ अश्वमेधमवाप्नोति पितॄन्प्रीणाति शाश्वतम् ॥ ४१ ॥ ततोऽवन्त्यां च धर्मज्ञ समासाद्य यथाक्रमम् ॥ कामेश्वरस्य तीर्थे तु स्नात्वा श्रद्धासमन्वितः ॥ ४२ ॥ सर्वव्याधिविनिर्मुक्तो ब्रह्म चाप्नोति निश्चितम् ॥ मातृतीर्थे च तत्रैव यत्र स्नातस्य भक्तितः ॥ ४३ ॥ प्रजा विवर्धते नित्यमनन्तां चाप्नुयाच्छ्रियम् ॥ ततः सीतावनं गच्छेन्नियतो नियताशनः ॥ ४४ ॥ तीर्थं तत्र च विप्रेन्द्रा महदन्यत्र दुर्लभम् ॥ पुनाति दर्शनादेव पुरुषानेकविंशतिम् ॥

तन्तुवचा व वमञ्च समासाद्य यथाक्रमम् ॥ कामेश्वरस्य तीर्थे तु स्नात्वा श्रद्धासमन्वितः ॥ ४२ ॥ सर्वव्याधिविनिर्मुक्तो ब्रह्म
चाप्नोति निश्चितम् ॥ मातृतीर्थे च तत्रैव यत्र स्नातस्य भक्तितः ॥ ४३ ॥ प्रजा विवर्धते नित्यमनन्तां चाप्नुयाच्छ्रियम् ॥ ततः

सीतावनं गच्छेन्नियतो नियताशनः ॥ ४४ ॥ तीर्थं तत्र च विप्रेन्द्रा महदन्यत्र दुर्लभम् ॥ पुनाति दर्शनादेव पुरुदानेकविंशतिम् ॥४५॥ केशानभ्युक्ष्य चैकस्मिन्पूतो भवति पापतः ॥ तत्र तीर्थवरं चान्यच्छ्वुनां लोमापहं महत् ॥४६॥ तत्र विप्रा महाप्राज्ञा विद्वांसस्तीर्थतत्पराः ॥ श्वविलोमापहे तीर्थे विप्रास्त्रैलोक्यविश्रुते ॥४७॥ प्राणायामैर्निर्हरन्ति स्वलोमानि द्विजोत्तमाः ॥ पूतात्मानश्च ते विप्राः प्रयान्ति परमां गतिम् ॥ ४८ ॥ दशाश्वमेधिकं चैव तत्र तीर्थं सुविश्रुतम् ॥ तत्र स्नात्वा भक्तियुक्तस्तदेव लभते फलम् ॥ ४९ ॥ ततो गच्छेद्द्वि श्रद्धावान्मानुषं लोकविश्रुतम् ॥ दर्शनात्तस्य तीर्थस्य मुक्तो भवति किल्बिषैः ॥ ५० ॥ पुरा कृष्णमृगास्तत्र व्याधैस्तु शरपीडिताः ॥ अवगाह्य सरस्यस्मिन्मानुषत्वमुपागताः ॥ ५१ ॥ ततो व्याधाश्च ते सर्वे तानपृच्छन्द्विजोत्तमान् ॥ मृगाः क्व ऋषयो याता अस्माभिः शरपीडिताः ॥५२॥ निमग्नास्ते सरः प्राप्य किं तद्ब्रूत द्विजोत्तमाः ॥ तेऽब्रुवंस्तत्र वै पृष्टा वयं ते च द्विजोत्तमाः ॥ ५३ ॥ अस्य तीर्थस्य माहात्म्यान्मानुषत्वमुपागताः ॥ तस्माद्यूयं श्रद्दधानाः स्नात्वा तीर्थे विमत्सराः ॥ ५४ ॥ सर्वपापविनिर्मुक्ता भविष्यथ न संशयः ॥ ततः स्नाताश्च ते सर्वे शुद्धदेहा दिवं गताः ॥ ५५ ॥ एतत्तीर्थस्य माहात्म्यं मानुषस्य द्विजोत्तमाः ॥ ये शृण्वन्ति श्रद्दधानास्तेऽपि यान्ति परां गतिम् ॥५६॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥३५॥ लोमहर्षण उवाच ॥ मानुषस्य तु पूर्वेण क्रोशमात्रे द्विजोत्तमाः ॥ आपगा नाम विख्याता नदी द्विजनिषेविता ॥ १ ॥ श्यामाकं पयसा सिद्धमाज्येन च परिप्लुतम् ॥ ये प्रयच्छन्ति विप्रेभ्यस्तेषां पापं न विद्यते ॥२॥

ये तु श्राद्धं करिष्यन्ति प्राप्य तामापगां नदीम् ॥ ते सर्वकामसंयुक्ता भविष्यन्ति न संशयः ॥ ३ ॥ स्मरन्ति पितरस्तस्य स्मरन्ति च पितामहाः ॥ अस्माकं च कुले पुत्रः पौत्रो वाऽपि भविष्यति ॥ ४ ॥ य आपगां नदीं गत्वाऽस्मांस्तिलैस्तर्पयिष्यति ॥ तेन तृप्ता भविष्यामो यावत्कुलशतं भवेत् ॥५॥ नभस्ये मासि संप्राप्ते कृष्णपक्षे विशेषतः ॥ चतुर्दश्यां तु मध्याह्ने पिण्डदो मुक्तिमाप्नुयात् ॥६॥ततो गच्छेच्च विप्रेन्द्रा ब्रह्मणः स्थानमुत्तमम् ॥ ब्रह्मोदुम्बरमित्येवं सर्वलोकेषु विश्रुतम् ॥७॥ तत्र ब्रह्मर्षिकुण्डेषु स्नातस्य द्विजसत्तमाः ॥ सप्तर्षीणां प्रसादेन सप्तसोमफलं लभेत् ॥८॥ भरद्वाजो गौतमश्च जमदग्निश्च कश्यपः ॥ विश्वामित्रो वसिष्ठश्च अत्रिश्च भगवानृषिः ॥ ९ ॥ एते समेत्य तत्कुण्डं कलितं भुवि दुर्लभम् ॥ ब्रह्मणा सेवितं तस्माद्ब्रह्मोदुम्बरमुच्यते ॥ १० ॥ तस्मिंस्तीर्थवरे स्नात्वा ब्रह्मणोऽव्यक्तजन्मनः ॥ ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥११॥ देवान्पितॄन्समुद्दिश्य यो विप्रं पूजयिष्यति॥ पितरस्तस्य सुखिता दास्यन्ति भुवि दुर्लभम् ॥ ॥ १२ सप्तर्षींश्च समुद्दिश्य पृथक्स्नानं समाचरेत् ॥ ऋषीणां च प्रसादेन सप्तलोकाधिपो भवेत् ॥ १३ ॥ कपिलस्थेति विख्यातं सर्वपातकनाशनम् ॥ यस्मिन्स्थितः स्वयं देवो वृद्धकेदारसंज्ञितः ॥ १४ ॥ तत्र स्नात्वार्चयित्वा च रुद्रं दण्डिसमन्वितम् ॥ अन्तर्द्धानमवाप्नोति शिवलोके स मोदते ॥ १५ ॥ यस्तत्र तर्पणं कृत्वा पिबते चुलकत्रयम् ॥ देवदेवं नमस्कृत्य केदारस्य फलं लभेत् ॥ १६ ॥ यस्तत्र कुरुते श्राद्धं शिवमुद्दिश्य मानवः ॥ चैत्रशुक्ल-

दुर्लभतरम् ॥ देवदेवं नमस्कृत्य केदारस्य फलं लभेत् ॥ १६ ॥ यस्तत्र कुरुते श्राद्धं शिवमुद्दिश्य मानवः ॥ चैत्रशुक्ल



सनातनी ॥ १८ ॥ कलस्यां च नरः स्नात्वा दृष्ट्वा दुर्गां तटस्थिताम् ॥ संसारगहनं दुर्गं निस्तरेन्नात्र संशयः ॥ ॥ १९ ॥ ततो गच्छेद्धि सरकं त्रैलोक्यस्यापि दुर्लभम् ॥ कृष्णपक्षे चतुर्दश्यां दृष्ट्वा देवं महेश्वरम् ॥ २० ॥ लभते सर्वकामांश्च शिवलोकं स गच्छति ॥ तिस्रः कोट्यस्तु तीर्थानां सरके द्विजसत्तमाः ॥ २१ ॥ रुद्रकोटिस्तथा कूपे सरोमध्ये व्यवस्थिता ॥ तस्मिन्सरसि यः स्नात्वा रुद्रकोटिं स्मरेन्नरः ॥ २२ ॥ पूजयित्वा रुद्रकोटिं भविष्यति न संशयः ॥ रुद्राणां च प्रसादेन सर्वदोषविवर्जितः ॥ २३ ॥ ऐन्द्रयानेन संयुक्तः परं पदमवाप्नुयात् ॥ इडास्पदं च तत्रैव तीर्थं पापभयापहम् ॥ २४ ॥ यस्मिन्मुक्तिमवाप्नोति दर्शनादेव मानवः ॥ तत्र स्नात्वाऽर्चयित्वा च पितृदेवगणानपि ॥ २५ ॥ न दुर्गतिमवाप्नोति चिन्तितं मनसाऽऽप्नुयात् ॥ केदारं च महातीर्थं सर्वकल्मषनाशनम् ॥ २६ ॥ तत्र स्नात्वा तु पुरुषः सर्वदानफलं लभेत् ॥ किंरूपं[1] च महातीर्थं तत्रैव भुवि दुर्लभम् ॥ तस्मिन्स्नातस्तु पुरुषः सर्वयज्ञफलं लभेत् ॥ २७ ॥ सरकस्य तु पूर्वेण तीर्थं त्रैलोक्यविश्रुतम् ॥ अस्य जन्म भुवि ख्यातं सर्वपापप्रणाशनम् ॥ २८ ॥ नारसिंहं वपुः कृत्वा हत्वा दानवमूर्जितम् ॥ तिर्यग्योनिस्थितो विष्णुः सिंहीषु रतिमाप्तवान् ॥ २९ ॥ ततो देवाः सगंधर्वा आराध्य वरदं शिवम् ॥ ऊचुः प्रणतसर्वाङ्गा विष्णुदेहस्य लम्भने ॥ ३० ॥ ततो देवो महात्मासौ शारभं रूपमास्थितः ॥ युद्धं चकार सुमहद्दिव्यं वर्षसहस्र



१ विश्वरूपं महातीर्थमिति क्वचित्पाठः ।

वा॰पु॰
६६ ॥

कम् ॥ ३१ ॥ युद्ध्यमानौ तु तौ देवौ पतितौ ह्रदमध्यतः ॥ ३२ ॥ तस्मिन्सरस्तटे विप्रो देवर्षिर्नारदः स्थितः ॥ अश्वत्थस्था नमाश्रित्य ध्यानस्थस्तौ ददर्श ह ॥ ३३ ॥ विष्णुश्चतुर्भुजो जज्ञे लिङ्गाकारः शिवः स्थितः ॥ तौ दृष्ट्वा तत्र पुरुषौ तुष्टाव भक्तिभावतः ॥ ३४ ॥ नमः शिवाय देवाय विष्णवे प्रभविष्णवे ॥ हरये च उमाभर्त्रे स्थितिकालभृते नमः ॥ ३५ ॥ हराय बहुरूपाय विश्वरूपाय विष्णवे ॥ त्र्यम्बकाय सुसिद्धाय कृष्णाय ज्ञानहेतवे ॥ ३६ ॥ धन्योऽहं सुकृती नित्यं यद्दृष्टौ पुरुषोत्तमौ ॥ ममाश्रममिदं पुण्यं युवाभ्यां विमलीकृतम् ॥ ३७ ॥ अद्यप्रभृति त्रैलोक्ये धन्यं जन्मेति विश्रुतम् ॥ ३८ ॥ य इहागत्य च स्नात्वा पितॄन्सन्तर्पयिष्यति ॥ तस्य श्रद्धान्वितस्येह ज्ञानमिन्द्रं भविष्यति ॥३९॥ अश्वत्थस्य च यन्मूलं सदा तत्र वसाम्यहम् ॥ अश्वत्थवन्दनं कृत्वा शिवं कृष्णं नमस्यति ॥ ४० ॥ ततो गच्छेद्धि विप्रेन्द्रा नागस्य ह्रदमुत्तमम् ॥ पुण्डरीकाम्भसि स्नात्वा यज्ञस्य फलमाप्नुयात् ॥ ४१ ॥ दशम्यां शुक्लपक्षस्य चैत्रस्य तु विशेषतः ॥ स्नानं जपस्तथा श्राद्धं मुक्तिमार्गप्रदायकम् ॥ ४२ ॥ ततस्त्रिविष्टपं गच्छेत्तीर्थं देवनिषेवितम् ॥ तत्र वैतरणी पुण्या नदी पापप्रमोचनी ॥ ४३ ॥ तत्र स्नात्वाऽर्चयित्वा च शूलपाणिं वृषध्वजम् ॥ सर्वपापविशुद्धात्मा गच्छेच्च परमां गतिम् ॥ ४४ ॥ ततो गच्छेद्धि विप्रेन्द्रा रसावर्तनमुत्तमम् ॥ तत्र स्नात्वा भक्तियुक्तः सिद्धिमाप्नोत्यनुत्तमाम् ॥ ४५ ॥ चैत्रशुक्लचतुर्दश्यां तीर्थे स्नात्वा ह्यलेपके ॥ पूजयित्वा शिवं तत्र पापलेशो न विद्यते ॥ ४६ ॥



ततो गच्छेद्धि विप्रेन्द्राः फलकीवनमुत्तमम् ॥ ... तपश्चरन्ति विपुलं दिव्यं वर्षसह...

कम् ॥ ४७ ॥ दृषद्वत्यां नरः स्नात्वा तर्पयित्वा च देवताः ॥ अग्निष्टोमातिरात्रस्य फलं विन्दति मानवः ॥ ४८ ॥ सोमक्षये च

ततो गच्छेद्धि विप्रेन्द्राः फलकीवनमुत्तमम् ॥ यत्र देवाः सगन्धर्वाः साध्याश्च ऋषयस्तथा ॥ तपश्चरन्ति विपुलं दिव्यं वर्षसहस्र

कम् ॥ ४७ ॥ दृषद्वत्यां नरः स्नात्वा तर्पयित्वा च देवताः ॥ अग्निष्टोमातिरात्रस्य फलं विन्दति मानवः ॥ ४८ ॥ सोमक्षये च संप्राप्ते सोमस्य च दिने तथा ॥ यः श्राद्धं कुरुते मर्त्यस्तस्य पुण्यफलं शृणु ॥ ४९ ॥ गयायां च यथा श्राद्धं पितॄन्प्रीणाति नित्यशः ॥ तथा श्राद्धं च कर्त्तव्यं फलकीवनमाश्रितैः ॥ ५० ॥ मनसा स्मरते यस्तु फलकीवनमुत्तमम् ॥ तस्यैव पितरस्तृप्तिं प्रयास्यन्ति न संशयः ॥ ५१ ॥ तत्रापि तीर्थं सुमहत्सर्वदेवैरलंकृतम् ॥ तस्मिन्स्नातस्तु पुरुषो गोसहस्रफलं लभेत् ॥ ५२ ॥ पाणिखाते नरः स्नात्वा पितॄन्संतर्प्य मानवः ॥ अवाप्नुयाद्राजसूयं साङ्ख्यं योगं च विन्दति ॥५३॥ ततो गच्छेद्धि सुमहत्तीर्थमिश्रकमुत्तमम् ॥ तत्र तीर्थानि मुनिना मिश्रितानि महात्मना ॥ ५४ ॥ व्यासेन मुनिशार्दूल दधीचार्थं महात्मना ॥ सर्वतीर्थेषु स स्नातो मिश्रके स्नाति यो नरः ॥ ५५ ॥ ततो व्यासवनं गच्छेन्नियतो नियताशनः ॥ मनोजवे नरः स्नात्वा दृष्ट्वा देवं मनीषिणम् ॥ ५६ ॥ मनसा चिन्तितं सर्वं सिद्ध्यते नात्र संशयः ॥ गत्वा मधुवनं चैव देव्यास्तीर्थं नरः शुचिः ॥ ५७ ॥ तत्र स्नात्वा च वै देवान्पितॄंश्च प्रयतो नरः ॥ स देव्या समनुज्ञातो यथा सिद्धिं लभेन्नरः ॥ ५८ ॥ कौशिक्याः संगमे यस्तु दृषद्वत्यां नरोत्तमः ॥ स्नायीत नियताहारः सर्वपापैः प्रमुच्यते ॥ ५९ ॥ ततो व्यासस्थलीं गच्छेद्यत्र व्यासेन धीमता ॥ पुत्रशोकाभिभूतेन देहत्यागाय निश्चयः ॥६०॥ कृतो देवैश्च विप्रेन्द्र पुनरुत्थापितस्तदा ॥ अभिगम्य स्थलीं तस्य पुत्रशोकं न विन्दति॥६१॥ किंदत्तकूपमासाद्य तिलप्रस्थं प्रदाय च ॥ गच्छेच्च परमां सिद्धिं ततो मुक्तिमवाप्नुयात् ॥ ६२ ॥ अन्नं च सुदिनं चैव द्वे तीर्थे

भुवि दुर्लभे ॥ तयोः स्नात्वा विशुद्धात्मा सूर्यलोकमवाप्नुयात् ॥ ६३ ॥ कृतपुण्यं ततो गच्छेत्त्रिषु लोकेषु विश्रुतम् ॥ तत्राभिषकं कुर्वीत गङ्गायां प्रयतः स्थितः ॥६४॥ अर्चयित्वा महादेवमश्वमेधफलं लभेत् ॥ कोटितीर्थं च तत्रैव दृष्ट्वा कोटीश्वरं प्रभुम्॥ ॥६५॥तत्र स्नात्वा श्रद्दधानः कोटियज्ञफलं लभेत् ॥ ततो वामनकं गच्छेत्त्रिषु लोकेषु विश्रुतम्॥६६॥यत्र वामनरूपेण विष्णुना प्रभविष्णुना॥बलेरपहृतं राज्यमिन्द्राय प्रतिपादितम् ॥ ६७ ॥ तत्र विष्णुपदे स्नात्वा अर्चयित्वा च वामनम् ॥ सर्वपापविशुद्धात्मा विष्णुलोकमवाप्नुयात् ॥६८॥ ज्येष्ठाश्रमं च तत्रैव सर्वपातकनाशनम् ॥ तं तु दृष्ट्वा नरो मुक्तिं संप्रयाति न संशयः॥६९॥ ज्येष्ठमासे सिते पक्षे एकादश्यामुपोषितः ॥ द्वादश्यां च नरः स्नात्वा ज्येष्ठत्वं लभते नृषु ॥ ७० तत्र प्रतिष्ठिता विप्रा विष्णुना प्रभविष्णुना ॥ दीक्षाप्रतिष्ठासंयुक्ता विष्णुप्रीणनतत्पराः ॥ ७१ ॥ तेभ्यो दत्तानि श्राद्धानि दानानि विविधानि च ॥ अक्षयाणि भविष्यन्ति यावन्मन्वन्तरस्थितिः ॥ ७२ ॥ तत्रैव कोटितीर्थं च त्रिषु लोकेषु विश्रुतम् ॥ तस्मिंस्तीर्थे नरः स्नात्वा कोटियज्ञफलं लभेत् ॥ ७३ ॥ कोटीश्वरं नरो दृष्ट्वा तस्मिंस्तीर्थे महेश्वरम् ॥ महादेवप्रसादेन गाणपत्यमवाप्नुयात् ॥ ७४ ॥ तत्रैव सुमहत्तीर्थं सूर्यस्य च महात्मनः ॥ तस्मिन्स्नात्वा भक्तियुतः सूर्यलोके महीयते ॥७५॥ ततो गच्छेच्च विप्रेन्द्रास्तीर्थं कल्मषनाशनम् ॥ कूलोत्तारणकं नाम्ना विष्णुना कल्पितं पुरा ॥ ७६ ॥ वर्णानामाश्रमाणां च तारणाय सुनिर्मलम् ॥ तेऽपि तत्तीर्थमासाद्य पश्यन्ति परमं पदम् ॥७७॥ [illegible]



[illegible] तीर्थस्नाता भक्तियुताः पश्यन्ति परमं पदम् ॥ ७९ ॥ दूरस्थोऽपि स्मरेद्यस्तु

साद्य पश्यन्ति परमं पदम् ॥७७॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ कुलानि तारयेत्स्नातः सप्त सप्त च सप्त च॥७८॥

ब्राह्मणाः क्षत्त्रिया वैश्याः स्त्रियः शूद्राश्च तत्पराः ॥ तीर्थस्नाता भक्तियुताः पश्यन्ति परमं पदम् ॥ ७९ ॥ दूरस्थोऽपि स्मरेद्यस्तु कुरुक्षेत्रं सवामनम् ॥ सोऽपि मुक्तिमवाप्नोति किं पुनस्तु वसन्नरः ॥८०॥ इति श्रीवानपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥ लोमहर्षण उवाच ॥ पवनस्य ह्रदे स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ विमुक्तः सर्वकलुषैः शैवं पदमवाप्नुयात् ॥१॥ पुत्रशोकेन पवनो यस्मिँल्लीनो बभूव ह ॥ ततः सब्रह्मकैर्देवैः स्तुत्वा तं भक्तिसंयुतः ॥ २ ॥ ततो गच्छेद्धि हनुमत्स्थानं तच्छूलपाणिनः ॥ यत्र देवैः सगन्धर्वैर्हनूमान्प्रकटीकृतः ॥ ३ ॥ तत्र तीर्थे नरः स्नात्वा अमृतत्वमवाप्नुयात् ॥ कुलोत्तारणमासाद्य तीर्थसेवी द्विजोत्तमः ॥ ४ ॥ कुलानि तारयेत्सर्वान्मातामहपितामहान् ॥ शालिहोत्रस्य राजर्षेस्तीर्थं त्रैलोक्यविश्रुतम् ॥५॥ तत्र स्नात्वा विमुक्तस्तु कलुषैर्देहसंभवैः ॥ श्रीकुञ्जं तु सरस्वत्यां तीर्थं त्रैलोक्यविश्रुतम् ॥ ६ ॥ तत्र स्नात्वा नरो भक्त्या ह्यग्निष्टोमफलं लभेत् ॥ ततो नैमिषकुञ्जं तु समासाद्य नरः शुचिः ॥ ७ ॥ नैमिषस्य च स्नानेन यत्पुण्यं तत्समाप्नुयात् ॥ तत्र तीर्थं महत्ख्यातं वेदवत्या निषेवितम् ॥८॥ रावणेन गृहीतायाः केशेषु द्विजसत्तमाः ॥ तद्वधाय च सा प्राणान्मुमुचे शोककर्शिता ॥ ९ ॥ ततो जाता गृहे राज्ञो जनकस्य महात्मनः ॥ सीता नामेति विख्याता रामपत्नी पतिव्रता ॥ १० ॥ सा हृता रावणेनैव विनाशायात्मनः स्वयम् ॥ रामेण रावणं हत्वा अभिषिच्य विभीषणम् ॥ ११ ॥ समानीता गृहं सीता कीर्तिरात्मवनं यथा ॥ तस्यास्तीर्थे नरः स्नात्वा कन्यायज्ञफलं लभेत् ॥ १२ ॥ विमुक्तः कलुषैः सर्वैः प्राप्नोति परमं पदम् ॥ ततो गच्छेच्च

सुमहद्ब्रह्मणः स्थानमुत्तमम् ॥ १३ ॥ यत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः ॥ ब्राह्मणश्च विशुद्धात्मा परं पदमवाप्नुयात ॥
॥ १४ ॥ ततो गच्छेत्सोमतीर्थं त्रैलोक्ये चापि दुर्लभम् ॥ यत्र सोमस्तपस्तप्त्वा द्विजराज्यमवाप्तवान् ॥ १५ ॥ तत्र स्नात्वाऽर्च
यित्वा च स्वपितॄन्दैवतानि च ॥ निर्मुक्तः स्वर्गमायाति कार्तिक्यां वामनं यथा ॥ १६ ॥ सप्तसारस्वतं तीर्थं त्रैलोक्य
स्यापि दुर्लभम् ॥ यत्र सप्त सरस्वत्य एकीभूता वहन्ति च ॥ १७ ॥ सुप्रभा काञ्चनाक्षी च विमला मानसह्रदा ॥ सरस्वत्तोय
नाम्नी च सुवर्णा विमलोदका ॥ १८ ॥ पितामहस्य यजतः पुष्करेषु स्थितस्य ह ॥ अब्रुवन्नृषयः सर्वे नायं यज्ञो महाफलः ॥
॥ १९ ॥ न दृश्यते सरिच्छ्रेष्ठा पुरःस्था वै सरस्वती ॥ तच्छ्रुत्वा भगवान्प्रीतः सस्माराथ सरस्वतीम् ॥ २० ॥ पितामहेन यजता
ह्याहूता पुष्करेषु च ॥ सुप्रभा नाम सा देवी तत्र ख्याता सरस्वती ॥ २१ ॥ तां दृष्ट्वा मुनयः प्रीता वेगयुक्तां सरस्वतीम् ॥ पिता
महं मानयन्तीं ते तु तां बहुमेनिरे ॥२२॥ एवमेषा सरिच्छ्रेष्ठा पुष्करस्था सरस्वती ॥ समानीता कुरुक्षेत्रं मार्कण्डेन महात्मना ॥
॥ २३ ॥ नैमिषे मुनयः स्थित्वा शौनकाद्यास्तपोधनाः ॥ ते पृच्छन्ति महात्मानं पुराणं लोमहर्षणम् ॥ २४ ॥ कथं नः स्याद्यज्ञ
फलं वर्त्ततां सत्पथे मुने ॥ ततोऽब्रवीन्महाभागः प्रणम्य शिरसा मुनीन् ॥२५॥ सरस्वती स्थिता यत्र तत्र यज्ञफलं महत् ॥ एत
च्छ्रुत्वा तु मुनयो नानास्वाध्यायवेदिनः ॥ २६ ॥ समागम्य ततः सर्वे संस्मरन्ति सरस्वतीम् ॥ सा तु ध्याता ततस्तत्र ऋषिभिः
सत्रयाजिभिः ॥२७॥ समागता प्लावनार्थं यज्ञे तेषां महात्मनाम् ॥ नैमिषे काञ्चनाक्षी तु [illegible] महौजसा ॥ २८ ॥ समायाता
कुरुक्षेत्रं पुण्यतोया सरस्वती ॥ गयस्य यजमानस्य गयायां च महाक्रतौ ॥२९॥ आहूता च सरिच्छ्रेष्ठा गययज्ञे सरस्वती ॥ विशाला

सत्रयाजिभिः ॥२७॥ समागता प्लावनार्थं यज्ञे तेषां महात्मनाम् ॥ नैमिषे काञ्चनाक्षी तु मङ्कणेन महौजसा ॥ २८ ॥ समायाता

कुरुक्षेत्रं पुण्यतोया सरस्वती ॥ गयस्य यजमानस्य गयायां च महाक्रतौ ॥२९॥ आहूता च सरिच्छ्रेष्ठा गययज्ञे सरस्वती ॥ विशालां नाम तां प्राहुर्ऋषयः संशितव्रताः ॥ ३० ॥ सरित्सा हि समाहूता मङ्कणेन महात्मना ॥ कुरुक्षेत्रं समायाता प्रविष्टा च महा नदी ॥ ३१ ॥ उत्तरे कोशलाभागे पुण्ये देवर्षिसेविते ॥ उद्दालकेन मुनिना तत्र ध्याता सरस्वती ॥३२ ॥ आजगाम सरिच्छ्रेष्ठा तं देशं मुनिकारणात् ॥ पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ॥३३॥ मनोहरेति विख्याता केदारे या सरस्वती ॥ सर्वपापक्षया ज्ञेया ऋषिसिद्धनिषेविता ॥ ३४ ॥ साऽपि तेनेह मुनिना ह्याराध्य परमेश्वरम् ॥ ऋषीणामुपकारार्थं कुरुक्षेत्रं प्रवेशिता ॥ ३५ ॥ दक्षेण यजता साऽपि गङ्गाद्वारे सरस्वती ॥ विमलोदा भगवती दक्षेण प्रकटीकृता ॥ ३६ ॥ समाहूता ययौ तत्र मङ्कणेन महात्मना ॥ कुरुक्षेत्रे तु कुरुणा यजता च सरस्वती ॥ ३७ ॥ सरोमध्ये समानीता मार्कण्डेयेन धीमता ॥ अभिष्टूय महाभागः पुण्यतोयां सरस्वतीम् ॥ यत्र मङ्कणकः सिद्धः सप्तसारस्वते स्थितः ॥ ३८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये सप्त त्रिंशोऽध्यायः ॥ ३७ ॥ ऋषय ऊचुः ॥ कथं मङ्कणकः सिद्धः कस्माज्जातो महानृषिः ॥ नृत्यमानस्तु देवेन किमर्थं स निवारितः ॥ १ ॥ लोमहर्षण उवाच ॥ कश्यपाच्च सुतो जज्ञे मानसो मङ्कणो मुनिः ॥ स्नानं कर्त्तुं व्यवसितो गृहीत्वा वल्कलं द्विजाः ॥ २ ॥ तत्रागता ह्यप्सरसो रम्भाद्याः प्रियदर्शनाः ॥ स्नान्त्येव रुचिराकारा मुक्तवस्त्रा अनिन्दिताः ॥ ३ ॥ ततो मुनेस्तदा क्षोभाद्रेतः स्कन्नं यदम्भसि ॥ व्याधो जग्राह तद्रेतः कलशे न्यषिञ्चत्तथा ॥ ४ ॥ सप्तधा प्रविभागं तु कलशस्थं जगाम ह ॥ तत्रर्षयः सप्त

जाता विदुर्यान्मरुतो गणान् ॥ ५ ॥ वायुवेगो वायुबलो वायुहा वायुमण्डलः ॥ वायुकालो वायुरेता वायुचक्रश्च वीर्यवान् ॥६॥ तस्यर्षेस्तनया एते धारयन्ति चराचरम् ॥ पुरा मङ्कणगः सिद्धः कुशाग्रेणेति मे श्रुतम्॥७॥ क्षतात्किल करे विप्रास्तस्य शाकरसोऽस्रवत् ॥ स वै शाकरसं दृष्ट्वा हर्षाविष्टः स नृत्तवान् ॥ ८ ॥ ततः सर्वं प्रनृत्तं च स्थावरं जङ्गमं च यत् ॥ प्रनृत्तं च जगद्दृष्ट्वा तेजसा तस्य मोहितम् ॥ ९ ॥ ब्रह्मादिभिः सुरैस्तत्र ऋषिभिश्च तपोधनैः ॥ विज्ञप्तो वै महादेवो मुनेरर्थे द्विजोत्तमाः ॥१०॥ नायं नृत्येद्यथा देव तथा त्वं कर्त्तुमर्हसि ॥ ततो देवो मुनिं दृष्ट्वा हर्षाविष्टमतिं तदा ॥११॥ सुराणां हितकामार्थं महादेवोऽभ्यभाषत॥ हर्षस्थानं किमर्थं च तवैवं मुनिसत्तम ॥ तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ॥ १२ ॥ ऋषिरुवाच ॥ किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं स्रुतम् ॥ यं दृष्ट्वा च प्रनृत्तो वै हर्षेण महताऽन्वितः ॥ १३ ॥ तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् ॥ अहं न विस्मयं विप्र गच्छामीह प्रपश्य माम् ॥ १४ ॥ एवमुक्त्वा मुनिश्रेष्ठं देवदेवो महाद्युतिः ॥ अङ्गुल्यग्रेण विप्रेन्द्राः स्वाङ्गुष्ठस्ताडितोऽभवत् ॥ १५ ॥ ततो भस्मक्षतात्तस्मान्निर्गतं हिमसन्निभम् ॥ तद्दृष्ट्वा व्रीडितो विप्रः पादयोः पतितोऽब्रवीत् ॥ १६ ॥ नान्यद्देवादहं मन्ये शूलपाणेर्महात्मनः ॥ चराचरस्य जगतो गुरुस्त्वमसि शूलधृक् ॥ १७ ॥ त्वदाश्रयाश्च दृश्यन्ते सुरा ब्रह्मादयोऽनघ ॥ सर्वस्त्वमसि देवानां कर्त्ता कारयिता महान् ॥ १८ ॥ त्वत्प्रसादात्सुराः सर्वे मोदन्ते ह्यकुतोभयाः ॥ सुरा सुरस्य चाधीश न तपो मे क्षरेन्महत् ॥ १९ ॥ लोमहर्षण उवाच ॥ एवं स्तुत्वा महादेवमृषिः स प्रणतोऽभवत् ॥ ततो देवः प्रसन्नात्मा तमृर्षिं वाक्यमब्रवीत् ॥ २० ॥ ईश्वर उवाच ॥ तपस्ते वर्द्धतां विप्र मत्प्रसादात्सहस्रधा ॥ आश्रमे चेह वत्स्यामि

सुरस्य चाधीश न तपो मे क्षरेन्महत् ॥ १९ ॥ लोमहर्षण उवाच ॥ एवं स्तुत्वा महादेवमृषिः स प्रणतोऽभवत् ॥ ततो देवः

प्रसन्नात्मा तमृषिं वाक्यमब्रवीत् ॥ २० ॥ ईश्वर उवाच ॥ तपस्ते वर्द्धतां विप्र मत्प्रसादात्सहस्रधा ॥ आश्रमे चेह वत्स्यामि
त्वया सार्द्धमहं सदा ॥ २१ ॥ सप्तसारस्वते स्नात्वा यो मामर्चिष्यते नरः ॥ न तस्य दुर्लभं किंचिदिह लोके परत्र च ॥ २२ ॥
सारस्वतं च ते लोकं गमिष्यन्ति न संशयः ॥ शिवस्य च प्रसादेन प्राप्नोति परमं पदम् ॥ २३ ॥ इति श्रीवामनपुराणे पुलस्त्य
नारदसंवादे सरोमाहात्म्ये अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ लोमहर्षण उवाच ॥ ततश्चौशनसं तीर्थं गच्छेत्तु श्रद्धयाऽन्वितः ॥ उशना
यत्र संसिद्धो ग्रहत्वं समवाप्तवान् ॥१॥ तस्मिन्पुण्ये कुरुक्षेत्र पातकैर्जन्मसंभवैः ॥ मुक्तो याति परं ब्रह्म यतो नावर्त्तते पुनः ॥ २ ॥
रहोदरो नाम मुनिर्यत्र मुक्तो बभूव ह ॥ महता शिरसा ग्रस्तस्तीर्थमाहात्म्यदर्शनात् ॥ ३ ॥ ऋषय ऊचुः ॥ कथं रहोदरो ग्रस्तः
कथं मोक्षमवाप्तवान् ॥ तीर्थस्य तस्य माहात्म्यं श्रोतुमिच्छामहे वयम् ॥ ४ ॥ लोमहर्षण उवाच ॥ पुरा वै दण्डकारण्ये राघवेण
महात्मना ॥ वसता द्विजशार्दूला राक्षसास्तत्र हिंसिताः ॥ ५ ॥ तत्रैकस्य शिरश्छिन्नं राक्षसस्य दुरात्मनः ॥ क्षुरेण शितधारेण
तत्पपात महावने ॥ ६ ॥ रहोदरस्य तल्लग्नं ग्रीवायां च यदृच्छया ॥ वने विचरतस्तस्य ह्यस्थि भित्त्वा विवेश ह ॥ ७ ॥ स तेन
लग्नेन तदा विहर्त्तुं न शशाक ह ॥ अभिगम्य महाप्राज्ञस्तीर्थान्यायतनानि च ॥ ८ ॥ स तु तेनापि स्रवता वेदनार्त्तो महामुनिः॥
जगाम सर्वतीर्थानि पृथिव्यां यानि कानिचित् ॥९॥ ततः स कथयामास ऋषीणां भावितात्मनाम् ॥ तेऽब्रुवन्नृषयो विप्र प्रयाह्यौ
शनसं प्रति ॥ १० ॥ तेषां तद्वचनं श्रुत्वा जगाम स रहोदरः ॥ तत औशनसं तीर्थं तस्यापः स्पृशतस्तदा ॥ ११ ॥ तच्छिरः

शरणं मुक्त्वा पपावान्तर्जले द्विजाः ॥ ततः स विरजा भूत्वा पूतात्मा वीतकल्मषः ॥ १२ ॥ आजगामाश्रमं प्रीतः कथयामास चाखिलम् ॥ ते श्रुत्वा ऋषयः सर्वे तीर्थमाहात्म्यमुत्तमम् ॥ १३ ॥ कपालमोचनमिति नाम चक्रुः समागताः ॥ तत्रापि सुमह तीर्थं विश्वामित्रस्य विश्रुतम् ॥ १४ ॥ ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रो महामुनिः ॥ तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम् ॥ १५ ॥ ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥ ततः पृथूदकं गच्छेन्नियतो नियताशनः ॥ १६ ॥ तत्र सिद्धस्तु ब्रह्मर्षिर्ऋषङ्गुरिति नामतः ॥ जातिस्मर ऋषङ्गुस्तु गङ्गाद्वारे सदा स्थितः ॥ १७ ॥ अन्तकालं ततो दृष्ट्वा पुत्रान्वचनमब्रवीत् ॥ स्मृत्वा तीर्थगुणान्सर्वान्प्राहेदमृषिसत्तमान् ॥ १८ ॥ सरस्वत्युत्तरे तीर्थे यस्त्यजेदात्मनस्तनुम् ॥ पृथूदके जप्यपरो नैतस्य मरणं भवेत् ॥ १९ ॥ तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र वै पुरा ॥ पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितम् ॥ २० ॥ चातुर्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ॥ तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ॥ २१ ॥ मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रिया स्तथा ॥ ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ॥ २२ ॥ चातुर्वर्ण्यं ततो दृष्ट्वा आश्रमाः स्थापितास्ततः ॥ एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम् ॥ २३ ॥ तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ॥ तत्रैव तीर्थं विख्यातमवकीर्णेति नामतः ॥२४॥ यस्मिंस्तीर्थे बको दाल्भ्यो राष्ट्रं वैचित्र्यवर्षणात् ॥ जुहाव ब्राह्मणैः सार्धं तत्राभ्यर्च्य ततो नृपः ॥ २५ ॥ ऋषय

१ [illegible]। २ [illegible]।



ऊचुः ॥ कथं प्रतिष्ठितं तीर्थमवकीर्णेति नामतः ॥ धृतराष्ट्रेण राज्ञा स किमर्थं न प्रसादितः ॥२६॥ लोमहर्षण उवाच ॥ नैमिषेयाश्र

ऊचुः ॥ कथं प्रतिष्ठितं तीर्थमवकीर्णेति नामतः ॥ धृतराष्ट्रेण राज्ञा स किमर्थं न प्रसादितः ॥२६॥ लोमहर्षण उवाच ॥ नैमिषेयाश्च ऋषयो दक्षिणार्थं ययुः पुरा ॥ तत्रैव च बको दाल्भ्यो धृतराष्ट्रमयाचत ॥२७॥ तेनापि तत्र निन्दार्थमुक्तं यच्च धृतं तु तत् ॥ ततः क्रोधेन महता मांसान्युत्कृत्य तत्र ह ॥२८॥ पृथूदके महातीर्थे अवकीर्णेति नामतः ॥ जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेस्ततः ॥२९॥ हूयमाने तदा राष्ट्रे प्रवृत्ते यज्ञकर्मणि ॥ अक्षीयत ततो राष्ट्रं नृपतेर्दुष्कृतेन वै ॥३०॥ ततः स चिन्तयामास ब्राह्मणस्य विचेष्टितम् ॥ पुरोहितेन सहितो रत्नान्यादाय सर्वशः ॥ ३१ ॥ प्रसादनार्थं विप्रस्य ह्यवकीर्णे ययौ तदा ॥ प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम् ॥ ३२ ॥ ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता ॥ ब्राह्मणश्चेदवज्ञातो हन्यात्त्रिपुरुषं कुलम् ॥३३॥ एवमुक्त्वा स नृपतिमाज्येन पयसा पुनः ॥ उत्थापयामास मृतांस्तस्य राज्ञो हिते स्थितः ॥३४॥ तस्मिंस्तीर्थे तु यः स्नाति श्रद्दधानो जितेन्द्रियः ॥ स प्राप्नोति नरो दिव्यं मनसा चिन्तितं फलम् ॥३५॥ तत्र तीर्थं सुविख्यातं यायातं नाम नामतः ॥ यस्येह यजमानस्य मधु सुस्राव वै नदी ॥३६॥ तस्मिन्स्नातोऽथ भक्त्या तु मुच्यते सर्वकिल्बिषैः ॥ फलं प्राप्नोति यज्ञस्य ह्यश्वमेधस्य मानवः ॥ ॥ ३७ ॥ मधुस्रवं च तत्रैव तीर्थं पुण्यतमं द्विजाः ॥ तस्मिन्स्नात्वा नरो भक्त्या मधुना तर्पयेत्पितॄन् ॥३८॥ तत्रापि सुमहत्तीर्थं वसिष्ठोद्वाहसंज्ञितम् ॥ तत्र स्नातो भक्तियुतो वासिष्ठं लोकमाप्नुयात् ॥ ३९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ऋषय ऊचुः ॥ वसिष्ठस्यापवाहोऽसौ महावेगो बभूव ह ॥ किमर्थं सा सरिच्छ्रेष्ठा

तमृषिं प्रत्यवाहयत् ॥१॥ लोमहर्षण उवाच॥विश्वामित्रस्य राजर्षेर्वसिष्ठस्य महात्मनः॥भृशं वैरं बभूवेह तपःस्पर्द्धाकृते महत्॥२॥ आश्रमो वै वसिष्ठस्य स्थाणुतीर्थे बभूव ह॥ तस्य पश्चिमदिग्भागे विश्वामित्रस्य धीमतः ॥ ३ ॥ यत्रेष्ट्वा भगवान्स्थाणुः पूजयित्वा सरस्वतीम् ॥ स्थापयामास देवेशो लिङ्गाकारां सरस्वतीम् ॥ ४ ॥ वसिष्ठस्तत्र तपसा घोररूपेण संस्थितः ॥ तस्येह तपसा हीनो विश्वामित्रो बभूव ह ॥ ५ ॥ सरस्वतीं समाहूय इदं वचनमब्रवीत् ॥ वसिष्ठं मुनिशार्दूलं स्वेन वेगेन चानय ॥ ६ ॥ इहायातं मुनिश्रेष्ठं हनिष्यामि न संशयः॥एतच्छ्रुत्वा तु वचनं व्यथिता सा नदी किल॥७॥ तथा तां व्यथितां दृष्ट्वा वेपमानां महानदीम्॥ विश्वामित्रोऽवदत्क्रुद्धो वसिष्ठं शीघ्रमानय ॥ ८ ॥ ततो गत्वा सरिच्छ्रेष्ठा वसिष्ठं मुनिसत्तमम् ॥ कथयामास रुदती विश्वामित्रस्य तद्वचः ॥ ९ ॥ तपःकृशां विवर्णां च भृशं शोकसमन्विताम् ॥ उवाच तां सरिच्छ्रेष्ठां विश्वामित्राय मां वह ॥ १० ॥ तस्य तद्वचनं श्रुत्वा कृपाशीलस्य सा सरित् ॥ प्लावयामास तत्स्थानं प्रवाहेणाम्भसस्तदा ॥११॥ स च कूलापहारेण मैत्रावरुणिरुह्यतः ॥ वाह्यमानश्च तुष्टाव तदा देवीं सरस्वतीम्॥ १२ ॥ पितामहस्य सरसः प्रवृत्ताऽसि सरस्वति ॥ व्याप्तं त्वया जगत्सर्वं तवैवाम्भोभिरुत्तमैः ॥ १३ ॥ त्वमेव कामगा देवी मेघेषु सृजसे पयः ॥ सर्वास्त्वापस्त्वमेवेति त्वत्तो वयं वहामहे ॥ १४॥ पुष्टिर्धृतिस्तथा कीर्त्तिः सिद्धिः कान्तिः क्षमा तथा ॥ स्वधा स्वाहा तथा वाणी तवायत्तमिदं जगत् ॥ १५ ॥ त्वमेव सर्वभूतेषु वाणीरूपेण संस्थिता ॥ एवं सरस्वती तेन स्तुता भगवती तदा ॥ १६ ॥ सुखेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति ॥ न्यवेदयत्तदाऽर्चित्वा विश्वामित्राय तं मुनिम् ॥ १७ ॥ तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ॥ अथान्विषत्प्रहरणं वसिष्ठान्तकरं तदा ॥ १८ ॥ तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्महत्याभयान्नदी ॥ अपोवाह वसिष्ठं च मध्येन स्वाम्भसस्ततः ॥ उभयोः कुर्वती वाक्यं वञ्चयित्वा च गाधिजम्

मित्राय तं मुनिम् ॥ १७ ॥ तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ॥ अथान्विपत्प्रहरणं वसिष्ठान्तकरं तदा ॥ १८ ॥ तं तु
क्रुद्धमभिप्रेक्ष्य ब्रह्महत्याभयान्नदी ॥ अपोवाह वसिष्ठं च मध्येन स्वाम्भसस्ततः ॥ उभयोः कुर्वती वाक्यं वञ्चयित्वा च गाधिजम्
॥ १९ ॥ ततोऽपवाहितं दृष्ट्वा वसिष्ठमृषिसत्तमम् ॥ अब्रवीत्क्रोधरक्ताक्षो विश्वमित्रो महातपाः ॥ २० ॥ यस्मान्मां सरितां श्रेष्ठे
वञ्चयित्वा विनिर्गता ॥ शोणितं वह कल्याणि रक्षोग्रामणिसंयुता ॥ २१ ॥ ततः सरस्वती शप्ता विश्वामित्रेण धीमता ॥ अवहच्छो
णितोन्मिश्रं तोयं संवत्सरं तदा ॥ २२ ॥ अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तदा ॥ सरस्वतीं तदा दृष्ट्वा बभूवुर्भृशदुःखिताः
॥ २३ ॥ तस्मिंस्तीर्थवरे रम्ये शोणितं समुपावहत् ॥ २४ ॥ ततो भूतपिशाचाश्च राक्षसाश्च समागताः ॥ ततस्ते शोणितं सर्वे
पिबन्ति सुखमासते ॥ २५ ॥ तृप्ताश्च तेन सुभृशं सुखिता विगतज्वराः ॥ नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ २६ ॥
कस्यचित्त्वथ कालस्य मुनयः शतयोजनात् ॥ तीर्थयात्रां समाजग्मुः सरस्वत्यां तपोधनाः ॥ २७ ॥ तां दृष्ट्वा राक्षसैर्घोरैः पीय
मानां महानदीम् ॥ परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ २८ ॥ ते तु सर्वे महाभागाः समागम्य महाव्रताः ॥ आश्रित्य सरितां
श्रेष्ठामिदं वचनमब्रुवन् ॥ २९ ॥ किं कारणं सरिच्छ्रेष्ठे शोणितेन वहस्यहो ॥ एवमाकुलतां यातां श्रुत्वा पृच्छामहे वयम्
॥ ३० ॥ ततः सा सर्वमाचष्ट विश्वामित्रविचेष्टितम् ॥ ततस्ते मुनयः प्रीताः सरस्वत्यां समानयन् ॥ ३१ ॥ अरुणां पुण्यतो
यौघां सर्वदुष्कृतनाशनीम् ॥ दृष्ट्वा तोयं सरस्वत्या राक्षसा दुःखिता भृशम् ॥ ३२ ॥ ऊचुस्तान्वै मुनीन्सर्वान्दैन्ययुक्ताः पुनः

पुनः ॥ वयं हि क्षुधिताः सर्वे धर्महीनाश्च शाश्वताः ॥ ३३ ॥ न च नः कामकारोऽयं यद्वयं पापकारिणः ॥ युष्माकं चाप्रसा
देन दुष्कृतेन च कर्मणा ॥ ३४ ॥ पक्षोऽयं वर्धतेऽस्माकं यतश्च ब्रह्मराक्षसाः ॥ एवं वैश्याश्च शूद्राश्च क्षत्रियाश्च विकर्मभिः ॥३५॥
ये ब्राह्मणान्प्रद्विषन्ति ते भवन्तीह राक्षसाः ॥ आचार्यं मातरं चैव पितरं ये द्विषन्ति ह ॥ ३६ ॥ वृद्धानामवमानेन ते भवन्ती
ह राक्षसाः ॥ योषितां चैव पापानां योनिदोषेण वर्द्धते ॥ ३७ ॥ शक्ता भवन्तः सर्वेषां लोकानामपि तारणे ॥ तेषां ते मुनयः
श्रुत्वा कृपाशीलाः पुनश्च ते ॥ ३८ ॥ ऊचुः परस्परं सर्वे तप्यमानाश्च ते द्विजाः ॥ क्षुतकीटावपन्नं च यत्त्वशिष्टाशितं भवेत
॥ ३९ ॥ केशावपन्नमाधूतं मारुतश्वासदूषितम् ॥ एतैः संस्पृष्टमन्नं च भागो वै राक्षसो भवेत् ॥ ४० ॥ तस्माज्ज्ञात्वा सदा
विद्वांस्तान्येतानि विवर्जयेत् ॥ राक्षसान्वै भोजयते यो भुङ्क्ते स्वयमीदृशम् ॥ ४१॥ शोधयित्वा तु तत्तीर्थमृषयस्ते तपोधनाः॥
मोक्षार्थं रक्षसां तेषां संगमं चाप्यकल्पयन् ॥ ४२ ॥ अरुणायाः सरस्वत्याः संगमे लोकविश्रुते ॥ त्रिरात्रोपोषितः स्नातो मुच्यते
सर्वकिल्बिषैः ॥ ४३ ॥ प्राप्ते कलियुगे घोरे ह्यधर्मे प्रत्युपस्थिते ॥ अरुणासंगमे स्नात्वा मुक्तिमाप्नोति मानवः ॥ ४४ ॥ ततस्ते
राक्षसाः सर्वे स्नाताः पापविवर्जिताः ॥ दिव्यमालाम्बरधराः स्वर्गस्त्रीभिः समन्विताः ॥ ४५ ॥ इति श्रीवामनपुराणे पुलस्त्य
नारदसंवादे सरोमाहात्म्ये चत्वारिंशोऽध्यायः ॥ ४०॥ लोमहर्षण उवाच ॥ समुद्रास्तत्र चत्वार ऋषिणा निर्मिताः पुरा ॥ प्रत्येकं
च नरः स्नातो गोसहस्रफलं लभेत् ॥१॥ यत्किंचित्क्रियते [illegible]





॥२॥शतसाहस्रकं तीर्थं तत्रैव शतिकं द्विजाः ॥ उभयोरिह सुस्नातो गोसहस्रफलं लभेत् ॥ ३ ॥ सोमतीर्थं च तत्रापि सरस्वत्या

॥२॥शतसाहस्रकं तीर्थं तत्रैव शतिकं द्विजाः ॥ उभयोरिह सुस्नातो गोसहस्रफलं लभेत् ॥ ३ ॥ सोमतीर्थं च तत्रापि सरस्वत्या स्तटे स्थितम् ॥ यस्मिन्स्नातस्तु पुरुषो राजसूयफलं लभेत् ॥ ४ ॥ रेणुकाष्टकमासाद्य श्रद्दधानो जितेन्द्रियः ॥ मातृभक्त्या तु यत्पुण्यं तत्पुण्यं प्राप्नुयान्नरः ॥ ५ ॥ ऋणमोचनमासाद्य तीर्थं ब्राह्मणसेवितम् ॥ कुमारस्याभिषेकं च ओजसं नाम विश्रुतम् ॥ ॥ ६ ॥ तस्मिन्स्नातस्तु पुरुषो यशसा च समन्वितः ॥ कौमारं पुरमाप्नोति कृत्वा स्नानं तु मानवः ॥ ७ ॥ चैत्रषष्ठ्यां शुक्ल पक्षे यस्तु श्राद्धं करिष्यति ॥ गयाश्राद्धे च यत्पुण्यं तत्फलं प्राप्नुयान्नरः ॥८॥ सन्निहत्यां यथा श्राद्धं वायुना कथितं पुरा॥ तस्मात्सर्वप्रयत्नेन श्राद्धं तत्र समाचरेत् ॥ ९ ॥ यस्तु स्नानं श्रद्दधानश्चैत्रषष्ठ्यां करिष्यति॥अक्षयं चोदकं तस्य पितॄणामुपजा यते ॥ १० ॥ तत्र पञ्चवटं नाम तीर्थं त्रैलोक्यविश्रुतम्॥महादेवः स्थितो यत्र योगमूर्तिधरः स्वयम् ॥ ११ ॥ तत्र स्नात्वाऽर्चयित्वा च देवदेवं महेश्वरम् ॥ गाणपत्यमवाप्नोति दैवतैः सह मोदते ॥१२॥ कुरुक्षेत्रं च विख्यातं कुरुणा यत्र वै तपः ॥ तप्तं सुघोरं क्षेत्रस्य कर्षणार्थं द्विजोत्तमाः ॥ १३ ॥ तस्य घोरेण तपसा तुष्ट इन्द्रोऽब्रवीद्वचः ॥ राजर्षे परितुष्टोऽस्मि तपसाऽनेन सुव्रत ॥ ॥ १४ ॥ यज्ञं च ये कुरुक्षेत्रे करिष्यन्ति शतक्रतुम् ॥ ते गमिष्यन्ति सुकृताँल्लोकान्पापविवर्जितान् ॥ १५ ॥ अवहस्य ततः शक्रो जगाम त्रिदिवं प्रभुः ॥ आगम्यागम्य चैवैनं भूयोभूयोऽवहस्य च ॥१६॥ शतक्रतुरनिर्विण्णः पृष्ट्वा पृष्ट्वा जगाम ह ॥ यदा तु तपसो ग्रेण संतप्तं देहमात्मनः ॥ ततः शक्रोऽब्रवीत्प्रीतो ब्रूहि यत्ते चिकीर्षितम् ॥ १७ ॥ कुरुरुवाच ॥ ये श्रद्दधानास्तीर्थेऽस्मिन्मानवा

निवसन्ति ह ॥ ते प्राप्नुवन्ति सदनं ब्रह्मणः परमात्मनः ॥ १८ ॥ अन्यत्र कृतपापा ये पञ्चपातकदूषिताः ॥ अस्मिंस्तीर्थे नराः स्नाता मुक्ता यान्तु परां गतिम् ॥ १९ ॥ कुरुक्षेत्रे पुण्यतमे कुरुक्षेत्रं द्विजोत्तमाः ॥ तं दृष्ट्वा मुक्तपापस्तु परं पदमवाप्नुयात् ॥ २० ॥ कुरुक्षेत्रे नरः स्नात्वा मुक्तो भवति किल्बिषैः ॥ कुरुणा समनुज्ञातः प्राप्नोति परमं पदम् ॥ २१ ॥ ततो गच्छेदनरकं तीर्थं त्रैलोक्यविश्रुतम् ॥ यत्र पूर्वं स्थितो ब्रह्मा दक्षिणे च महेश्वरः ॥ २२ ॥ रुद्रपत्नी पश्चिमतः पद्मनाभोत्तरे स्थितः ॥ मध्ये ह्यनरकं तीर्थं त्रैलोक्यस्यापि दुर्लभम् ॥ २३ ॥ यस्मिन्स्नातास्तु पुरुषाः प्रमुच्यन्ते च पातकैः ॥ वैशाखे च यदाऽष्टम्यां मङ्गलस्य दिनं भवेत् ॥ २४ ॥ तदा स्नानं तत्र कृत्वा मुक्तो भवति पातकैः ॥ यः प्रयच्छेच्च कनकं तुर्यभागेन संयुतम् ॥ २५ ॥ कलशं च तथा दद्याद्धूपैः परिशोभितम् ॥ देवताः प्रीणयेत्पूर्वं करकै रत्नसंयुतैः ॥ २६ ॥ ततस्तु कलशौ दद्यात्सर्वपातकनाशनौ ॥ अनेनैव विधानेन यस्तु स्नानं समाचरेत् ॥ २७ ॥ स मुक्तः कलुषैः सर्वैः प्रयाति परमं पदम् ॥ अन्यत्रापि यदा षष्ठी मङ्गलेन भविष्यति ॥ २८ ॥ तत्रापि मुक्तिफलदा कृत्या तस्मिन्भविष्यति ॥ तीर्थे च सर्वतीर्थानां यस्मिन्स्नातो द्विजोत्तमाः ॥ २९ ॥ सर्वदेवैरनुज्ञातः परमं चाप्नुयात्पदम् ॥ काम्यकं च वनं पुण्यं सर्वपातकनाशनम् ॥ ३० ॥ यस्मिन्प्रविष्टमात्रस्तु मुक्तो भवति किल्बिषैः ॥ समाश्रित्य वनं पुण्यं सविता प्रकटः स्थितः ॥ ३१ ॥ पूषानाम

१ अत्र छन्दोभङ्गः।







द्विजश्रेष्ठा दर्शनान्मुक्तिमाप्नुयात् ॥ आदित्यस्य दिने प्राप्ते तस्मिन्स्नातस्तु मानवः ॥ विशुद्धमानसोऽभ्येति मनसा चिन्तितं
... ॥ ३२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ऋषय ऊचुः ॥ काम्य

द्विजश्रेष्ठा दर्शनान्मुक्तिमाप्नुयात् ॥ आदित्यस्य दिने प्राप्ते तस्मिन्स्नातस्तु मानवः ॥ विशुद्धमानसोऽभ्येति मनसा चिन्तितं फलम् ॥ ३२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ऋषय ऊचुः ॥ काम्य कस्य तु पूर्वेण कुञ्जं देवैर्निषेवितम् ॥ तस्य तीर्थस्य संभूतिं विस्तरेण ब्रवीतु नः ॥ १ ॥ लोमहर्षण उवाच ॥ शृण्वन्तु मुनयः सर्वे तीर्थमाहात्म्यमुत्तमम् ॥ ऋषीणां चरितं श्रुत्वा मुक्तो भवति किल्बिषैः ॥२॥ नैमिषेयाश्च ऋषयः कुरुक्षेत्रे समागताः॥ सरस्वत्यां च स्नानार्थं प्रवेशं न. च लेभिरे ॥ ३ ॥ ततस्तु कल्पयामासुस्तीर्थं यज्ञोपवीतिनम् ॥ शेषास्तु मुनयस्तत्र न प्रवेशं हि लेभिरे ॥ ४ ॥ रन्तुकस्याश्रमाद्यावत्तावत्तीर्थं च चक्रकम् ॥ ब्राह्मणैः परिपूर्णं तु दृष्ट्वा देवी सरस्वती ॥५॥ हितार्थं सर्वविप्राणां कृत्वा कुण्डानि सा नदी ॥ प्रयाता पश्चिमं मार्गं सर्वभूतहिते स्थिता ॥ ६ ॥ पूर्वप्रवाहे यः स्नाति गङ्गास्नानफलं लभेत ॥ प्रवाहे दक्षिणे तस्या नर्म्मदा सरितां वरा ॥ ७ ॥ पश्चिमे तु दिशाभागे यमुना चाश्रिता नदी ॥ यदा ह्युत्तरतो याति . सिन्धुर्भवति सा नदी ॥ ८ ॥ एवं दिशाप्रवाहेण ह्यतिपुण्या सरस्वती ॥ तस्यां स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥ ९ ॥ ततो गच्छेद्द्विजश्रेष्ठा मदनस्य महात्मनः ॥ तीर्थं त्रैलोक्यविख्यातं विहारं नाम नामतः ॥ १० ॥ यत्र देवाः समागम्य शिवदर्शनकाङ्क्षिणः ॥ समागता न चापश्यन्देवं देव्या समन्वितम् ॥ ११ ॥ तेऽस्तुवन्त महादेवं नन्दिनं गणनायकम् ॥ ततः प्रसन्नो नन्दीशः कथयामास चेष्टितम् ॥ १२ ॥ भवस्य उमया सर्वविहारे क्रीडितं महत् ॥ तच्छ्रुत्वा देवताः सर्वाः पत्नीमाहूय ते गताः ॥ १३ ॥

वा०पु०

॥ ७४ ॥

तेषां क्रीडाविनोदेन तुष्टः प्रोवाच शंकरः ॥ योऽस्मिंस्तीर्थे नरः स्नाति विहारे श्रद्धयाऽन्वितः ॥ १४ ॥ धनधान्यप्रियैर्युक्तो जायते नात्र संशयः ॥ दुर्गातीर्थं ततो गच्छेद्दुर्गया सेवितं महत् ॥१५॥ यत्र स्नात्वा पितॄन्पूज्य न दुर्गतिमवाप्नुयात् ॥ तत्रापि च सरस्वत्याः कूलं त्रैलोक्यविश्रुतम् ॥ १६ ॥ दर्शनान्मुक्तिमाप्नोति सर्वपातकवर्जितः ॥ यस्तत्र तर्पयेद्देवान्पितॄंश्च श्रद्धया नरः ॥ १७ ॥ अक्षय्यं लभते सर्वं पितृतीर्थं विशिष्यते ॥ मातृहा पितृहा यश्च ब्रह्महा गुरुतल्पगः ॥ १८ ॥ स्नात्वा शुद्धिमवाप्नोति यत्र प्राची सरस्वती ॥ देवमार्गं प्रतिष्ठाय देवमार्गेण निःसृता ॥ १९ ॥ प्राची सरस्वती पुण्या अपि दुष्कृतकर्मणाम् ॥ त्रिरात्रं ये करिष्यन्ति प्राचीं प्राप्य सरस्वतीम् ॥२०॥ तेषां न दुष्कृतं किंचिद्देहमाश्रित्य तिष्ठति ॥ नरनारायणौ देवौ ब्रह्मा स्थाणुस्तथा ऋषिः॥२१॥प्राचीं दिशं निषेवन्तः सदा देवाः सवासवाः ॥ ये तु श्राद्धं करिष्यन्ति प्राचीमाश्रित्य मानवाः॥२२॥तेषां न दुर्लभं किंचिदिह लोके परत्र च ॥ तस्मात्प्राची सदा सेव्या पञ्चम्यां च विशेषतः॥२३॥पञ्चम्यां सेवमानस्तु लक्ष्मीवांश्च भवेन्नरः ॥ तीर्थमौशनसं तत्र त्रैलोक्यस्यापि दुर्लभम्॥२४॥उशना यत्र संसिद्ध आराध्य परमेश्वरम् ॥ ग्रहमध्येषूच्यते स तस्य तीर्थस्यसेवनात्॥२५॥ एवं शुक्रेण मुनिना सेवितं तीर्थमुत्तमम् ॥ ये सेवन्ते श्रद्दधानास्ते यान्ति परमां गतिम् ॥२६॥ यस्तु श्राद्धं नरो भक्त्या तस्मिंस्तीर्थे करिष्यति ॥ पितरस्तारितास्तेन भविष्यन्ति न संशयः ॥२७॥ चतुर्मुखं ब्रह्मतीर्थं यत्र मर्यादया स्थितम् ॥ ये सेवन्ते चतु

तीर्थ करिष्यति ॥ पितरस्तारितास्तेन भविष्यन्ति न संशयः ॥२७॥ चतुर्मुखं ब्रह्मतीर्थं यत्र मर्यादया स्थितम् ॥ ये सेवन्ते

॥ २९ ॥ स्थाणुतीर्थं ततो गच्छेत्सहस्रलिङ्गशोभितम् ॥ तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बिषैः ॥ ३० ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये द्विचत्वारिंशोऽध्यायः ॥४२॥ ऋषय ऊचुः ॥ स्थाणुतीर्थस्य माहात्म्यं वटस्यापि महामुने ॥ सन्निहत्याः पुरोत्पत्तिं पूरणं पांशुना ततः ॥ :१ ॥ लिङ्गानां दर्शनात्पुण्यं स्पर्शनेन च किं फलम् ॥ तथैव सरमाहात्म्यं ब्रूहि सर्वमशेषतः ॥ २ ॥ लोमहर्षण उवाच ॥ शृण्वन्तु देवताः सर्वाः पुराणं वामनं महत् ॥ यच्छ्रुत्वा मुक्तिमाप्नोति प्रसादाद्वामनस्य तु ॥ ३॥ सनत्कुमारमासीनं स्थाणोर्वटसमीपतः ॥ ऋषिभिर्वालखिल्याद्यैर्ब्रह्मपुत्रैर्महात्मभिः ॥४॥ मार्कण्डेयो मुनिस्तत्र विनयेनाभिगम्य च ॥ पप्रच्छ सरमाहात्म्यं प्रमाणं च स्थितं तथा ॥५॥ मार्कण्डेय उवाच ॥ ब्रह्मपुत्र महाभाग सर्वशास्त्रविशारद ॥ ब्रूहि मे सरमाहात्म्यं सर्वपापभयापहम् ॥ ६ ॥ कानि तीर्थानि दृश्यानि गुह्यानि द्विजसत्तम ॥ लिङ्गानि कति पुण्यानि स्थाणोर्यानि समीपतः ॥ ७ ॥ येषां दर्शनमात्रेण मुक्तिं प्राप्नोति मानवः ॥ वटस्य दर्शनं पुण्यमुत्पत्तिं कथयस्व मे ॥ ८ ॥ प्रदक्षिणायां यत्पुण्यं तीर्थस्नानेन यत्फलम् ॥ गुह्येषु देवदृष्टेषु यत्पुण्यमभिजायते ॥ ॥ ९ ॥ देवदेवो यथा स्थाणुः सरमध्ये व्यवस्थितः ॥ किमर्थं पांशुना शक्रस्तीर्थं पूरितवान्पुनः ॥१०॥ स्थाणुतीर्थस्य माहात्म्यं चक्रतीर्थस्य यत्फलम् ॥ सूर्यतीर्थस्य माहात्म्यं सोमतीर्थस्य ब्रूहि मे ॥११॥ शंकरस्य च गुह्यानि विष्णोः स्थानानि यानि च ॥ कथयस्व महाभाग सरस्वत्याः सविस्तरम् ॥ ॥ १२ ॥ त्वं देही चापि देवस्य माहात्म्यं वेत्सि तत्त्वतः ॥ विरञ्चस्य प्रसादेन विदितं सर्वमेव च ॥ १३ ॥ लोमहर्षण उवाच ॥

तेषां क्रीडाविनोदेन तुष्टः प्रोवाच शंकरः ॥ योऽस्मिंस्तीर्थे नरः स्नाति विहारे श्रद्धयाऽन्वितः ॥ १४ ॥ धनधान्यप्रियैर्युक्तो जायते नात्र संशयः ॥ दुर्गातीर्थं ततो गच्छेद्दुर्गया सेवितं महत् ॥१५॥ यत्र स्नात्वा पितॄन्पूज्य न दुर्गतिमवाप्नुयात् ॥ तत्रापि च सरस्वत्याः कूलं त्रैलोक्यविश्रुतम् ॥ १६ ॥ दर्शनान्मुक्तिमाप्नोति सर्वपातकवर्जितः ॥ यस्तत्र तर्पयेद्देवान्पितॄंश्च श्रद्धया नरः ॥ १७ ॥ अक्षय्यं लभते सर्वं पितृतीर्थं विशिष्यते ॥ मातृहा पितृहा यश्च ब्रह्महा गुरुतल्पगः ॥ १८ ॥ स्नात्वा शुद्धिमवाप्नोति यत्र प्राची सरस्वती ॥ देवमार्गं प्रतिष्ठाय देवमार्गेण निःसृता ॥ १९ ॥ प्राची सरस्वती पुण्या अपि दुष्कृतकर्मणाम् ॥ त्रिरात्रं ये करिष्यन्ति प्राचीं प्राप्य सरस्वतीम् ॥२०॥ तेषां न दुष्कृतं किंचिद्देहमाश्रित्य तिष्ठति ॥ नरनारायणौ देवौ ब्रह्मा स्थाणुस्तथा ऋषिः॥२१॥प्राचीं दिशं निषेवन्तः सदा देवाः सवासवाः ॥ ये तु श्राद्धं करिष्यन्ति प्राचीमाश्रित्य मानवाः॥२२॥तेषां न दुर्लभं किंचिदिह लोके परत्र च ॥ तस्मात्प्राची सदा सेव्या पञ्चम्यां च विशेषतः॥२३॥पञ्चम्यां सेवमानस्तु लक्ष्मीवांश्च भवेन्नरः ॥ तीर्थमौशनसं तत्र त्रैलोक्यस्यापि दुर्लभम्॥२४॥उशना यत्र संसिद्ध आराध्य परमेश्वरम् ॥ ग्रहमध्येषु पूज्यते स तस्य तीर्थस्यसेवनात्॥२५॥ एवं शुक्रेण मुनिना सेवितं तीर्थमुत्तमम् ॥ ये सेवन्ते श्रद्दधानास्ते यान्ति परमां गतिम् ॥२६॥ यस्तु श्राद्धं नरो भक्त्या तस्मिं तीर्थे करिष्यति ॥ पितरस्तारितास्तेन भविष्यन्ति न संशयः ॥२७॥ चतुर्मुखं ब्रह्मतीर्थं यत्र मर्यादया स्थितम् ॥ ये सेवन्ते चतुर्दश्यां सोपवासा वसन्ति च ॥२८॥ [illegible]



॥ २९ ॥ स्थाणुतीर्थं ततो गच्छेत्सहस्रलिङ्गशोभितम्॥तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बिषैः ॥ ३० ॥ इति श्रीवामनपुराणे

दश्यां सोपवासा वसन्ति च ॥२८॥ अष्टम्यां कृष्णपक्षस्य चैत्रे मासि द्विजोत्तमाः ॥ [illegible]

॥ २९ ॥ स्थाणुतीर्थं ततो गच्छेत्सहस्रलिङ्गशोभितम्॥तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बिषैः ॥ ३० ॥ इति श्रीवामनपुराणे
पुलस्त्यनारदसंवादे सरोमाहात्म्ये द्विचत्वारिंशोऽध्यायः ॥४२॥ ऋषय ऊचुः ॥ स्थाणुतीर्थस्य माहात्म्यं वटस्यापि महामुने ॥
सन्निहत्याः पुरोत्पत्तिं पूरणं पांशुना ततः ॥ १ ॥ लिङ्गानां दर्शनात्पुण्यं स्पर्शनेन च किं फलम् ॥ तथैव सरमाहात्म्यं ब्रूहि
सर्वमशेषतः ॥ २ ॥ लोमहर्षण उवाच ॥ शृण्वन्तु देवताः सर्वाः पुराणं वामनं महत् ॥ यच्छ्रुत्वा मुक्तिमाप्नोति प्रसादाद्वामन
स्य तु ॥ ३॥ सनत्कुमारमासीनं स्थाणोर्वटसमीपतः ॥ ऋषिभिर्वालखिल्याद्यैर्ब्रह्मपुत्रैर्महात्मभिः ॥४॥ मार्कण्डेयो मुनिस्तत्र विन
येनाभिगम्य च ॥ पप्रच्छ सरमाहात्म्यं प्रमाणं च स्थितं तथा ॥५॥ मार्कण्डेय उवाच ॥ ब्रह्मपुत्र महाभाग सर्वशास्त्रविशारद ॥
ब्रूहि मे सरमाहात्म्यं सर्वपापभयापहम् ॥ ६ ॥ कानि तीर्थानि दृश्यानि गुह्यानि द्विजसत्तम ॥ लिङ्गानि कति पुण्यानि स्थाणो
र्यानि समीपतः ॥ ७ ॥ येषां दर्शनमात्रेण मुक्तिं प्राप्नोति मानवः ॥ वटस्य दर्शनं पुण्यमुत्पत्तिं कथयस्व मे ॥ ८ ॥ प्रदक्षि
णायां यत्पुण्यं तीर्थस्नानेन यत्फलम् ॥ गुह्येषु देवदृष्टेषु यत्पुण्यमभिजायते ॥ ॥ ९ ॥ देवदेवो यथा स्थाणुः सरमध्ये व्यव
स्थितः ॥ किमर्थं पांशुना शक्रस्तीर्थं पूरितवान्पुनः ॥१०॥ स्थाणुतीर्थस्य माहात्म्यं चक्रतीर्थस्य यत्फलम् ॥ सूर्यतीर्थस्य माहा
त्म्यं सोमतीर्थस्य ब्रूहि मे ॥११॥ शंकरस्य च गुह्यानि विष्णोः स्थानानि यानि च॥कथयस्व महाभाग सरस्वत्याः सविस्तरम् ॥
॥ १२ ॥ त्वं देही चापि देवस्य माहात्म्यं वेत्सि तत्त्वतः ॥ विरिञ्चस्य प्रसादेन विदितं सर्वमेव च ॥ १३ ॥ लोमहर्षण उवाच ॥

मार्कण्डेयवचः श्रुत्वा ब्रह्मात्मा स महामुनिः ॥ अतिभक्त्या तु तीर्थस्य प्रवणीकृतमानसः॥१४॥ पर्यङ्कं शिथिलीकृत्य नमस्कृत्य महेश्वरम् ॥ कथयामास तत्सर्वं यच्छ्रुतं ब्रह्मणः पुरा ॥ १५ ॥ सनत्कुमार उवाच ॥ नमस्कृत्य महादेवमीशानं वरदं शुभम् ॥ उत्पत्तिं च प्रवक्ष्यामि तीर्थानां ब्रह्मभाषिताम् ॥ १६ ॥ पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥ बृहदण्डमभूदेकं प्रजानां बीजसंभवम् ॥ १७ ॥ तस्मिन्नण्डे स्थितो ब्रह्मा शयनायोपचक्रमे ॥ सहस्रयुगपर्यन्तं सुप्त्वा स प्रत्यबुध्यत ॥ १८ ॥ सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमपश्यत ॥ सृष्टिं चिन्तयतस्तस्य रजसा मोहितस्य च ॥१९॥ रजः सृष्टिगुणं प्रोक्तं सत्त्वं स्थितिगुणं विदुः ॥ उपसंहारकाले च प्रवर्त्तेत तमोगुणः ॥ २० ॥ गुणातीतः स भगवान्व्यापकः पुरुषः स्मृतः ॥ तेनेदं सकलं व्याप्तं यत्किंचिज्जीवसंज्ञितम् ॥ २१ ॥ स ब्रह्मा स च गोविन्द ईश्वरः स सनातनः ॥ यस्तं वेद महात्मानं स सर्वं वेद निश्चितम् ॥ २२ ॥ गुणातीतः स पुरुषः परमात्मा सनातनः ॥ यस्तं वेद महात्मानं स सर्वं वेद मोक्षवित् ॥ २३ ॥ किं तेषां सकलैस्तीर्थैराश्रमैर्वा प्रयोजनम् ॥ येषां चानन्तकं चित्तमात्मन्येव व्यवस्थितम् ॥ २४ ॥ आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलशमादियुक्ता ॥ तस्यां स्नातः पुण्यकर्मा पुनाति न वारिणा शुद्ध्यति चान्तरात्मा ॥२५॥ एतत्प्रधानं पुरुषस्य कर्म यदात्मसंबोधसुखे प्रविष्टम् ॥ ज्ञेयं तदेव प्रवदन्ति सन्तस्तत्प्राप्य देही विजहाति कामान् ॥ २६ ॥ नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च ॥ शीलं स्थितिर्दण्डविधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ २७ ॥ [illegible] यदुक्तं ते द्विजोत्तम ॥ यज्ज्ञात्वा





इमं चोदाहरंस्तत्र श्लोकं नारायणं प्रति ब्रह्म परमं प्राप्स्यसि त्वं न संशयः ॥ २८ ॥ इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः ॥ [illegible] ॥३०॥ विशुद्धसलिले तस्मिन्

च ॥ शीलं स्थितिं दण्डविधानमार्जवं ततस्ततश्चोपरमः क्रियासु ॥ २७ ॥ अपि ब्रह्म समासेन यदुक्तं ते द्विजोत्तम ॥ ...

... ॥ २८ ॥ इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः ॥ इमं चोदाहरंस्तत्र श्लोकं नारायणं प्रति
ब्रह्म परमं प्राप्स्यसि त्वं न संशयः ॥ २८ ॥ इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः ॥ इमं चोदाहरंस्तत्र श्लोकं नारायणं प्रति
॥२९॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः॥तासु शेते सः यस्माच्च तेन नारायणः स्मृतः॥३०॥ विशुद्धसलिले तस्मिन्वि
...॥३१॥ततो भूरभवत्तस्माद्भुव इत्यपरः स्मृतः॥स्वः शब्दश्च तृतीयो
ज्ञायान्तर्गतं जगत्॥अण्डं विभज्य भगवांस्तस्मादोमित्यजायत॥३१॥ततो भूरभवत्तस्माद्भुव इत्यपरः स्मृतः॥स्वः शब्दश्च तृतीयो
ऽभूद्भूर्भुवःस्वेति संज्ञिताः ॥३२॥ तस्यां तेजः समभवत्तत्सवितुर्वरेण्यं यत् ॥ उदकं शोषयामास यत्तेजोऽणुविनिःसृतम् ॥३३॥
तेजसा शोषितं शेषं कललत्वमुपागतम् ॥ कललाद्बुद्बुदं ज्ञेयं ततः काठिन्यतां गतम् ॥ ३४ ॥ काठिन्याद्धरिणी ज्ञेया भूतानां
धारिणी हि सा ॥ यस्मिन्स्थाने स्थितं ह्यण्डं तस्मिन्सन्निहितं सरः ॥ ३५ ॥ यदाद्यं निःसृतं तेजस्तस्मादित्य उच्यते ॥ अण्ड
मध्ये समुत्पन्नो ब्रह्मा लोकपितामहः ॥ ३६ ॥ तस्योल्बं मेरुरभवज्जरायुः पर्वताः स्मृताः ॥ गर्भोदकं समुद्राश्च तथा नद्यः सह
स्रशः ॥ ३७ ॥ नाभिस्थानाद्यदुदकं ब्रह्मणो निर्मलं महत् ॥ महत्सरस्तेन पूर्णं विमलेन वराम्भसा ॥ ३८ ॥ तस्मिन्मध्ये स्थाणु
रूपी वटवृक्षो महामनाः ॥ तस्माद्विनिर्गता वर्णा ब्राह्मणाः क्षत्रिया विशः ॥ ३९ ॥ शूद्राश्च तस्मादुत्पन्नाः शुश्रूषार्थं द्विजन्म
नाम् ॥ ततश्चिन्तयतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ॥४०॥ वालखिल्याः समुत्पन्ना मानसाः शुद्धिरूपिणः ॥ अष्टाशीतिसहस्राणि
बभूवुश्चोर्ध्वरेतसः ॥ ४१ ॥ ततः सृष्टिं चिन्तयतो ब्रह्मणोऽव्यक्तजन्मनः ॥ मनसो मानसा जाताः सनकाद्या महर्षयः ॥ ४२ ॥
पुनश्चिन्तयतस्तस्य प्रजाकामस्य धीमतः ॥ ऋषयः सप्त चोत्पन्नास्ते प्रजापतयोऽभवन् ॥ ४३ ॥ पुनश्चिन्तयतस्तस्य रजसा

मोहितस्य च ॥ वालखिल्याः समुत्पन्नास्तपःस्वाध्यायतत्पराः ॥ ४४ ॥ ते सदा स्नाननिरता देवार्चनपरायणाः ॥ उपवासैर्व्रतै
स्तीव्रैः शोषयन्ति कलेवरम् ॥ ४५ ॥ दिव्यं वर्षसहस्रं ते कृशा धमनिसंतताः ॥ आराधयन्ति देवेशं न च तुष्यति शंकरः ॥४६॥
ततः कालेन महता उमया सह शंकरः ॥ आकाशमार्गेण तदा दृष्ट्वा देवी सुदुःखिता ॥ ४७ ॥ प्रसाद्य देवदेवेशं शंकरं प्राह
सुव्रता ॥ क्लिश्यन्ति ते मुनिगणा देवदारुवनाश्रयाः ॥ ४८ ॥ तेषां क्लेशक्षयं देव विधेहि कुरु मे दयाम् ॥ किं देव धर्मनिष्ठानाम
नन्तं देव दुष्कृतम् ॥ ४९ ॥ नाद्यापि ये न सिद्ध्यन्ति शुष्कस्नाय्वस्थिशोषिताः ॥ तच्छ्रुत्वा वचनं देव्याः पिनाकी पतिता
न्तकः ॥ प्रोवाच प्रहसन्मूर्ध्ना चारुचन्द्रांशुशोभितः ॥ ५० ॥ श्रीमहादेव उवाच ॥ न वेत्सि देवि तत्त्वेन धर्मस्य गहनां गतिम् ॥
नैते धर्म्मं विजानन्ति न च कामविवर्जिताः ॥ ५१ ॥ न च क्रोधेन निर्मुक्ताः केवलं मूढबुद्धयः ॥ एतच्छ्रुत्वाऽब्रवीद्देवी मामेवं
संशितव्रतम् ॥ ५२ ॥ देव प्रदर्शयात्मानं परं कौतूहलं हि मे ॥ स इत्युक्त उवाचेदं देवदेवः स्मिताननः ॥ ५३ ॥ तिष्ठ त्वमत्र
यास्यामि यत्रैते मुनिपुंगवाः ॥ साधयन्ति तपो घोरं दर्शयिष्यामि चेष्टितम् ॥ ५४ ॥ इत्युक्ता तु ततो देवी शंकरेण महात्मना ॥
गच्छस्वेत्याह मुदिता भर्त्तारं भुवनेश्वरी ॥ ५५ ॥ यत्र ते मुनयः सर्वे काष्ठलोष्ठसमाः स्थिताः ॥ अधीयाना महाभागाः कृताग्नि
सदनक्रियाः ॥५६॥ तान्विलोक्य ततो देवो नग्नः सर्वाङ्गसुन्दरः ॥ वनमालाकृतापीडो युवा भिक्षाकपालभृत् ॥ ५७ ॥ आश्रमे
पर्यटन्भिक्षां मुनीनामाश्रमं प्रति ॥ [illegible]



नाम् ॥ सकौतुकस्वभावेन तस्य रूपेण मोहिताः ॥ ५९ ॥ प्रोचुः परस्परं नार्य एहि पश्याम भिक्षुकम् ॥ परस्परमिति प्रोक्त्वा
[illegible] देवं मुनियोषितः ॥ सु तु भिक्षाकपालं तत्प्रसार्य बहु सादरम् ॥ ६१ ॥

पर्यटन्भिक्षां मुनीनामाश्रमं प्रति ॥ देहि भिक्षां ततश्चोक्त्वा संभ्रमश्चाश्रमं ययौ ॥ ५८ ॥

नाम् ॥ सकौतुकस्वभावेन तस्य रूपेण मोहिताः ॥ ५९ ॥ प्रोचुः परस्परं नार्य एहि पश्याम भिक्षुकम् ॥ परस्परमिति प्रोक्त्वा गृह्य मूलफलं बहु ॥ ६० ॥ गृहाण भिक्षामूचुस्तास्तं देवं मुनियोषितः ॥ स तु भिक्षाकपालं तत्प्रसार्य बहु सादरम् ॥ ६१ ॥ देहि भिक्षां शिवं वोऽस्तु भवतीभ्यस्तपोधनाः ॥ हसमानस्तु देवेशस्तत्र देव्या निरीक्षितः ॥ ६२ ॥ तत्र दत्त्वैव तां भिक्षां प॰ च्छुस्ताः स्मरातुराः ॥ नार्य ऊचुः ॥ कोऽसौ नाम व्रतविधिस्त्वया तापस सेव्यते ॥ ६३ ॥ यत्र नग्नेन लिङ्गेन वनमालाविभू षितः ॥ भवान्वै तापसो हृद्यो ब्रूहि स्म यदि मन्यसे ॥ ६४ ॥ इत्युक्तस्तापसस्ताभिः प्रोवाच हसिताननः ॥ इदं मम व्रतं किंचिन्न रहस्यं प्रकाशते ॥ ६५ ॥ शृण्वन्ति बहवो यत्र तत्र वाऽऽख्या न विद्यते ॥ अस्य व्रतस्य सुभगा इति मत्वा गम्य ॥ ६६ ॥ एवमुक्तास्तदा तेन प्रत्यूचुस्तं तदा मुनिम् ॥ ततोऽभ्येहि गमिष्यामो मुने नः कौतुकं महत् ॥ ६७॥ इत्युक्त्वा तास्तदा तं वै जगृहुः पाणिपल्लवैः ॥ काचित्कण्ठे सकन्दर्पा काचित्कामपरा तथा ॥ ६८ ॥ जानुभ्यामपरा नारी केशेषु ललि ताऽपरा ॥ अपरा तु कटीरन्ध्रे ह्यपरा पादयोरपि ॥ ६९ ॥ क्षोभं विलोक्य मुनय आश्रमे तु स्वयोषिताम् ॥ हन्यतामिति संभा ष्य काष्ठपाषाणपाणयः ॥ ७० ॥ पातयन्ति स्म देवस्य लिङ्गमूर्ध्वं विभीषणम् ॥ पातिते तु ततो लिङ्गे गतोऽन्तर्धानमीश्वरः॥७१॥ देव्या जहास भगवान्कैलासं नगमाश्रितः ॥ पतिते देवदेवस्य लिङ्गपृष्ठे चराचरे ॥ ७२ ॥ क्षोभः बभूव सुमहानृषीणां भावितात्मनाम् ॥ एवं विदित्वा ते तत्र वर्त्तन्ते व्याकुलाः स्मृताः ॥७३॥ उवाचैको मुनिवरस्तत्र बुद्धिमतां वरः ॥ न वयं विद्मः सद्भावं

तापसस्य महात्मनः ॥७४॥ विरिञ्चिं शरणं यामः स हि ज्ञास्यति चेष्टितम् ॥ एवमुक्ताः सर्व एव मुनयः संजितेन्द्रियाः ॥७५॥ ब्रह्मणः सदनं जग्मुर्देवैः सर्वैर्निषेवितम् ॥ प्रणिपत्याथ देवेशं लज्जयाऽधोमुखाः स्थिताः ॥ ७६ ॥ अथ तान्दुःखितान्दृष्ट्वा ब्रह्मा वचनमब्रवीत् ॥ अहो मुग्धा यदा यूयं क्रोधेन कलुषीकृताः ॥ ७७ ॥ न धर्मं च क्रियां कांचिज्जानते मूढबुद्धयः ॥ श्रूयतां धर्मसर्वस्वं तापसाः क्रूरकर्मणः ॥७८॥ विदित्वा यद्बुधः क्षिप्रं धर्मस्य फलमाप्नुयात् ॥ योऽसावात्मनि देहेऽस्मिन्विभुर्नित्यो व्यवस्थितः ॥७९॥ सोऽनादिः स महास्थाणुः पृथक्त्वे परिसूचितः ॥ मणिर्यथोपधानेन धत्ते वर्णोज्ज्वलोऽपि वै ॥८०॥ तन्मयो भवते तद्वदात्माऽपि मनसा कृतः ॥ मनसो भेदमाश्रित्य कर्मभिश्चोपचीयते ॥ ८१ ॥ ततः कर्मवशाद्भुङ्क्ते यद्भोगान्स्वर्गनारकान् ॥ तन्मनः शोधयेद्धीमाञ्ज्ञानयोगमुपक्रमैः ॥८२॥ तस्मिञ्छुद्धे ह्यन्तरात्मा स्वयमेव निराकुलः ॥ न शरीरस्य संक्लेशैरपि निर्दहनात्मकः ॥ ८३ ॥ शुद्धिमाप्नोति पुरुषः संशुद्धं यस्य नो मनः ॥ क्रियानियमनार्थाय पातकेभ्यः प्रकीर्तिताः ॥ ८४ ॥ यस्मादत्याविलं देहं न शीघ्रं शुद्ध्यते किल ॥ तेन लोकेषु मार्गोऽयं सत्पथस्य प्रवर्तकः ॥ ८५ ॥ वर्णाश्रमविभागोऽयं लोकाध्यक्षेण केनचित् ॥ निमित्तं मोहमाहात्म्यं निह्नवोत्तमभागिनाम् ॥ ८६ ॥ भवन्तः क्रोधकामाभ्यामभिभूताश्रमे स्थिताः ॥ ज्ञानिनामाश्रमो वेश्म वेश्माश्रममयोगिनाम् ॥ ८७ ॥ क्व च न्यस्तसमस्तेच्छा क्व च नारीमयो भ्रमः ॥ क्व क्रोध ईदृशो घोरो येनात्मानं न जानथ ॥ ८८ ॥ यत्क्रोधनो भजति यच्च ददाति नित्यं यच्च तपस्तपति यच्च जुहोति तस्य ॥ प्राप्नोति नैव किमपीह



॥ ७७

फलं हि लोके मोघं फलं भवति तस्य हि कोपनस्य ॥ ८९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये त्रिचत्वा

स्मानं न जानथ ॥ ८८ ॥ यत्क्रोधनो यजति यच्च ददाति नित्यं यच्चा तपस्तपति यच्च जुहोति तस्य ॥ प्राप्नोति नैव किमपीह

फलं हि लोके मोघं फलं भवति तस्य हि कोपनस्य ॥ ८९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ सनत्कुमार उवाच ॥ ब्रह्मणो वचनं श्रुत्वा ऋषयः सर्व एव ते ॥ पुनरेव च पप्रच्छुर्जगतः श्रेयकारणम् ॥ १ ॥ ब्रह्मोवाच ॥ गच्छामः शरणं देवं शूलपाणिं त्रिलोचनम् ॥ प्रसादाद्देवदेवस्य भविष्यथ यथा पुरा ॥ २ ॥ इत्युक्ता ब्रह्मणा सार्द्धं कैलासं गिरिमुत्तमम् ॥ ददृशुस्ते समासीनमुमया सहितं हरम् ॥ ३ ॥ ततः स्तोतुं समारब्धो ब्रह्मा लोकपितामहः ॥ देवाधिदेवं वरदं त्रैलोक्यस्य शिवं प्रभुम् ॥ ४ ॥ ब्रह्मोवाच ॥ अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने ॥ महादेवाय देवाय स्थाणवे परमात्मने ॥ ५ ॥ नमोऽस्तु भुवनेशाय तुभ्यं तारक सर्वदा ॥ ज्ञानानां दायको देवस्त्वमेकः पुरुषोत्तमः ॥ ६ ॥ नमस्ते पद्मगर्भाय हृत्पद्मशायिने नमः ॥ घोरशातितपापाय चण्डक्रोधनमोऽस्तु ते ॥७॥ नमस्ते देवविश्वेश नमस्ते शूरनायक ॥ शूलपाणे नमस्तेऽस्तु नमस्ते विश्वभावन ॥ ८ ॥ एवं स्तुतो महादेवो ब्रह्मणा ऋषिभिस्तदा ॥ उवाच तानाव्रजत लिङ्गं वो भविता पुनः ॥ ९ ॥ क्रियतां मद्वचः शीघ्रं येन मे प्रीतिरुत्तमा ॥ भविष्यति प्रतिष्ठायां लिङ्गस्यात्र न संशयः ॥ १० ॥ ये लिङ्गं पूजयिष्यन्ति मामकं भक्तिमाश्रिताः ॥ न तेषां दुर्लभं किंचिद्भविष्यति कदाचन ॥ ११ ॥ सर्वेषामपि पापानां कृतानामपि जानता ॥ शुद्ध्यते लिङ्गपूजाया नात्र कार्या विचारणा ॥ १२ ॥ युष्माभिः पातितं लिङ्गं तारयित्वा महत्सरः ॥ सन्निहत्यां तु विख्यातं तस्मिञ्छीघ्रं प्रतिष्ठितम् ॥ १३ ॥ यथाऽभिलषितं कामं ततः प्राप्स्यथ ब्राह्मणाः ॥

स्थाणुनाम्ना हि लोकेषु पूजनीयो दिवौकसाम् ॥ १४ ॥ स्थाण्वीश्वरे स्थितो यस्मात्ततः स्थाण्वीश्वरः स्मृतः ॥ ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्वकिल्बिषैः ॥ १५ ॥ शुद्धदेहा भविष्यन्ति दर्शनान्मोक्षगामिनः ॥ इत्येवमुक्त्वा देवेन ऋषयो ब्रह्मणा सह ॥ १६ ॥ तस्माद्दारुवनाल्लिङ्गं नेतुं समुपचक्रमुः ॥ अशक्तास्तं चालयितुं ते देवा ऋषिभिः सह ॥ १७ ॥ श्रमेण महता युक्ता ब्रह्माणं शरणं ययुः ॥ तेषां श्रमाभिपन्नानामिदं ब्रह्माऽब्रवीद्वचः ॥ १८ ॥ किं वा श्रमेण महता न यूयं वहनक्षमाः ॥ स्वेच्छया पतितं लिङ्गं देवदेवेन शूलिना ॥ १९ ॥ तस्मात्तमेव शरणं यास्यामः सहिताः सुराः ॥ प्रसन्नश्च महादेवः स्वयमेव स नेष्यति ॥ २० ॥ इत्येवमुक्ता ऋषयो देवाश्च ब्रह्मणा सह ॥ कैलासं गिरिमासाद्य रुद्रदर्शनकाङ्क्षिणः ॥ २१ ॥ न च पश्यन्ति ते देवं ततश्चिन्तासमन्विताः ॥ ब्रह्माणमूचुर्मुनयः क्व स देवो महेश्वरः ॥ २२ ॥ ततो ब्रह्मा चिरं ध्यात्वा देवदेवं महेश्वरम् ॥ हस्तिरूपेण तिष्ठन्तं मुनिभिर्मानसः स्तुतम् ॥ २३ ॥ अथ ते ऋषयः सर्वे देवाश्च ब्रह्मणा सह ॥ गता महत्सरः पुण्यं यत्र देवः स्वयं स्थितः ॥ २४ ॥ न च पश्यन्ति ते देवमन्विषन्तस्ततस्ततः ॥ ततश्चिन्तान्विता देवा ब्रह्मणा सहितास्तथा ॥ २५ ॥ पश्यन्ति देवीं सुप्रीतां कमण्डलुविभूषिताम् ॥ प्रीयमाणास्तदा देवीमिदं वचनमब्रुवन् ॥ २६ ॥ क्व देवि मातर्देवेशो दृश्यते सर्वदा समः ॥ श्रमेण महता युक्ता अन्विषन्तो महेश्वरम् ॥ २७ ॥ ततस्तु कृपयाऽऽविष्टा देवी वचनमब्रवीत् ॥ अत्रैवाद्य महाभागास्तं द्रक्ष्यथ महेश्वरम् ॥ २८ ॥ पीयताममृतं देवास्ततो द्रक्ष्यथ शंकरम् ॥ [illegible] भवान्या समुदाहृतम् ॥ २९ ॥ सुखोपविष्टास्ते देवाः पपुस्तदमृतं शुचि ॥ अनन्तरं सुखासीनाः पप्रच्छुः परमेश्वरीम् ॥ ३० ॥

मब्रवीत ॥ अत्रैवाद्य महाभागास्तं द्रक्ष्यथ महेश्वरम् ॥ २८ ॥ पीयताममृतं देव्यास्ततो द्रक्ष्यथ शंकरम् ॥

भवान्या समुदाहृतम् ॥ २९ ॥ सुखोपविष्टास्ते देवाः पपुस्तदमृतं शुचि ॥ अनन्तरं सुखासीनाः पप्रच्छुः परमेश्वरीम् ॥ ३० ॥
क्व स देव इहायातो हस्तिरूपधरः स्थितः ॥ दर्शितश्च तदा देव्या सरोमध्ये व्यवस्थितः ॥३१॥ दृष्ट्वा देवं हर्षयुक्ताः सर्वे देवाः
सवासवाः ॥ ब्रह्माणमग्रतः कृत्वा इदं वचनमब्रुवन् ॥ ३२ ॥ त्वया त्यक्तं महादेव लिङ्गं त्रैलोक्यवन्दितम् ॥ तस्य चानयने
नान्यः समर्थः स्यान्महेश्वर ॥ ३३ ॥ इत्येवमुक्तो भगवान्देवो ब्रह्मादिभिर्हरः ॥ जगाम ऋषिभिः सार्द्धं देवदारुवनाश्रयम् ॥३४॥
तत्र गत्वा महादेवो हस्तिरूपधरो हरः ॥ करेण जग्राह ततो लीलया परमेश्वरम् ॥ ३५ ॥ तमादाय महादेवः स्तूयमानो मह
र्षिभिः ॥ निवेशयामास तदा सरः पार्श्वे तु पश्चिमे ॥ ३६ ॥ ततो देवाः सर्व एव ऋषयश्च तपोधनाः ॥ आत्मानं सफलं दृष्ट्वा
स्तोत्रं चक्रुर्महेश्वरे॥३७॥ नमस्ते परमात्मन् अनन्तयोने लोकसाक्षिन् परमेष्ठिन् भगवन् सर्वज्ञ क्षेत्रज्ञ ज्ञानज्ञेय सर्वेश्वर महाविरञ्चे
महाविभूते महाक्षेत्रज्ञ महापुरुष सर्वभूतावास मनोनिवास आदिदेव महादेव सदाशिव ईशान दुर्विज्ञेय दुराराध्य महाभूतेश्वर पर
मेश्वर महायोगेश्वर त्र्यम्बक महायोगिन् परब्रह्मन् परमज्योतिःब्रह्मविदुत्तम ॐकार वषट्कार स्वाहाकार स्वधाकार परमकारण सर्व
गत सर्वदर्शन सर्वशक्त सर्वदेव अज सहस्रार्चिः सुधामन् हरधाम वंशवर्त्त संवर्त्त संकर्षण वडवानल आग्नीषोमात्मक पवित्र महा
पवित्र महामेघ महाकामदहन् हंस परमहंस महाराजिक महेश्वर महाकामुक महाहंस भवक्षयकर सुरसिद्धार्चित हिरण्यवाह हिरण्य
रेतः हिरण्यनाभ हिरण्याग्रकेश मुञ्जकेशिन् सर्वलोकवरप्रद सर्वानुग्रहकर कमलेशय हृदयेशय ज्ञानोदधे शंभो च विभो महा

यज्ञ महायाज्ञिक सर्वयज्ञमय सर्वयज्ञसंस्तुत निराश्रय समुद्रेश अत्रिसंभूत भक्तानुकम्पक अभग्नयोग योगधर वासुकिमहाहिवि
द्योतितविग्रह हरितनयन त्रिलोचन जटाधर नीलकण्ठ चन्द्रार्धधर उमाशरीरार्धधर शूलधर पिनाकधर खड्गचर्मधर गजचर्मधर
दुस्तरसंसारमहासंहारकर प्रसीद भक्तजनवत्सल ॥ २८ ॥ एवं स्तुतो देवगणैः सुभक्त्या स ब्रह्ममुख्यैश्च पितामहेन ॥ त्यक्त्वा
तदा हस्तिरूपं महात्मा लिङ्गं तदा संनिधानं चकार ॥२९॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे सरोमाहात्म्ये चतुश्चत्वा
रिंशोऽध्यायः ॥ ४४ ॥ सनत्कुमार उवाच ॥ अथोवाच महादेवो देवान्ब्रह्मपुरोगमान् ॥ ऋषीणां चैव प्रत्यक्षं तीर्थमाहात्म्यमुत्त
मम् ॥ १ ॥ एतत्सन्निहतं प्रोक्तं सरः पुण्यतमं महत् ॥ मयोपवेशितं यस्मात्तस्मान्मुक्तिप्रदायकम् ॥ २ ॥ इह ये पुरुषाः केचि
द्ब्राह्मणाः क्षत्रिया विशः ॥ लिङ्गस्य दर्शनादेव पश्यन्ति परमं पदम् ॥ ३ ॥ अहन्यहनि तीर्थानि आसमुद्रात्सरांसि च ॥ स्थाणु
तीर्थं समेष्यन्ति मध्यं प्राप्ते दिवाकरे ॥ ४ ॥ स्तोत्रेणानेन सततं ये मां स्तोष्यन्ति भक्तितः ॥ तस्याहं सुलभो नित्यं भविष्यामि
न संशयः ॥ ५ ॥ इत्युक्त्वा भगवान्रुद्रो ह्यन्तर्धानं गतः प्रभुः ॥ देवाश्च ऋषयः सर्वे स्वानि स्थानानि भेजिरे ॥ ६ ॥ ततो निर
न्तरं स्वर्गं मानुषैर्मिश्रितं कृतम् ॥ स्थाणुलिङ्गस्य माहात्म्यदर्शनात्स्वर्गमाप्नुयुः ॥ ७ ॥ ततो देवगणाः सर्वे ब्रह्माणं शरणं
पर्वताः ॥ उपविष्टाः सभार्यां वै प्रणिपत्य ऋषींश्च तान् ॥४७॥ ततो गिरीशः स्वां भार्यां मेनामाहूतवान्स्वयम् ॥ समागच्छतु कल्याणी समं पुत्रेण भामिनी ॥ ४८ ॥ साऽभिवन्द्य ऋषीणां च चरणांश्च तपस्विनी ॥ सर्वान्ज्ञातीन्समाभाष्य विवेश ससुता तदा ॥ ४९ ॥ ततोऽद्रिषु महाशैल उपविष्टेषु नारद ॥ उवाच वाक्यं वाक्यज्ञः सर्वानाभाष्य सुस्वरम् ॥ ५० ॥ हिमवानुवाच ॥ इमे सप्तर्षयः पुण्या याचितारः सुतां मम ॥ महेश्वरार्थं कन्यां तु तच्चावेद्यं भवत्सु वै ॥५१॥ तद्वदध्वं यथान्यायं ज्ञातयो यूयमेव मे ॥ नोल्लङ्घ्य युष्मान्दास्यामि तत्क्षमं वक्तुमर्हथ ॥ ५२ ॥ पुलस्त्य उवाच ॥ हिमवद्वचनं श्रुत्वा मेर्वाद्याः स्थावरोत्तमाः ॥ सर्वं एवाब्रुवन्वाक्यं स्थितास्तेष्वासनेषु ते ॥ ५३ ॥ याचितारश्च मुनयो वरस्त्रिपुरहा हरः ॥ दीयतां शैल कालीयं जामाताऽभिमतो हि नः ॥ ५४ ॥ मेनाऽथ प्राह भर्तारं शृणु शैलेन्द्र मे वचः ॥ पितृभिस्तनया मह्यं दत्ताऽनेनैव हेतुना ॥ ५५ ॥ यस्तस्यां भूतपतिना पुत्रो दत्तो भविष्यति ॥ स हनिष्यति दैत्येन्द्रं महिषं तारकं तथा ॥५६॥ इत्येवं मेनया प्रोक्तः शैले शैलेश्वरः सुताम् ॥ प्रोवाच पुत्रि दत्ताऽसि शर्वाय त्वं मयाऽधुना ॥ ५७ ॥ ऋषीनुवाच कालीयं मम पुत्री तपोधनाः ॥ प्रणामं शंकरवधूर्भक्तिनम्रा करोति वः ॥ ५८ ॥ ततोऽप्यरुन्धती कालीमङ्कमारोप्य चाटुकैः ॥ विलज्जमानामाश्वास्य हरनामोचितैः शुभैः ॥ ५९ ॥ ततः सप्तर्षयः प्रोचुः शैलराज निशामय ॥ जामित्रगुणसंयुक्ता तिथिः पुण्या सुमङ्गला ॥ ६० ॥ उत्तराफाल्गुनीयोगं तृतीयेऽह्नि हिमांशुमान् ॥ गमिष्यति च तत्रोक्तो मुहूर्तो मैत्रनामकः ॥ ६१ ॥ तस्यां तिथौ [illegible] ॥ [illegible] विसर्जयामास शनैः शैलराट्त्वृषिपुंगवान् ॥६३॥

सप्तर्षयः प्रोचुः शैलराज निशामय ॥ जामित्रगुणसंयुक्तां तिथिं पुण्यां सुमङ्गलाम् ॥ ६० ॥ उत्तराफाल्गुनीयोगे तृतीयेऽह्नि हिमा
गुमान् ॥ गमिष्यति च तत्रोक्तो मुहूर्तो मैत्रनामकः ॥ ६१ ॥ [illegible]
॥ विसर्जयामास शनैः शैलराडृषिपुंगवान् ॥ ६३ ॥
यामस्तदनुज्ञातुमर्हसि ॥ ६२ ॥ ततः संपूज्य विधिना फलमूलादिभिः शुभैः ॥ विसर्जयामास शनैः शैलराडृषिपुंगवान् ॥ ६३ ॥
यामस्तदनुज्ञातुमर्हसि ॥ ६२ ॥ ततः संपूज्य विधिना फलमूलादिभिः शुभैः ॥ आसाद्य मन्दरगिरिं भूयोऽपश्यन्त शंकरम् ॥ ६४ ॥ प्रणम्योचुर्महेशानं भवान्भर्ता
तेऽप्याजग्मुर्महावेगात्त्वाक्रम्य महदालयम् ॥ आसाद्य मन्दरगिरिं भूयोऽपश्यन्त शंकरम् ॥ ६४ ॥ प्रणम्योचुर्महेशानं भवान्भर्ता
द्रक्ष्यन्ति घनवाहनम् ॥ ६५ ॥ ततो महेश्वरः प्रीत ऋषीन्सर्वाननुक्रमात् ॥ पूजयामास
ऽद्रिजा वधूः ॥ सब्रह्मकास्त्रयो लोका द्रक्ष्यन्ति घनवाहनम् ॥ ६५ ॥ ततो महेश्वरः प्रीत ऋषीन्सर्वाननुक्रमात् ॥ पूजयामास
विधिना अरुन्धत्या समं हरः ॥ ६६ ॥ ततः संपूजिता जग्मुः सुराणां मन्त्रणाय ते ॥ तेऽथाजग्मुर्हरं द्रष्टुं ब्रह्मविष्णिवन्द्रभा
स्कराः ॥ ६७ ॥ ततः समभ्येत्य महेश्वरस्य कृतप्रणामा विविशुर्महर्षे ॥ सस्मार नन्दिप्रमुखांश्च सर्वानभ्येत्य ते वन्द्य हरं
निषण्णाः ॥ ६८ ॥ देवैर्गणैश्चापि वृतो गणेशः संशोभते मुक्तजटाग्रभारः ॥ यथा वने सर्ज्जकदम्बमध्ये प्ररोहमूलोऽथ वनस्प
तिर्वा ॥ ६९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे उमासंभवे गौरीविवाहे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ पुलस्त्य उवाच ॥
समागतान्सुरान्दृष्ट्वा नन्दिराख्यातवान्विभोः ॥ अथोत्थाय हरिं भक्त्या परिष्वज्य न्यपीडयत् ॥ १ ॥ ब्रह्माणं शिरसा नत्वा स
माभाष्य शतक्रतुम् ॥ आलोक्यान्यान्सुरगणान्संभावयत स शंकरः ॥ २ ॥ गणाश्च जय देवेति वीरभद्रपुरोगमाः ॥ शैवाः
पाशुपताद्याश्च विविशुर्मन्दराचलम् ॥ ३ ॥ ततस्तस्मान्महाशैलं कैलासं सह दैवतैः ॥ जगाम भगवाञ्छर्वः कर्तुं वैवाहिकं
विधिम् ॥ ४ ॥ ततस्तस्मिन्महाशैले देवमातादितिः शुभा ॥ सुरभिः सुरमा चान्याश्चक्रुर्मण्डनमाकुलाः ॥ ५ ॥ महास्थिशेखरी
चारुरोचनातिलको हरः ॥ सिंहाजिनी चातिनीलभुजगकृतकुण्डलः ॥ ६ ॥ महाहिरत्नवलयो हारकेयूरनूपुरः ॥ समुन्नतजटाभारो

वृषभस्थो विराजते ॥ ७ ॥ तस्याग्रतो गणाः स्वैः स्वैरारूढा यान्ति वाहनैः ॥ देवाश्च पृष्ठतो जग्मुर्हुताशनपुरोगमाः ॥ ८ ॥ वैनतेयं समारूढः सह लक्ष्म्या जनार्दनः ॥ प्रयाति देवपार्श्वस्थो हंसेन च पितामहः ॥ ९ ॥ गजाधिरूढो देवेन्द्रश्छत्रं शुक्लपटं विभोः ॥ धारयामास विततं सहेन्द्राण्या सहस्रधृक् ॥ १० ॥ यमुना सरितां श्रेष्ठा वालव्यजनमुत्तमम् ॥ श्वेतं प्रगृह्य हस्तेन कच्छपे संस्थिता ययौ ॥ ११ ॥ हंसकुन्देन्दुसङ्काशं वालव्यजनमुत्तमम् ॥ सरस्वती सरिच्छ्रेष्ठा गजारूढा समादधे ॥ १२ ॥ ऋतवः षट् समादाय कुसुमं गन्धसंयुतम् ॥ पञ्चवर्णं महेशार्थे जग्मुस्ते कामचारिणः ॥१३॥ मत्तमैरावतनिभं गजमारुह्य वेगवान् ॥ अनुलेपनमादाय ययौ तत्र पृथूदकः ॥ १४ ॥ गन्धर्वास्तुम्बरुमुखा गायन्तो मधुरस्वरम् ॥ अनुजग्मुर्महादेवं वादयन्तश्च किंनराः ॥ १५ ॥ नृत्यन्त्यप्सरसश्चैव स्तुवन्तो मुनयश्च तम् ॥ गन्धर्वा यान्ति देवेशं त्रिणेत्रं शूलपाणिनम् ॥१६॥ एकादश तथा कोट्यो रुद्राणां तत्र वै ययुः ॥ द्वादशैवादितेयानामष्टौ कोट्यो वसूनपि ॥ १७ ॥ सप्तषष्टिस्तथा कोट्यो गणानामृषिसत्तमाः ॥ चतुर्विंशत्तदा जग्मुर्गणानामूर्ध्वरेतसाम् ॥ १८ ॥ असंख्यातानि यूथानि यक्षकिन्नररक्षसाम् ॥ अनुजग्मुर्महेशानं विवाहाय समाकुलाः ॥ १९ ॥ ततः क्षणेन देवेशः क्ष्माधराधिपतेस्तलम् ॥ संप्राप्तश्चागमञ्छैलाः कुञ्जरस्थाः समन्ततः ॥ २० ॥ ततो ननाम भगवांस्त्रिणेत्रः स्थावराधिपम् ॥ शैलाः प्रणेमुरीशानं ततोऽसौ मुदितोऽभवत् ॥ २१ ॥ समं सुरैः पार्षदैश्च विवेश वृषकेतनः॥नन्दिना दर्शिते मार्गे शैलराजपुरं महत्॥२२॥जीमूतकेतुशयात इत्येवं नगरस्त्रियः ॥ निजकर्म परित्यज्य



माल्यदाम समादाय करेणैकेन भामिनी ॥ केशपाशं द्वितीयेन शंकराभिमुखी गता ॥ २४ ॥ अन्या

॥ २० ॥ ततो ननाम भगवान्हिमवन्तं स्थावराधिपम् ॥ शैलः प्रणम्य ईशानं ततोऽसौ मुदितोऽभवत् ॥ २१ ॥ ...

देशं विवेश वृषकेतनः॥नन्दिना दर्शिते मार्गे शैलराजपुरं महत्॥२२॥जीमूतकेतुरायात इत्थ्येवं नगरस्त्रियः ॥ निजकर्म परित्यज्य

दर्शनायाहृताभवन् ॥२३॥ माल्यदाम समादाय करेणैकेन भामिनी ॥ केशपाशं द्वितीयेन शंकराभिमुखी गता ॥ २४ ॥ अन्या

ऽलक्तकरागाढ्यं पादं कृत्वाऽऽकुलेक्षणा ॥ अनलक्तकमेकं हि हरं द्रष्टुमुपागता ॥ २५ ॥ एकेनाक्ष्णाऽञ्जितेनैव श्रुत्वा भीमसमुपाग

तम् ॥ साञ्जनं च प्रगृह्यान्या शलाकां सुष्ठु धावति ॥२६॥ अन्या सरशनं वासः पाणिनाऽऽदाय सुन्दरी ॥ उन्मत्तेवागमन्नग्ना

हरदर्शनलालसा ॥२७॥ अन्याऽतिक्रान्तमीशानं श्रुत्वा स्तनभरालसा ॥ अनिन्दत कुचौ बाला यौवनं स्वं कृशोदरी ॥ २८ ॥

इत्थं स नागरस्त्रीणां क्षोभं संजनयन्हरः ॥ जगाम वृषभारूढो दिव्यं श्वशुरमन्दिरम् ॥ २९ ॥ ततः प्रविष्टं प्रसमीक्ष्य शंभुं

शैलेन्द्रवेश्मन्यबला ब्रुवन्ति ॥ स्थाने तपो दुश्चरमम्बिकायाश्चीर्णं महानेष सुरस्तु शंभुः॥३०॥ स एष येनाङ्गमनङ्गतां कृतं कन्द

र्पनाम्नः कुसुमायुधस्य ॥ क्रतोः क्षयी दक्षविनाशकर्त्ता भगाक्षिहा शूलधरः पिनाकी ॥ ३१ ॥ नमो नमः शंकर शूलपाणे मृगा

रिचर्माम्बर कालशत्रो ॥ महाहिहाराङ्कितकुण्डलाय नमो नमः पार्वतिवल्लभाय ॥ ३२ ॥ इत्थं संस्तूयमानः, सुरपतिविधृतेना

तपत्रेण शंभुः, सिद्धैर्वन्द्यः सपक्षैरहिकृतवलयी, चारुभस्मोपलिप्तः ॥ अग्रस्थेनाग्रजेन,प्रमुदितमनसा, विष्णुना चानुगेन, वैवाहीं

मङ्गलाढ्यां,हुतवहसहितामारुरोहाथ वेदीम् ॥ ३३ ॥ आयाति त्रिपुरान्तके सहचरैः सार्धं च सप्तर्षिभिर्व्यग्रोऽभूद्गिरिराजवेश्मनि

जनः कन्यासमालंकृतौ ॥ व्याकुल्यं समुपागताश्च गिरयः पूजादिना देवताः प्रायो व्याकुलिता भवन्ति सुहृदः कन्याविवाहो

त्सुकाः ॥३४॥ प्रसाध्य देवीं गिरिजां ततः स्त्रियो दुकूलयुक्ताभिवराङ्गयष्टिकाम् ॥ आत्रा सुनाभेन तदोत्सवे कृते सा शंकराभ्या

शमथोपपादिता ॥२५॥ ततः शुभे हर्म्यतले हिरण्मये स्थिताः सुराः शंकरकालिचेष्टितम् ॥ पश्यन्ति देवोऽपि समं कृशाङ्ग्या लोकानु
जुष्टं पदमाससाद ॥२६॥ यत्र क्रीडा विचित्राः सकुसुमतरवो वारिणो बिन्दुपातैर्गन्धाढ्यैर्गन्धचूर्णैः प्रविरलमवनौ गुण्ठितौ गुण्डिका
याम् ॥ मुक्तादामैः प्रकामं हरगिरितनयाक्रीडनार्थं तदाथ्नन्पश्चात्सिन्दूरपुञ्जैरविरतविततैश्चक्रतुः क्ष्मां सुरक्ताम् ॥ २७ ॥ एवं क्रीडां
हरः कृत्वा समं च गिरिकन्यया ॥ आगच्छद्दक्षिणां वेदिमृषिभिः सेवितां दृढाम् ॥ २८ ॥ अथाजगाम हिमवाञ्शुक्लाम्बरधरः शुचिः ॥
पवित्रपाणिरादाय मधुपर्कमथाकुलम् ॥ २९ ॥ उपविष्टस्त्रिणेत्रस्तु शाक्रीं दिशमपश्यत ॥ सप्तर्षिकांश्च शैलेन्द्रः सूपविष्टो विलोकयन् ॥
॥ ४० ॥ सुखासीनस्य शर्वस्य कृताञ्जलिपुटो गिरिः ॥ प्रोवाच वचनं श्रीमान्धर्मसाधनमात्मनः ॥ ४१ ॥ हिमवानुवाच ॥ मत्पुत्रीं
भगवन्कालीं पौत्रीं च पुलहाग्रजे ॥ पितॄणामपि दौहित्रीं प्रतीच्छेमां मयोदिताम् ॥ ४२ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्त्वा शैलेन्द्रो
हस्तं हस्तेन योजयन् ॥ प्रादात्प्रतीच्छ भगवन्निदमुच्चैरुदीरयन् ॥ ४३ ॥ हर उवाच ॥ न मेऽस्ति माता न पिता तथैव न ज्ञातयो
वाऽपि च बान्धवाद्याः ॥ निराश्रयोऽहं गिरिशृङ्गवासी सुतां प्रतीच्छामि तवाद्रिराज ॥ ४४ ॥ इत्येवमुक्त्वा वरदोऽवपीडयत्करं
करेणादिकुमारिकायाः ॥ सा चापि संस्पर्शमवाप्य शंभोः परां मुदं लब्धवती सुरर्षे ॥ ४५ ॥ तथाऽधिरूढो वरदोऽथ वेदिं सहा
द्रिपुत्र्या मधुपर्कमश्नन् ॥ दत्त्वा च लाजा[illegible] ॥ ४६ ॥ कालि पश्येशवदनं रम्यं शशध
रप्रभम् ॥ समदृष्टिः स्थिरा भूत्वा कुरुष्वाग्नेः प्रदक्षिणाम् ॥ ४७ ॥ ततोऽम्बिका हरमुखे दृष्टे शैत्यमुपागता ॥ यथाऽर्करश्मिसंतप्ता

[illegible] ॥ ४८ ॥ भूयः प्राह [illegible]वक्रमीक्षस्वेति पितामहः ॥ लज्जया साऽपि दृष्टेति शनैर्ब्रह्माणमब्रवीत ॥ ४९ ॥

द्रिपुत्र्या मधुपर्कमश्नन् ॥ दत्त्वा च लाजान्कलमस्य शुक्लांस्ततो विरञ्चो गिरिजामुवाच ह ॥४६॥ कालि ... 
रप्रभम् ॥ समदृष्टिः स्थिरां भूत्वा कुरुष्वाग्नेः प्रदक्षिणाम् ॥४७॥ ततोऽम्बिका हरमुखे दृष्टे ... 
प्राप्य वृष्टिमिवावनी ॥ ४८ ॥ भूयः प्राह विभोर्वक्त्रमीक्षस्वेति पितामहः ॥ लज्जया साऽपि दृष्टेति शनैर्ब्रह्माणमब्रवीत् ॥ ४९ ॥
समं गिरिजया तेन हुताशाग्नेः प्रदक्षिणम् ॥ कृतो लाजाश्च हविषा समं क्षिप्ता हुताशने ॥५०॥ ततो हराङ्घ्रिर्मालिन्या गृहीतो
दायकारणात् ॥ किं याचसे ते दास्यामि मुञ्चस्वेति हरोऽब्रवीत् ॥ ५१ ॥ मालिनी शंकरं प्राह मत्सख्या देहि शंकर ॥ सौभाग्यं
निजगोत्रीयं ततो मोक्षमवाप्स्यसि ॥५२॥ अथोवाच महादेवो दत्तं मालिनि मुञ्च माम् ॥ सौभाग्यं निजगोत्रीयं योऽस्यास्तं शृणु
वच्मि ते ॥ ५३ ॥ योऽसौ पीताम्बरधरः शङ्खधृङ् मधुसूदनः ॥ एतदीयं हि सौभाग्यं दत्तं मद्गोत्रमेव हि ॥५४॥ इत्येवमुक्ते व
चने प्रमुमोच वृषध्वजम् ॥ मालिनी निजगोत्रस्य शुभचारित्रमालिनी ॥ ५५ ॥ यदा हरो हि मालिन्या गृहीतश्चरणे शुभे ॥
तदा कालीमुखं ब्रह्मा ददर्श शशिनोऽधिकम् ॥ ५६ ॥ तद्दृष्ट्वा मोहमगमच्छुक्रच्युतिमवाप च ॥ तच्छुक्रं वालुकायां च खिलीचक्रे
ससाध्वसः ॥ ५७ ॥ ततोऽब्रवीद्धरो ब्रह्मन्न द्विजान्हन्तुमर्हसि ॥ अमी महर्षयो धन्या वालखिल्याः पितामह ॥ ५८ ॥ ततो
महेशवाक्यान्ते समुत्तस्थुस्तपस्विनः ॥ अष्टाशीतिसहस्राणि वालखिल्या इति स्मृताः ॥५९॥ ततो विवाहे निर्वृत्ते प्रविष्टः कौतुकं
हरः ॥ रेमे सहोमया रात्रिं प्रभाते पुनरुत्थितः ॥ ६० ॥ ततोऽद्रिपुत्रीं समवाप्य शंभुः सर्वैः समं भूतगणैश्च हृष्टः ॥ संपूज्
तः पर्वतपार्थिवन स्वमन्दिरं शीघ्रमुपाजगाम ॥ ६१ ॥ ततः सुरान्ब्रह्महरीन्द्रमुख्यान्प्रणम्य संपूज्य यथाविभागम् ॥विसृज्य भूतैः
सहितो महीध्रमध्यावसन्मन्दरमष्टमूर्तिः ॥६२॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे उमासंभवे गौरीविवाहो नाम त्रिपञ्चाश

त्तमोऽध्यायः ॥९३॥ पुलस्त्य उवाच ॥ ततो गिरौ वसन्रुद्रः स्वेच्छया विचरन्मुने ॥ विश्वकर्माणमाहूय अवोचत्कुरु मे गृहम् ॥ ॥ १ ॥ ततश्चकार शर्वस्य गृहं स्वस्तिकलक्षणम् ॥ योजनानि चतुःषष्टिः प्रमाणेन हिरण्मयम् ॥२॥ दन्ततोरणनिर्व्यूहं मुक्ताजालान्तरं शुभम् ॥ शुद्धस्फटिकसोपानं वैडूर्यकृतरूपकम् ॥ ॥ ३ ॥ सप्तकक्षं सुविस्तीर्णं सर्वं समुदितं गुणैः ॥ ततो देवपतिश्चक्रे यज्ञं गार्हस्थ्यलक्षणम् ॥ ४ ॥ तं पूर्वचरितं मार्गमनुयाति स्म शङ्करः ॥ तथा सतस्त्रिणेत्रस्य महान्कालोऽभ्यगान्मुने ॥ ५ ॥ रमतः सह पार्वत्या धर्मापेक्षी जगत्पतिः ॥ ततः कदाचिद्ब्रह्मार्थं कालीत्युक्ता भवेन हि ॥ ६ ॥ पार्वती मन्युनाऽऽविष्टा शंकरं वाक्यमब्रवीत् ॥ संरोहतीषुणा विद्धं वनं परशुना हतम् ॥ वाचा दुरुक्तं बीभत्सं न प्ररोहति वाक्क्षतम् ॥ ७ ॥ वाक्सायका वदनान्निष्पतन्ति तैराहतः शोचति रात्र्यहानि ॥ न तान्विमुञ्चेत हि पण्डितो जनस्तदद्य धर्मं वितथं त्वया कृतम् ॥ ८ तस्माद्व्रजामि देवेश तपस्तप्तुमनुत्तमम् ॥ तथा यतिष्ये न यथा भवान्कालीति वक्ष्यति ॥ ९ ॥ इत्येवमुक्त्वा गिरिजा प्रणम्य च महेश्वरम् ॥ अनुज्ञाता त्रिणेत्रेण दिवमेवोत्पपात ह ॥ १० ॥ समुत्पत्य च वेगेन हिमाद्रेः शिखरं शिवम् ॥ टङ्कच्छिन्नं प्रयत्नेन विधात्रा निर्मितं यथा ॥ ११ ॥ ततोऽवतीर्य सस्मार जयां च विजयां तथा ॥ जयन्तीं च महापुण्यां चतुर्थीमपराजिताम् ॥ १२ ॥ ताः संस्मृताः समाजग्मुः कालीं द्रष्टुं हि देवताः ॥ [illegible] ॥ १३ ॥ ततस्तपसि पार्वत्यां स्थितायां हिमवद्वनात् ॥ समाजगाम तं देशं व्याघ्रो दंष्ट्रानखायुधः ॥ १४ ॥ एकपादस्थितायां वै देव्यां व्याघ्रस्त्वचिन्तयत् ॥ यदा पति



॥ १५ ॥ इत्येवं चिन्तयन्नेव दत्तदृष्टिर्मृगाधिपः ॥ पश्यमानस्तद्वदनमेकदृष्टिरजायत ॥१६॥

समाजग्मुः काली दृष्ट्वा हि देवताः ॥ अनुज्ञातास्तथा देव्याः शुश्रूषां चाकरं शुभाः ॥ १३ ॥ ततस्तपसि पार्वत्या [...]
हिमवद्वनात् ॥ समाजगाम तं देशं व्याघ्रो दंष्ट्रानखायुधः ॥ १४ ॥ एकपादस्थितायां वै देव्यां व्याघ्रस्त्वचिन्तयत् ॥ यदा पति
इत्येवं चिन्तयन्नेव दत्तदृष्टिर्मृगाधिपः ॥ पश्यमानस्तद्वदनमेकदृष्टिरजायत ॥१६॥
ष्यते चेष्टं तदा दास्यामि वै अहम् ॥ १५ ॥ तपोऽतप्यत्ततोऽभ्यागाद्ब्रह्मा त्रिभुवनेश्वरः ॥ १७ ॥ पितामहस्तथोवाच देवीं प्रीतोऽस्मि
ततो वर्षशतं देवी गृणन्ती ब्रह्मणः पदम् ॥ अथोवाच वचः काली व्याघ्रस्य कमलोद्भव ॥ वरदो भव तेनाहं
शाश्वते ॥ तपसा धूतपापाऽसि वरं वृणु यथेप्सितम् ॥ १८ ॥ गाणपत्यं विभौ भक्तिमजेयत्वं च धर्मिताम् ॥२०॥
यास्ये प्रीतिमनुत्तमाम् ॥१९॥ ततः प्रादाद्वरं ब्रह्मा व्याघ्रस्याद्भुतकर्मणः ॥ ततो वरं गिरिसुता प्राह देवी
वरं व्याघ्राय दत्त्वैवं शिवकान्तामथाब्रवीत् ॥ वृणीष्व वरमव्यग्रा वरं दास्ये तवाम्बिके ॥ २१ ॥ कोशं कृष्णं परि
पितामहम् ॥ वरः प्रदीयतां ब्रह्मन्वर्णं कनकसंनिभम् ॥ २२ ॥ तथेत्युक्त्वा गतो ब्रह्मा पार्वती चाभवत्ततः ॥ तामभ्येत्य सहस्राक्षः प्रतिजग्राह दक्षि
त्यज्य पद्मकिञ्जल्कसन्निभा ॥ २३ ॥ तस्मात्कोशाच्च सा जाता भूयः कात्यायनी मुने ॥ इयं प्रदीयतां मह्यं भगिनी मेऽस्तु कौशिकी ॥
णाम् ॥ प्रोवाच गिरिजां देवो वाक्यं स्वर्गाय वासवः ॥२४ ॥ इन्द्र उवाच ॥ तां प्रादादिति संश्रुत्य कौशिकीं रूपसंयुताम् ॥ सहस्राक्षोऽपि तां
त्वत्कोशसंभवा चेयं कौशिकी कौशिकोऽप्ययम् ॥ २५ ॥ तत्र गत्वा त्वथोवाच तिष्ठ चात्र महाचले ॥ पूज्यमाना सुरैर्नाम्ना ख्याता त्वं विन्ध्यवा
गृह्य विन्ध्यं वेगाज्जगाम च ॥ २६ ॥ तत्र स्थाप्य हरिर्देवीं दत्त्वा सिंहं च वाहनम् ॥ भवामरारिहन्त्री चेत्युक्त्वा स्वर्गमुपागमत् ॥ २८ ॥ उमाऽपि
सिनी ॥ २७ ॥ प्रणम्य च महेशानं स्थिता सविनयं मुने ॥ २९ ॥ ततोऽमरगुरुः श्रीमान्पार्वत्या सहितो
तं वरं लब्ध्वा मन्दिरं पुनरेत्य च ॥

ऽव्ययः ॥ तस्थौ वर्षसहस्रं हि महामोहनके मुने ॥३०॥ महामोहस्थिते रुद्रे भुवनाश्चेलुरुद्धताः ॥ चुक्षुभुः सागराः सप्त देवाश्च भयमागमन् ॥ ३१ ॥ ततः सुरा महेन्द्रेण ब्रह्मणः सदनं गताः ॥ प्रणम्योचुर्महेशानं जगत्क्षुब्धं तु किं त्विदम् ॥ ३२ ॥ तानुवाच भवो नूनं महामोहनके स्थितः ॥ तेनाक्रान्तास्त्विमे लोका जग्मुः क्षोभं दुरत्ययम् ॥ ३३ ॥ इत्युक्त्वा सोऽभवत्तूष्णीं ततोऽप्यूचुः सुरा हरिम् ॥ आगच्छ शक्र गच्छामो यावत्तन्न समाप्यते ॥ ३४ ॥ समाप्ते मोहने बालो यः समुत्पत्स्यतेऽव्ययः ॥ स नूनं देवराजस्य पदमैन्द्रं हरिष्यति ॥ ३५ ॥ ततोऽमराणां वचनाद्दिवौकोबलघातिनः ॥ भयाज्ज्ञानं ततो नष्टं भाविकर्मप्रचोदनात् ॥ ३६ ॥ ततः शक्रः सुरैः सार्धं वह्निना च सहस्रदृक् ॥ जगाम मन्दरगिरिं तच्छृङ्गेष्वपि सत्तम ॥ ३७ ॥ अशक्ताः सर्व एवैते प्रवेष्टुं तद्भवाजिरम् ॥ चिन्तयित्वा तु सुचिरं पावकं ते व्यसर्जयन् ॥ ३८ ॥ स चाभ्येत्य सुरश्रेष्ठो दृष्ट्वा द्वारे च नन्दिनम् ॥ दुष्प्रवेशं च तं दृष्ट्वा चिन्तां वह्निः परां गतः॥३९॥स तु चिन्तार्णवे मग्नः प्रापश्यच्छंभुसद्मनः॥निष्क्रामन्तीं महापङ्क्तिं हंसानां विमलां तथा॥४०॥ असावुपाय इत्युक्त्वा हंसरूपी हुताशनः ॥ वञ्चयित्वा प्रतीहारं प्रविवेश हराजिरम्॥४१॥प्रविश्य सूक्ष्ममूर्तिश्च शिरोदेशे कपर्दिनः ॥ प्राह प्रहस्य गम्भीरं देवा द्वारि स्थिता इति ॥४२॥ तच्छ्रुत्वा सहसोत्थाय परित्यज्य गिरेः सुताम् ॥ विनिष्क्रान्तोऽजिराच्छर्वो वह्निना सह नारद ॥४३॥ विनिष्क्रान्ते सुरपतौ देवा मुदितमानसाः ॥ शिरोभिरवनीं जग्मुः सेन्द्रार्कशशि

शिरोदरः कपर्दिनः ॥ प्राह प्रहस्य गम्भीरं देवो द्वारि स्थितो इति ॥४२॥

ष्क्रान्तोऽजिरा च्छवौ वह्निना सह नारद ॥४३॥ विनिष्क्रान्ते सुरपतौ देवा मुदितमानसाः ॥ शिरोभिरवनीं जग्मुः सेन्द्रार्कशशि

पावकाः ॥४४॥ ततः प्रीत्या सुरानाह वदध्वं कार्यमाशु मे ॥ प्रणामावनता वो हि दास्येऽहं वरमुत्तमम् ॥४५॥ देवा ऊचुः ॥ यदि
तुष्टोऽसि देवानां वरं दातुमिहेच्छसि ॥ तदिह त्यज्यतां तावन्महामैथुनमीश्वर ॥ ४६ ॥ ईश्वर उवाच ॥ एवं भवतु संत्यक्तो मया।
भावोऽमरोत्तमाः ॥ ममेदं तेज उद्रिक्तं कश्चिदेव प्रतीच्छतु॥ ४७॥ पुलस्त्य उवाच ॥ इत्युक्ताः शंभुना देवाः सेन्द्रचन्द्रदिवाकराः॥
असीदन्त यथा मग्नाः पङ्के गावस्तथा सुराः ॥४८॥ सीदत्सु दैवतेष्वेवं हुताशोऽभ्येत्य शंकरम् ॥ प्रोवाच मुञ्च तेजस्त्वं प्रतीच्छा
म्येव शंकर ॥४९॥ ततो मुमोच भगवांस्तद्रेतः स्कन्नमेव तु ॥ जलं तृषार्तो वै यद्वत्तैलपानं पिपासितः ॥५०॥ततः पीते रेतसि वै
शार्वे देवेन वह्निना ॥ स्वस्थाः सुराः समामन्त्र्य हरं जग्मुस्त्रिविष्टपम् ॥ ५१ ॥ संप्रयातेषु देवेषु हरोऽपि निजमन्दिरम् ॥ सम
भ्येत्य महादेवीमिदं वचनमब्रवीत् ॥५२॥ देवि देवैरिहाभ्येत्य यत्नात्प्रेष्य हुताशनम् ॥ ततः प्रोक्तो निषिद्धस्तु पुत्रोत्पत्तिं तवोद
दरात् ॥५३॥ साऽपि भर्तुर्वचः श्रुत्वा क्रुद्धा रक्तान्तलोचना ॥ शशाप देवताः सर्वा नष्टपुत्रोद्भवा शिवा ॥ ५४ ॥ यस्मान्नेच्छन्ति
ते दुष्टा मम पुत्रं ममौरसम् ॥ तस्मात्ते न जनिष्यन्ति स्वासु योषित्सु पुत्रकान् ॥ ५५ ॥ एवं शप्त्वा सुरान्गौरी शौचशालामुपा
गमत् ॥ आहूय मालिनीं स्नातुं मतिं चक्रे तपोधन ॥ ५६ ॥ मालिनी सुरभिं गृह्य श्लक्ष्णमुद्वर्तनं शुभा ॥ देव्यङ्गमुद्वर्तयते कराभ्यां
कनकप्रभा ॥ ५७ ॥ तच्छौचं पार्वती नैवं मेने कीटगुणेन हि ॥ उद्वर्त्य पार्वतीं तां तु शुभेनोद्वर्त्तनेन च ॥५८॥ मालिनी तूर्णमग
मद्गृहं स्नानस्य कारणात् ॥ तस्यां गतायां शैलेयी मलाच्चक्रे गजाननम् ॥ ५९ ॥ चतुर्भुजं पीनवक्षः पुरुषं लक्षणान्वितम् ॥

कृत्वोत्ससर्ज तं भूम्यां स्थिता भद्रासने पुनः ॥६०॥ मालिनी तच्छिरःस्नानं ददौ विहसती तदा ॥ ईषद्धासमुखीं दृष्ट्वा मालिनीं प्राह नारद ॥ ६१ ॥ किमर्थं भीरु शनकैर्हससि त्वमतीव च ॥ साऽथोवाच हसाम्येवं भवत्यास्तनयः किल ॥ ६२ ॥ भविष्यतीति देवेन प्रोक्तो नन्दिगणाधिपः ॥ तच्छ्रुत्वा मम हासोऽयं संजातोऽद्य कृशोदरि ॥ ६३ ॥ यस्माद्देवी पुत्रकामाच्छंकरो विनिवारितः ॥ एतच्छ्रुत्वा वचो देवी सस्नौ तत्र विधानतः ॥६४॥ स्नात्वाऽर्च्य शंकरं भक्त्या समभ्यागाद् गृहं प्रति ॥ ततः शंभुः समागत्य तस्मिन्भद्रासनेऽपि च ॥६५॥ स्नातस्तस्य ततस्तस्मात्स्थितः स मलपूरुषः॥उमास्वेदभवस्वेदं जलभूमिसमन्वितम् ॥ ६६ ॥ तत्संपर्कात्समुत्तस्थौ फूत्कृत्य करमुत्तमम् ॥ अपत्यं हि विदित्वा च प्रीतिमान्भुवनेश्वरः ॥ ६७ ॥ तं चादाय हरो नन्दिमुवाच भगनेत्रहा ॥ रुद्रः स्नात्वाऽर्च्य देवादीं वाऽद्भिरग्निं पितॄनपि ॥६८॥ जप्त्वा सहस्रनामानमुमापार्श्वमुपागतः ॥ समेत्य देवीं विहसन्शंकरः शूलधृग्वचः ॥ ६९ ॥ प्राह त्वं पश्य शैलेयि त्वत्सुतं गुणसंयुतम् ॥ इत्युक्ता पर्वतसुता ह्युपेत्यापश्यदद्भुतम् ॥ ७० ॥ यस्त्वदङ्गमलाद्दिव्यः कृतो गजमुखो नरः ॥ ततः प्रीता गिरिसुता तं पुत्रं परिषस्वजे ॥ ७१ ॥ मूर्ध्नि चैनमुपाघ्राय ततः शर्वोऽब्रवीदुमाम् ॥ नायकेन विना देवी मया भूतोऽपि पुत्रकः ॥७२॥ यस्माज्जातस्ततो नाम्ना भविष्यति विनायकः ॥ एष विघ्नसहस्राणि देवादीनां हनिष्यति ॥ ७३ ॥ पूजयिष्यन्ति देवाश्च देवि लोकाश्चराचराः ॥ इत्येवमुक्त्वा देव्यास्तु दत्तवांस्तनयं स हि ॥ ७४ ॥ सहायं तु गणश्रेष्ठं नाम्ना ख्यातं घटोदरम् ॥ तथा मातृगणा घोरा भूता विघ्नकराश्च ये ॥ ७५ ॥ ते सर्वे परमेशेन दे



॥७६॥ रेमेऽथ शंभुना सार्द्धं मन्दिरे चारुकन्दरे ॥ एवं भूयो

स्त्राणि देवादीनां हनिष्यति ॥ ७३ ॥ पूजयिष्यन्ति देवाश्च दिवि लोकाश्चराचराः ॥ इत्येवमुक्त्वा देव्यास्तु ... ॥ ७५ ॥ ते सर्वे परमेशेन दे

॥ ७४ ॥ सहायं तु गणश्रेष्ठं नाम्ना ख्यातं घटोदरम् ॥ तथा मातृगणा घोरा भूता विघ्नकराश्च ये ॥

ढ्यः प्रीत्योपपादिताः ॥ देवी च तं सुतं दृष्ट्वा परां मुदमवाप च ॥७६॥ रेमेऽथ शंभुना सार्द्धं मन्दिरे चारुकन्दरे ॥ एवं भूयो

ऽभवद्देवी इयं कात्यायनी विभो ॥ या जघान महादैत्यौ पुरा शुम्भनिशुम्भकौ ॥ ७७ ॥ एतत्तवोक्तं वचनं सुभाव्यं यथोद्भवः पर्व

ततो मृडान्याः ॥ स्वर्ग्यं यशस्यं च तथाऽघहारि आख्यानमूर्जस्करमद्रिपुत्र्याः ॥ ७८॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे

उमासंभवे विनायकोत्पत्तिर्नाम चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ पुलस्त्य उवाच ॥ कश्यपस्य दनुर्नाम्ना भार्याऽऽसीद्द्विज

सत्तम ॥ तस्याः पुत्रत्रयं चासीत्सहस्राक्षाद्बलाधिकम् ॥१॥ ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ॥ तृतीयो नमुचिर्नाम

महाबलसमन्वितः ॥ २ ॥ योऽसौ नमुचिरित्येवं ख्यातो दनुसुतोऽसुरः ॥ तं हन्तुमिच्छति हरिः प्रगृह्य कुलिशं करे

॥ ३ ॥ त्रिदिवेशं समायान्तं नमुचिस्तु भयादथ ॥ प्रविवेश रथं भानोस्ततो नाशकदच्युतः ॥ ४ ॥ शक्रस्तेनाथ

समयं प्रचक्रे स महामनाः ॥ अवध्यत्वं वरं प्रादाच्छस्त्रैरस्त्रैश्च नारद ॥ ५ ॥ ततोऽवध्यत्वमाज्ञाय शस्त्रैरस्त्रैश्च नारदः ॥

संत्यज्य भास्कररथं पातालमुदयादथ ॥ ६ ॥ स निमज्जन्नपि जले सामुद्रं फेनमुत्तमम् ॥ ददृशे दानवपतिस्तं प्रगृह्येदमब्रवीत्

॥ ७ ॥ यदुक्तं देवपतिना वासवेन वचोऽस्तु तत् ॥ अयं स्पृशतु मां फेनः कराभ्यां गृह्य दानवः ॥ ८ ॥ मुखनासादिकर्णा

दीन्समापूर्य यथेच्छया ॥ तस्मिञ्छक्रोऽसृजद्वज्रमन्तर्हितमपीश्वरः॥९॥ तेनासौ रुद्धनासास्यः पपात च ममार च ॥समये न तथा



स्नातः पापाद्विमुच्यत ॥ ततोऽस्य भ्रातरौ वीरौ क्रुद्धौ शुम्भनिशुम्भकौ

नष्टे ब्रह्महत्याऽस्पृशद्धरिम् ॥ १० ॥ स चैतत्तीर्थमासाद्य

॥ ११ ॥ उद्योगं सुमहत्कृत्वा सुरान्बाधितुमागतौ ॥ सुरास्तेऽपि सहस्राक्षं पुरस्कृत्य विनिर्ययुः ॥ १२ ॥ जितास्त्वाक्रम्य दैत्याभ्यां सबलाः सपदानुगाः ॥ शक्रस्याहृत्य च गजं याम्यं च महिषं बलात् ॥१३॥ वरुणस्य मणिं छत्रं गदां वै माधवस्य च ॥ निधयः शङ्खपद्माद्या हृतास्त्वाक्रम्य दानवैः ॥१४॥ त्रिलोकी वशगा चास्तेऽनयोर्नारद दैत्ययोः ॥ आजग्मतुर्महीपृष्ठं ददृशाते महासुरम् ॥ १५ ॥ रक्तबीजमथोचुस्ते को भवानिति सोऽब्रवीत् ॥ स चाह दैत्योऽस्मि विभो सचिवो महिषस्य तु ॥ १६ ॥ रक्तबीजेति विख्यातो महावीर्यो महाभुजः॥ अमात्यौ रुचिरौ वीरौ चण्डमुण्डाविति श्रुतौ॥१७॥तावास्तां सलिले मग्नौ भयाद्देव्या महाभुजौ ॥ यस्त्वासीत्प्रभुरस्माकं महिषो नाम दानवः ॥ १८ ॥ निहतः स महादेव्या विन्ध्यशैले सुविस्तृते ॥ भवन्तौ कस्य तनयौ किं वा नाम्ना परिश्रुतौ ॥ किंवीर्यौ किंप्रभावौ च एतच्छंसितुमर्हथः॥१९॥ शुम्भनिशुम्भावूचतुः ॥ अहं शुम्भ इति ख्यातो दनोः पुत्रस्तथौरसः ॥ निशुम्भोऽयं मम भ्राता कनीयाञ्छक्रदर्पहा ॥२०॥ अनेन बहुशो देवाः सेन्द्ररुद्रदिवाकराः ॥ समेत्य निर्जिता वीरा ये चान्ये बलवत्तराः॥२१॥तदुच्यतां कथं दैत्यो निहतो महिषासुरः॥यावत्तान्घातयिष्यावः स्वसैन्यपरिवारितौ॥ ॥ २२ ॥ इत्थं तयोस्तु वदतोर्नर्मदायास्तटे मुने ॥ जलवासाद्विनिष्क्रान्तौ चण्डमुण्डौ च दानवौ ॥२३॥ ततोऽभ्येत्य सुरश्रेष्ठौ रक्तबीजं समाश्रितौ ॥ ऊचतुर्वचनं श्लक्ष्णं कोऽयं तव पुरस्सरः ॥ २४ ॥ स चोभौ प्राह दैत्योऽसौ शुम्भो नाम सुरार्दनः ॥ कनीयानस्य च भ्राता द्वितीयो हि निशुम्भकः ॥ २५ ॥ एतावाश्रित्य तां दुष्टां महिषघ्नीं न संशयः ॥ अहं विवादयिष्यामि रत्न

... न सम्यग्युक्तं भवता रत्नार्होऽसि न साम्प्रतम् ॥ यः प्रभुः स्यात्स रत्नार्हस्तस्माच्छुम्भाय

... कौशिकीं रूपशालिनीम्॥२८॥

यानस्य च भ्राता द्वितीयो हि निशुम्भकः ॥ २५ ॥ एतावाश्रित्य तां दुष्टां मद्विपत्नीं न संशयः ॥ अहं विवादयिष्यामि रत्न-
भूतां जगत्त्रये ॥ २६ ॥ चण्ड उवाच ॥ न सम्यगुक्तं भवता रत्नार्हाऽसि न साम्प्रतम् ॥ यः प्रभुः स्यात्स रत्नार्हस्तस्माच्छुम्भाय
योज्यताम् ॥ २७ ॥ तदाऽऽचचक्षे शुम्भाय निशुम्भाय च कौशिकीम् ॥ भूयोऽपि तद्विधां जातां कौशिकीं रूपशालिनीम् ॥ २८ ॥
ततः शुम्भो निजं दूतं सुग्रीवं नाम दानवम् ॥ दैत्यं च प्रेषयामास सकाशं विन्ध्यवासिनीम् ॥ २९ ॥ स गत्वा तद्वचः श्रुत्वा
देव्यागत्य महासुरः ॥ निशुम्भशुम्भावाहेदं मन्युनाऽभिपरिप्लुतः ॥ ३० ॥ सुग्रीव उवाच ॥ युवयोर्वचनाद्देवी प्रदिष्टा दैत्यना-
यकौ ॥ गतवानहमत्रैव तामहं वाक्यमब्रवम् ॥ ३१ ॥ यथा शुम्भोऽतिविख्यातः ककुद्दानवेष्वपि ॥ स त्वां प्राह महाभागे
प्रभुरस्मि जगत्त्रये ॥ ३२ ॥ यानि स्वर्गे महीपृष्ठे पाताले चापि सुन्दरि ॥ रत्नानि सन्ति तावन्ति मम वेश्मनि नित्यशः ॥
॥ ३३ ॥ त्वमुक्ता चण्डमुण्डाभ्यां रत्नभूता कृशोदरी ॥ तस्माद्भजस्व मां वा त्वं निशुम्भं वा ममानुजम् ॥ ३४ ॥ सा चाह मां
विहसती शृणु सुग्रीव मद्वचः ॥ सत्यमुक्तं त्रिलोकेशः शुम्भो रत्नार्ह एव च ॥ ३५ ॥ किं त्वस्ति दुर्विनीताया हृदये मे मनो-
रथः ॥ यो मां विजयते युद्धे स भर्ता स्यान्महासुरः ॥ ३६ ॥ मया चोक्ताऽवलिप्ताऽसि यो जयेत्ससुरासुरान् ॥ स त्वां कथं
न जयते सा त्वमुत्तिष्ठ भामिनि ॥ ३७ ॥ साऽथ मां प्राह किं कुर्मो यन्नालोचितः कृतः ॥ मनोरथस्तु तद्गच्छ शुम्भाय त्वं
निवेदय ॥ ३८ ॥ तथैवमुक्तस्त्वभ्यागां त्वत्सकाशं महासुरः ॥ तां चाग्निकोटिसंकाशां मत्वैवं कुरु यत्क्षमम् ॥ प्राह दूतं त्विदं
शुम्भो दानवं धूम्रलोचनम् ॥ ३९ ॥ शुम्भ उवाच ॥ धूम्राक्ष गच्छ तां दुष्टां केशाकर्षणविह्वलाम् ॥ सापराधां यथा दासीं कृत्वा

शीघ्रमिहानय ॥ ४० ॥ यश्चास्याः पक्षकृत्कश्चिद्र्विष्यति महाबलः ॥ स हन्तव्योऽविचार्यैव यदि हि स्यात्पितामहः ॥ ४१ ॥ स एवमुक्तः शुम्भेन धूम्राक्षोऽक्षौहिणीशतैः ॥ वृतः षड्भिर्महातेजा विन्ध्यं गिरिमुपाद्रवत् ॥ ४२ ॥ तत्र दृष्ट्वा च तां दुर्गां भ्रान्तदृष्टिरुवाच ह ॥ एह्येहि मूढे भर्तारं शुम्भमिच्छस्व कौशिकि ॥ न चेद्बलान्नयिष्यामि केशाकर्षणविह्वलाम् ॥ ४३ ॥ श्रीदेव्युवाच ॥ प्रेषितोऽसीह शुम्भेन बलान्नेतुं हि मां किल ॥ तत्र किं ह्यबला कुर्याद्यथेच्छसि तथा कुरु ॥ ४४ ॥ पुलस्त्य उवाच ॥ एवमुक्तो विभावर्या बलवान्धूम्रलोचनः ॥ हुंकारेणैव तं भस्मसाच्चकाराम्बिका तथा ॥ ४५ ॥ ततो हाहाकृतमभूज्जगत्यस्मिंश्चराचरे ॥ सबलं भस्मसान्नीतं कौशिक्या वीक्ष्य दानवम् ॥ ४६ ॥ तं च शुम्भोऽपि शुश्राव महच्छब्दमुदीरितम् ॥ अथादिदेश बलिनौ चण्डमुण्डौ महासुरौ ॥ ४७ ॥ रुरुं च बलिनां श्रेष्ठं तथाऽऽजग्मुर्मुदाऽन्विताः ॥ तेषां च सैन्यमतुलं गजाश्वरथसंकुलम् ॥ ४८ ॥ समाजगाम सहसा यत्रास्ते कोशसंभवा ॥ तदाऽऽयान्तं रिपुबलं दृष्ट्वा कोटिशतावरम् ॥ ४९ ॥ अथ सिंहो धुतसटः पाटयन्दानवान्रणे ॥ कांश्चित्करप्रहारेण कांश्चिदास्येन लीलया ॥ ५० ॥ नखरैः कांश्चिदाक्रम्य उरसाऽस्तमियाय च ॥ ते वध्यमानाः सिंहेन गिरिकन्दरवासिना ॥ ५१ ॥ भूतैश्च देव्यनुचरैश्चण्डमुण्डौ समाश्रयन् ॥ तावार्त्तं स्वबलं दृष्ट्वा कोपप्रस्फुरिताधरौ ॥ ५२ ॥ समाद्रवेतां दुर्गां वै पतङ्गाविव पावकम् ॥ तावायान्तौ ततो रौद्री दृष्ट्वा कोपपरिप्लुता ॥ ५३ ॥ त्रिशिखां भ्रुकुटीं चक्रे चकार परमेश्वरी ॥ भ्रुकुटीकुटिलाद्देव्या ललाटफलकाद्द्रुतम् ॥ काली करालवदना निःसृता योगिनी शुभा ॥ ५४ ॥ खट्वाङ्गमादाय करेण रौद्रमसिं ... रुधिराप्लुताङ्गी नरेन्द्र मूर्धा स्रजमुद्वहन्ती ॥ ५५ ॥ कांश्चित्खड्गेन चिच्छेद खट्वाङ्गेन परा ...

दुर्गा वै पतङ्गाविव पावकम् ॥ तावायान्तीं ततो रौद्री दृष्ट्वा क्रोधपरिप्लुता ॥ ५३ ॥ त्रिशिखां भ्रुकुटीं ... खड्गाङ्गमादाय करेण रौद्रमसिं
भ्रुकुटीकुटिलाद्देव्या ललाटफलकाद्द्रुतम् ॥ काली करालवदना निःसृता योगिनी शुभा ॥ ५४ ॥
काश्चित्खड्गेन चिच्छेद खड्गाङ्गेन परा
च कालीयमकोशमुग्रम् ॥ संशुष्कगात्री रुधिराप्लुताङ्गी नरेन्द्र मूर्ध्ना स्रजमुद्वहन्ती ॥ ५५ ॥ कुञ्जरं सह यन्त्रेण प्रचि
न्रणे ॥ न्यषूदयद् भृशं क्रुद्धा सरथांश्च गजान्रिपून् ॥५६॥ चर्माङ्कुशं मुद्गरं च सधनुष्कं सघण्टिकम् ॥ ... ॥ समं योधेन वदने क्षिप्य चर्वयतेऽम्बिका ॥ ५८ ॥ एकं जग्राह
क्षेप मुखेऽम्बिका ॥ ५७ ॥ सचक्रकूबररथं ससारथितुरङ्गमम् ॥ ततस्तु तद्बलं देव्या भक्षितं सगणाधिपम् ॥ रुरु
केशेषु ग्रीवायामपरं तथा॥पादेनाक्रम्य चैवान्यं प्रेषयामास मृत्यवे ॥ ५९ ॥ स पपात हतो भूम्यां छिन्नमूल इव
दृष्ट्वा प्रदुद्राव तं चण्डो ददृशे स्वयम् ॥ ६० ॥ आजघानाथ शिरसि खट्वाङ्गेन महासुरम् ॥ सा च कोशं समा
द्रुमः ॥ ६१ ॥ ततस्तं पतितं दृष्ट्वा पशोरिव विभावरी ॥ कोशमुत्कर्त्तयामास करादिचरणान्तिकम् ॥ ६२ ॥ सा जाता सुतरां रौद्री तैलाभ्यक्तशिरोरुहा॥
दाय बबन्ध विमला जटाः ॥ एका न बन्धमगमत्तामुत्पाट्याक्षिपद्भुवि ॥ ६३ ॥ तस्या नाम तदा चक्रे चण्डमा
कृष्णार्धमर्धशुक्लं च धारयन्ती स्वकं वपुः ॥ ६४ ॥ साऽब्रवीद्धरमेकं तु मारयामि महासुरम् ॥ स्वयं हि मारयिष्यामि तावानेतुं त्वमर्हसि ॥ ६६ ॥
रीति विश्रुतम् ॥ ६५ ॥ प्राह गच्छस्व सुभगे चण्डमुण्डाविहानय ॥ ततस्तावपि वेगेन प्राधावत्त्यक्त
श्रुत्वैवं वचनं देव्याः साऽभ्यद्रवत तावुभौ ॥ प्रदुद्रुवतुर्भयात्तौ दिशमाश्रित्य दक्षिणाम् ॥ ६७ ॥ सा ददर्श तदा पौ
वाससा ॥ साऽधिरुह्य महावेगं रासभं गरुडोपमम् ॥ ६८ ॥ यतो गतौ हि तौ दैत्यौ तत्रैवानुययौ शिवा ॥ दानवानन्वगाज्जवात् ॥
ण्ड्रं महिषं वै यमस्य च ॥ ६९ ॥ सा तस्योत्पाटयामास विषाणं भुजगाकृतिम् ॥ तं प्रगृह्य करेणैव

॥ ७० ॥ तौ चापि भूमिं संत्यज्य जग्मतुर्गगनं तदा ॥ वेगेनाभिसृता सा च रासभेन महेश्वरी ॥ ७१ ॥ ततो ददर्श गरुडं पन्नगेन्द्रं विषादिषु ॥ कर्कोटकं स दृष्ट्वैव ऊर्ध्वरोमा व्यजायत ॥ ७२ ॥ भयार्त्तश्चैव गरुडो मांसपिण्डोपमो बभौ ॥ न्यपतंस्तस्य पत्राणि रौद्राणि हि पतत्रिणः ॥ ७३ ॥ खगेन्द्रपत्राण्यादाय नागं कर्कोटकं तथा ॥ वेगेनाथासरद्देवी चण्डमुण्डौ भयातुरौ ॥ ॥७४॥ संप्राप्तौ च तदा देव्या चण्डमुण्डौ महासुरौ॥ बद्धौ कर्कोटकेनैव बद्ध्वा विन्ध्यमुपागमत्॥७५॥निवेदयित्वा कौशिक्याः कोशमादाय भैरवम् ॥ शिरोभिर्दानवेन्द्राणां तार्क्ष्यपत्रैश्च शोभनैः॥७६॥कृत्वा स्रजमनौपम्यां चण्डिकायै न्यवेदयत् ॥ घर्घरां च मृगेन्द्रस्य चर्मणः सा समार्पयत् ॥७७॥ स्रजमन्यां खगेन्द्रस्य पत्रैर्मूर्ध्नि निबध्य च ॥ आत्मना सा पपौ पानं रुधिरं दानवेष्वपि ॥७८॥ चण्डं त्वादाय मुण्डं च मुण्डं चासुरनायकौ ॥ चकार कुपिता दुर्गा विशिरस्कौ महासुरौ॥७९॥तयोरेव तदा देव्या शेखरः शिरसा कृतः॥कृत्वा जगाम कौशिक्याः सकाशं शर्वया सह ॥८०॥ समेत्य साऽब्रवीद्देवि गृह्यतां शेखरोत्तमः ॥ ग्रथितो दैत्यशीर्षाभ्यां नागराजेन वेष्टितः॥८१॥ तं शेखरं शिवा गृह्य चामुण्डा मूर्ध्नि विस्तृतम्॥बबन्ध प्राह चैवैनां कृतं कर्म सुदारुणम् ॥८२॥ शेखरं चण्डमुण्डाभ्यां यस्माद्धारयसे शुभम्॥तस्माल्लोके तव ख्यातिश्चामुण्डेति भविष्यति॥८३॥ इत्येवमुक्त्वा वचनं त्रिनेत्रां तां चण्डमुण्डस्रजधारिणीं वै॥ दिग्वाससं [illegible] ॥ [illegible] विषाणकोट्या सुवेगा [illegible] क्रेन शरासनेन ॥ निषूदयन्ती रिपुसैन्यमग्रं चचार चान्यानसुरांश्चखाद ॥ ८५ ॥ ततोऽम्बिका [illegible] चण्डमुण्डौ [illegible]



सिंहमुपाश्रयन्तम् ॥८६॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमा[illegible]

चण्डमुण्डस्रजधारिणीं वै ॥ दिग्वाससं चाभ्यवदत्प्रतीता निषूदयस्वारिबलान्यमूनि ॥८४॥ सा त्वम्मुक्ताऽथ विषाणकोट्या ...
केन शरासनेन ॥ निषूदयन्ती रिपुसैन्यमुग्रं चचार चान्यानसुरांश्चखाद ॥ ८५ ॥ ततोऽम्बिकायास्त्वथ चण्डमुण्डौ मार्गा न भिन्नौ
न च भूतसंघैः ॥ निपात्यमाना दनुपुंगवास्ते ककुद्मिनं सिंहमुपाश्रयन्तम् ॥८६॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमा
हात्म्ये चण्डमुण्डवधो नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥५५॥ पुलस्त्य उवाच ॥ चण्डमुण्डौ च निहतौ दृष्ट्वा सैन्यं च विद्रुतम् ॥
समादिदेशातिबलं रक्तबीजं महासुरम् ॥ १ ॥ अक्षौहिणीनां त्रिंशद्भिः कोटिभिः परिवारितम् ॥ तमापतन्तं दैत्यानां बलं दृष्ट्वैव
चण्डिका ॥ २ ॥ मुमोच सिंहनादं वै काल्या सह महेश्वरी ॥ निनदत्यास्ततो देव्या ब्रह्माणी मुखतोऽभवत् ॥३॥ हंसयुक्तविमान
स्था साक्षसूत्रकमण्डलुः ॥ माहेश्वरी त्रिनेत्रा च वृषारूढा त्रिशूलिनी ॥ ४ ॥ महाहिवलया रौद्रा जाता कुण्डलिनी क्षणात् ॥ ततो
ऽथ जाता कौमारी बर्हिपत्रा च शक्तिनी ॥ ५ ॥समुद्भूता च देवर्षे मयूरवरवाहना ॥ बाहुभ्यां गरुडारूढा शङ्खचक्रगदासिनी ॥६॥
शार्ङ्गबाणधरा जाता वैष्णवी रूपशालिनी ॥ महोग्रमुशला रौद्रा दंष्ट्रोल्लिखितभूतला ॥ ७ ॥ वाराही पृष्ठतो जाता शेषनागोपरि
स्थिता ॥ विक्षिपन्ती सटाक्षेपैर्ग्रहनक्षत्रतारकाः॥८॥ नखिनी हृदयाज्जाता नारसिंही सुदारुणा ॥ ताभिर्निपात्यमानं तु निरीक्ष्य
बलमासुरः ॥ ९ ॥ ननाद भूयो नादान्वै चण्डिका निर्भया रिपून् ॥ तन्निनादं महच्छ्रुत्वा त्रैलोक्यप्रतिपूरकम् ॥ १० ॥ समाजगाम
देवेशः शूलपाणिस्त्रिलोचनः ॥ अभ्येत्य वन्द्य चैवैनां प्राह वाक्यं तदाऽम्बिकाम् ॥११॥ समायातोऽस्मि वै दुर्गे देह्याज्ञां किं क
रोऽस्मि ते ॥ तद्वाक्यसमकालं च देव्या देहोद्भवा शिवा ॥ १२ ॥ जाता सा चाह देवेशं गच्छ दौत्येन शंकर ॥ ब्रूहि शुम्भं निशु
म्भं च यदि जीवितुमिच्छथ ॥ १३ ॥ तद्गच्छन्तु दुराचाराः सर्वे एव रसातलम् ॥ वासवो लभतां स्वर्गं देवाः सन्तु गतव्यथाः

॥ १४ ॥ यजन्तु ब्राह्मणाद्यामी वर्णा यज्ञांश्च साम्प्रतम् ॥ नोचेद्बलावलेपेन भवन्तो योद्धुमिच्छथ ॥ १५ ॥ तदागच्छध्वमव्यग्रा
एषाऽहं विनिषूदये ॥ यतस्तु सा शिवं दौत्ये न्ययोजयत नारद ॥१६॥ ततो नाम महादेव्याः शिवदूतीत्यजायत ॥ ते चापि शंक
रवचः श्रुत्वा गर्वसमन्वितम् ॥ हुंकृत्वाऽभ्यद्रवन्सर्वे यत्र कात्यायनी स्थिता ॥१७॥ ततः शरैः शक्तिभिरङ्कुशैर्वरैः परश्वधैः शूल
भुशुण्डिपट्टिशैः ॥ प्रासैः सुतीक्ष्णैः परिघैश्च विस्तृतैर्ववर्षतुर्दैत्यवरौ सरस्वतीम् ॥१८॥ सा चापि बाणैर्वरकार्मुकच्युतैश्चिच्छेद शस्त्रा
ण्यथ बाहुभिः सह ॥ जघान चान्यान्रणचण्डविक्रमा महासुरान्बाणशतैर्महेश्वरी ॥ १९ ॥ मारी त्रिशूलेन जघान चान्यान्खट्वाङ्ग
पातैरपरांश्च कौशिकी ॥ महाजलक्षेपहतप्रभावान्ब्राह्मी तथाऽन्यानसुरांश्चकार ॥२०॥ माहेश्वरीशूलविदारितोरसश्चकार दग्धांश्च
परांश्च वैष्णवी ॥ शक्त्या कुमारी कुलिशेन चण्डी तुण्डेन चक्रेण वराहरूपिणी ॥ २१ ॥ नखैर्विभिन्नानपि नारसिंही अट्टाट्टहासैरपि
रुद्रदूती ॥ रुद्रस्त्रिशूलेन तथैव चान्यान्विनायकश्चापि परश्वधेन॥२२॥एवं हि देव्या विविधैस्तु रूपैर्निपात्यमाना दनुपुंगवास्ते॥
पेतुः पृथिव्यां भुवि चापि भूतैस्ते भक्ष्यमाणाः प्रलयं प्रजग्मुः ॥ २३ ॥ ते वध्यमानास्त्वथ देवताभिर्महासुरा मातृभिराकुलाश्च॥
विमुक्तकेशास्तरलेक्षणा भयात्ते रक्तबीजं शरणं हि जग्मुः ॥२४॥ स रक्तबीजः सहसाऽभ्युपेत्य वरास्त्रमादाय च मातृमण्डलम् ॥
विद्रावयन्भूतगणान्समन्ताद्विवेश कोपात्स्फुरिताधरश्च ॥ २५ ॥ [illegible] शस्त्रैः शिताग्रैर्दितिजं ववर्षुः ॥

यो रक्तबिन्दुर्न्यपतत्पृथिव्यां स तत्प्रमाणस्त्वपरोऽपि जज्ञे ॥ २६ ॥ ततश्च मारी स्वयमम्बिकाऽथ [illegible] मावज्ञमिदमाच ॥
[illegible] ॥ २७ ॥ सा त्वेवमुक्ता वरदाऽम्बिका हि वितत्य वक्त्रं विकराल

विद्रावयन्भूतगणान्समन्ताद्विवेश कोपात्स्फुरिताधरश्च ॥ २५ ॥ तमापतन्तं प्रसमीक्ष्य मातरः शस्त्रैः शिताग्रैर्दितिजं ...
यो रक्तबिन्दुर्न्यपतत्पृथिव्यां स तत्प्रमाणस्त्वपरोऽपि जज्ञे ॥ २६ ॥ ततश्च मारी ...

पिबस्व चण्डे रुधिरं त्वरातेर्वितन्य वक्त्रं वडवानलाभम् ॥ २७ ॥ सा त्वेवमुक्ता वरदाऽम्बिका हि वितत्य वक्त्रं विकराल मुग्रम् ॥ तुङ्गं नभःस्पृक्पृथिवीस्पृगास्यं कृत्वा चिरं तिष्ठति चर्ममुण्डा ॥ २८ ॥ ततोऽम्बिका केशविकर्षणाकुलं कृत्वा रिपुं प्राक्षिपत्स्वे च वक्त्रे ॥ बिभेद शूलेन तथाऽप्युरस्तः क्षतोद्भवो वा न्यपतंश्च वक्त्रे ॥ २९ ॥ ततस्तु शोषं प्रजगाम रक्तं रक्तक्षये हीनबलो बभूव ॥ तं हीनवीर्यं शतधा चकार चक्रेण चामीकरभूषितेन ॥ ३० ॥ तस्मिन्हते वै दनुसैन्यनाथे ते दानवा दीनतरं विनेदुः ॥ हा तात हा भ्रातरिति ब्रुवन्तः क्व यासि तिष्ठस्व मुहूर्तमेहि ॥ ३१ ॥ तथाऽपरे विलुलितकेश पाशा विशीर्णचर्माभरणा दिगम्बराः ॥ निपातिता धरणितले मृडान्या प्रदुद्रुवुर्गिरिवरमुह्य दैत्याः ॥ ३२ ॥ विशीर्णचर्मा युधभूषणं तद्बलं निरीक्ष्यैव हि दानवेन्द्रः ॥ विकीर्णचक्राक्षरथे निशुम्भः क्रोधान्मृडानीं समुपाजगाम ॥ ३३ ॥ खड्गं समा दाय च चर्मभास्वरं धुन्वञ्छिरः प्रेक्ष्य च रूपमस्याः ॥ संस्तभ्य मोहं ज्वरपीडितोऽथ चित्रे यथाऽसौ लिखितो बभूव ॥ ३४ ॥ तं स्तम्भितं वीक्ष्य सुरारिमग्रे प्रोवाच देवी वचनं विहस्य ॥ अनेन वीर्येण सुरास्त्वया जिता अनेन मां प्रार्थयसे बलेन ॥ ३५ ॥ श्रुत्वा तु वाक्यं कौशिक्या दानवः सुचिरादिव ॥ प्रोवाच चिन्तयित्वाऽथ वचनं वदतां वरः ॥ ३६ ॥ सुकुमारशरीरा त्वं मच्छस्त्रपतनादपि ॥ शतधा यास्यसे भीरु आमपात्रमिवाम्भसि ॥ ३७ ॥ एवं संचिन्तयन्नर्थं त्वां प्रहर्तुं न सुन्दरि ॥ करोमि बुद्धिं तस्मात्त्वं मां भजस्वायतेक्षणे ॥ ३८ ॥ मम खड्गनिपातं हि नेन्द्रो धारयितुं क्षमः ॥ निव

वा०पु०

॥१०५॥

र्त्तय मातँ युद्धाद्भार्या मे भव साम्प्रतम् ॥ ३९ ॥ इत्थं निशुम्भवचनं श्रुत्वा योगेश्वरी मुने ॥ विहस्य भावगम्भीरं निशुम्भं वाक्यमब्रवीत् ॥ ४० ॥ नाजिताऽहं रणे वीर भवे भार्या हि कस्यचित् ॥ भवान्यदीह भार्यार्थी ततो मां जय संयुगे ॥ ४१ ॥ इत्येवमुक्ते वचने खड्गमुद्भ्राम्य दानवः ॥ प्रचिक्षेप तदा वेगात्कौशिकीं प्रति नारद ॥ ४२ ॥ तमापतन्तं निस्त्रिंशं षड्भिर्बर्हिणवाजिभिः ॥ चिच्छेद चर्मणा सार्द्धं तदद्भुतमिवाभवत् ॥ ४३ ॥ खड्गे सचर्मणि च्छिन्ने गदां गृह्य महासुरः ॥ समाद्रवत्कोशभवां वायुवेगसमो जवे ॥ ४४ ॥ तस्यापतत एवाशु करौ श्लिष्टौ समौ दृढौ ॥ गदया सह चिच्छेद क्षुरप्रेण रणेऽम्बिका ॥४५॥ तस्मिन्निपतिते रौद्रे सुरशत्रौ भयंकरे ॥ चण्डाद्या मातरो हृष्टाश्चक्रुः किलकिलाध्वनिम् ॥ ४६ ॥ गगनस्थास्ततो देवाः शतक्रतुपुरोगमाः ॥ जयस्व विजयेत्यूचुर्हृष्टाः शत्रौ निपातिते ॥४७॥ ततस्तूर्याण्यवाद्यन्त भूतसङ्घैः समन्ततः ॥ पुष्पवृष्टिं च मुमुचुः सुराः कात्यायनीं प्रति ॥ ४८ ॥ निशुम्भं पतितं दृष्ट्वा शुम्भः क्रोधान्महामुने ॥ वृन्दारकं समारुह्य प्रासपाणिः समभ्यगात् ॥४९॥ तमापतन्तं दृष्ट्वाऽथ सगजं दानवेश्वरम् ॥ जग्राह चतुरो बाणांश्चन्द्रार्धाकारवर्चसः ॥५०॥ क्षुरप्राभ्यां समं पादौ द्वौ चिच्छेद द्विपस्य सा ॥ द्वाभ्यां कुम्भे जघानाथ हसन्ती लीलयाऽम्बिका ॥ ५१ ॥ निकृत्ताभ्यां गजः पद्भ्यां निपपात यथेच्छया ॥ शक्रवज्रसमाक्रान्तं शैलराजशिरो यथा ॥ ५२ ॥ तस्याविजितमस्य शुम्भस्याप्युपतिष्ठतः ॥ शिरश्चिच्छेद बाणेन कुण्डलालंकृतं शिवा ॥ ५३ ॥ छिन्ने शिरसि दैत्येन्द्रो निपपात सकुञ्जरः ॥ यथा स महिषः क्रौञ्चो महासेनेन संहतः ॥५४॥ श्रुत्वा [illegible] निहतौ [illegible] ॥ आगत्य तं गिरिवरं विनयावनम्रा देव्यास्तदा श्रुतिसुखं त्रिदशैरयन्त ॥५५॥ देवा [illegible] नमोऽस्तु ते

क्रान्तं शैलराजशिरो यथा ॥ ५२ ॥ तस्यावर्जितनागस्य शुम्भस्याप्युत्पतिष्यतः ॥ शिरश्चिच्छेद [illegible] निहतो
॥ ५३ ॥ छिन्ने शिरसि दैत्येन्द्रो निपपात सकुञ्जरः ॥ यथा स मदिपः क्रौञ्चो महासेनेन संहतः ॥५४॥ श्रुत्वा सुरासुररिपुं

मृडान्या सेन्द्राः सम्पूर्णमरुदश्विवसुप्रधानाः ॥ आगत्य तं गिरिवरं विनयावनम्रा देव्यास्तदा श्रुतिसुखं विदधीरयन्तः ॥५५॥ देवा
ऊचुः ॥ ॐ ॥ नमोऽस्तु ते भगवति पापनाशिनि नमोऽस्तु ते सुररिपुदर्पशातनि ॥ नमोऽस्तु ते हरिहरराज्यदायिनि नमोऽस्तु ते
मखभुजकार्यकारिणि ॥५६॥ नमोऽस्तु ते त्रिदशरिपुक्षयंकरि नमोऽस्तु ते शतमखपादपूजिते ॥ नमोऽस्तु ते महिषविनाशकारिणि
नमोऽस्तु ते हरिहयभास्करस्तुते ॥५७॥ नमोऽस्तु तेऽष्टादशबाहुशालिनि नमोऽस्तु ते शुम्भनिशुम्भघातिनि ॥ नमोऽस्तु ते चार्त्तिहरे
त्रिशूलिनि नमोऽस्तु नारायणि चक्रधारिणि ॥५८॥ नमोऽस्तु वाराहि सदाधराधरे त्वां नारसिंहि प्रणता नमोऽस्तु ते ॥ नमोऽस्तु
ते वज्रधरे गजध्वजे नमोऽस्तु कौमारि मयूरवाहिनि ॥५९॥ नमोऽस्तु पैतामहहंसवाहने नमोऽस्तु मालाविकटे सुकेशिनि ॥ नमो
ऽस्तु ते रासभपृष्ठवाहनि नमोऽस्तु सर्वार्त्तिहरे जगन्मये ॥६०॥ नमोऽस्तु विश्वेश्वरि पाहि विश्वं निषूदयारिं द्विजदेवतानाम् ॥
नमोऽस्तु ते सर्वमयि त्रिनेत्रे नमो नमस्ते वरदे प्रसीद ॥६१॥ ब्रह्माणी त्वं मृडानी वरशिखिगमना शक्तिहस्ता कुमारी वाराही त्वं सुवक्त्रा
खगपतिगमना वैष्णवी त्वं सशार्ङ्गी ॥ दुर्दर्शा नारसिंही घुरघुरितरवा त्वं तथैन्द्री सवज्रा त्वं मारी चर्ममुण्डा शवगमनरता योगि
नी योगसिद्धा ॥ ६२ ॥ ॐ ॥ नमस्ते त्रिनेत्रे भगवति तव चरणानुच्छ्रिता ये अहरहर्विनतशिरोधरांसनम्राः ॥ नहि नहि परम
स्त्यशुभं सततं स्तुतिबलिकुसुमकराः सततं ये ॥ ६३ ॥ ॐ ॥ एवं स्तुता सुरवरैः सुरशत्रुनाशी प्राह प्रहस्य सुरसिद्धमहर्षि
वर्यान् ॥ प्राप्तो मयाऽद्भुततमो भवता प्रसादात्संग्रामपूर्णि सुरशत्रुजयः प्रमर्दात् ॥ ६४ ॥ इमां स्तुतिं भक्तिपरा नरोत्तमा भवद्भि

रुक्तामनुकीर्त्तयन्ति ॥ दुःस्वप्ननाशो भविता न संशयो वरस्तथाऽन्यो व्रियतामभीप्सितः ॥ ६५ ॥ देवा ऊचुः ॥ यदि वरदा भवती त्रिदशानां द्विजशिशुगोषु यतस्व हिताय ॥ पुनरपि देवरिपूनपरांस्त्वं प्रदह हुताशनतुल्यशरीरे ॥ ६६ ॥ देव्युवाच ॥ भूयो वधिष्यामि सुरारिमुत्तमं संभूय नन्दस्य गृहे यशोदया ॥ तत्रावतीर्णा लवणं तथाऽपरौ शुम्भं निशुम्भं दशनप्रहारिणी ॥ ॥ ६७ ॥ भूयः सुरास्तिष्ययुगे निराशनान्निरीक्ष्य मारीचगृहे शतक्रतोः ॥ संभूय देव्या इति सप्तधा मया सुरान्भरिष्यामि च शाकसंकरैः ॥ ६८ ॥ भूयो विपक्षक्षपणाय देवा विन्ध्ये भविष्याम्यृषिरक्षणार्थम् ॥ दुर्वृत्तचेष्टान्विनिहत्य दैत्यान्भूयः समेष्यामि सुरा जयं हि ॥ ६९ ॥ यदाऽरुणाक्षो भविता महासुरस्तदा भविष्यामि हिताय देवताः ॥ महालिरूपेण विनष्टजीवितं कृत्वा समेष्यामि पुनस्त्रिविष्टपम् ॥ ७० ॥ पुलस्त्य उवाच ॥ इत्येवमुक्त्वा वरदा सुराणां कृत्वा प्रणामं द्विजपुंगवानाम् ॥ विसृज्य भूतानि जगाम देवी खं सिद्धसंघैरनुगम्यमाना ॥ ७१ ॥ इदं पुराणं परमं पवित्रं देव्या जयं मङ्गलदायि पुंसाम् ॥ श्रोतव्यमेतन्नियतैः सदैव रक्षोघ्नमेतद्भगवानुवाच ॥ ७२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे देवीमाहात्म्ये शुम्भनिशुम्भवधो नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ नारद उवाच ॥ कथं समहिषः क्रौञ्चो भिन्नः स्कन्देन सुव्रत ॥ एतन्मे विस्तराद्ब्रह्मन्कथयस्वा मितद्युते ॥ १ ॥ पुलस्त्य उवाच ॥ शृणुष्व कथयिष्यामि कथां पुण्यां पुरातनीम् ॥ यशोवृद्धिं कुमारस्य कार्तिकेयस्य नारद ॥ २ ॥ यत्तत्पीतं हुताशेन स्कन्नं शुक्रं पिनाकिनः ॥ तेनाक्रान्तोऽभवद्ब्रह्मन्मन्दतेजा हुताशनः ॥ ३ ॥ ततो जगाम तेजस्वी ब्रह्मा... ॥ ४ ॥ स गच्छन्कुटिलां देवीं ददर्श पथि पावकः ॥ तां दृष्ट्वा प्राह

मितद्युते ॥ १ ॥ पुलस्त्य उवाच ॥ शृणुष्व कथयिष्यामि कथां पुण्यां पुरातनीम् ॥ यशोवृद्धिं कुमारस्य कीर्तिकथस्य [illegible]
॥ २ ॥ यत्तत्पीतं हुताशेन स्कन्नं शुक्रं पिनाकिनः ॥ तेनाक्रान्तोऽभवद्ब्रह्मन्मन्दतेजा हुताशनः ॥ ३ ॥ ततो जगाम [illegible]

शममितद्युतिः ॥ तैश्चापि प्रहितस्तूर्णं ब्रह्मलोकं जगाम ह ॥ ४ ॥ स गच्छन्कुटिलां देवीं ददर्श पथि पावकः ॥ तां दृष्ट्वा प्राह
कुटिले तेज एतत्सुदुर्द्धरम् ॥ ५ ॥ महेश्वरेण संत्यक्तं निर्दहेद्भुवनान्यपि ॥ तस्मात्प्रतीच्छ पुत्रोऽयं तव धन्यो भविष्यति ॥ ६ ॥
इत्यग्निना सा कुटिला स्मृत्वा स्वमतमुत्तमम् ॥ प्रक्षिपस्वाम्भसि मम प्राह वह्निं महापगा ॥ ७ ॥ ततस्त्वधारयद्देवी शार्वं तेज
स्त्वपूपुषत् ॥ हुताशनोऽपि भगवान्कामचारी परिभ्रमन् ॥ ८ ॥ पञ्चवर्षसहस्राणि धृतवान्हव्यभुक्ततः ॥ मांसमस्थीनि रुधिरं
मेदो मज्जाऽथ तस्य हि ॥ ९ ॥ रोमश्मश्र्वक्षिकेशाद्याः सर्वे जाता हिरण्मयाः ॥ हिरण्यरेता लोकेषु तेन गीतश्च पावकः ॥ १० ॥
पञ्चवर्षसहस्राणि कुटिला ज्वलनोपमम् ॥ धारयन्ती तदा गर्भं ब्रह्मणः स्थानमागता ॥ ११ ॥ तां दृष्ट्वान्पद्मजन्मा संतप्यन्तीं
महापगाम् ॥ दृष्ट्वा पप्रच्छ केनायं तव गर्भः समाहितः ॥ १२ ॥ सा चाह शाङ्करं यत्तच्छुक्रं पीतं हि वह्निना ॥ तदशक्तेन तेनाद्य
निःक्षिप्तं मयि सत्तम ॥ १३ ॥ पञ्चवर्षसहस्राणि धारयन्त्या पितामह ॥ गर्भस्य वर्त्तते कालो नायं पतति कर्हिचित् ॥ १४ ॥
तच्छ्रुत्वा भगवानाह गच्छ त्वमुदयं गिरिम् ॥ तत्रास्ति योजनशतं रौद्रं शरवणं महत् ॥ १५ ॥ तत्रैनं क्षिप सुश्रोणि विस्तीर्णे
गिरिसानुनि ॥ दशवर्षसहस्रान्ते ततो बालो भविष्यति ॥ १६ ॥ सा श्रुत्वा ब्रह्मणो वाक्यं रूपिणी गिरिमागता ॥ आगत्य गर्भं
तत्याज मुखेनैवाद्रिनन्दिनी ॥ १७ ॥ सा तु संत्यज्य तं बालं ब्रह्माणं सहसाऽगमत् ॥ आपोमयी मन्त्रवशात्संजाता कुटिला
सती ॥ १८ ॥ तेजसा चापि शार्वेण रौक्मं शरवणं महत् ॥ तन्निवासरताश्चान्ये पादपा मृगपक्षिणः ॥ १९ ॥ ततो दशसु पूर्णेषु

शरदां हि शतेष्वथ ॥ बालार्कदीप्तिः संजातो बालः कमललोचनः ॥ २० ॥ उत्तानशायी भगवान्दिव्ये शरवणे स्थितः ॥ मुखे
ऽङ्गुष्ठं समाक्षिप्य रुरोद घनराडिव ॥ २१ ॥ एतस्मिन्नन्तरे दिव्याः कृत्तिकाः षट् सुतेजसः ॥ ददृशुः स्वेच्छया यान्त्यो बालं
शरवणे स्थितम् ॥ २२ ॥ कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत् ॥ अहं पूर्वमहं पूर्वं तस्मै स्तन्यं विचुक्रुशुः ॥ २३ ॥
विवदन्तीः स ता दृष्ट्वा षण्मुखः समजायत ॥ अबीभरंश्च ताः सर्वाः शिशुस्नेहाच्च कृत्तिकाः ॥ २४ ॥ ध्रियमाणः स ताभिस्तु
बालो वृद्धिमगान्मुने ॥ कार्त्तिकेय इति ख्यातो जातः स बलिनां वरः ॥ २५ ॥ एतस्मिन्नन्तरे ब्रह्मन्पावकं प्राह पद्मभूः ॥ किय
त्प्रमाणः पुत्रस्ते वर्त्तते साम्प्रतं गुहः ॥ २६ ॥ स तद्वचनमाकर्ण्य जानन्नपि हि चात्मजम् ॥ प्रोवाच वह्निर्देवेशं न वेद्मि कतमो
गुहः ॥ २७ ॥ तं प्राह भगवान्प्रीतस्तेजः पीतं पुरा त्वया ॥ त्रैयम्बकं त्रिलोकेशो जातः शरवणे शिशुः ॥ २८ ॥ श्रुत्वा पिता
महवचः पावकस्त्वरितोऽभ्यगात् ॥ वेगिनं मेषमारुह्य कुटिला तं ददर्श ह ॥ २९ ॥ ततः पप्रच्छ कुटिला शीघ्रं क्व व्रजसे कवे ॥
सोऽब्रवीत्पुत्रदृष्ट्यर्थं जातः शरवणे शिशुः ॥३०॥ साऽब्रवीत्तनयो मह्यं ममेत्याह च पावकः ॥ विवदन्तौ ददर्शाथ स्वेच्छाचारी
जनार्दनः ॥ ३१ ॥ तौ पप्रच्छ किमर्थं वा विवादमिह चक्रतुः ॥ तावूचतुः पुत्रहेतो रुद्रशुक्रोद्भवो यदि ॥ ३२ ॥ तावुवाच हरि
र्देवो गच्छतं त्रिपुरान्तकम् ॥ स यद्वक्ष्यति देवेशस्तत्कुरुध्वमसंशयम् ॥ ३३ ॥ इत्युक्तौ वासुदेवेन कुटिलाग्नी हरान्तिके ॥ सम
भ्येत्योचतुस्तथ्यं कस्य पुत्रेति नारद ॥ ३४ ॥ रुद्रस्तद्वचनमाकर्ण्य हर्षनिर्भरमानसः ॥ दिष्ट्या दिष्ट्येति गिरिजां प्रोद्भूतपुलको

भ्येत्योचतुस्तथ्यं कस्य पुत्रेति नारद ॥ ३४ ॥ रुद्रस्तद्वाक्यमाकर्ण्य हर्षनिर्भरमानसः ॥ दिष्ट्या दिष्ट्येति गिरिजां प्राहोत्फुल्ल

ऽब्रवीत् ॥ ३५ ॥ ततोऽम्बिका प्राह हरं देव गच्छाव तं शिशुम् ॥ प्रष्टुं समाश्रयेद्यं स तस्य पुत्रो भविष्यति ॥ ३६ ॥ बाढमित्येव
भगवान्समुत्तस्थौ वृषध्वजः ॥ सहोमयाऽकुटिलया पावकेन च धीमता ॥ ३७ ॥ संप्राप्तास्ते शरवणं हरोमाकुटिलाग्नयः ॥ ददृशुः
शिशुकं तं च कृत्तिकोत्सङ्गशायिनम् ॥ ३८ ॥ ततः स बालकस्तेषां मत्वा चिन्तितमादरात् ॥ योगाच्चतुर्मूर्तिरभूच्छिशुत्वेऽपि
च षण्मुखः ॥ ३९ ॥ कुमारः शंकरमगाद्विशाखो गिरिजामगात् ॥ कुटिलामभ्यगाच्छाखो नैगमेयोऽग्निमभ्यगात् ॥ ४० ॥
ततः प्रीतियुतो रुद्र उमा च कुटिला तथा ॥ पावकश्चापि देवेशः परां मुदमवाप ह ॥ ४१ ॥ ततोऽब्रुवन्कृत्तिकास्ताः षण्मुखः किं
हरात्मजः ॥ ततोऽब्रवीद्धरः प्रीत्या विशेषवचनं मुने ॥ ४२ ॥ नाम्ना तु कार्त्तिकेयेति युष्माकं च भवत्वसौ ॥ कुटिलायाः कुमा
रेति पुत्रोऽयं भविताऽव्ययः ॥ ४३ ॥ स्कन्द इत्येव विख्यातो गौरीपुत्रो भवत्वसौ ॥ गुह इत्येव नाम्ना च ममासौ तनयः स्मृतः
॥ ४४ ॥ महासेन इति ख्यातो हुताशस्यास्तु पुत्रकः ॥ सारस्वत इति ख्यातः पुत्रः शरवणस्य च ॥ ४५ ॥ एवमेष महायोगी
पृथिव्यां ख्यातिमेष्यति ॥ षडंशत्वान्महाबाहुः षण्मुखो नाम गीयते ॥ ४६ ॥ इत्येवमुक्त्वा भगवाञ्छूलपाणिः पितामहम् ॥
सस्मार दैवतैः सार्द्धं तेऽप्याजग्मुस्त्वरान्विताः ॥ ४७ ॥ प्रणिपत्य च कामारिमुमां च गिरिनन्दिनीम् ॥ दृष्ट्वा हुताशनं प्रीत्या
कुटिलां कृत्तिकास्तथा ॥ ४८ ॥ ददृशुर्बालमत्युग्रं षण्मुखं सूर्यसन्निभम् ॥ मुष्णन्तमिव चक्षूंषि तेजसा स्वेन देवताः ॥ ४९ ॥
कौतुकाभिवृताः सर्वे एवमूचुः सुरोत्तमाः ॥ देवकार्यं त्वया देव कृतं दिव्याग्निना तदा ॥ ५० ॥ तदुत्तिष्ठ व्रजामोऽद्य तीर्थमौज

समन्वयम् ॥ कुरुक्षेत्रं सरस्वत्यामभिषिञ्चाम षण्मुखम् ॥ ५१ ॥ सेनायाः पतिरस्त्वेष देवगन्धर्वकिंनराः ॥ महिषं घातयत्वेष तारकं च सुदारुणम् ॥ ५२ ॥ बाढमित्यब्रवीच्छर्वः समुत्तस्थुः सुरास्ततः ॥ कुमारसहिता जग्मुः कुरुक्षेत्रं महाफलम् ॥ ५३ ॥ तत्रैव देवताः सेन्द्रा रुद्रब्रह्मजनार्दनाः ॥ यत्नमस्याभिषेकार्थं चक्रुर्मुनिगणैः सह ॥ ५४ ॥ ततोऽम्बुना सप्तसमुद्रवाहिना नदीजलेनापि महाफलेन ॥ वनौषधिष्वेव सहस्रमूर्तिभिस्तमभ्यषिञ्चन्त हराच्युताद्याः ॥ ५५ ॥ अभिषिक्ते तु सेनान्यां कुमारे दिव्यरूपिणि ॥ जगुर्गन्धर्वऋषयो ननृतुश्चाप्सरोगणाः ॥ ५६ ॥ अभिषिक्तं कुमारं हि गिरिपुत्री निरीक्ष्य हि ॥ स्नेहादुत्सङ्गगं स्कन्दं मूर्ध्न्यजिघ्रन्मुहुर्मुहुः ॥ ५७ ॥ जिघ्रती कार्त्तिकेयस्य अभिषेकार्द्रमाननम् ॥ भात्यद्रिजा यथेन्द्रस्य देवमाताऽदितिः पुरा ॥५८॥ तदाभिषिक्तं तनयं दृष्ट्वा शर्वो मुदं ययौ ॥ पावकः कृत्तिकाश्चैव कुटिला च यशस्विनी ॥ ५९ ॥ ततोऽभिषिक्तस्य हरः सेनापत्ये गुहस्य च ॥ प्रमथांश्चतुरः प्रादाच्छक्रतुल्यपराक्रमान् ॥ ६० ॥ घण्टाकर्णं लोहिताक्षं नन्दिषेणं च दारुणम् ॥ चतुर्थं बलिनां मुख्यं ख्यातं कुमुदमालिनम् ॥ ६१ ॥ हरदत्तान्गणान्दृष्ट्वा देवाः स्कन्दस्य नारद ॥ प्रददुः प्रमथान्स्वांश्च सर्वे ब्रह्मपुरोगमाः ॥ ॥ ६२ ॥ स्थाणुं ब्रह्मा गणं प्रादाद्विष्णुः प्रादाद्गणत्रयम् ॥ संक्रमं विक्रमं चैव तृतीयं च पराक्रमम् ॥ ६३ ॥ उत्क्रेशपङ्कजौ शक्रो रविर्दण्डकपिङ्गलौ ॥ चन्द्रो मणिं वसुमणिमश्विनौ वत्सनन्दिनौ ॥ ६४ ॥ ज्योतिर्हुताशनः प्रादाज्ज्वलज्जिह्वं तथा पुरम् ॥ कुन्दं मुकुन्दं कुसुमं त्रीन्धाताऽनुचरान्ददौ ॥६५॥ चक्रानुचक्रौ त्वष्टा च वेधा निस्थिरसुस्थिरौ ॥ पाणित्यजं कालिकं च [illegible]

रविदण्डकापिञ्जलौ ॥ चन्द्रो मणिं वसुमणिमश्विनौ वत्सनन्दिनौ ॥ ६४ ॥ ज्योतिर्हुताशनः प्रादाज्ज्वलज्जिह्वं तथा पुरुम् ॥ [illegible]

मुकुन्दं कुसुमं श्रीन्धाताऽनुचरान्ददौ ॥६५॥ चक्रानुचक्रौ त्वष्टा च मेधा निस्थिरश्रस्थिरौ ॥ पाणितयजं कालिकां च [illegible]

प्रादादेवांच्छ्रितो विन्ध्यस्त्वतिकृष्णं च पार्षदम् ॥ ६७ ॥ सुव
महाबलौ ॥ ६६ ॥ स्वर्णमालं घनाह्वं च हिमवान्प्रमथोत्तमौ ॥ प्रादादेवांच्छ्रितो विन्ध्यस्त्वतिकृष्णं च पार्षदम् ॥ ६७ ॥ सुव
र्चसं च वरुणः प्रददौ चातिवर्चसम् ॥ संग्रहं विग्रहं चापि नागा जयपराजयौ ॥ ६८ ॥ उन्मादं शङ्कुकर्णं च पुष्पदन्तं तथा
म्बिका ॥ घसं चातिघसं वायुः प्रादादनुचरावुभौ ॥ ६९ ॥ परिघं वटकं भीमं दाहातिदहनौ तथा ॥ प्रददावंशुमान्पञ्च प्रमथा
न्षण्मुखाय हि ॥ ७० ॥ यमः प्रमथमुन्माथं कालसेनं महामुखम् ॥ तालपत्रं कालजङ्घं पञ्चैवानुचरान्ददौ ॥ ७१ ॥ सुप्रभं
शुभकर्माणं ददौ धाता गणेश्वरौ ॥ सुव्रतं सत्यसन्धं च मित्रः प्रादाद्द्विजोत्तम ॥ ७२ ॥ अनन्तः शङ्कुपीठश्च निकुम्भः कुमुदो
ऽम्बुजः ॥ एकाक्षः कुनटी चक्षुः किरीटी कलशोदरः ॥ ७३ ॥ सूचीवक्त्रः कोकनदः प्रहासः प्रियकोऽच्युतः ॥ गणाः पञ्चदशैते
हि यक्षैर्दत्ता गुहस्य तु ॥ ७४ ॥ कालिन्द्या कलकन्दश्च नर्मदाया रणोत्कटः ॥ गोदावर्या सिद्धयात्रं तमसा साद्रिकम्पकौ ॥७५॥
सहस्रबाहुः शीताया वञ्जुलायाः स्मितोदरः ॥ मन्दाकिन्यास्तदा गन्धो विपाशायाः प्रियंकरः ॥७६॥ ऐरावत्याश्चतुर्दंष्ट्रः षोड
शाख्यो वितस्तया ॥ मार्जारं कौशिकी प्रादात्क्रथक्रौञ्चौ च गौतमी ॥ ७७ ॥ बाहुदा शतशीर्षं च वाहा गोनन्दनन्दिकौ ॥
भीमं भीमरथी प्रादाद्वेगारिं सरयूर्ददौ ॥ ७८ ॥ अष्टबाहुं ददौ काली सुबाहुमपि गण्डकी ॥ महानदी चित्रदेवं शिप्रा चित्ररथं
ददौ ॥ ७९ ॥ कुहूः कुवलयं प्रादान्मधुवर्णं मधूदका ॥ जम्बूकं धूतपापा च वेत्रा श्वेताननं ददौ ॥ ८० ॥ स्तुतं च प्रथमं वर्णा
रेवा सागरवेगिनम् ॥ प्रभावाऽर्थसहं प्रादात्काञ्चना कनकेक्षणम् ॥ ८१ ॥ ग्रथवक्रं च विमला चारुपत्रं मनोहरा ॥ धूतपापा महा

रावं कर्णा विद्रुमसन्निभम् ॥ ८२ ॥ सुप्रसादं सुवेणुं च जिष्णुमोघवती ददौ ॥ यज्ञबाहुं विशाला च सरस्वत्यो ददुर्गणान् ॥८३॥ कुटिला तनयान्प्रादात्रिंशच्छक्रबलान्गणान् ॥ करालं सितकोशं च कृष्णकेशं जटाधरा ॥८४॥ मेघनादं चतुर्दंष्ट्रं विद्युज्जिह्वं दशाननम् ॥ सोमाप्यायनमेवोग्रं देवयाजिनमेव च ॥८५॥ हंसास्यं कुण्डजठरं सुग्रीवं हयाननम् ॥ कूर्मग्रीवं च पञ्चैतान्ददुः पुत्राय कृत्तिकाः ॥८६॥ स्थाणुजङ्घं कुम्भवक्त्रं लोहजङ्घं महाननम् ॥ पिण्डाकारं च पञ्चैतान्ददुः स्कन्दाय चर्षयः ॥८७॥ नागजिह्वं चन्द्रभासं पाणिकूर्ममशिक्षकम् ॥ चाषवक्त्रं च जम्बूकं ददौ तीर्थं पृथूदकम् ॥ ८८ ॥ चक्रतीर्थं सुचक्राख्यं मकराख्यं गयाशिरः॥ गणं पञ्चशिवं नाम ददौ कनखलं स्वकम् ॥ ८९ ॥ बन्धुदत्तं चाजिशिरा बाहुशालं च पुष्करम् ॥ सर्वौजसं माहिषकं मानसः पिङ्गलं तथा ॥९०॥ रुद्रमौशनसः प्रादात्ततोऽन्यान्मातरो ददुः ॥ वसुदामं सोमतीर्थः प्रभासो नन्दिनीमपि ॥ ९१ ॥ इन्द्रतीर्थं विशोकां च उदपानो घनस्वनाम् ॥ सप्तसारस्वतः प्रादान्मातरश्चतुरोऽद्भुताः ॥ ९२ ॥ गीतप्रियां माधवीं च तीर्थनेमिं स्मिताननम् ॥ एकचूडां नागतीर्थः कुरुक्षेत्रं फलास्पदम् ॥ ९३ ॥ ब्रह्मयोनिश्चण्डशितां भद्रकाली त्रिविष्टपम् ॥ रोण्डीसेण्डीपोषभेडीं प्रादाद्विरदपावनः ॥ ९४ ॥ मोपलीयां मही प्रादाच्छालिकां मानसो ह्रदः ॥ शतघण्टां शतानन्दा तथोलूखलमेखलाम् ॥ ९५ ॥ पद्मावतीं माधवीं च ददौ बदरिकाश्रमः ॥ सुषमामेकचूडां च देवी धमधमां तथा ॥ ९६ ॥ उत्क्राथनी वेदमन्त्रां केदारो मातगे ददौ ॥ सुनक्षत्रं कल्लूलां च सुप्रभातं सुमङ्गलम् ॥ ९७ ॥ देवमित्रो चित्रसेनां ददौ रौद्रमहालयः ॥ कोटरां



पतितां कमलाक्षीं च प्रयागो मातरो ददौ ॥ सुषमां मधुदं गां च क्षान्ति

मातरो ददौ ॥ सुनक्षत्रं कल्पूलां च सुप्रभातं सुमङ्गलम् ॥ ९७ ॥ देवमित्रां चित्रसेनां ददौ रौद्रमहालयः ॥ कोटरा
मूर्द्धवेणीं च श्रीमतीं बाहुपुत्रिकाम् ॥ ९८ ॥ पतितां कमलाक्षीं च प्रयागो मातरो ददौ ॥ सुषमां मधुरां गां च शान्ति
दहदहां पराम् ॥ ९९ ॥ प्रादात्खेटकरां चान्यां सर्वपापविमोचनः ॥ संतानिकां च विकलां क्रमुकाम्बरवासिनीम् ॥
॥ १०० ॥ जलेश्वरीं कर्कुटिकां सुदामा लोहमेखलाम् ॥ वपुष्मत्युल्मुकाक्षी च कोकनामा महासनी ॥ १०१ ॥ रौद्रा कर्क
टिका तुण्डा श्वेततीर्थो ददौ त्विमाम् ॥ एतानि भूतानि गणांश्च मातरो दृष्ट्वा महात्मा विनतातनूजः ॥ १०२ ॥ ददौ
मयूरं स्वसुतं महाजवं तथाऽरुणस्ताम्रचूडं च पुत्रम् ॥ शक्तिं हुताशोऽद्रिसुता च वस्त्रं दण्डं गुरुः सा कुटिला कमण्डलुम् ॥
॥ १०३ ॥ मालां हरिः शूलधरः पताकं कण्ठे च हारं मघवानुरस्तः ॥ गणैर्वृतो मातृभिरध्वयातो मयूरसंस्थो वरशक्तिपाणिः ॥
सेनाधिपत्ये स कृतो भवेन रराज सूर्यो व महावपुष्मान् ॥ १०४ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे कार्त्तिकेयोत्पत्तौ
सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ पुलस्त्य उवाच ॥ सेनापत्येऽभिषिक्तस्तु कुमारो दैवतैरथ ॥ प्रणिपत्य भवं भक्त्या गिरिजां
पावकं शुचिम् ॥ १ ॥ षट् कृत्तिकाश्च सरसां प्रणम्य कुटिलामपि ॥ ब्रह्माणं च नमस्कृत्य इदं वचनमब्रवीत् ॥ २ ॥ कुमार
उवाच ॥ नमो भगवतीं देवीमों नमोऽस्तु तपोधनाः ॥ युष्मत्प्रसादाज्जेष्यामि शत्रू महिषतारकौ ॥ ३ ॥ शिशुरस्मि न जाना
मि वक्तुं किंचन देवताः ॥ दीयतां ब्रह्मणा सार्धमनुज्ञा मम साम्प्रतम् ॥४॥ इत्येवमुक्ते वचने कुमारेण महात्मना ॥ मुखं निरी
क्ष्य तत्सर्वाः सर्वे विगतसाध्वसाः ॥ ५ ॥ शंकरोऽपि सुतस्नेहात्समुत्थाय प्रजापतिम् ॥ आदाय दक्षिणे पाणौ स्कन्दान्तिकमु

पाययौ ॥ ६ ॥ अथोमा प्राह तनयं पुत्र एह्येहि शत्रुहन् ॥ वन्दस्व चरणौ दिव्यौ विष्णोर्लोकनमस्कृतौ ॥ ७ ॥ ततो विह स्याह गुहः कोऽयं मातर्वदस्व माम् ॥ यस्यादरात्प्रणामोऽयं क्रियते मद्विधैर्जनैः ॥ ८ ॥ तं माता प्राह वचनं कृते कर्मणि पद्मभूः ॥ वक्ष्यते तव योऽयं हि महात्मा गरुडध्वजः ॥ ९ ॥ केवलं त्विह मां देव त्वत्पिता प्राह शंकरः ॥ नान्यः परत रोऽस्माद्धि वयमन्ये च देहिनः ॥ ॥ १० ॥ पार्वत्या गदिते स्कन्दः प्रणिपत्य जनार्दनम् ॥ तस्थौ कृताञ्जलिपुटस्त्वाज्ञां प्रार्थ यतेऽच्युतात्॥११॥ कृताञ्जलिपुटं स्कन्दं भगवान्भूतभावनः ॥ कृत्वा स्वस्त्ययनं देवो ह्यनुज्ञां प्रददौ ततः॥१२॥ नारद उवाच॥ यत्तत्स्वस्त्ययनं पुण्यं कृतवान्गरुडध्वजः॥शिखिध्वजाय विप्रर्षे तन्मे व्याख्यातुमर्हसि॥१३॥पुलस्त्य उवाच॥ शृणु स्वस्त्ययनं पुण्यं यत्प्राह भगवान्हरिः॥स्कन्दस्य विजयार्थाय वधाय महिषस्य च॥१४॥ॐ स्वस्ति कुरुतां ब्रह्मा पद्मयोनी रजोगुणः॥ स्वस्ति चक्राङ्कितकरो विष्णुस्ते विदधात्वजः ॥१५॥ स्वस्ति ते शंकरो भक्त्या सपत्नीको वृषध्वजः ॥ पावकः स्वस्ति तुभ्यं च करोतु शिखिवाहनः॥१६॥दिवाकरः स्वस्तिकरोऽस्तु ते सदा सोमः सभौमः सबुधो गुरुश्च॥काव्यः सदा स्वस्तिकरोऽस्तु तुभ्यं शनैश्चरः स्वस्त्ययनं करोतु ॥ १७ ॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुर्वसिष्ठो भृगुरङ्गिराश्च ॥ मृगाङ्कजस्ते कुरुताद्धि मङ्गलं महर्षयः सप्त दिवि स्थिताश्च ये ॥ १८॥ विश्वेऽश्विनौ साध्यमरुद्गणाग्नयो दिवाकराः शूलधरा महेश्वराः ॥ यक्षाः पिशाचा वसवोऽथ किन्नरास्ते स्वस्ति कुर्वन्तु सदोद्यतास्त्वमी ॥ १९ ॥ नागाः सुपर्णाः सरितः सरांसि तीर्थानि पुण्यानि [illegible] समुद्राः ॥ महाबला भूतगणा

स्वस्ति कुर्वन्तु सदोद्यतास्त्वमी ॥ १९ ॥ नागाः सुपर्णाः सरितः सरांसि तीर्थानि पुण्यानि ह्रदाः समुद्राः ॥ महाबला भूतगणा

गणेन्द्रास्ते स्वस्ति कुर्वन्तु सदोद्यतास्त्वमी ॥२०॥ स्वस्ति द्विपादिकेभ्यश्च चतुष्पादेभ्य एव च ॥ स्वस्ति ते बहुपादेभ्यस्त्वपादे
भ्योऽस्त्वनामयम् ॥ २१ ॥ प्राग्दिशं रक्षतां वज्री दक्षिणां दण्डनायकः ॥ पाशी प्रतीचीमवतु यक्षेशः पातु चोत्तराम् ॥ २२ ॥
वह्निर्दक्षिणपूर्वां तु कुबेरो दक्षिणापराम् ॥ प्रतीचीमुत्तरां वायुः शिवः पूर्वोत्तरामपि ॥ २३ ॥ उपरिष्टाद्ध्रुवः पातु ह्यधस्ताच्च धरा
धरः ॥ मुसली लाङ्गली वज्री धनुष्मानन्तरेषु च॥२४॥वाराहोऽम्बुनिधौ पातु दुर्गे पातु नृकेसरी॥ सामवेदध्वनिः श्रीमान्सर्वतः
पातु माधवः ॥२५॥ पुलस्त्य उवाच ॥ एवं कृतस्वस्त्ययनो गुहः शक्तिधरोऽग्रणीः॥ प्रणिपत्य सुरान्सर्वान्भूतलादुत्पपात खम्॥
॥ २६ ॥ तमन्ये च गणाः सर्वे देवाश्च मुनिदैवतैः ॥ अनुजग्मुः कुमारं ते कामरूपा विहंगमाः ॥ २७ ॥ मातरश्च तथा सर्वाः
समुत्पेतुर्नभस्तलम् ॥ समं स्कन्देन बलिना हन्तुकामा महासुरान् ॥ २८ ॥ ततः सुदीर्घमध्वानं गत्वा स्कन्दो
ऽब्रवीद्गणान् ॥ भूम्यां तूर्णं महावीर्याः कुरुध्वमवतारणम् ॥ २९ ॥ गणा गुहवचः श्रुत्वा अवतीर्य महीतलम् ॥
आरात्पर्वतमभ्येत्य नादं चक्रुर्भयंकरम् ॥ ३० ॥ तन्निनादो महीं सर्वामापूर्य च नभस्तलम् ॥ विवेशार्णवरन्ध्रेण पातालं दानवा
लयम् ॥ ३१ ॥ श्रुतः स महिषेणाथ तारकेण च धीमता ॥ विरोचनेन कुम्भेन निकुम्भेनासुरेण च ॥ ३२ ॥ श्रुत्वा च सहसा
नादं वज्रपातोपमं दृढम् ॥ किमेतदिति संचिन्त्य तूर्णं जग्मुस्तदान्धकम् ॥ ३३ ॥ ते समेत्यान्धकेनैव समं दानवपुंगवाः ॥ मन्त्र
यामासुरुद्विग्नास्तच्छब्दं प्रति नारद ॥ ३४ ॥ मन्त्रयत्सु च दैत्येषु पातालात्सकराननः ॥ पातालकेतुर्दैत्येन्द्रः संप्राप्तोऽथ रसा

तलम् ॥ ३५ ॥ स बाणविद्धो व्यथितः कम्पमानो मुहुर्मुहुः ॥ अब्रवीद्वचनं दीनं समभ्येत्यान्धकासुरम् ॥ ३६ ॥ पातालकेतुरुवाच ॥ गतोऽहमासं दैत्येन्द्र गालवस्याश्रमं प्रति ॥ तद्विध्वंसयितुं यत्नः समारब्धो बलान्मया ॥ ३७ ॥ यावत्सूकररूपेण प्रविशामि तदाश्रमम् ॥ न जानेऽहं नरं राजन्येन मे प्रहितः शरः ॥ ३८ ॥ शरसंभिन्नजन्तुश्च भयार्तश्च महाजवः ॥ प्रपलाय्याश्रमात्तस्मात्स च मां पृष्ठतोऽन्वगात् ॥ ३९ ॥ तुरङ्गखुरनिर्घोषः श्रूयते परमोऽसुर ॥ तिष्ठ तिष्ठेति वदतः सूकरस्य च पृष्ठतः ॥ तद्भयादस्मि जलधिं संप्राप्तो दक्षिणार्णवम् ॥ ४० ॥ यावत्पश्यामि तत्रस्थान्नानावेषाकृतीन्नरान् ॥ केचिद्गर्जन्ति घनवत्प्रत्यगर्जंस्तथाऽपरे ॥ ४१ ॥ अन्ये चोचुर्वयं नूनं निहन्मो महिषासुरम् ॥ तारकं घातयामोऽद्य वदन्त्यन्ये सुतेजसः ॥ ४२ ॥ तच्छ्रुत्वा सुतरां त्रासो मम जातोऽसुरेश्वर ॥ महार्णवं परित्यज्य पतितोऽस्मि भयातुरः ॥ ४३ ॥ धरण्यां विवृतं गर्तं स मामन्वपतद्बली ॥ तद्भयात्संपरित्यज्य हिरण्यपुरमात्मनः ॥ ४४ ॥ तवान्तिकमनुप्राप्तः प्रसादं कर्तुमर्हसि ॥ तच्छ्रुत्वा चान्धको वाक्यं प्राह मेघस्वनं वचः ॥ ४५ ॥ न भेतव्यं त्वया तस्मात्सत्यं गोप्तास्मि दानव ॥ महिषस्तारकश्चोग्रो बाणश्च बलिनन्दनः ॥ ४६ ॥ अनाख्यायैव ते वीरास्त्वन्धकं महिषादयः ॥ स्वपरिग्रहसंयुक्ता भूमौ युद्धाय निर्ययुः ॥ ४७ ॥ यत्र ते दारुणाकारा गणाश्चक्रुर्महास्वनम् ॥ तत्र दैत्याः समाजग्मुः सायुधाः सबला मुने ॥ ४८ ॥ दैत्यानां पतयो दृष्ट्वा कार्त्तिकेयगणांस्ततः ॥ अभ्यद्रवन्त सहसा ते चोग्रं मातृमण्डलम् ॥ ४९ ॥ तेषां पुरस्सरः स्थाणुः प्रगृह्य परिघं बली ॥ न्यपूदयत्परबलं क्रुद्धो रुद्रः पशूनिव ॥ ५० ॥ तं निघ्नन्तं





कुठारं पाणिनाऽऽदाय हन्ति सर्वान्महासुरान् ॥ ५१ ॥ ज्वालामुखी भयकरः करेणादाय चापु

मातृमण्डलम् ॥ ४९ ॥ तेषां पुरस्सरः स्थाणुः प्रगृह्य परिघं वली ॥ न्यपूदयत्परबलं क्रुद्धो रुद्रः पशूनिव ॥ ५० ॥ तं निघ्नन्त

महादेवं निरीक्ष्य कलशोदरः ॥ कुठारं पाणिनाऽऽदाय हन्ति सर्वान्महासुरान् ॥ ५१ ॥ ज्वालामुखो भयकरः करेणादाय चापु

रम् ॥ सरथं सगजं साश्वं विस्तृते वदनेऽक्षिपत् ॥ ५२ ॥ दण्डकश्चापि संक्रुद्धः प्रासपाणिं महासुरम् ॥ सवाहनं प्रक्षिपति समुत्पा

टय महार्णवे ॥ ५३ ॥ शङ्कुकर्णश्च मुसली हलेनाहत्य दानवान् ॥ संचूर्णयति मन्त्रीव राजानं हीनपौरुषम् ॥ ५४ ॥ खड्गचर्म

धरो वीरः पुष्पदन्तो गणेश्वरः ॥ द्विधा त्रिधा च बहुधा चक्रे दैतेयदानवान् ॥ ५५ ॥ पिङ्गलो दण्डमुण्डैश्च यत्र यत्र प्रधावति॥

तत्र तत्र प्रदृश्यन्ते राशयः सर्वदानवैः ॥ ५६ ॥ सहस्रनयनः शूलं भ्रामयन्वै गणाग्रणीः ॥ निजघानासुरान्वीरः सवाजिरथकुञ्ज

रान् ॥ ५७ ॥ भीमो भीमशिलावर्षैः सपुरः सरिणोऽसुरान् ॥ निजघान यथैवेन्द्रो वज्रवृष्ट्या नगोत्तमान् ॥ ५८ ॥ रौद्रः शक

टचक्राख्यो गणः पञ्चशिखो बली ॥ भ्रामयन्मुद्गरं वेगान्निजघान बलाद्रिपून् ॥ ५९ ॥ गिरिभेदी तलेनैव सारोहं कुञ्जरं रणे ॥

भस्म चक्रे महावेगो रथं च रथिना सह ॥ ६० ॥ नाडीजङ्घो निपातैश्च मुष्टिभिर्जानुनाऽसुरान् ॥ कीलाभिर्वज्रतुल्याभिर्जघान

बलवान्मुने ॥ ६१ ॥ कूर्मग्रीवो हयग्रीवः शिरसा चरणेन च ॥ लुण्ठनेन तदा दैत्यान्निजघान सवाहनान् ॥ ६२ ॥ पिण्डाकरस्तु

तुण्डेन शृङ्गाभ्यां च कलिप्रियः॥ विदारयति संग्रामे दानवान्समरोद्धतान् ॥६३॥ ततो दृष्ट्वैव स्वबलं वध्यमानं गणेश्वरैः ॥ प्रदु

द्राव्राथ महिस्तारकश्च गणाग्रणीः ॥ ६४ ॥ ते हन्यमानाः प्रमथा दानवानां वरायुधैः ॥ परिवार्य समन्तात्ते युयुधुः कुपिता

स्तदा ॥ ६५ ॥ हंसास्यः पट्टिशेनाथ जघान महिषासुरम् ॥ सोऽप्यशान्यत्रिशूलेन शतशीर्षो वरासिना ॥ ६६ ॥ श्रुतायुधस्तु

गदया विशोको मुसलेन च ॥ बन्धुदत्तस्तु शूलेन मूर्ध्नि दैत्यमताडयत् ॥ ६७ ॥ तथाऽन्यैः पार्षदैर्युद्धे शूलशक्त्यृष्टिपट्टिशैः ॥ नाकम्पत्तुद्यमानोऽपि मैनाक इव पर्वतः ॥ ६८ ॥ तारको भद्रकाल्या च तथोलूखलया रणे ॥ बध्यतेऽनेक चूडाया दार्यते परमायुधैः ॥ ६९ ॥ तौ ताड्यमानौ प्रमथौ मातृभिश्च महासुरैः ॥ न क्षोभं जग्मतुर्वीरौ क्षोभयन्तौ गणानपि॥ ॥७० ॥ महिषो गदया तूर्णं प्रहारैः प्रमथानपि ॥ पराजित्य प्रयात्येव कुमारं प्रति सायुधः ॥ ७१ ॥ तमापतन्तं महिषं स चक्राक्षो निरीक्ष्य हि ॥ चक्रमुद्यम्य संक्रुद्धो रुरोध दनुनन्दनम् ॥ ७२ ॥ गदाचक्राङ्कितकरौ गणासुरमहारथौ ॥ अयुध्येतां तदा ब्रह्मँल्लघु चित्रं च सुष्ठु च ॥ ७३ ॥ गदां मुमोच महिषः समाविध्य गणाय तु ॥ सुचक्राक्षो निजं चक्रमुत्ससर्ज्ज रथं प्रति ॥७४॥ गदां छित्त्वा सुतीक्ष्णारं चक्रं महिषमाद्रवत् ॥ तत उच्चुक्रुशुर्दैत्या हा हतो महिषस्त्विवति ॥ ७५ ॥ तच्छ्रुत्वाऽभ्यद्रवद्बाणः प्रास माविध्य वेगवान् ॥ जघान चक्रं रक्ताक्षं पञ्चमुष्टिशतेन हि ॥७६॥ पञ्चबाहुशतेनापि सुचक्राक्षं बबन्ध सः ॥ बलवानपि बाणेन निष्प्रयत्नगतिः कृतः ॥ ७७ ॥ सुचक्राक्षं सचक्रं हि बद्धं बाणासुरेण हि ॥ दृष्ट्वाऽद्रवद्गदापाणिर्मकराक्षो महाबलः ॥ ७८ ॥ गदया मूर्ध्नि पातेन निजघान महाबलः ॥ स चापि तेन संयुक्तो व्रीडायुक्तो महामनाः ॥ ७९ ॥ स संग्रामं परित्यज्य शालिग्राम मुपाययौ ॥ बाणोऽपि मकराक्षेण ताडितोऽभूत्पराङ्मुखः ॥ ८० ॥ अभज्यत बलं सर्वं दैत्यानां सुरतापस ॥ प्रभज्य तद्बलं सर्वं दैत्यानां ते गणेश्वराः ॥८१॥ तिष्ठन्तस्ते भृशं क्रुद्धा दैत्यान्यद्रावयन्रणे ॥ ततः स्वबलमीक्ष्यैव प्रभग्नं तारको बली ॥ खड्गोद्यत

दैत्यानां ते गणेश्वराः ॥८१॥ तिष्ठन्तस्ते भृशं क्रुद्धा दैत्यान्व्यद्रावयन्रणे ॥ ततः स्वबलमीक्ष्यैव प्रभग्नं तारको बली ॥ खड्गोद्यत

करो दैत्यः प्रदुद्राव गणेश्वरान् ॥८२॥ ततस्तु तेनाप्रतिमेन सासिना ते हंसवक्त्रप्रमुखा गणेश्वराः ॥ ता मातरश्चापि पराजिता रणे

स्कन्दं भयार्त्ताः शरणं प्रपेदिरे ॥ ८३ ॥ भग्नान्गणान्वीक्ष्य महेश्वरात्मजस्तं तारकं सासिनमापतन्तम् ॥ दृष्ट्वैव शक्त्या हृदये

बिभेद स भिन्नमर्मा न्यपतत्पृथिव्याम् ॥ ८४ ॥ तस्मिन्हते भ्रातरि भग्नदर्पे भयातुरोऽभून्महिषो महर्षे ॥ संत्यज्य संग्रामशिरो

दुरात्मा जगाम शैलं स हिमाचलं च ॥ ८५ ॥ बाणोऽथ वीरे निहतेऽथ तारके गते हिमाद्रौ महिषे भयार्त्ते ॥ भयाद्विवेशोग्रमपां

निधानं गणैर्बले विध्यति सापराधे ॥८६॥ हत्वा कुमारो रणमूर्ध्नि तारकं प्रगृह्य शक्तिं महता जवेन ॥ मयूरमारुह्य शिखण्डमण्डितं

ययौ निहन्तुं महिषासुरं च ॥८७॥ स पृष्ठतः प्रेक्ष्य शिखण्डिकेतनं समापतन्तं वरशक्तिपाणिनम् ॥ कैलासमुत्सृज्य हिमाचलं

तथा क्रौञ्चं समभ्येत्य गुहां विवेश ॥ ८८ ॥ दैत्यं प्रविष्टं स पिनाकिसूनुर्जुगोप यत्नाद्भगवान्गुहोऽपि ॥ स्वबन्धुहन्ता भविता

कथं त्वहं विचिन्तयन्नेव ततः स्थितोऽभूत् ॥ ८९ ॥ ततोऽभ्यगात्पुष्करसंभवश्च हरो मुरारिस्त्रिदशेश्वरश्च ॥ अभ्येत्य चोचुर्म

हिषं सशैलं भिन्दस्व शक्त्या कुरु देवकार्यम् ॥ ९० ॥ तत्कार्त्तिकेयः प्रियमेव तथ्यं श्रुत्वा वचः प्राह सुरान्विहस्य ॥ कथं हि

मातामहनप्तृकं च स्वभ्रातरं भ्रातृसुतं च मातुः ॥ ९१ ॥ एषा श्रुतिश्चापि पुरातनी किल गायन्ति यां वेदविदो महर्षयः ॥ कृत्वा

च यस्यां मतमुत्तमायां स्वर्गं व्रजन्ति त्वतिपापिनोऽपि ॥ ९२ ॥ गां ब्राह्मणं वृद्धमथापि चाप्तं बालं स्वबन्धुं ललनां सुदुष्टाम् ॥

कृतापराधामपि नैव वध्यादाचार्यमुख्या गुरवस्तथैव ॥ ९३ ॥ एवं ज्ञात्वा धर्ममनन्तं सुरेन्द्रा नाहं वध्यां भ्रातरं मातुलेयम् ॥

हन्यां

यथा दैत्योऽभिगमिष्यद्गुहातस्तथा शक्त्या घातयिष्यामि शत्रुम् ॥ ९४ ॥ श्रुत्वा कुमारवचनं भगवान्महर्षे कृत्वा मतं स्वहृदये गुहमाह शक्रः ॥ मत्तो भवान्न मतिमान्वदसे किमित्थं वाक्यं शृणुष्व हरिणा गदितं हि पूर्वम् ॥ ९५ ॥ नैकस्यार्थे बहून्हन्यादिति शास्त्रेषु निश्चयः ॥ एकं हन्याद्बहूनां हि न पापी तेन जायते ॥ ९६ ॥ एतच्छ्रुत्वा मया पूर्वं समयस्तेन चाग्निज ॥ निहतो नमुचिः पूर्वं सोदरोऽपि सहानुजः ॥ ९७ ॥ तस्माद्बहूनामर्थाय सक्रौञ्चं महिषासुरम् ॥ घातयस्व पदाऽऽक्रम्य शक्त्या पावकदत्तया ॥ ९८ ॥ पुरंदरवचः श्रुत्वा क्रोधादारक्तलोचनः ॥ कुमारः प्राह वचनं कम्पमानः शतक्रतुम् ॥ ९९ ॥ मूढ किं ते बलं बाह्वोः शारीरं वाऽपि वृत्रहन् ॥ येनाधिक्षिपसे मां त्वं भुवने मतिमानसि ॥ १०० ॥ तमुवाच सहस्राक्षः स्वतोऽहं बलवान्गुह ॥ तं गुहः प्राह एह्येहि युद्धचस्व बलवान्यदि ॥ १०१ ॥ शक्रः प्राहाथ बलवाञ्जायते कृत्तिकासुत ॥ प्रदक्षिणं शीघ्रतरं यः कुर्यात्क्रौञ्चमेव हि ॥ १०२ ॥ श्रुत्वा तद्वचनं स्कन्दो मयूरं प्रोज्झ्य तत्क्षणात् ॥ प्रदक्षिणं पादचारी कर्तुं तूर्णतरोऽभ्यगात् ॥ १०३ ॥ शक्रोऽवतीर्य नागेन्द्रात्पादेनाथ प्रदक्षिणाम् ॥ कृत्वा तस्थौ गुहोऽभ्येत्य मूढ किंस्वित्स्थितो भवान् ॥ १०४ ॥ तमिन्द्रः प्राह कौटिल्यान्मया पूर्वं प्रदक्षिणा ॥ कृताऽस्य तत्त्वया पूर्वं कुमारः शक्रमब्रवीत् ॥ १०५ ॥ मया पूर्वं मया पूर्वं विवदन्तौ परस्परम् ॥ आजग्मतुर्महेशाय ब्रह्मणे माधवाय च ॥ १०६ ॥ अथोवाच हरिः स्कन्दं प्रष्टुमर्हसि पर्वतम् ॥ योऽयं वक्ष्यति पूर्वं स भविष्यति महाबलः ॥ १०७ ॥ तन्माधववचः श्रुत्वा क्रौञ्चमभ्येत्य पावकिः ॥ पप्रच्छाद्रिमिदं केन कृतं पूर्वं ... ॥ १०८ ॥ इत्येवमुक्तः क्रौञ्चस्तु प्राह पूर्वं महामतिः ॥ चकार गोत्रभित्पूर्वं त्वया कृतमयो गुह ॥ १०९ ॥ एवं ब्रुवन्तौ

मया पूर्वं विवदन्तौ परस्परम् ॥ ...

योऽयं वक्ष्यति पूर्वं स भविष्यति महाबलः ॥१०७॥ तन्माधववचः श्रुत्वा क्रौञ्चमभ्येत्य पावकिः ॥ पप्रच्छाद्रिमिदं केन कृतं पूर्वं

प्रदक्षिणम् ॥ १०८ ॥ इत्येवमुक्तः क्रौञ्चस्तु प्राह पूर्वं महामतिः ॥ चकार गोत्रभित्पूर्वं त्वया कृतमयो गुह ॥ १०९ ॥ एवं ब्रुवन्तं क्रौञ्चं स क्रोधात्प्रस्फुरिताधरः ॥ बिभेद शक्त्या कौटिल्यान्महिषेण समं तदा ॥ ११० ॥ तस्मिन् हतेऽथ तनये बलवान्सुनाभो वेगेन भूमिधरपार्थिवजस्तथाऽगात् ॥ ब्रह्मेन्द्ररुद्रमरुदश्विवसुप्रधाना जग्मुर्दिवं महिषमीक्ष्य हतं गुहेन ॥ १११ ॥ स्वमातुलं वीक्ष्य सुनाभमभ्येत्य हिमाचलस्तु प्रगृह्य हस्तेन निनाय तं च ॥ हरिं कुमारं सशिखण्डिनं नयन्वेगाद्दिवं पन्नगशत्रुपुत्रः ॥ ११२ ॥ बली कुमारः शक्तिं समुत्पाट्य निहन्तुकामः ॥ निवारितश्चक्रधरेण वेगादालिङ्ग्य दोर्भ्यां गुरुरित्युदीर्य ॥ ११३ ॥ ततो गुहः प्राह हरिं सुरेशं मोहेन नष्टो भगवन्विवेकी ॥ भ्राता मया मातुलेयो निरस्तस्तस्मात्करिष्ये स्वशरीरशोषम् ॥ ११४ ॥ तमाह विष्णुर्व्रज तीर्थवर्यं पृथूदकं पापहरं कुमार ॥ स्नात्वौघवत्यां हरमीक्ष्य भक्त्या भविष्यसे सूर्यसमप्रभावः ॥ ११५ ॥ इत्येवमुक्तो हरिणा कुमारस्त्वभ्येत्य तीर्थं प्रसमीक्ष्य शंभुम् ॥ स्नात्वाऽर्च्य देवान्स रविप्रकाशो जगाम शैलं सदनं हरस्य ॥ ११६ ॥ सुचक्रनेत्रोऽपि महाश्रमे तपश्चचार शैले पवनाशनस्तु ॥ आराधयामास वृषध्वजं तथा हरोऽपि तुष्टो वरदो बभूव ॥ ११७ ॥ देवात्स वव्रे वरमायुधार्थे क्रौञ्चान्तकारी रिपुबाहुखण्डम् ॥ छिन्द्यां यथा त्वत्प्रतिमं करेण बाणस्य तन्मे भगवान्ददातु ॥ ११८ ॥ तमाह शंभुर्व्रज दत्तमेतद्वरं हि चक्रस्य तवायुधस्य ॥ बाणस्य तद्बाहुवनं प्रवृद्धं संछेत्स्यसे नात्र विचार्यमस्ति ॥ ११९ ॥ वरे प्रदत्ते त्रिपुरान्तकेन गणेश्वरः स्कन्दमुपाजगाम ॥ निपत्य पादौ प्रतिवेद्य हृष्टो निवेदयामास हरप्रसादम् ॥ १२० ॥ एवं तवोक्तं महिषा

सुरस्य वधस्त्रिणेत्रात्मजशक्तिभेदात् ॥ क्रौञ्चस्य मृत्युः शरणागतानां पापापहं पुण्यविवर्धनं च ॥ १२१ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे महिषासुरतारकवधोपाख्याने क्रौञ्चभेदनं नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ नारद उवाच ॥ योऽसौ मन्त्रयतां प्राप्तो दैत्यानां शरताडितः ॥ स केन वद निर्भिन्नः शरेण दितिजेश्वरः ॥ १ ॥ पुलस्त्य उवाच ॥ आसीन्नृपो रघुकुले रिपुजिन्महर्षे तस्यात्मजो गुणगणैकनिधिर्महात्मा ॥ शूरोऽरिसैन्यदमनो बलवान्सुहृष्टो विप्रान्धदीनकृपणार्तिशमः पृथिव्याम् ॥ २ ॥ ऋतध्वजो नाम महामहीशः स गालवार्थे तुरगाधिरूढः ॥ पातालकेतुं निजघान पृष्ठे बाणेन चन्द्रार्धनिभेन वेगशः ॥ ३ ॥ नारद उवाच ॥ किमर्थं गालवस्यासौ साधयामास सत्तम ॥ येनासौ पत्रिणा तूर्णं निजघान नृपात्मजः ॥ ४ ॥ पुलस्त्य उवाच ॥ पुरा तपस्तप्यति गालवर्षौ महाश्रमे स्वे सततं निविष्टे ॥ पातालकेतुस्तपसोऽस्य विघ्नं करोति मौढ्यात्ससमाधिभङ्गम् ॥ ५ ॥ न चेष्यतेऽसौ तपसो व्ययं हि शक्नोति कर्तुं त्वथ भस्मसात्तम्॥ आकाशमीक्ष्याथ स दीर्घमुष्णं मुमोच निःश्वासमनुत्तमं हि ॥६॥ ततोऽम्बराद्वाजिवरः पपात बभूव वाणी त्वशरीरिणी च ॥ असौ तुरङ्गो बलवान्क्रमेत त्वह्ना सहस्राणि तु योजनानाम् ॥ ७ ॥ स तं प्रगृह्याश्ववरं तुरङ्गमृतध्वजं योज्य तदाऽऽत्तशस्त्रम् ॥ स्थितस्तपस्येव ततो महर्षिर्दैत्यं समभ्येत्य नृपो बिभेद ॥८॥ नारद उवाच॥ केनाम्बरतलाद्वाजी निसृष्टो वद सुव्रत ॥ वाक्कस्यादेहिनी जाता परं कौतूहलं मम ॥९॥ पुलस्त्य उवाच ॥ विश्वावसुर्नाम महेन्द्रगायनो गन्धर्वराजो बलवान्यशस्वी ॥ निसृष्टवान्भूवलये तुरङ्गम [illegible] सुतार्थमाशु ॥ १० ॥ नारद उवाच ॥ कोऽर्थो







[illegible] ॥ राज्ञः कुवलयाश्वस्य कोऽर्थो नृपसुतस्य च ॥ ११ ॥ [illegible]
[illegible] त्रिलोके ॥ लावण्यराशिः शशिकान्तितुल्या मदालसा नाम मदालसेव ॥१२॥ तां [illegible]

गुणोपपन्ना आसीत्पुरन्ध्री सुभगा त्रिलोके ॥ लावण्यराशिः शशिकान्तितुल्या मदालसा नाम मदालसेव ॥१२॥ तां नन्दनो देव
रिपुस्तरस्वी संक्रीडन्तीं रूपवतीं ददर्श ॥ पातलकेतुस्तु जहार तन्वीं तस्यार्थतः सोऽश्ववरः प्रदत्तः ॥ १३ ॥ हत्वाऽरिंदैत्यं
नृपतेस्तनूजो लब्ध्वा वरोरूमपि वस्थितोऽभूत ॥ दृष्टो यथा देवपतिर्महेन्द्रः शच्या तथा राजसुतो मृगाक्ष्या ॥ १४ ॥ नारद
उवाच ॥ एवं निरस्ते महिषे तारके च महासुरे॥ हिरण्याक्षसुतो धीमान्किमाचेष्टत वै पुनः ॥१५॥ पुलस्त्य उवाच ॥ तारकं निहतं
दृष्ट्वा महिषं च रणेऽन्धकः ॥ कोपं चक्रे सुदुर्बुद्धिर्दैत्यानां देवसैन्यहा ॥१६॥ ततः स्वल्पपरीवारः प्रगृह्य परिघं करे ॥ निर्जगामाथ
पातालाद्विचचार च मेदिनीम् ॥ १७ ॥ ततो विचरता तेन मन्दरे चारुकन्दरे ॥ दृष्टा गौरी च गिरिजा सखीमध्यस्थिता
शुभा ॥ १८ ॥ ततोऽभूत्कामबाणार्त्तः सहसैवान्धकासुरः ॥ तां दृष्ट्वा चारुसर्वाङ्गीं गिरिराजसुतां वने ॥ १९ ॥ अथोवाचासुरो
मूढो वचनं मन्मथान्धकः ॥ कस्येयं चारुसर्वाङ्गी वने चरति सुन्दरी ॥ २० ॥ इयं यदि भवेन्नैव ममान्तःपुरवासिनी ॥ तन्म
दीयेन जीवेन क्रियते निष्फलेन किम् ॥ २१ ॥ यदस्यास्तनुमध्याया न परिष्वङ्गवानहम् ॥ अतो धिङ् मम रूपेण किं स्थिरेण

१ कुवलयाश्वः ऋतध्वजः एवम्, उक्ताश्वलाभादेतन्नाम्नाऽऽख्यातोऽभवत् । २ यद्यपि "दाराः स्यात्तु कुटुम्बिनी । पुरन्ध्री" इत्यमरेण कृतपाणिग्रहाया एव पुरन्ध्रीपदवाच्यता लभ्यते । तथापीह दारभावयोग्यावस्थाविशिष्टस्त्रीसामान्यवाचितामाश्रित्य कन्यापरत्वेन व्याख्येयः ॥ अत एव राज्ञः अस्याः पाणिग्रहाभिधानमग्रे संगच्छति ॥

सुरस्य वधस्त्रिणेत्रात्मजशक्तिभेदात् ॥ क्रौञ्चस्य मृत्युः शरणागतानां पापापहं पुण्यविवर्धनं च ॥ १२१ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे महिषासुरतारकवधोपाख्याने क्रौञ्चभेदनं नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ नारद उवाच ॥ योऽसौ मन्त्रयतां प्राप्तो दैत्यानां शरताडितः ॥ स केन वद निर्भिन्नः शरेण दितिजेश्वरः ॥ १ ॥ पुलस्त्य उवाच ॥ आसीन्नृपो रघुकुले रिपुजिन्महर्षे तस्यात्मजो गुणगणैकनिधिर्महात्मा ॥ शूरोऽरिसैन्यदमनो बलवान्सुहृष्टो विप्रान्धदीनकृपणार्तिशमः पृथिव्याम् ॥ २ ॥ ऋतध्वजो नाम महामहीशः स गालवार्थे तुरगाधिरूढः ॥ पातालकेतुं निजघान पृष्ठे बाणेन चन्द्रार्धनिभेन वेगशः ॥ ३ ॥ नारद उवाच ॥ किमर्थं गालवस्यासौ साधयामास सत्तम ॥ येनासौ पत्रिणा तूर्णं निजघान नृपात्मजः ॥ ४ ॥ पुलस्त्य उवाच ॥ पुरा तपस्तप्यति गालवर्षौ महाश्रमे स्वे सततं निविष्टे ॥ पातालकेतुस्तपसोऽस्य विघ्नं करोति मौढ्यात्ससमाधिभङ्गम् ॥ ५ ॥ न चेष्यतेऽसौ तपसो व्ययं हि शक्नोति कर्तुं त्वथ भस्मसात्तम्॥ आकाशमीक्ष्याथ स दीर्घमुष्णं मुमोच निःश्वासमनुत्तमं हि ॥६॥ ततोऽम्बराद्वाजिवरः पपात बभूव वाणी त्वशरीरिणी च ॥ असौ तुरङ्गो बलवान्क्रमेत त्वह्ना सहस्राणि तु योजनानाम् ॥ ७ ॥ स तं प्रगृह्याश्ववरं तुरङ्गमृतध्वजं योज्य तदाऽऽत्तशस्त्रम् ॥ स्थितस्तपस्येव ततो महर्षिर्दैत्यं समभ्येत्य नृपो बिभेद ॥८॥ नारद उवाच॥ केनाम्बरतलाद्वाजी निसृष्टो वद सुव्रत ॥ वाक्कस्यादेहिनी जाता परं कौतूहलं मम ॥९॥ पुलस्त्य उवाच ॥ विश्वावसुर्नाम महेन्द्रगायनो गन्धर्वराजो बलवान्यशस्वी ॥ निसृष्टवान्सूनुवरं [illegible] ॥ १० ॥ नारद उवाच ॥ कोऽसौ

महेन्द्रगायनो गन्धर्वराजो बलवान्यशस्वी ॥ निसृष्टवान्भूवलयं तुरङ्गमृतध्वजस्यैव सुतार्थमाशु ॥ १० ॥ नारद उवाच ॥ कोऽसौ

गन्धर्वराजस्य येन प्रेषीन्महाजवम् ॥ राज्ञः कुवलयाश्वस्य कोऽर्थो नृपसुतस्य च ॥ ११ ॥ पुलस्त्य उवाच ॥ विश्वावसोः शील
गुणोपपन्ना आसीत्पुरन्ध्री सुभगा त्रिलोके ॥ लावण्यराशिः शशिकान्तितुल्या मदालसा नाम मदालसेव ॥१२॥ तां नन्दनो देव
रिपुस्तरस्वी संक्रीडन्तीं रूपवतीं ददर्श ॥ पातलकेतुस्तु जहार तन्वीं तस्यार्थतः सोऽश्ववरः प्रदत्तः ॥ १३ ॥ हत्वाऽरिदैत्यं
नृपतेस्तनूजो लब्ध्वा वरोरूमपि वस्थितोऽभूत् ॥ दृष्टो यथा देवपतिर्महेन्द्रः शच्या तथा राजसुतो मृगाक्ष्या ॥ १४ ॥ नारद
उवाच ॥ एवं निरस्ते महिषे तारके च महासुरे॥ हिरण्याक्षसुतो धीमान्किमाचेष्टत वै पुनः ॥१५॥ पुलस्त्य उवाच ॥ तारकं निहतं
दृष्ट्वा महिषं च रणेऽन्धकः ॥ कोपं चक्रे सुदुर्बुद्धिर्दैत्यानां देवसैन्यहा ॥१६॥ ततः स्वल्पपरीवारः प्रगृह्य परिघं करे ॥ निर्जगामाथ
पातालाद्विचचार च मेदिनीम् ॥ १७ ॥ ततो विचरता तेन मन्दरे चारुकन्दरे ॥ दृष्टा गौरी च गिरिजा सखीमध्यस्थिता
शुभा ॥ १८ ॥ ततोऽभूत्कामबाणार्त्तः सहसैवान्धकासुरः ॥ तां दृष्ट्वा चारुसर्वाङ्गीं गिरिराजसुतां वने ॥ १९ ॥ अथोवाचासुरो
मूढो वचनं मन्मथान्धकः ॥ कस्येयं चारुसर्वाङ्गी वने चरति सुन्दरी ॥ २० ॥ इयं यदि भवेन्नैव ममान्तःपुरवासिनी ॥ तन्म
दीयेन जीवेन क्रियते निष्फलेन किम् ॥ २१ ॥ यदस्यास्तनुमध्याया न परिष्वङ्गवानहम् ॥ अतो धिङ् मम रूपेण किं स्थिरेण

१ कुवलयाश्वः ऋतध्वजः एवम्, उक्ताश्वलाभादेतन्नाम्नाऽऽख्यातोऽभवत् ।     २ यद्यपि "दाराः स्यात्तु कुटुम्बिनी । पुरन्ध्री" इत्यमरेण कृतपाणिग्रहाया एव पुरन्ध्रीपदवाच्यता
लभ्यते । तथापीह दारभावयोग्यावस्थाविशिष्टस्त्रीसामान्यवाचितामाश्रित्य कन्यापरत्वेन व्याख्येयः ॥ अत एव राज्ञः अस्याः पाणिग्रहाभिधानमग्रे संगच्छति ॥

मया योजयितुं निर्दिष्टं स्यात्।

प्रयोजनम् ॥ २२ ॥ स मे बन्धुः स सचिवः स भ्राता साम्परायिकः ॥ यो माससितकेशीं तां योजयेन्मृगलोचनाम् ॥ २३ ॥ इत्थं वदति दैत्येन्द्रे प्रह्लादो बुद्धिसागरः ॥ पिधाय कर्णौ हस्ताभ्यां शिरःकम्पं वचोऽब्रवीत् ॥ २४ ॥ मा मैवं वद दैत्येन्द्र जगतो जननी त्वियम् ॥ लोकनाथस्य भार्येयं शंकरस्य त्रिशूलिनः ॥ २५ ॥ मा कुरुष्व सुदुर्बुद्धिं सद्यः कुलविनाशिनीम् ॥ भवतः परदारेयं मा निमज्ज रसातले ॥ २६ ॥ सत्सु कुत्सितमेवं हि असत्स्वपि हि कुत्सितम् ॥ शत्रवस्ते प्रकुर्वन्तु परदारावगाहनम् ॥ २७ ॥ किं न श्रुतो दैत्यनाथेह किं नु गीतः श्लोको गाधिना पार्थिवेन ॥ दृष्ट्वा सैन्यं विप्रयातं प्रसक्तं पथ्यं तथ्यं सर्वलोके हितं च ॥ २८ ॥ वरं प्राणास्त्याज्या न बत परहिंसा त्वभिमता वरं मौनं कार्यं न च वचनमुक्तं यदनृतम् ॥ वरं क्लीबैर्भाव्यं न च परकलत्राभिगमनं वरं भिक्षार्थित्वं न च परधनानां हि हरणम् ॥ २९ ॥ स प्रह्लादवचः श्रुत्वा क्रोधान्धो मदनातुरः ॥ इयं सा शत्रुजननीत्येवमुक्त्वा प्रदुद्रुवे ॥ ३० ॥ ततोऽन्वधावन्दैतेया यन्त्रमुक्ता इवोपलाः ॥ तानद्रावीद्बलान्नन्दी चक्रोद्यतकरोऽव्ययः ॥ ३१ ॥ मयतारधुरोगास्ते वारिता द्रावितास्तथा ॥ कुलिशेनाहतास्तूर्णं जग्मुर्भीता दिशो दश ॥ ३२ ॥ तानार्दितान्रणे दृष्ट्वा नन्दिनाऽन्धकदानवः ॥ परिघेण समाहत्य पातयामास नन्दिनम् ॥ ३३ ॥ शैलेयं पतितं दृष्ट्वा धावमानं तथाऽन्धकम् ॥ शतरूपाऽभवद्गौरी भयात्तस्य दुरात्मनः ॥ ३४ ॥ ततः स देवीगणमध्यसंस्थितः परिभ्रमन्भाति महासुरेन्द्रः ॥ यथा वने मत्तकरी परिभ्रमन्करेणुमध्ये मदलोलदृष्टिः ॥ ३५ ॥ न परिज्ञातवांस्तत्र कां तु गिरिकन्यकाम् ॥ नाश्चर्यं न पश्यन्ति चत्वारोऽमी





सदैव हि ॥ ३६ ॥ न पश्यतीह जात्यन्धो रागान्धोऽपि न पश्यति ॥ न पश्यति मदोन्मत्तो लोभाक्रान्तो न पश्यति ॥ ... ततो देव्या स दुरात्मा शतावर्यां ...

परिभ्रमन्करेणुमध्ये मदलालिहाष्टिः ॥ २५ ॥ न परिज्ञातवांस्तत्र कां तु सा गिरिकन्यका ॥ नेत्राश्रय न पश्यन्ति चत्वारोऽमी

सदैव हि ॥ २६ ॥ न पश्यतीह जात्यन्धो रागान्धोऽपि न पश्यति ॥ न पश्यति मदोन्मत्तो लोभाक्रान्तो न पश्यति ॥ सोऽपश्यन्
मानो गिरिजां पश्यन्नपि तदाऽन्धकः ॥ २७ ॥ प्रधावन्नाददत्तासां युवत्य इति चिन्तयन् ॥ ततो देव्या स दुष्टात्मा शतावर्या
निराकृतः ॥ ३८ ॥ कुट्टितः प्रवरैः शस्त्रैर्निपपात महीतले ॥ वीक्ष्यान्धकं निपतितं शतरूपा विभावरी ॥ ३९ ॥ तस्मात्स्थानाद
पाक्रम्य गताऽन्तर्धानमम्बिका ॥ पतितं चान्धकं दृष्ट्वा दैत्यदानवयूथपाः ॥ ४० ॥ कुर्वन्तः सुमहाशब्दं प्राद्रवन्त रणार्थिनः ॥
तेषामापततां शब्दं श्रुत्वा तस्थौ गणेश्वरः ॥ ४१ ॥ आदाय वज्रं बलवान्मघवानिव कोपितः ॥ दानवान्समयान्वीक्ष्य पराजित्य
गणेश्वरः ॥ ४२ ॥ समभ्येत्याम्बिकां दृष्ट्वा ववन्दे चरणौ शुभौ ॥ देवी च ता निजा मूर्तीस्त्वाह गच्छध्वमिच्छया ॥ ४३ ॥
विहरध्वं महीपृष्ठे पूज्यमाना नरैरिह ॥ वसतिर्भवतीनां च उद्यानेषु वनेषु च ॥ ४४ ॥ वनस्पतिषु वृक्षेषु गच्छध्वं विगत
ज्वराः ॥ तास्त्वेवमुक्ताः शैलेय्या प्रणिपत्याम्बिकां क्रमात् ॥ ४५ ॥ दिक्षु सर्वासु जग्मुस्ताः स्तूयमानाश्च किन्नरैः ॥ अन्ध
कोऽपि स्मृतिं लब्ध्वा अपश्यन्नद्रिनन्दिनीम् ॥ स्वबलं निर्जितं दृष्ट्वा ततः पातालमाद्रवत् ॥ ४६ ॥ ततो दुरा
त्मा स तदाऽन्धको मुने पातालमभ्येत्य दिवा न भुङ्क्ते ॥ रात्रौ न शेते मदनेषु ताडितो गौरीं स्मरन्कामबलाभिपन्नः ॥ ४७ ॥ इति
श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे नवपञ्चाशत्तमोऽध्यायः ॥ ५९ ॥ नारद उवाच ॥ क्व गतः शंकरो ह्यासीद्येनाम्बा
नन्दिना सह ॥ अन्धकं योधयामास एतन्मे वक्तुमर्हसि ॥ १ ॥ पुलस्त्य उवाच ॥ यदा वर्षसहस्रं तु महामोहे स्थितो भवः ॥ तदा

प्रभृति निस्तेजा हीनवीर्यः प्रदृश्यते ॥२॥ स्वमात्मानं निरीक्ष्याथ निस्तेजोंऽशं महेश्वरः ॥ तपोऽर्थाय तदा चक्रे मतिं मतिमतां वरः ॥ ३ ॥ स महाव्रतमुत्पाद्य समाश्वास्याम्बिकां विभुः ॥ शैलादिं स्थाप्य गोप्तारं विचचार महीतले ॥ ४ ॥ महामुद्रार्पितग्रीवो महाहिकृतकुण्डलः ॥ धारयंश्च कटीदेशे महाशङ्खस्य मेखलाम् ॥ ५ ॥ कपालं दक्षिणे हस्ते सव्ये गृह्य कमण्डलुम् ॥ एकाहवासी वृक्षाद्रिशैलसानुनदीषु च ॥ ६ ॥ स्थानं त्रैलोक्यमास्थाय मूलाहारोऽम्बुभोजनः ॥ वाय्वाहारस्तथा तस्थौ नववर्षशतं क्रमात् ॥ ७ ॥ ततो वीटां मुखे क्षिप्य निरुच्छ्वासो भवेद्यदि ॥ विस्तृते हिमवत्पृष्ठे रम्ये समशिलातले ॥ ८ ॥ ततो वीटां विदार्यैव कपालं परमेष्ठिनः ॥ साऽर्चिष्मती जटामध्यान्निक्षिप्ता धरणीतले ॥ ९ ॥ वीटया तु पतन्त्याऽद्रिर्दारितः क्ष्मासमोऽभवत् ॥ यावत्तीर्थवरः पुण्यः केदार इति विश्रुतः ॥ १० ॥ ततो हरो वरं प्रादात्केदारे वृषभध्वजः ॥ पुण्यवृद्धिकरं ब्रह्मन्पापघ्नं मोक्षसाधनम् ॥ ११ ॥ ये जलं तावके तीर्थे पीत्वा संयमिनो नराः ॥ मधुमांसनिवृत्तास्तु ब्रह्मचारिव्रते स्थिताः ॥ १२ ॥ षण्मासाद्धारयिष्यन्ति निवृत्ताः परपाकतः ॥ तेषां हृत्पङ्कजेष्वेव तल्लिङ्गं भविता ध्रुवम् ॥ १३ ॥ न चास्य पापेषु रतिर्भविष्यति कदाचन ॥ पितॄणामक्षयं श्राद्धं भविष्यति न संशयः ॥ १४ ॥ स्नानदानतपांसीह होमजप्यादिकाः क्रियाः ॥ भविष्यन्त्यक्षया नॄणां मृतानामपुनर्भवः ॥ १५ ॥ एतद्वरं हरात्तीर्थं प्राप्य मुष्णन्ति देवताः ॥ पुनाति पुंसां केदारस्त्रिणेत्रवचनं यथा ॥ १६ ॥ केदाराय वरं दत्त्वा जगाम त्वरितो हरः ॥ स्नातुं भानुसुतां देवीं कालिन्दीं पापनाशिनीम् ॥ १७ ॥ अवतीर्य ततः स्नातुं निमग्नश्च महा

य वरं दत्त्वा जगाम त्वरितो हरः ॥ स्नातुं भानुसुतां देवीं कालिन्दीं पापनाशिनीम् ॥ १७ ॥ अवतीर्य ततः स्नातुं निमग्नश्च महा-
म्भसि ॥ द्रुपदां नाम गायत्रीं जजापान्तर्जले हरः ॥ १८ ॥ निमग्ने शंकरे देव्यां सरस्वत्यां कलिप्रिय ॥ ... तस्मिन्काले
न चोन्मज्जत्तदेश्वरः ॥१९॥ एतस्मिन्नन्तरे ब्रह्मा भुवनान्यर्णवास्तथा ॥ चेलुः पेतुर्धरण्यां च नक्षत्रं तारकैः सह॥२०॥आसनेभ्यः
प्रचलिता देवाः शक्रपुरोगमाः ॥ स्वस्त्यस्तु लोकेभ्य इति जपन्तः परमर्षयः ॥२१॥ क्षुब्धाश्च देवा लोकेषु ब्रह्माणं प्रष्टुमागताः॥
दृष्ट्वोचुः किमिदं लोकाः क्षुब्धाः संशयमागताः ॥२२॥ तानाह पद्मसंभूतो न तद्वेद्मि च कारणम् ॥ तदागच्छत वो युक्तं प्रष्टुं चक्र-
गदाधरम् ॥२३॥ पितामहेनैवमुक्ता देवाः शक्रपुरोगमाः ॥ पितामहं पुरस्कृत्य मुरारिसदनं गताः॥२४॥ नारद उवाच ॥ कोऽसौ
मुरारिर्देवर्षे देवो यक्षो नु किंनरः ॥ दैत्यो वा राक्षसो वाऽपि पार्थिवो वा तदुच्यताम् ॥२५॥ पुलस्त्य उवाच॥योऽसौ रजःसत्त्व-
मयो गुणवांश्च तमोमयः ॥ निर्गुणः सर्वगो व्यापी मुरारिर्मधुसूदनः ॥२६॥ नारद उवाच ॥ योऽसौ मुर इति ख्यातः कस्य पुत्रः
स गीयते ॥ कथं च निहतः संख्ये विष्णुना तद्वदस्व मे ॥ २७ ॥ पुलस्त्य उवाच ॥ श्रूयतां कथयिष्यामि मुरासुरनिबर्हणम् ॥
विचित्रमिदमाख्यानं पुण्यदं पापनाशनम् ॥ २८ ॥ कश्यपस्यौरसः पुत्रो मुरो नाम दनूद्भवः ॥ स ददर्श रणे भग्नान्दितिपुत्रा-
न्सुरोत्तमैः ॥ २९ ॥ ततः स मरणाद्भीतस्तप्त्वा वर्षगणान्बहून् ॥ आराधयामास विभुं ब्रह्माणमपराजितम् ॥ ३० ॥ ततोऽस्य तुष्टो
वरदः प्राह वत्स वरं वृणु ॥ स च वव्रे वरं दैत्यो वरमेवं पितामहात् ॥ ३१ ॥ यं यं करतलेनाहं स्पृशेयं समरे विभो ॥ स स
मद्धस्तसंस्पृष्टस्त्वमरोऽपि म्रियेद्ध्रुवम् ॥ ३२ ॥ बाढमित्याह भगवान्ब्रह्मा लोकपितामहः ॥ ततोऽभ्यागान्महातेजा मुरः सुरगिरिं

बली ॥ ३३ ॥ समेत्याह्वयते देवं यक्षं किन्नरमेव वा ॥ न कश्चिद्युयुधे तेन समं दैत्येन नारद ॥ ३४ ॥ ततोऽमरावतीं क्रुद्धः स गत्वा शक्रमाह्वयत् ॥ नानेन सह योद्धुं वै मतिं चक्रे पुरंदरः ॥ ३५ ॥ ततः स करमुद्यम्य प्रविवेशामरावतीम् ॥ प्रविशन्तं न तं कश्चिन्निवारयितुमुत्सहेत् ॥ ३६ ॥ स गत्वा शक्रसदनं प्रोवाचेन्द्रं सुरस्तदा ॥ देहि युद्धं सहस्राक्ष नोचेत्स्वर्गं परित्यज ॥३७॥ इत्येवमुक्तो दैत्येन ब्रह्मन्हरिहयस्तदा ॥ स्वर्गराज्यं परित्यज्य भूचरः समजायत ॥३८॥ ततो गजेन्द्रकुलिशौ हृतौ शक्रस्य शत्रुणा ॥ सकलत्रो महातेजा देवैः सह सुतेन च ॥ ३९ ॥ कालिन्द्या दक्षिणे कूले निविवेश पुरं हरिः ॥ सुरश्चापि महाभोगान्बुभुजे स्वर्गसंस्थितः ॥ ४० ॥ दानवाश्चापरे रौद्रा मयतारपुरोगमाः ॥ सुरमासाद्य मोदन्ते स्वर्गे सुकृतिनो यथा ॥ ४१ ॥ स कदाचिन्महीपृष्ठं समायातो महासुरः ॥ एकाकी कुञ्जरारूढः सरयूं निम्नगां प्रति ॥ ४२ ॥ स सरय्वास्तटे वीरं राजानं सूर्यवंशजम् ॥ ददृशे रघुनामानं दीक्षितं यज्ञकर्मणि ॥ ४३ ॥ तमुपेत्याब्रवीद्दैत्यो युद्धं मे दीयतामिति ॥ नोचेन्निवर्ततां यज्ञो नेष्टव्या देवतास्त्वया॥४४॥ तमुपेत्य महातेजा मित्रावरुणसंभवः ॥ प्रोवाच बुद्धिमान्ब्रह्मन्वसिष्ठस्तपतां वरः ॥ ४५ ॥ किं ते जितैर्नरैर्दैत्य अजिताननुशासय॥ प्रहर्तुमिच्छसि यदि तं निवारय चान्तकम् ॥ ४६ ॥ स बली शासनं ते वै न करोति महासुर ॥ तस्मिञ्जिते हि विजितं सर्वमन्यच्च भूतलम् ॥ ४७ ॥ स तद्वसिष्ठवचनं निशम्य दनुपुंगवः ॥ जगाम धर्मराजानं विजेतुं दण्डपाणिनम् ॥ ४८ ॥ तमायान्तं यमः श्रुत्वा मत्वाऽवध्यं च संयुगे ॥ स समारुह्य महिषं [illegible] ॥ ४९ ॥ [illegible] प्रोवाच सुरचेष्टितम् ॥

श्रुत्वा मत्वाऽवध्यं च संयुगे ॥ स समारुह्य माहिषं केशवान्तिकमागमत् ॥ ४९ ॥ समेत्य चाभिवाद्येन प्रोवाच मुरश्चाष्टतम् ॥

स चाह गच्छ मामद्य प्रेषयस्व महासुरम् ॥ ५० ॥ स वासुदेववचनं श्रुत्वा च स्वस्थाऽभवत् ॥ [illegible]
मुरः ॥ ५१ ॥ तमागतं यमः प्राह किं मुरे कर्तुमिच्छसि ॥ वदस्व वचनं कर्त्ता त्वदीयं दानवेश्वर ॥ ५२ ॥ मुर उवाच ॥ यम
प्रजासंयमनान्निवृत्तिं कर्त्तुमर्हसि ॥ नोचेत्तवाद्य च्छित्त्वाऽहं मूर्धानं पातये भुवि ॥ ५३ ॥ तमाह धर्मराड् वाक्यं यदि संयमसे
महान् ॥ मुरो नित्यं गोपिताऽस्ति करिष्ये वचनं तव ॥ ५४ ॥ मुरस्तमाह भवतः कोऽधिकस्तं वदस्व मे ॥ अहमेनं पराजित्य वार
यामि न संशयः ॥ ५५ ॥ यमस्तं प्राह मे विष्णुर्देवश्चक्रगदाधरः ॥ श्वेतद्वीपनिवासी यः स मां संयमतेऽव्ययः ॥ ५६ ॥ तमाह
दैत्यशार्दूलः क्वासौ वसति कीर्तय ॥ स्वयं तत्र गमिष्यामि तस्य संयमनोद्यतः ॥ ५७ ॥ तमुवाच यमो गच्छ क्षीरोदं नाम सागरम् ॥ तत्रास्ते भगवान्विष्णुर्लोकनाथो जगन्मयः ॥ ५८ ॥ मुरस्तद्वाक्यमाकर्ण्य प्राह गच्छामि केशवम् ॥ किंतु त्वया न तावद्धि
संयम्या धर्म मानवाः ॥ ५९ ॥ स प्राह गच्छ त्वत्तो वा प्रवर्त्तिष्ये जयं प्रति ॥ संयन्तुं वा यथा वाऽपि ततो युक्तं समाचरे
॥ ६० ॥ इत्येवमुक्त्वा वचनं दुग्धाब्धिमगमन्मुरः ॥ यत्रास्ते शेषपर्यङ्के चतुर्मूर्तिर्जनार्दनः ॥ ६१ ॥ नारद उवाच ॥ चतुर्मूर्त्तिः
कथं विष्णुरेक एव निगद्यते ॥ सर्वगत्वात्कथमपि अव्यक्तत्वाच्च तद्वद ॥ ६२ ॥ पुलस्त्य उवाच ॥ अव्यक्तः सर्वगोऽपीह एक
एव महामुने ॥ चतुर्मूर्तिर्जगन्नाथो यथा ब्रह्मंस्तथा शृणु ॥ ६३ ॥ अप्रतर्क्यमनिर्देश्यं शुक्लं शान्तं परं पदम् ॥ वासुदेवाख्यम
व्यक्तं स्मृतं द्वादशपत्रकम् ॥ ६४ ॥ नारद उवाच ॥ कथं शुक्लं कथं शान्तमप्रतर्क्यमनिन्दितम् ॥ कान्यस्य द्वादशोक्तानि

पत्रकाणि महामुने ॥ ६५ ॥ पुलस्त्य उवाच ॥ शृणुष्व वचनं गुह्यं परमेष्ठिप्रभाषितम् ॥ श्रुतं सनत्कुमारेण तेनाख्यातं च यन्मम ॥ ६६ ॥ नारद उवाच ॥ कोऽयं सनत्कुमारेति यथोक्तं ब्रह्मणः स्वयम् ॥ तवापि तेन गदितं वद मामनुपूर्वशः ॥ ६७ ॥ पुलस्त्य उवाच ॥ धर्मस्य भार्याऽहिंसाख्या तस्यां पुत्रचतुष्टयम् ॥ संजातं मुनिशार्दूल योगशास्त्रविचारकम् ॥ ६८ ॥ ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ॥ तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥ ६९ ॥ सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ॥ दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥ ७० ॥ ततस्तस्यासनं दद्याज्ज्यायानपि कनीयसे ॥ मौनं गुह्यं महायोगं कपिलादीनुवाच सः ॥ ७१ ॥ सनत्कुमारश्चाभ्येत्य ब्रह्माणं कमलोद्भवम् ॥ अपृच्छद्योगविज्ञानं तमुवाच प्रजापतिः ॥ ७२ ॥ ब्रह्मोवाच ॥ कथयिष्यामि ते साध्य यदि पुत्रेति मे वचः ॥ शृणोषि कुरुषे तच्च ज्ञानं सांख्ययुतो भवान् ॥ ७३ ॥ सनत्कुमार उवाच ॥ पुत्र एवास्मि देवेश यतः शिष्योऽस्म्यहं विभो ॥ न विशेषोऽस्ति पुत्रस्य शिष्यस्य च पितामह ॥ ७४ ॥ ब्रह्मोवाच ॥ विशेषः शिष्यपुत्राभ्यां विद्यते धर्मनन्दन ॥ धर्मकर्मसमायोगे तथापि गदतः शृणु ॥ ७५ ॥ पुन्नाम्नो नरकात्त्राति पुत्रस्तेनेह गीयते ॥ शेषः पापहरः शिष्य इतीयं वैदिकी श्रुतिः ॥७६॥ सनत्कुमार उवाच ॥ कोऽयं पुन्नामको देव यस्मात्त्राति च पुत्रकः ॥ तस्माच्छेषं तथा पापं हरेच्छिष्यश्च तद्वद ॥७७॥ ब्रह्मोवाच ॥ एतत्पुराणं परमं महर्षे योगाङ्गयुक्तं च तथा सदैव ॥ तथैव चोग्रं भयहारि पुण्यं वदामि ते शाम्यति येन पापम् ॥ ७८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारद

युक्तं च तथा सदैव ॥ तथैव चोग्रं भयहारि पुण्यं वदामि ते शाम्यति येन पापम् ॥ ७८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारद

संवादे भैरवप्रादुर्भावे षष्टितमोऽध्यायः ॥ ६० ॥ ब्रह्मोवाच ॥ परदाराभिगमनं पापिनामुपसेवनम् ॥ पारुष्यं सर्वभूतानां प्रथमं नरकं मतम् ॥१॥ फलस्तेयं महापापं फलहीनं तथाऽटनम् ॥ छेदनं वृक्षजातीनां द्वितीयं नरकं स्मृतम् ॥२॥ वर्ज्यादानं तथा दुष्टमवध्यवधबन्धनम् ॥ विवाहोऽबान्धवैः सार्धं तृतीयं नरकं मतम् ॥३॥ भयदं सर्वसत्त्वानां भवभूतिविनाशनम् ॥ भ्रंशनं निजधर्माणां चतुर्थं नरकं स्मृतम् ॥४॥ मारणं मित्रकौटिल्यं मिथ्याभिशंसनं च यत् ॥ मिष्टैकाशनमित्युक्तं पञ्चमं तु नृयातनम् ॥५॥ यात्राफलादिहरणं यमनं योगनाशनम् ॥ यानयुग्मस्य हरणं षष्ठमुक्तं नृयातनम् ॥६॥ राजभागहरं मूढं राजजायानिषेवणम् ॥ राज्ञामहितकर्त्तृत्वं सप्तमं नरकं स्मृतम् ॥७॥ लुब्धत्वं लोलुपत्वं च लब्धधर्मार्थनाशनम् ॥ लालासंकीर्णमेवोक्तमष्टमं नरकं स्मृतम् ॥८॥ विप्रोक्तं ब्रह्महरणं ब्राह्मणानां विनिन्दनम् ॥ विरोधं बन्धुभिश्चोक्तं नवमं नरयातनम् ॥९॥ शिष्टाचारविनाशं च शिष्टद्वेषं शिशोर्वधम् ॥ शास्त्रस्तेयं धर्मस्तेयं दशमं परिकीर्तितम् ॥१०॥ षडङ्गनिधनं घोरं षाड्गुण्यप्रतिषेधनम् ॥ एकादशं तथैवोक्तं नरकं सद्भिरुत्तमम् ॥ ११ ॥ सत्सु निन्दा सदाचौरमनाचारमसत्क्रिया ॥ संस्कारपरिहीनत्वमिदं द्वादशमुच्यते ॥१२॥ हानिर्धर्मार्थकामानामपवर्गस्य हारणम् ॥ संवेदः संविदामेतत्त्रयोदशमुच्यते ॥१३॥ क्षपणं धर्महीनं च यद्वर्ज्यं यच्च वह्निदम् ॥ चतुर्दशं तथैवोक्तं नरकं तद्विगर्हितम् ॥ १४ ॥ अज्ञानं चाप्यसूयत्वमशौचमशुभावहम् ॥ स्मृतं तत्पञ्चदशकमसत्यवचनानि ह ॥ १५ ॥ आलस्यं वै षोडशकं सक्रोधं च विशेषतः ॥ सर्वस्य चाततायित्वमावासेष्वग्निदीपनम् ॥ १६ ॥ इच्छा च परदारेषु नरकाय निगद्यते ॥ ईर्ष्याभा

वश्च शास्त्रेषु उद्धतत्वं विगर्हितम् ॥ १७ ॥ एतैस्तु पापैः पुरुषः पुन्नामाद्यैर्न संशयः ॥ संयुक्तः प्रीणयेद्देवं सन्तत्या जगतः पतिम् ॥ १८ ॥ प्रीतः सृष्ट्या तु शुभया समध्यास्ते तमच्युतम् ॥ पुंनाम नरकं घोरं विनाशयति सर्वतः ॥ १९ ॥ एतस्मात्कारणात्साध्य ततः पुत्रेति गद्यते ॥ अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ॥ २० ॥ देयं देवर्षिभूतानां मनुजानां पितॄनथ ॥ लिप्सा परधनेष्वेव सर्ववर्णेषु चैकता ॥ २१ ॥ ओंकारादपि निर्वृत्तिः पापकारी स्मृतश्च सः ॥ गुरोर्वादो महापापमगम्यागमनं तथा ॥२२॥ घृतादिविक्रयो घोरश्चण्डालादिपरिग्रहः ॥ स्वदोषच्छादनं पापं परदोषप्रकाशनम् ॥ २३ ॥ मत्सरित्वं वाग्दुष्टत्वं निष्ठुरत्वं तथाऽपरे ॥ टोकित्वं तालवादित्वं नाम्ना वाचाऽप्यधर्मजम् ॥२४॥ दारुणत्वमधर्मित्वं नरकावहमुच्यते ॥ एतैश्च पापैः संयुक्तः प्रीणयेद्यदि शंकरम् ॥ २५ ॥ ज्ञानाधिकमशेषेण शेषं पापं जयेत्ततः ॥ शारीरं वाचिकं यच्च मानसं साधिकं च यत् ॥ २६ ॥ पितृमातृकृतं यच्च कृतं यच्चाश्रितैर्नरैः ॥ भ्रातृभिर्बान्धवैश्चापि तस्मिञ्जन्मनि धर्मज ॥ २७ ॥ तत्सर्वं विलयं याति स धर्मः सुतशिष्ययोः ॥ विपरीते भवेत्साध्य विपरीतः पदक्रमः ॥ २८ ॥ तस्माच्च पुत्रशिष्यौ हि विधातव्यौ विपश्चिता ॥ एतदर्थमभिध्यायेच्छिष्याच्छ्रेष्ठतरः सुतः ॥ शेषांस्तारयते शिष्यः सर्वतोऽपि हि पुत्रकः ॥ २९ ॥ पुलस्त्य उवाच ॥ पितामहवचः श्रुत्वा साध्यः प्राह तपोधनः ॥ त्रिसत्यं तव पुत्रोऽहं देव योगं वदस्व मे ॥ ३० ॥ तमुवाच महायोगी त्वन्मातापितरौ यदि ॥ दास्यते च ततो योगं दायादो ह्यसिपुत्रक ॥ ३१ ॥ सनत्कुमारः प्रोवाच दायादपरिकल्पना ॥ येयं हि भवता प्रोक्ता तां

दास्यते च ततो योगं दायादो ह्यसिपुत्रक ॥ २१ ॥ सनत्कुमारः प्रोवाच दायादपरिकल्पना ॥ येयं हि भवता प्रोक्ता तां मे त्वं ख्यातुमर्हसि ॥ २२ ॥ तदुक्तं साध्यमुख्येन वाक्यं श्रुत्वा पितामहः ॥ प्राह प्रहस्य भगवाञ्छृणु वत्सेति नारद ॥ २३ ॥ औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ॥ गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवास्तु षट् ॥ २४ ॥ अमीषु षट्सु पुत्रेषु ऋणपिण्डधनक्रियाः ॥ गोत्रसाम्यं कुले वृत्तिः प्रतिष्ठा शाश्वती तथा ॥ २५ ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ॥ स्वयंदत्तः पारशवः षट् पुत्रास्तु प्रकीर्तिताः ॥ २६ ॥ अमीषामृणपिण्डादिकथा नैवेह विद्यते ॥ नामधारक एवेह गोत्रे च कुलसंमतः ॥ २७ ॥ तत्तस्य वचनं श्रुत्वा ब्रह्मणः सनकाग्रजः ॥ उवाचैनं विशेषं हि ब्रह्मन्मे ख्यातुमर्हसि ॥ २८ ॥ ततोऽब्रवीत्सुरपतिर्विशेषं शृणु पुत्रक ॥ औरसो यः स्वयं जातः प्रतिबिम्बमिवात्मनः ॥ २९ ॥ क्लीबोन्मत्ते व्यसनिनि पत्यौ तस्या ज्ञया तु यः ॥ भार्या ह्यनातुरा पुत्रं जनयेत्क्षेत्रजस्तु सः ॥४०॥ मातापितृभ्यां यो दत्तः स दत्तः परिगीयते ॥ मित्रपुत्रं मित्रदत्तं कृत्रिमं प्राहुरुत्तमाः ॥ ४१ ॥ न ज्ञायते गृहे केन जातस्त्विति स गूढकः ॥ बाह्यतः स्वयमानीतः सोऽपविद्धः प्रकीर्तितः ॥४२॥ कन्याजातस्तु कानीनः सगर्भोढः सहोढजः ॥ मूल्यैर्गृहीतः क्रीतः स्याद्द्विविधः स्यात्पुनर्भवः ॥ ४३ ॥ दत्ताऽप्येकस्य या कन्या भूयोऽन्यस्य प्रदीयते ॥ तज्जातस्तनयो ज्ञेयो लोके पौनर्भवः स्मृतः ॥ ४४ ॥ दुर्भिक्षे व्यसने चापि येनात्मा विनिवेदितः ॥ स स्वयं दत्त इत्युक्तस्तथाऽन्यः कारणान्तरैः ॥ ४५ ॥ ब्राह्मणस्य सुतः शूद्रयां जायते यस्तु सुव्रत ॥ ऊढायां चाप्यनूढायां स पारशव उच्यते ॥४६॥ एतस्मात्कारणात्पुत्र न स्वयं दातुमर्हसि ॥ स्वमात्मानं गच्छ शीघ्रं पितरौ समुपाह्वय ॥४७॥ ततः स माता

पितरौ सस्मार वचनाद्विभोः॥तावाजग्मतुरीशानं द्रष्टुं वै दम्पती मुने॥४८॥प्रणिपत्य तु ब्रह्माणमादेशो देव दीयताम् ॥उपविष्टौ सुखासीनौ साध्यो वचनमब्रवीत्॥४९॥सनत्कुमार उवाच॥योगं जिगमिषुस्तात ब्रह्माणं समचूचुदम्॥मामुक्तवांस्तु पुत्रार्थे तस्मात्त्वं दातुमर्हसि ॥५०॥ तावेवमुक्तौ पुत्रेण योगाचार्यं पितामहम् ॥ उक्तवन्तौ प्रभोऽयं हि आवयोस्तनयोऽस्ति च॥५१॥ अद्यप्रभृत्ययं पुत्रस्तव ब्रह्मन्भविष्यति॥ इत्युक्त्वा जग्मतुः स्वर्गं येनैवाभ्यागतौ यथा॥५२॥पितामहोऽपि तं पुत्रं साध्यं च विनयान्वितम्॥सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम्॥५३॥ शिखासंस्थस्तु ओंकारो मेषोऽस्य शिरसि स्थितः॥पत्रं वैशाखमासे हि प्रथमं परिकीर्तितम्॥५४॥ नकारो मुखसंस्थोऽपि वृषस्तत्र प्रकीर्तितः ॥ ज्येष्ठमासश्च तत्पत्रं द्वितीयं परिकीर्तितम् ॥५५॥ मोकारो भुजयोर्युग्मं मिथुनस्तत्र संस्थितः ॥ आषाढ इति विख्यातस्तृतीयं पत्रकं स्मृतम् ॥ ५६ ॥ भकारं नेत्रयुगलं तत्र कर्कटकः स्थितः ॥ मासः श्रावण इत्युक्तश्चतुर्थं पत्रकं स्मृतम् ॥५७॥ गकारं हृदयं प्रोक्तं सिंहो वसति तत्र च ॥ मासो भाद्रपदः प्रोक्तः पञ्चमं परिगीयते ॥ ५८ ॥ वकारं कवचं विद्यात्कृत्या तत्र प्रतिष्ठिता ॥ मासश्चाश्वयुजि प्रोक्तः षष्ठं तत्पत्रकं स्मृतम् ॥ ५९ ॥ तेकारं मनसि प्रोक्तं तुला तत्र च संस्थिता ॥ मासश्च कार्त्तिको नाम सप्तमं पत्रकं स्मृतम् ॥६०॥ वाकारं नाभिसंयुक्तं स्थितस्तत्र तु वृश्चिकः॥ मासो मार्गशिरा नाम त्वष्टकं पत्रकं मुने ॥ ६१ ॥ सकारं जघनं प्रोक्तं तत्रस्थश्च धनुर्धरः ॥पौषो निगदितो मासो नवमं परिकीर्तितम् ॥ ६२ ॥ देकारश्चाङ्घ्रियुगले तत्रस्थस्तिमिरुच्यते ॥ मासो माघेति विख्यातो दशमं पत्रकं स्मृतम् ॥ ६३ ॥ वाकारो

कीर्तितम् ॥ ६२ ॥ देकारश्चाङ्घ्रियुगले तत्रस्थस्तिमिरुच्यते ॥ मासो माघेति विख्यातो दशमं पत्रकं स्मृतम् ॥ ६३ ॥ वाकारो

जानुयुग्मं च कुम्भस्तत्रादिसंस्थितः ॥ पत्रकं फाल्गुनः प्रोक्तं तदेकादशमुत्तमम् ॥ ६४ ॥ पादौ यकारो मीनोऽपि स चैत्र वसते मुने ॥ इदं तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ॥ ६५ ॥ द्वादशारं तथा चक्रं षण्णाभिद्वियुतं तथा ॥ त्रिव्यूहमेकमूर्तिश्च तथोक्तः परमेश्वरः ॥ ६६ ॥ तत्र चोक्तं तु देवस्य रूपं द्वादशपत्रकम् ॥ यस्मिन्ज्ञाते मुनिश्रेष्ठ न भूयो मरणं लभेत् ॥ ६७ ॥ द्वितीयमुक्तं सत्त्वाद्यं चतुर्वर्णं चतुर्मुखम् ॥ चतुर्बाहुमुदाराङ्गं श्रीवत्सधरमव्ययम् ॥ ६८ ॥ तृतीयस्तामसो नाम शेषमूर्तिः सहस्रधा ॥ सहस्रवदनः श्रीमान्प्रजाप्रलयकारकः ॥ ६९ ॥ चतुर्थो राजसो नाम रक्तवर्णश्चतुर्मुखः ॥ द्विभुजो धारयन्मालां सृष्टिकृत्त्वादिपूरुषः ॥ ७० ॥ अव्यक्तात्संभवन्त्येते त्रयो व्यक्ता महामुने ॥ अतो मरीचिप्रमुखास्तथाऽन्येऽपि सहस्रशः ॥ ७१ ॥ एतत्तवोक्तं मुनिवर्य रूपं विष्णोः पुराणं मतिपुष्टिवर्धनम् ॥ चतुर्भुजं चापि मुरो दुरात्मा कृतान्तवाक्यात्पुनराससाद ॥ ७२ ॥ तमागतं प्राह मुने मधुघ्नः प्राप्तोऽसि केनासुर कारणेन ॥ स प्राह योद्धुं सह वै त्वयाऽद्य तं प्राह भूयोऽसुरपूगहन्ता ॥ ७३ ॥ यदीह मां योद्धुमुपागतोऽसि तत्कम्पते ते हृदयं किमर्थम् ॥ ज्वरातुरस्येव मुहुर्मुहुर्वै तन्नैव योत्स्ये सह कातरेण ॥७४॥ इत्येवमुक्तो मधुसूदनेन मुरस्तदाऽऽस्यद्धृदये स्वहस्तम् ॥ कथं क्व कस्येति मुरस्तदोक्त्वा निपातयामास विपन्नबुद्धिः ॥ ७५ ॥ हरिश्च चक्रं मृदुलाघवेन मुमोच तद्धृत्कमलं च शत्रोः ॥ चिच्छेद देवास्तु गतव्यथाभवन्देवं प्रशंसन्ति च पद्मनाभम् ॥ ७६ ॥ एतत्तवोक्तं मुरदैत्यनाशनं कृतं हि तुष्टया शितचक्रपाणिना ॥ अतः प्रसिद्धं समुपाजगाम

मुरारिरित्येव विभुर्नृसिंहः ॥ ७७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे मुरवधो नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ पुलस्त्य उवाच ॥ ततो मुरारिभुवनं समभ्येत्य सुरास्ततः ॥ ऊचुर्देवं नमस्कृत्य जगत्संक्षोभकारणम् ॥ १ ॥ तच्छ्रुत्वा भगवान्प्राह गच्छामो हरमन्दिरम् ॥ स वेत्स्यति महाज्ञानी जगत्क्षुब्धं चराचरम् ॥ २ ॥ तथोक्ता वासुदेवेन देवाः शक्रपुरोगमाः ॥ जनार्दनं पुरस्कृत्य जग्मुर्मन्दरभूधरम् ॥ न तत्र देवं वृषभं न देवीं च न नन्दिनम् ॥ ३ ॥ शून्यं गिरिमपश्यन्त ह्यज्ञानतिमिरावृताः ॥ तान्मूढदृष्टीन्संप्रेक्ष्य देवो विष्णुर्महाद्युतिः ॥ ४ ॥ प्रोवाच किं न पश्यध्वं महेशं पुरतः स्थितम् ॥ तमूचुर्नैव देवेशं पश्यामो गिरिजापतिम् ॥ ५ ॥ न विद्मः कारणं तच्च येन दृष्टिर्हता हि नः ॥ तानुवाच जगन्मूर्त्तिर्यूयं देवस्य सागसः ॥ ६ ॥ पापिष्ठा गर्भहन्तारो मृडान्याः स्वार्थतत्पराः ॥ तेन ज्ञानं विवेको वा हृतो देवेन शूलिना ॥ ७ ॥ येनाग्रतः स्थितमपि पश्यन्तोऽपि न पश्यथ ॥ तस्मात्कायविशुद्ध्यर्थं देवदृष्ट्यर्थमादरात् ॥ ८ ॥ तप्तकृच्छ्रेण संशुद्धाः कुरुध्वं ज्ञानमीश्वरे ॥ क्षीरस्नानं प्रयुञ्जीत साग्रकुम्भशतं पुरा ॥ ९ ॥ दधिस्नाने चतुःषष्टिर्द्वात्रिंशद्घृविषोऽर्हणे ॥ पञ्चगव्यस्य शुद्धस्य कुम्भाः षोडश कीर्तिताः ॥ १० ॥ मधुनोऽष्टौ जलस्योक्ताः सर्वे ते द्विगुणाः सुराः ॥ ततो रोचनया देवमष्टोत्तरशतेन हि ॥ ११ ॥ अनुलिम्पेत्कुङ्कुमेन चन्दनेन च भक्तितः ॥ बिल्वपत्रैः सकमलैः कर्पूरागरुचन्दनैः ॥ १२ ॥ मन्दारैः पारिजातैश्च अतिमुक्तैस्तथाऽर्चयेत् ॥ अगरुं सहकालेयं चन्दनेनापि धूपयेत् ॥१२॥ जप्तव्यं शतरुद्रीयमृग्वेदोक्तं पदक्रमैः ॥ एवं कृते तु देवेशं पश्यध्वं नेतरेण

...भक्तितः ॥ बिल्वपत्रैः सकमलैः कर्पूरागरुचन्दनैः ॥१२॥ मन्दारैः पारिजातैश्च अतिमुक्तैस्तथाऽर्च
येत् ॥ अगरुं सहकालेयं चन्दनेनापि धूपयेत् ॥१२॥ जप्तव्यं शतरुद्रीयमृग्वेदोक्तं पदक्रमैः ॥ एवं कृते तु देवेशं पश्यध्वं नेतरेण

हि ॥ १४ ॥ इत्युक्त्वा वासुदेवेन देवाः केशवमब्रुवन् ॥ विधानं तप्तकृच्छ्रस्य कथ्यतां मधुसूदन ॥ यस्मिञ्चीर्णे कायशुद्धिर्भ
विता सार्वकालिकी ॥ १५ ॥ वासुदेव उवाच ॥ त्र्यहमुष्णाः पिबेच्चापस्त्र्यहमुष्णं पयः पिबेत् ॥ त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो
दिनत्रयम् ॥ १६ ॥ पला द्वादश तोयस्य पलाष्टौ पयसः सुराः ॥ षट् पलाः सर्पिषः प्रोक्ता दिवसे दिवसे पिबेत् ॥ १७ ॥
पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने सुराः कायविशुद्धये ॥ तप्तकृच्छ्ररहस्यं वै चक्रुः शक्रपुरोगमाः ॥ १८ ॥ ततो व्रते सुरा
श्चीर्णे विमुक्ताः पापतोऽभवन् ॥ विमुक्तपापा देवेशं वासुदेवमथाब्रुवन् ॥ १९ ॥ क्वासौ वद जगन्नाथ शंभुस्तिष्ठति केशव ॥ यं
क्षीराद्यभिषेकेण स्नापयामो विधानतः ॥ २० ॥ अथोवाच सुरान्विष्णुरेष तिष्ठति शंकरः ॥ मद्देहे किं न पश्यध्वं योगं प्राप्य
प्रतिष्ठितम् ॥ २१ ॥ तमूचुर्नैव पश्यामः स्वतो वै त्रिपुरान्तकम् ॥ सत्यं वद सुरेशान महेशानः क्व तिष्ठति ॥ २२ ॥ ततोऽव्यया
त्मा स हरिः स्वहृत्पङ्कजशायिनम् ॥ दर्शयामास देवानां मुरारिर्लिङ्गमैश्वरम् ॥ २३ ॥ ततोऽमराः क्रमेणैव क्षीरादिभिरनु
त्तमैः ॥ स्नापयांचक्रिरे लिङ्गं शाश्वतं ध्रुवमव्ययम् ॥ २४ ॥ आलिप्य गोरोचनया चन्दनेन सुगन्धिना ॥ बिल्वपत्राम्बुजैर्देवं
पूजयामासुरञ्जसा ॥ २५ ॥ धूपयित्वाऽगुरुं भक्त्या निवेद्य परमौषधीः ॥ जप्त्वाऽष्टशतनामानि प्रणामं चक्रिरे ततः ॥ २६ ॥
नारद उवाच ॥ इत्येवं चिन्तयन्तस्ते देवदेवौ हराच्युतौ ॥ कथं योगं तमापन्नौ सत्त्वेन तमसा वृतौ ॥ २७ ॥ पुलस्त्य उवाच ॥

सुराणां चिन्तितं ज्ञात्वा विश्वमूर्तिरभूद्विभुः ॥ सर्वलक्षणसंयुक्तः सर्वायुधधरोऽव्ययः ॥ २८ ॥ सार्द्धद्विनेत्रं कनकाहिकुण्डलं

जटागुडाकेशखगर्षभध्वजम् ॥ समाधवं हारभुजङ्गभूषणं पीताजिनाच्छन्नकटिप्रदेशम् ॥ २९ ॥ चक्रासिहस्तं हलशार्ङ्ग पाणिं पिनाकशूलाजगवान्वितं च ॥ कपर्दखट्वाङ्गकपालघण्टं सशङ्खटङ्काररवं महर्षे ॥ ३० ॥ दृष्ट्वैव देवा हरिशंकरं तं नमोऽस्तु ते सर्वगताव्ययेति ॥ प्रोक्तप्रणामाः कमलासनाद्याश्चक्रुर्मतिं चैकतरां नियुज्य ॥ ३१ ॥ तानेकचित्ता न्विज्ञाय देवान्देवपतिर्हरिः ॥ प्रगृह्याभ्यद्रवत्तूर्णं कुरुक्षेत्रं स्वमाश्रमम् ॥ ३२ ॥ ततोऽपश्यन्त देवेशं स्थाणुभूतं जले स्थितम् ॥ दृष्ट्वा नमः स्थाणवे तु प्रोक्त्वा सर्वेऽप्युपाविशन् ॥ ३३ ॥ ततोऽब्रवीत्सुरपतिरेहि नो दीयतां वरः ॥ क्षुब्धं जगज्जगन्नाथ उन्मज्जस्व प्रियातिथे ॥ ३४ ॥ ततस्तां मधुरां वाणीं शुश्राव वृषभध्वजः ॥ श्रुत्वोत्तस्थौ च वेगेन सर्वव्यापी निरञ्जनः ॥३५॥ नमोऽस्तु देवदेवेभ्यः प्रोवाच प्रहसन्हरः ॥ स चागतः सुरैः सेन्द्रैः प्रणतो विनयान्वितः ॥३६॥ तमूचुर्देवताः सर्वास्त्यज्यतां शंकर द्रुतम् ॥ महाव्रतं त्रयो लोकाः क्षुब्धास्ते तेजसाऽर्दिताः ॥३७॥ अथोवाच महादेवो मया त्यक्तो महाव्रतः ॥ ततः सुरा दिवं जग्मुर्हृष्टाः प्रयतमानसाः ॥ ३८ ॥ ततो विकम्पते पृथ्वी साब्धिद्वीपा महामुने ॥ ततो ह्यचिन्तयद्रुद्रः किमर्थं क्षुभिता मही ॥ ३९ ॥ ततः पर्यचरच्छूली कुरुक्षेत्रं समन्ततः ॥ ददर्शौघवतीतीरे उशनसं तपोनिधिम् ॥ ४० ॥ ततोऽब्रवीत्सुर पतिः किमर्थं तप्यते तपः ॥ जगत्क्षोभकरं विप्र तच्छीघ्रं कथ्यतां मम ॥४१॥ उशना उवाच ॥ तवाराधनकामार्थं तप्यते हि मह त्तपः ॥ तस्मात्संजीविनीं विद्यां ज्ञातुमिच्छे त्रिलोचन ॥४२॥ हर उवाच ॥ तपसा परितुष्टोऽस्मि सुतप्तेन तपोधन ॥ तस्मात्सं

पातः किमर्थं तप्यते तपः ॥ जगत्क्षोभकरं विप्र तच्छीघ्रं कथ्यतां मम ॥४१॥ उशना उवाच ॥ तवाराधनकामार्थं तप्यते हि मह
तपः ॥ तस्मात्संजीविनीं विद्यां ज्ञातुमिच्छे त्रिलोचन ॥४२॥ हर उवाच ॥ तपसा परितुष्टोऽस्मि सुतप्तेन तपोधन ॥ तस्मात्सं
जीविनीं विद्यां भवाञ्ज्ञास्यति तत्त्वतः ॥४३॥ वरं लब्ध्वा ततः शुक्रस्तपसः संन्यवर्त्तत ॥ तथापि चलते पृथ्वी साब्धिभूभृन्नगा
वृता ॥ ४४ ॥ ततोऽगमन्महादेवः सप्तसारस्वतं शुचि ॥ ददर्श नृत्यमानं च ऋषिं मङ्कणसंज्ञितम् ॥४५॥ भावेन पोप्लुयति बाल
वत्सं भुजौ प्रसार्यैव ननर्त्त वेगात् ॥ तस्यैव वेगेन समाहता तु चचाल भूर्भूमिधरैः सहैव ॥ ४६ ॥ तं शंकरोऽभ्येत्य करे निगृह्य
प्रोवाच वाक्यं प्रहसन्महर्षे ॥ किं भावितो नृत्यसि केन हेतुना वदस्व मामद्य किमत्र तुष्टिः ॥ ४७ ॥ स ब्राह्मणः प्राह ममाद्य
तुष्टिर्येनेह जाता शृणु तद्द्विजेन्द्र ॥ तपस्यतो मे बहवो गता हि संवत्सराः कायविशोधनार्थम् ॥ ४८ ॥ ततोऽनु पश्यामि करा
त्क्षतोत्थं निर्गच्छते शाकरसं ममेह ॥ तेनातितुष्टोऽस्मि भृशं द्विजेन्द्र येनास्मि नृत्यामि सुभावितात्मा ॥४९॥ तं प्राह शंभुर्द्विज
पश्य मह्यं भस्म प्रवृत्तं करतोऽतिशुक्लम् ॥ संताडनादेव न च प्रहर्षो ममास्ति नूनं हि भवान्प्रमत्तः ॥५०॥ श्रुत्वाऽथ वाक्यं वृष
भध्वजं तं नत्वा मुनिर्मङ्कणको महर्षे ॥ नृत्यं परित्यज्य सुविस्मितोऽथ ववन्द पादौ विनयावनम्रः ॥ ५१ ॥ तमाह शंभुर्द्विज
गच्छ लोकं तं ब्रह्मणो दुर्गम एव यश्च ॥ इदं च तीर्थं प्रवरं पृथिव्यां पृथूदकं स्यात्सुमहत्फलं हि ॥ ५२ ॥ सांनिध्यमत्रैव सुरासुरा
णां गन्धर्वविद्याधरकिंनराणाम् ॥ सदाऽस्तु धर्मस्य निधानमग्र्यं सारस्वतं पापमलापहारि ॥ ५३ ॥ सुप्रभा काञ्चनाक्षी च सुवेणु
र्विमलोदका ॥ महोदरा चौघवती विशाला च सरस्वती ॥ ५४ ॥ एताः सप्त सरस्वत्यो निवसिष्यन्ति नित्यशः ॥ सोमपानफलं
सर्वाः प्रयच्छन्ति सुपुण्यदाः ॥ ५५ ॥ भवानपि कुरुक्षेत्र मूर्त्तिं स्थाप्य गरीयसीम् ॥ गमिष्यति महापुण्यं ब्रह्मलोकं सुदुर्गमम् ॥

॥ ५६ ॥ इत्येवमुक्तो देवेन शंकरेण तपोधन ॥ मूर्त्तिं स्थाप्य कुरुक्षेत्रे ब्रह्मलोकमगाद्वशी ॥ ५७ ॥ गते मङ्कणके पृथ्वी निश्चला
समजायत ॥ अथागान्मन्दरं शंभुर्निर्जनावसथं शुचि ॥५८॥ एवं तवोक्तं द्विज शंकरस्तु गतस्तदाऽऽसीत्तपसम्तु शैले ॥ शून्ये
ऽभ्ययाद्द्रष्टुमतीर्हि देव्या स योजितो येन हि कारणेन ॥ ५९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे द्विष
ष्टितमोऽध्यायः ॥६२॥ नारद उवाच ॥ गतोंऽधकस्तु पाताले किमचेष्टत दानवः ॥ शंकरो मन्दरस्थोऽपि यच्चकार तदुच्यताम्॥
॥ १ ॥ पुलस्त्य उवाच ॥ पातालस्थोऽन्धको ब्रह्मन्बाध्यते मदनाग्निना ॥ संतप्तविग्रहः सर्वान्दानवानिदमब्रवीत् ॥ २ ॥ स मे
सुहृत्स मे बन्धुः स भ्राता स पिता मम ॥ यस्तामद्रिसुतां शीघ्रं ममान्तिकमुपानयेत् ॥ ३ ॥ एवं ब्रुवति दैत्येन्द्रे अन्धके मदना
तुरे ॥ मेघगम्भीरनिर्घोषं प्रह्लादो वाक्यमब्रवीत् ॥ ४ ॥ येयं गिरिसुता वीर सा माता धर्मतस्तव ॥ पिता त्रिनयनो देवः श्रूयता
मत्र कारणम् ॥ ५ ॥ तव पित्रा त्वपुत्रेण धर्मनित्येन दानव ॥ आराधितो हरो देवः पुत्रार्थाय पुरा किल ॥ ६ ॥ तस्मै त्रिलोच
नेनासीद्दत्तोऽन्धोऽप्येव दानवः ॥ पुत्रकः पुत्रकामस्य प्रोक्त्वेत्थं वचनं विभो ॥७॥ नेत्रत्रयं हिरण्याक्ष सनर्मसुतया मम ॥ पिहितं
योगसंस्थस्य ततोर्ध्वमभवत्तमः ॥८॥ तस्माच्च तमसो जातो भूतो नीलघनस्वनः ॥ तदिदं गृह्यतां दैत्य तवौपयिकमात्मजम् ॥९॥
यदा तु लोकविद्विष्टं कर्म चायं करिष्यति ॥ त्रैलोक्यजननीं चापि त्वभिवाञ्छिष्यतेऽधमः ॥१०॥ घातयिष्यति वा विप्रं यदा
प्रक्षिप्य चासुर ॥ तदाऽस्य स्वयमेवाहं करिष्ये कायशोषणम् ॥ ११ ॥ एवमुक्त्वा गतः शंभुः स्वस्थानं मन्दराचलम् ॥ त्वपि

... कर्म चैव करिष्यति ॥ त्रैलोक्यजननीं चापि त्वभिवाञ्छिष्यतेऽधमः ॥१०॥ घातयिष्यति वा विप्रं यदा
प्रक्षिप्य चासुर ॥ तदाऽस्य स्वयमेवाहं करिष्ये कायशोषणम् ॥ ११ ॥ एवमुक्त्वा गतः शंभुः स्वस्थानं मन्दराचलम् ॥ त्वपि

ताऽपि समभ्यागास्त्वामादाय रसातलम् ॥ १२ ॥ एतेन कारणेनाम्बा शैलजा तव दानव ॥ सर्वस्यापीह जगतो गुरुः शंभुः
पिता ध्रुवम् ॥१३॥ भवानपि तथा युक्तः शास्त्रवेत्ता गुणाद्भुतः ॥ नेदृशे पापसंकल्पे मतिं कुर्याद्भवद्विधः ॥ १४ ॥ त्रैलोक्यप्रभु
रव्यक्तो भवः सर्वैर्नमस्कृतः ॥ अजेयस्तस्य भार्येयं न त्वमर्होऽमरार्दन ॥ १५ ॥ न चापि शक्तः संप्राप्तुं शैलराजात्मजां शुभाम् ॥
अजित्वा सगणं रुद्रं स च कामोऽथ दुर्लभः ॥ १६ ॥ यस्तरेत्सागरं दोर्भ्यां पातयेद्भुवि भास्करम् ॥ मेरुमुत्पाटयेद्वाऽपि स जये
च्छूलपाणिनम् ॥ १७ ॥ उताहोस्विदिमां शक्तः क्रियां कर्तुं महाबलः ॥ न च शक्यो हरो ज्ञातुं सत्यं सत्यं मयोदितम् ॥ १८ ॥
किं त्वया न श्रुतं दैत्य यथा दण्डो महीपतिः ॥ परस्त्रीकामनामूढः सराष्ट्रो नाशमाप्तवान् ॥१९॥ आसीद्दण्डो नाम नृपः प्रभूत
बलवाहनः ॥ स च वव्रे महातेजाः पौरोहित्याय भार्गवम् ॥२०॥ ईजे च विविधैर्यज्ञैर्नृपतिः शुक्रपालितः ॥ शुक्रस्यासीच्च दुहि
ता अरजा नाम नामतः ॥ २१ ॥ शुक्रः कदाचिदगमद्वृषपर्वाणमासुरम् ॥ तेनार्चितश्चिरं तत्र तस्थौ भार्गवसत्तमः ॥ २२ ॥ अर
जाः स्वगृहे वह्निं शुश्रूषन्ती महासुर ॥ अतिष्ठत सुचार्वङ्गी ततोऽभ्यागान्नराधिपः ॥२३॥ स पप्रच्छ क्व शुक्रोऽस्ति तमूचुः परिचा
रिकाः ॥ गतः स भगवाञ्छुक्रो याजनाय दनोः सुतम् ॥ २४ ॥ पप्रच्छ नृपतिः का तु तिष्ठते भार्गवाश्रमे ॥ तास्तमूचुर्गुरोः
पुत्री संतिष्ठत्यरजा नृप ॥ २५ ॥ तामाश्रमे शुक्रसुतां द्रष्टुमिक्ष्वाकुनन्दनः ॥ प्रविवेश महाबाहुर्ददर्शारजसं ततः ॥ २६ ॥ तां
दृष्ट्वा कामसंतप्तस्तत्क्षणादेव पार्थिवः ॥ संजातोऽन्धक दण्डश्च कृतान्तबलचोदितः ॥ २७ ॥ विसर्जयामास तदा भृत्यान्भ्रातॄन्सु

हृत्तमान् ॥ शुक्रशिष्यानपि बली एकाकी पृष्ठ आव्रजत् ॥ २८ ॥ तमागतं शुक्रसुता प्रत्युत्थाय यशस्विनी ॥ पूजयामास संहृष्टा भ्रातृभावेन दानव ॥ २९ ॥ ततस्तामाह नृपतिर्बाले कामाग्नितापितम् ॥ मां समाह्लादयस्वाद्य स्वपरिष्वङ्गवारिणा ॥ ३० ॥ साऽपि प्राह नरश्रेष्ठ सुविनीता तमासुरम् ॥ पिता मम महाक्रोधी त्रिदशानपि निर्दहेत् ॥ ३१ ॥ मूढबुद्धे भवान्भ्राता ममापि स्वयमागतः ॥ भगिनीधर्मतस्तेऽहं भवाञ्छिष्यः पितुर्मम ॥ ३२ ॥ सोऽब्रवीद्भीरु मां शुक्रः कालेन परिधक्ष्यति ॥ कामाग्निर्निर्दहति मामद्यैव तनुमध्यमे ॥ ३३ ॥ सा प्राह दण्डं नृपतिं मुहूर्तं परिपालय ॥ तमेव याचस्व गुरुं स ते दास्यत्यसंशयम् ॥ ३४ ॥ दण्डोऽब्रवीत्सुतन्वङ्गि कालक्षेपो न मे क्षमः ॥ हुतावसरकर्तृत्वे विघ्नमायाति सुन्दरि ॥ ३५ ॥ ततोऽब्रवीच्च विरजा नाहं त्वां पार्थिवात्मज ॥ दातुं शक्ता तथाऽऽत्मानमस्वतन्त्रा हि योषितः ॥ ३६ ॥ किं वा ते बहुनोक्तेन द्राक् त्वं नाशं नराधिप ॥ गच्छस्व शुक्रशापेन सभृत्यज्ञातिबान्धवः ॥ ३७ ॥ ततोऽब्रवीन्नरपतिः सुतनु शृणु चेष्टितम् ॥ चित्राङ्गदाया यद्वृत्तं पुरा देवयुगे शुभे ॥ ३८ ॥ विश्वकर्मसुता साध्वी नाम्ना चित्राङ्गदाऽभवत् ॥ रूपयौवनसंपन्ना पद्महीना तु पद्मिनी ॥ ३९ ॥ सा कदाचिन्नारण्ये सखीभिः परिवारिता ॥ जगाम निमिषं नाम स्नातुं कमललोचना ॥ ४० ॥ सा स्नातुमवतीर्णा च अथाभ्यागान्नरेश्वरः ॥ सुदेवतनयो धीमान्सुरथो नाम नामतः ॥ ४१ ॥ संवृता सा सखीः प्राह वचनं सत्त्वसंयुतम् ॥ असौ नराधिपसुतो मदनेन कदर्थ्यते ॥ ४२ ॥ यदर्थे च क्षमं मेऽस्य स्वप्रदानं सुरूपिणः ॥ सख्यस्तामब्रुवन्बाला अप्रगल्भाऽसि सुन्दरि ॥ ४३ ॥ अस्या

...सुरथो नाम नामतः ॥ ४१ ॥ संवृता सा सखीः प्राह वचनं सत्त्वसंयुतम् ॥ असौ नराधिपश्रुतो मदनेन कदर्थ्यते ॥ ४२ ॥ यदर्थे च क्षमं मेऽस्य स्वप्रदानं सुरूपिणः ॥ सख्यस्तामब्रुवन्बाला अप्रगल्भाऽसि सुन्दरि ॥ ४३ ॥ अस्वा...



तन्व्यं तवास्तीह प्रदाने स्वात्मनोऽनघे ॥ पिता तवास्ति धर्मिष्ठः सर्वशास्त्रविशारदः ॥४४॥ न ते युक्तमिदास्मान् दातुं नरपतेः स्वयम् ॥ एतस्मिन्नन्तरे राजा सुरथः सत्यकः शुचिः ॥ ४५ ॥ समभ्येत्याब्रवीदेनां कन्दर्पशरपीडितः ॥ त्वं मुग्धे मोहयसि मां दृष्ट्वैव मदिरेक्षणे ॥ ४६ ॥ त्वद्दृष्टिशरबाणेन स्मरेणाभ्येत्य ताडितः ॥ तन्मां कुचतले तल्पे अभिशायितुमर्हसि ॥ ४७ ॥ नोचेत्प्रधक्ष्यते कामो भूयो भूयोऽतिदर्शनात् ॥ ततः सा चारुसर्वाङ्गी राज्ञो राजीवलोचना ॥ ४८ ॥ वार्यमाणा सखीभिस्तु प्रादादात्मानमात्मना ॥ एवं पुरा तया तन्व्या परित्रातः स भूपतिः ॥ ४९ ॥ तस्मात्त्वमपि सुश्रोणि मां परित्रातुमर्हसि ॥ अरजस्काऽब्रवीद्दण्डं तस्या यद्वृत्तमुत्तमम् ॥ ५० ॥ किं त्वया न परिज्ञातं तस्मात्तत्कथयाम्यहम् ॥ तदा तया तु तन्वङ्ग्या सुरथस्य महीपतेः ॥ ५१ ॥ आत्मा प्रदत्तः स्वातन्त्र्यात्ततस्तामशपत्पिता ॥ यस्माद्धर्मं परित्यज्य स्त्रीभावान्मन्दचेतसे ॥ ५२ ॥ आत्मा प्रदत्तस्तस्माद्धि न विवाहो भविष्यति ॥ विवाहरहिता नैव सुखं लप्स्यसि भर्तृतः ॥ ५३ ॥ न च पुत्रफलं नैव पतिना योगमेष्यसि ॥ उत्सृष्टमात्रे शापे तु ह्यपोवाह सरस्वती ॥ ५४ ॥ अकृतार्थं नरपतिं योजनानि त्रयोदश ॥ अपकृष्टे नरपतौ साऽपि मोहमुपागता ॥ ५५ ॥ ततस्ताः सिषिचुः सर्वाः सरस्वत्या जलेन हि ॥ सा सिच्यमाना सुतरां शिशिरेणाथ वारिणा ॥ ५६ ॥ मृतकल्पा हतोत्साहा विश्वकर्मसुताऽभवत् ॥ तां मृतामिव विज्ञाय जग्मुः सख्यस्त्वरान्विताः ॥ ५७ ॥ आहर्तुमपराः काष्ठं वह्निमानेतुमाकुलाः ॥ सा च तास्वपि सर्वासु गतासु वनमुत्तमम् ॥५८॥ संज्ञां लेभे सुचार्वङ्गी दिशश्चेत्यवलोक्य

च ॥ अपश्यन्ती नरपतिं तथा स्निग्धं सखीजनम् ॥ ५९ ॥ निपपात सरस्वत्यां पयोभिस्तरलेक्षणा ॥ तां वेगात्काञ्चनाक्षी तु महानद्यां नरेश्वर ॥ ६० ॥ गोमत्यां च प्रचिक्षेप तरङ्गकुटिले जले ॥ तथाऽपि तस्यास्तद्भाव्यं विदित्वाऽथ विशां पते ॥६१॥ महावने परिक्षिप्ता सिंहव्याघ्रसमाकुले ॥ एवं तस्याः स्वयं तत्र या त्ववस्था श्रुता मया ॥ ६२ ॥ तस्मान्न दास्याम्यात्मानं रक्षन्ती शीलमुत्तमम् ॥ तस्यास्तद्वचनं श्रुत्वा दण्डः शक्रसमो बली ॥ विहस्य त्वरजां प्राह स्वार्थमङ्गक्षयंकरम् ॥ ६३ ॥ दण्ड उवाच ॥ तस्या यदुत्तरं वृत्तं तत्पितुश्च कृशोदरि ॥ सुरथस्य तथा राज्ञस्तच्छ्रोतुं मतिमादधे ॥ ६४ ॥ यदा प्रकृष्टे नृपतौ पतिता सा महावनम् ॥ तदा गगनसंचारी दृष्टवान्गुह्यको जनः ॥ ६५ ॥ ततः सोऽभ्येत्य तां बालां परिभाष्य प्रयत्नतः ॥ प्राह चागच्छ सुभगे नयामि सुरथं प्रति ॥ ६६ ॥ ध्रुवमेष्यसि तेन त्वं संयोगमसितेक्षणे ॥ तस्माद्गच्छस्व शीघ्रं त्वं द्रष्टुं श्रीकण्ठमीश्वरम् ॥ ६७ ॥ इत्येवमुक्ता सा तेन गुह्यकेन सुलोचना ॥ श्रीकण्ठमागता तूर्णं कालिन्द्या दक्षिणोत्तरम् ॥ ६८ ॥ दृष्ट्वा महेशं श्रीकण्ठं स्नात्वा रविसुताजले ॥ अतिष्ठत शिरोनम्रा यावन्मध्ये स्थितो रविः ॥ ६९ ॥ अथाजगाम देवस्य स्नानं कर्तुं तपोधनः ॥ शुभः पाशुपताचार्यः सामवेदी ऋतुध्वजः ॥७०॥ रुदतीमिव स्थितां तामनङ्गपरिवर्जिताम् ॥ तां दृष्ट्वा स मुनिर्ध्यानमगमत्केयमित्यथ ॥ ७१ ॥ अथ सा तमृषिं कन्या कृताञ्जलिपरिस्थिता ॥ तां प्राह पुत्रि कस्यासि सुता सुरसुतोपमा ॥ ७२ ॥ किमर्थमागताऽसीह निर्मनुष्यमृगे वने ॥ ततः सा प्राह तमृषिं याथातथ्यं कृशोदरी ॥ ७३ ॥ श्रुत्वर्षिः कोपमगमदशपच्छि

...अथ सा तमृषिं वन्द्य कृताञ्जलिरुपस्थिता ॥ तां प्राह पुत्रि कस्यासि सुता सुरसुतोपमा ॥ ७२ ॥
किमर्थमागताऽसीह निर्मनुष्यमृगे वने ॥ ततः सा प्राह तमृषिं याथातथ्यं कृशोदरी ॥ ७३ ॥ श्रुत्वर्षिः कोपमगमद्दशपङ्क्ति

लिपनां वरम् ॥ यस्मात्स्वतनुजातेयं परदेयाऽपि पापिना ॥ ७४ ॥ योजिता नैव पतिना तस्माच्छ्वासमृगोऽस्तु सः ॥ इत्युक्त्वा
स महाभागो भूयः स्नात्वा विधानतः ॥ ७५ ॥ उपास्य पश्चिमां संध्यां पूजयामास शंकरम् ॥ संपूज्य देवदेवेशं यथोक्तविधिना
हरम् ॥ ७६ ॥ उवाचागम्यतां सुभ्रूं रुदन्तीं पतिलालसाम् ॥ गच्छस्व सुभगे देशं सप्तगोदावरं शुभम् ॥ ७७ ॥ तत्रोपास्य महा
देवं महान्तं हाटकेश्वरम् ॥ तत्र स्थिताया रम्भोरु ख्याता देववती शुभा ॥ ७८ ॥ आगमिष्यति दैत्यस्य पुत्री कन्दरमा
लिनः ॥ तथाऽन्या गुह्यकसुता दमयन्तीति विश्रुता ॥ ७९ ॥ अञ्जनस्यापि तत्रापि समेष्यति तपस्विनी ॥ तथाऽपरा वेदवती
पर्जन्यदुहिता शुभा ॥ ८० ॥ यदा तिस्रः समेष्यन्ति सप्तगोदावरे जले ॥ हाटकाख्ये महादेवे तदा संयोगमेष्यसि ॥ ८१ ॥
इत्येवमुक्ता मुनिना बाला चित्राङ्गदा तदा ॥ सप्तगोदावरं तीर्थमगमत्त्वरिता ततः ॥ ८२ ॥ संप्राप्य तत्र देवेशं पूजयन्ती त्रिलो
चनम् ॥ समध्यास्ते शुचिपरा फलमूलाशनाऽभवत् ॥ ८३ ॥ स चर्षिर्ज्ञानसंपन्नः श्रीकण्ठाय ततोऽलिखत् ॥ श्लोकं त्वेकं महा
त्मानं तस्याश्च प्रियकाम्यया ॥ ८४ ॥ न सोऽस्ति कश्चित्त्रिदशोऽसुरो वा यक्षोऽथ मर्त्यो रजनीचरो वा ॥ इदं हि दुःखं
मृगशावनेत्र्या निमार्जयेद्यः स्वपराक्रमेण ॥ ८५ ॥ इत्येवमुक्त्वा स मुनिर्जगाम द्रष्टुं विभुं पुष्करनाथमीड्यम् ॥
नन्दीं पयोष्णीं मुनिवृन्दवन्द्यां संचिन्तयन्नेव विशालनेत्राम् ॥ ८६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे
दण्डोपाख्याने त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ दण्डं [illegible] ॥ चित्राङ्गदा[illegible]जे तत्र सत्या यथासुखम् ॥ स्मरन्त्याः सुरथं

वीरं महान्कालः समभ्यगात् ॥ १ ॥ विश्वकर्माऽपि मुनिना शप्तो वानरतां गतः ॥न्यपतन्मेरुशिखराद्भूपृष्ठं विधिनोदितः ॥ २ ॥ वनं घोरं सुगुल्माढ्यं नदीं शालूकिनीमनु ॥ स त्वेवं पर्वतश्रेष्ठं समावसति सुन्दरि ॥ ३ ॥ तत्रासतोऽस्य सुचिरं फलमूलान्यथाश्नतः ॥ कालोऽत्यगाद्वरारोहे बहुवर्षगणो वने ॥ ४ ॥ एकदा दैत्यशार्दूलः कन्दराख्यः सुतां प्रियाम् ॥ प्रतिगृह्य समभ्यागात्ख्यातां देववतीं दिवि ॥ ५ ॥ तां च तद्वनमायातां समं पित्रा वराननाम् ॥ ददर्श वानरश्रेष्ठः प्रजग्राह बलात्करे ॥ ६ ॥ ततो गृहीतां कपिना स दैत्यः स्वसुतां शुभे ॥ कन्दरो वीक्ष्य संक्रुद्धः खड्गमुद्यम्य चाद्रवत् ॥ ७ ॥ तमापतन्तं दैत्येन्द्रं दृष्ट्वा शाखामृगो बली ॥ तथैव सह चार्वङ्ग्या हिमाचलमुपागमत् ॥ ८ ॥ ददर्श च महादेवं श्रीकण्ठं यमुनातटे ॥ तस्याविदूरे गहनमाश्रमं ऋषिवर्जितम् ॥ ९ ॥ तस्मिन्महाश्रमे पुण्ये स्थाप्य देववतीं कपिः ॥ न्यमज्जत स कालिन्द्यां पश्यतः कन्दरस्य हि ॥ १० ॥ सोऽजानत मृतां पुत्रीं समं शाखामृगेण हि ॥ जगाम च महातेजाः पातालं निलयं निजम् ॥ ११ ॥ स चापि वानरो देव्या कालिन्द्या वेगतो भृशम् ॥ नीतः शिवेति व्याख्यातं देशं स्फीतजनाश्रितम् ॥ १२ ॥ ततस्तीर्त्वाऽथ वेगेन स कापिलवनं प्रति ॥ गन्तुकामो महातेजा यत्र न्यस्ता सुलोचना ॥ १३ ॥ अथापश्यत्समायान्तमञ्जनं गुह्यकोत्तमम् ॥ दमयन्त्या समं पुत्र्या गत्वा जिगमिषुः कपिः ॥ १४ ॥ तां दृष्ट्वाऽमन्यत श्रीमान्सैव देववती ध्रुवम् ॥ तन्मे वृथा श्रमो जातो जलमज्जनसंभवः ॥ १५ ॥ इति संचिन्तयन्नेव समाद्रवत सुन्दरि ॥ सा तद्भयाच्च न्यपतन्नदीं चैव हिरण्वतीम् ॥ १६ ॥ गुह्यको

यन्त्या सम पुत्र्या गत्वा जिगमिषुः कपिः ॥ १४ ॥ तां दृष्ट्वाऽमन्यत श्रीमान्सेयं देववती ध्रुवम् ॥ तन्मे वृथा श्रमो जातो ॥१२४॥
जलमज्जनसंभवः ॥ १५ ॥ इति संचिन्तयन्नेव समाद्रवत सुन्दरि ॥ सा तद्भयाच्च न्यपतन्नदीं चैव हिरण्वतीम् ॥ १६ ॥ ग्रहको
वीक्ष्य तनयां पतितामापगाजले ॥ दुःखशोकसमायुक्तो जगामाञ्जनपर्वतम् ॥१७॥ तत्रासौ तप आस्थाय मौनव्रतधरः शुचिः ॥
समास्ते वै महातेजाः संवत्सरगणान्बहून् ॥ १८ ॥ दमयन्त्यपि वेगेन हिरण्वत्याऽपवाहिता ॥ नीता देशं महापुण्यं कोसलं
साधुभिर्युतम् ॥ १९ ॥ गच्छन्ती सा च रुदती ददृशे वटपादपम् ॥ प्ररोहप्रावृततनुं जटाधरमिवेश्वरम् ॥ २० ॥ तं दृष्ट्वा विपुल
च्छायं विशश्राम वरानना ॥ उपविष्टा शिलापट्टे ततो वाचं प्रशुश्रुवे ॥ २१ ॥ न सोऽस्ति पुरुषः कश्चिद्यस्तं ब्रूयात्तपोधनम् ॥
यथा स तनयस्तुभ्यमुद्बद्धो वटपादपे ॥ २२ ॥ सा श्रुत्वा तां तदा वाणीं विशिष्टाक्षरसंयुताम् ॥ तिर्यगूर्ध्वमधश्चैव समन्तादव
लोकयत् ॥ २३ ॥ ददृशे वृक्षशिखरे शिशुं पञ्चाब्दकं स्थितम् ॥ पिङ्गलाभिर्जटाभिस्तु उद्बद्धं यत्नतः शुभे ॥२४॥ तं विरुवन्तं
दृष्ट्वैव दमयन्ती सुदुःखिता ॥ प्राह केनासि बद्धस्त्वं पापिना वद पोतक ॥२५॥ स तामाह महाभागे बद्धोऽस्मि कपिना वटे ॥
जटास्वेवं सुदुष्टेन जीवामि तपसो बलात् ॥२६॥ पुरा मनुपुरे चैव तत्र देवो महेश्वरः ॥ तत्रास्ति तपसो राशिः पिता मम ऋत
ध्वजः ॥२७॥ तस्यास्मि तप्यमानस्य महायोगान्महात्मनः॥जातोऽलिवृन्दसंयुक्तः सर्वशास्त्रविशारदः ॥२८॥ततो मामब्रवीत्तातो
नमस्कृत्य शुभानने ॥ जाबालीति परिज्ञाय तच्छृणुष्व शुभानने॥२९॥पञ्चवर्षसहस्राणि बाल एव भविष्यसि ॥ दशवर्षसहस्राणि
कुमारत्वे भविष्यसि॥३०॥विंशतिर्यौवनस्थायी स्थाविर्ये द्विगुणं ततः ॥ पञ्चवर्षशतान्बालो मोक्ष्यसे बन्धनं दृढम् ॥३१॥ दश

वर्षशतान्येव कौमारे कायपीडनम् ॥ यौवने परमान्भोगान्द्विसहस्रसमास्तथा॥३२॥ चत्वारिंशच्छतान्येव वार्धके क्लेशमुत्तमम् ॥

आप्स्यसे भूमिशय्यायां कदन्नाशनभोजनम् ॥ ३३ ॥ इत्येवमुक्तः पित्राऽहं बालः पञ्चाब्ददेश्यकः ॥ विचरामि महीपृष्ठं गच्छन् स्नातुं हिरण्वतीम् ॥ ३४ ॥ ततोऽपश्यं कपिवरं सोऽवदन्मां क्व यास्यसि ॥ इमां देववतीं गृह्य मूढन्यस्तां महाश्रमे ॥ ३५ ॥ ततोऽसौ मां समादाय विस्फुरन्तं शिशुं ततः ॥ वटाग्रेऽस्मिन्नुद्बन्ध जटाभिरपि सुन्दरि ॥ ३६ ॥ तथा च रक्षा कपिना कृता भीरु निरन्तरैः ॥ लतापाशैर्महायन्त्रमध्यस्था दुष्टबुद्धिना ॥३७॥ अभेद्योऽयमनाक्रम्य उपरिष्टात्तथा वधः ॥ दिशां मुखेषु सर्वेषु कृतं यन्त्रं लतामयम् ॥ ३८ ॥ संयम्य मां कपिवरः प्रयातोऽमरपर्वतम् ॥ यथेच्छया मया दृष्टमेतत्ते गदितं शुभे ॥ ३९ ॥ भवती का महारण्ये ललना पतिवर्जिता ॥ समायाता सुचार्वङ्गी केन कार्येण मां वद ॥ ४० ॥ साऽब्रवीदञ्जनो नाम गुह्यकेन्द्रः पिता मम ॥ दमयन्तीति मे नाम प्रम्लोचागर्भसंभवा ॥ ४१ ॥ तत्र मे जातके प्रोक्तमृषिणा मुद्गलेन हि ॥ इयं नरेन्द्रमहिषी भविष्यति न संशयः ॥ ४२ ॥ तद्वाक्यसमकालं तु न्यनदद्दिवि दुन्दुभिः ॥ शिवाश्चाशिवनिर्घोषास्ततो भूयोऽब्रवीन्मुनिः ॥ ४३ ॥ न संदेहो नरपतेर्महाराज्ञी भविष्यति ॥ महान्तं संशयं घोरं कन्याभावे समेष्यसि ॥ ४४ ॥ ततो जगाम स ऋषिरेव मुक्त्वा वचो द्रुतम् ॥ पिता मामपि चादाय समागन्तुमथैच्छत ॥४५॥ तीर्थं ततो हिरण्वत्यास्तीरात्कपिरथोत्पतत् ॥ तद्भयाच्च मया ह्यात्मा क्षिप्तः सागरगाजले ॥ तयाऽस्मिन्देशमानीता इयं मातृवर्जितम् ॥ ४६ ॥ दण्ड उवाच ॥ श्रुत्वा जाबालिरथ तद्वचनं वै तयोदितम् ॥ प्राह सुन्दरि गच्छस्व श्रीकण्ठं यमुनातटे ॥४७॥ तत्रागच्छति मध्याह्ने मत्पिता शिवमर्चितुम् ॥ तस्मै निवे

मया क्षमा क्षितः सागरगांजल ॥ तयास्मि दृशमानोता इम मानुषवर्जितम् ॥ ४६ ॥ दण्ड उवाच ॥ श्रुत्वा जाबालिरथ तद्व
चनं वै तयोदितम् ॥ प्राह सुन्दरि गच्छस्व श्रीकण्ठं यमुनातटे ॥४७॥ तत्रागच्छति मध्याह्ने मत्पिता शिवमर्चितुम् ॥ तस्मै निवे 

दयाशु त्वं ततः श्रयोऽभिलप्स्यसे ॥ ॥ ४८ ॥ ततस्तु त्वरिता काले दमयन्ती तपोनिधिम् ॥ परित्राणार्थमगमद्धिमाद्रौ यमुनां
नदीम् ॥ ४९ ॥ सा त्वदीर्घेण कालेन कन्दमूलफलाशना ॥ संप्राप्ता शंकरस्थानं यत्रागच्छति तापसः ॥ ५० ॥ ततः सा देवदेवेशं
श्रीकण्ठं लोकवन्दितम् ॥ प्रतिवन्द्य ततोऽपश्यदक्षराणि महामुने ॥ ५१ ॥ तेषामर्थं हि विज्ञाय सा तदा चारुहासिनी ॥ जाप
माल्युदितं श्लोकमलिखच्चान्यमात्मनः ॥ ५२ ॥ मुद्गलेनास्मि गदिता राजपत्नी भविष्यति ॥ सा चावस्थामिमां प्राप्ता कश्चिन्मा
त्रातुमीश्वरः ॥ ५३ ॥ ॥ इत्युल्लिख्य शिलापट्टे गता स्नातुं यमानुजाम् ॥ ददृशे चाश्रमवरं मत्तकोकिलनादितम् ॥ ५४ ॥ अतो
मध्यमसावृषिर्ननं तिष्ठति सत्तमः ॥ इत्येवं चिन्तयन्ती सा संप्रविष्टा महाश्रमम् ॥ ५५ ॥ ततो ददर्श देवानां स्थितां देववतीं
शुभाम् ॥ शुष्कास्यां चलनेत्रां तु परिम्लानामिवाब्जिनीम् ॥ ५६ ॥ सा चापतन्तीं ददृशे यक्षजां दैत्यनन्दिनीम् ॥ केयमित्येव
संचिन्त्य समुत्थाय स्थिराऽभवत् ॥ ५७ ॥ ततोऽन्योन्यं समाश्लिष्य गाढं गाढं सुहृत्तया ॥ पर्यपृच्छत्तदाऽन्योन्यं कथयामास
तुस्ततः ॥ ५८ ॥ ते परिज्ञाततत्त्वार्थे अन्योन्यं ललनोत्तमे ॥ समासाते कथाभिस्ते नानारूपाभिरादरात् ॥ ५९ ॥ एतस्मिन्नन्तरं
प्राप्तः मुनिः श्रीकण्ठमार्चितुम् ॥ ऋतध्वजो मुनिश्रेष्ठस्ततोऽपश्यदथाक्षरान् ॥ ६० ॥ स दृष्ट्वा वाचयित्वा च तदर्थमधिगम्य च ॥
मुहूर्तं ध्यानमास्थाय व्यजानाच्च तपोनिधिः ॥ ६१ ॥ ततः संपूज्य देवेशं त्वरया स ऋतध्वजः ॥ अयोध्यामगमत्क्षिप्रं द्रष्टुमि
क्ष्वाकुमीश्वरम् ॥ ६२ ॥ तं दृष्ट्वा नृपतिश्रेष्ठ तापसो वाक्यमब्रवीत् ॥ श्रूयतां नरशार्दूल विज्ञप्तिर्मम पार्थिव ॥ ६३ ॥ मम पुत्रो

गुणैर्युक्तः सर्वशास्त्रविशारदः ॥ उद्बद्धः कपिराजेन विषयान्ते तवैव हि ॥ ६४ ॥ तं हि मोचयितुं नान्यः शक्तस्त्वत्तनयादृते ॥
शकुनिर्नाम राजेन्द्र स ह्यत्र विधिपारगः ॥ ६५ ॥ तन्मुनेर्वाक्यमाकर्ण्य पिता मम कृशोदरि ॥ आदिदेश प्रियं पुत्रं शकुनिं नाम
शान्तये ॥ ६६ ॥ ततः स प्रहितः पित्रा भ्राता मम महाभुजः ॥ संप्राप्तोऽथ वनोद्देशं समं हि परमर्षिणा ॥ ६७ ॥ दृष्ट्वा न्यग्रो
धमत्युच्चं प्ररोहश्वेतदिङ्मुखम् ॥ ददर्श वृक्षशिखरे उद्बद्धमृषिपुत्रकम् ॥ ६८ ॥ ततश्चललतापाशं दृष्टवान्स समन्ततः ॥ दृष्ट्वा स
मुनिपुत्रं तं स्वजटासंयतं वटे ॥ ६९ ॥ धनुरादाय बलवानधिज्यं स चकार ह ॥ लाघवादृषिपुत्रस्य समं चिच्छेद मार्गणैः
॥ ७० ॥ कपिना यत्कृतं पूर्वं लतापाशं चतुर्दिशम् ॥ पञ्चवर्षशते काले गते कृत्तं तदा शरैः ॥ ७१ ॥ लताच्छन्नं ततस्तूर्णमारु
रोह मुनिर्वटम् ॥ प्राप्तं स्वपितरं दृष्ट्वा जाबालिः संयतोऽपि सन् ॥ ७२ ॥ आदरातिशयान्मूर्ध्ना ववन्दे तु विधानतः ॥ संप
रिष्वज्य स मुनिर्मूर्ध्न्याघ्राय समन्ततः ॥ ७३ ॥ उन्मोचयितुमारब्धो न शशाक सुयन्त्रितः ॥ ततस्तूर्णं धनुर्नाम्य बाणांश्च
शकुनिर्बली ॥ ७४ ॥ आरुरोह वटं तूर्णं समुन्मोचयितुं जटाः ॥ न च शक्नोति संयत्तं दृढं कपिवरेण हि ॥ ७५ ॥
यदा न शकितस्तेन समं मोचयितुं जटाः ॥ तदाऽवतीर्णः शकुनिः सहितः परमर्षिणा ॥ ७६ ॥ जग्राह च धनुर्बाणांश्च
कार शरमण्डपम् ॥ लाघवादर्धचन्द्राभ्यां शाखां चिच्छेद स त्रिधा ॥ ७७ ॥ शाखया कृत्तया चासौ भारवाही तपोधनः ॥
शरसोपानमार्गेण अवतीर्णोऽथ पादपात् ॥ ७८ ॥ तस्मिंस्तथा स्थे तनये कृतध्वजस्ततो नरेन्द्रस्य सुतेन धन्विना ॥
जाबालिना भारवहेन संयतः समाजगामाथ नदीं स सूर्यजाम् ॥ ७९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे चतुःषष्टितमो

कार शरमण्डपम् ॥ लीघवादधचन्द्राभ्यां शाखां चिच्छेद स त्रिधा ॥ ७७ ॥ शाखया कृत्तया चासौ भारवाही तपोधनः ॥
धरसोपानमार्गेण अवतीर्णोऽथ पादपात् ॥ ७८ ॥ तस्मिंस्तथा ... तनमे ऋतध्वजस्ततो नरेन्द्रस्य सुतेन धन्विना ॥

जाबालिना भारवहेन संयुतः समाजगामाथ नदीं स सूर्यजाम् ॥ ७९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे चतुःषष्टितमो
ऽध्यायः ॥ ६४ ॥ दण्डक उवाच ॥ एतस्मिन्नन्तरे बाले यक्षासुरसुते मुने ॥ समागते हरं द्रष्टुं तं मुनिं योगिनां वरम् ॥ १ ॥
ददृशाते परिम्लानं संशुष्ककुसुमं विभुम् ॥ बहुनिर्माल्यसंयुक्तं गते तस्मिन्नृतध्वजे ॥ २ ॥ ततस्तु वीक्ष्य देवेशं ते उभे वर
कन्यके ॥ स्नापयेते विधानेन पूजयेते अहर्निशम् ॥३॥ ताभ्यां स्थिताभ्यां तत्रैव ऋषिरभ्यागमद्वनम् ॥ द्रष्टुं श्रीकण्ठमव्यक्तं गाल
वो नाम नामतः ॥ ४ ॥ स दृष्ट्वा कन्यकायुग्मं कस्येदमिति चिन्तयन् ॥ प्रविवेश मुनिः स्नात्वा कालिन्द्या विमले जले ॥ ५ ॥
ततोऽनु पूजयामास श्रीकण्ठं गालवो मुनिः ॥ गायेते सुस्वरं गीतं यक्षासुरसुते ततः ॥ ६ ॥ ततः संगीतमाकर्ण्य गालवो द्रु अजा
नत ॥ गन्धर्वकन्यके चैव संदेहो नात्र विद्यते ॥ ७ ॥ संपूज्य देवमीशानं गालवस्तु विधानतः ॥ कृतजप्यः समध्यास्ते कन्याभ्य।
मभिवादितः ॥ ८ ॥ ततः पप्रच्छ स मुनिः कन्यके कस्य कथ्यताम् ॥ कुलालङ्कारकरणे भक्तियुक्ते भवस्य हि ॥ ९ ॥ तमूचतुर्मु
निश्रेष्ठं याथातथ्यं शुभानने ॥ जातो विदितवृत्तान्तो गालवस्तपतां वरः ॥ १० ॥ समुष्य तत्र रजनीं ताभ्यां संपूजितो मुनिः ॥
प्रातरुत्थाय गौरीशं संपूज्य च विधानतः ॥ ११ ॥ ते उपेत्याब्रवीद्यास्ये पुष्करारण्यमुत्तमम् ॥ आमन्त्रयामि वां तन्व्यौ मामनु
ज्ञातुमर्हथ ॥ १२ ॥ ततस्ते ऊचतुर्ब्रह्मन्दुर्लभं दर्शनं तव ॥ किमर्थं पुष्करारण्ये भवान्यास्यत्यथादरात् ॥ १३ ॥ ते उवाच महा
तेजा अहङ्कारसमन्वितः॥ कार्तिकी पुण्यदा भावि पुष्करेष्वेव कार्तिके ॥ १४ ॥ ते ऊचतुर्वयं यामो भवान्यत्र गमिष्यति ॥ न

त्वया स्म विना ब्रह्मन्निह स्थातुं समुत्सहे ॥ १५ ॥ बाढमाह मुनिश्रेष्ठस्ततो नत्वा महेश्वरम् ॥ गते च ऋषिणा सार्धं पुष्करारण्य
मादरात् ॥ १६ ॥ तथाऽन्ये ऋषयस्तत्र समायाताः सहस्रशः ॥ पार्थिवा वा जानपदा मुक्त्वैकं तु ऋतध्वजम् ॥ १७ ॥ ततः
स्नातुं च कार्त्तिक्यामृषयः पुष्करेष्वथ ॥ राजानश्च महाभागा नाभागेक्ष्वाकुसंयुताः ॥१८॥ गालवोऽपि समं ताभ्यां कन्यका
भ्यामवातरत् ॥ स स्नातुं पुष्करजले मध्यमे धनुषां प्लुतौ ॥१९॥ निमग्नश्चापि ददृशे महामत्स्यं जलेशयम् ॥ बह्वीभिर्मत्स्यक
न्याभिः प्रीयमाणं मुहुर्मुहुः ॥ २० ॥ स ताश्चाह विनिर्मुक्ता इमं धर्मं न जानथ ॥ जनापवादं घोरं हि न शक्तः सोढुमुल्बणम्
॥ २१ ॥ तास्ता ऊचुर्महामत्स्यं किं न पश्याम गालवम् ॥ तापसं कन्यकाभ्यां वै विचरन्तं यथेच्छया ॥ २२ ॥ यद्यसावपि
धर्मात्मा न बिभेति तपोधनः ॥ जनापवादात्तत्किं त्वं बिभेषि जलमध्यगः ॥ २३ ॥ ततश्चाप्याह स निमिर्नैष वेत्ति तपोधनः ॥
रागान्धो नापि च भयं विजानाति सुबालिशः ॥ २४ ॥ तच्छ्रुत्वा मत्स्यवचनं गालवो व्रीडया युतः ॥ नोत्ततार निमग्नोऽपि
तस्थौ स विजितेन्द्रियः ॥ २५ ॥ स्नात्वा द्वे तेऽपि रम्भोरू समुत्तीर्य तटे स्थिते ॥ प्रतीक्षन्त्यौ मुनिवरं तद्दर्शनसमुत्सुके ॥ २६ ॥
वृत्ता तु पुष्करे यात्रा गतो लोको यथागतम् ॥ ऋषयः पार्थिवाश्चान्ये नानाजानपदास्तथा ॥ २७ ॥ तत्र स्थितैका सुदती विश्व
कर्मतनूरुहा ॥ चित्राङ्गदा सुचार्वङ्गी [illegible] समा ॥२८॥ ते स्थिते बाऽपि वीक्षन्त्यौ गालवं मुनिसत्तमम् ॥ संस्थिते निर्जने
तीर्थे गालवोऽन्तर्जले तथा ॥ २९ ॥ ततोऽभ्यगाद्वेदवती नाम्ना गन्धर्वकन्यका ॥ पर्जन्यतनया साध्वी घृताची गर्भसंभवा

चित्राङ्गदा सुचार्वङ्गी वीक्षन्ती तनुमध्यमा ॥२८॥ ते स्थिते वाऽपि वीक्षन्त्यौ गालवं मुनिसत्तमम् ॥ संस्थिते निर्जने तीर्थे गालवोऽन्तर्जले तथा ॥ २९ ॥ ततोऽभ्यगाद्वेदवती नाम्ना गन्धर्वकन्यका ॥ पर्जन्यतनया साध्वी घृताची गर्भसंभवा

॥ ३० ॥ कूले पुण्ये समभ्येत्य स्नात्वा मध्यमपुष्करे ॥ ददर्श कन्यात्रितयमुभयोस्तटयोः स्थितम् ॥ ३१ ॥ चित्राङ्गदां समभ्येत्य पर्यपृच्छदनिष्ठुरम् ॥ काऽसि केन च कार्येण निर्जने स्थितवत्यसि ॥ ३२ ॥ सा तामुवाच पुत्रीं मां विन्दस्व सुरवर्धके ॥ चित्राङ्गदेति सुश्रोणि विख्यातां विश्वकर्मणः ॥ ३३ ॥ साऽहमभ्यागता भद्रे स्नातुं पुण्यां सरस्वतीम् ॥ नैमिषे काञ्चनाक्षीं तु विख्यातां धर्ममातरम् ॥ ३४ ॥ तत्रागता सुरार्हाऽहं दृष्टा वैदर्भकेण हि ॥ सुरथेन स कामार्तो मामेव शरणं गतः ॥ ३५ ॥ मया ऽऽत्मा तस्य दत्तश्च सखीभिर्वार्यमाणया ॥ ततः शप्ताऽस्मि तातेन वियुक्ताऽस्मि च भूभुजा ॥ ३६ ॥ मर्तुं कृतमतिर्भद्रे वारिता गुह्यकेन च ॥ श्रीकण्ठमगमं द्रष्टुं ततो गोदावरीजलम् ॥ ३७ ॥ तस्मादिदं समायाता तीर्थप्रवरमुत्तमम् ॥ न चापि दृष्टः सुरथः स मनोह्लादनः पतिः ॥ ३८ ॥ भवती चात्र का बाले वृत्ते यात्राफलेऽधुना ॥ समागता हि तच्छंस मम सत्येन भामिनि ॥ ३९ ॥ साऽब्रवीच्छ्रूयतां याऽस्मि मन्दभाग्या कृशोदरी ॥ यथा यात्राफले वृत्ते समायाताऽस्मि पुष्करम् ॥४०॥ पर्जन्यस्य घृताच्यां तु जाता वेदवतीति हि ॥ रममाणा वनोद्देशे दृष्टाऽस्मि कपिना सखि ॥४१॥ स चाभ्येत्याब्रवीन्मां तु यासि वेदवति क्व हि ॥ आनीताऽस्याश्रमात्केन भूपृष्ठान्मेरुपर्वतम् ॥ ४२ ॥ ततो मयोक्तेनास्मीति कपे वेदवतीत्यहम् ॥ नाम्ना वेदवतीत्येवं मेरावपि कृताश्रया ॥ ४३ ॥ ततस्तेनातिदुष्टेन वानरेणाभिविद्रुता ॥ समारूढाऽस्मि सहसा बन्धुजीवं नगोत्तमम् ॥ ४४ ॥ तेनापि वृक्षस्तरसा पादाक्रान्तस्त्वभज्यत ॥ ततोऽस्य विपुलां शाखां समालिङ्ग्य स्थिता त्वहम् ॥४५॥ ततः प्लवङ्गमो वृक्षं प्राक्षिपत्सागराम्भसि॥

सह तेनैव वृक्षेण पतिताऽस्म्यहमाकुला ॥ ४६ ॥ ततोऽम्बरतलाद्वृक्षं निपतन्तं यदृच्छया ॥ ददृशुः सर्वभूतानि स्थावराणि चराणि च ॥ ॥४७॥ ततो हाहाकृतं लोकैर्मां पतन्तीं निरीक्ष्य हि॥ ऊचुश्च सिद्धगन्धर्वाः कष्टं सेयं महात्मनः॥४८॥इन्द्रद्युम्नस्य महिषी गदिता ब्रह्मणा स्वयम् ॥ मनोः पुत्रस्य वीरस्य सहस्रक्रतुयाजिनः ॥ ४९ ॥ तां वाणीं मधुरां श्रुत्वा मोहमस्म्यागता ततः ॥ न च जाने स केनापि वृक्षश्छिन्नः सहस्रधा ॥ ५० ॥ ततोऽस्मि वेगाद्वलिना हृताऽनलसखेन हि ॥ समानीताऽस्म्यहमिमं त्वं दृष्ट्वा चाद्य सुन्दरि ॥५१॥ तत उत्तिष्ठ गच्छावः के उभे संस्थिते वरे ॥ कन्यके अनुपश्येह पुष्करस्योत्तरे तटे ॥५२॥ एवमुक्त्वा वराङ्गी सा तया सुतनुकन्यया ॥ जगाम कन्यके द्रष्टुं प्रष्टुं काय तु कौतुकात ॥ ५३ ॥ ततो गत्वा पर्यपृच्छत्ते ऊचतुरुभे अपि ॥ यातातथ्यं तयोस्ताभ्यां स्वमात्मानं निवेदितम् ॥ ५४ ॥ ततस्ताश्चतुरोऽपीह सप्तगोदावरं जलम् ॥ संप्राप्य तीरे तिष्ठन्ति अर्चन्त्यो हाटकेश्वरम् ॥ ५५ ॥ ततो बहून्वर्षगणान्बभ्रमुस्ते जनास्त्रयः ॥ तासामर्थाय शकुनिर्जाबालिः स ऋतध्वजः ॥ ५६ ॥ भारवाही ततो भिन्नो दशान्दशतिके (?) गते ॥ काले जगाम निर्वेदात्समं पित्राऽनु शाकलम् ॥ ५७ ॥ तस्मिन्नरपतिः श्रीमानिन्द्रद्युम्नो मनोः सुतः ॥ समध्यास्ते स विज्ञाय सार्घपाद्यो विनिर्ययौ ॥ ५८ ॥ सम्यक्संपूजितस्तेन स जाबालिर्ऋतध्वजः ॥ स चेक्ष्वाकुसुतो धीमाञ्शकुनिर्भ्रातृजोऽर्चितः ॥ ५९ ॥ ततो वाक्यं मुनिः प्राह इन्द्रद्युम्नमृतध्वजः ॥ राजन्नस्या सुताऽस्माकं दमयन्तीति

१ कोष्ठकमिति प्रकृतः पाठः ।

कुश्रुतौ धर्मान्शकुनिर्भ्रातृजोऽर्चितः ॥ ५९ ॥ ततो वाक्यं मुनिः प्राह इन्द्रद्युम्नमृतध्वजः ॥ राजन्नष्टा सुताऽस्माकं दमयन्तीति

१ कोऽधाकमिति प्रसुरः पाठः ।

विश्रुता॥६०॥ तदर्थं चैव वसुधा अस्माभिरटिता नृप ॥ तस्मादुत्तिष्ठ मार्गस्य साहाय्यं कर्तुमर्हसि ॥६१॥ अथोवाच नृपो ब्रह्मन्म
मापि ललनोत्तमा ॥ नष्टा कृतश्रमस्यापि कस्याहं कथयामि ताम् ॥६२॥ आकाशात्पर्वताकारः पतमानो नगोत्तमः ॥ सिद्धानां
वाक्यमाकर्ण्य बाणैश्छिन्नः सहस्रधा ॥ ६३ ॥ ते चैव सा वरारोहा विभिन्ना लाघवान्मया ॥ न च जानामि सा कुत्र तस्मा
द्गच्छामि मार्गितुम् ॥ ६४ ॥ इत्येवमुक्त्वा स नृपः समुत्थाय त्वरान्वितः ॥ स्यन्दनानि द्विजाभ्यां स भ्रातृपुत्राय चार्पयत् ॥
॥ ६५ ॥ तेऽधिरूढरथास्तूर्णं मार्गन्ते वसुधां क्रमात् ॥ बदर्याश्रममासाद्य ददृशुस्तपसां निधिम् ॥ ६६ ॥ तपसा कर्शितं दीनं मल
पङ्कजटाधरम् ॥ निःश्वासायासपरमं प्रथमे वयसि स्थितम् ॥ ६७ ॥ तमुपेत्याब्रवीद्राजा इन्द्रद्युम्नो महाभुजः ॥ तपस्वियौन्वने
घोर आस्थितोऽसि सुदुश्चरम् ॥६८॥ तपः किमर्थं तच्छंस किमभिप्रेतमुच्यताम् ॥ सोऽब्रवीत्को भवान्ब्रूहि ममात्मानं सुहृत्तया
॥ ६९ ॥ परिपृच्छसि शोकार्तं परिद्यूनं तपोऽन्वितम् ॥ स प्राह राजाऽस्मि बली तपस्विन्शाकले पुरे ॥७०॥ मनोः पुत्रः प्रियो
भ्राता इक्ष्वाकोः कथितं तव ॥ स चास्मै पूर्वचरितं सर्वं कथितवान्नृपः ॥ ७१ ॥ श्रुत्वा प्रोवाच राजर्षिर्मा मुञ्चस्व कलेवरम् ॥
आगमिष्यामि तन्वङ्गीं विचेतुं भ्रातृजोऽसि मे ॥ ७२ ॥ इत्युक्त्वा संपरिष्वज्य नृपं धर्मे सुसंयतम् ॥ समारोप्य
रथं तूर्णं तापसाभ्यां न्यवेदयत् ॥ ७३ ॥ ऋतध्वजः सपुत्रस्तु तं दृष्ट्वा पृथिवीपतिम् ॥ प्रोवाच राजन्नेह्येहि करि
ष्यामि तव प्रियम् ॥ ७४ ॥ याऽसौ चित्राङ्गदा नाम त्वया दृष्टा हि नामिष ॥ सप्तगोदावरे तीर्थे सा मयैव विवर्जिता ॥ ७५ ॥

आगच्छ चागमिष्यामस्तस्मादेव हि कारणात् ॥ तत्रास्माकं समेष्यन्ति कन्यास्तिस्रस्तथाऽपराः ॥ ७६ ॥ इत्येवमुक्त्वा स ऋषिः समाश्वास्य सुदेवजाम् ॥ शकुनिं पुरतः कृत्वा सेन्द्रद्युम्नः सपुत्रकः ॥ ७७ ॥ स्यन्दनेनाश्वयुक्तेन गन्तुं समुपचक्रमे ॥ सप्तगोदावरं तीर्थं यत्र ताः कन्यका गताः ॥ ७८ ॥ एतस्मिन्नन्तरे तन्वी घृताची शोकसंयुता ॥ विचचारोदयगिरिं विचिन्वन्ती सुतां निजाम् ॥७९॥ तमाससाद च कपिं पर्यपृच्छद्यथाऽप्सराः ॥ किं बाला न त्वया दृष्टा कपे सत्यं वदस्व मे ॥८०॥ तस्या स्तद्वचनं श्रुत्वा स कपिः प्राह बालिकाम् ॥ दृष्टा देववती नाम सा च न्यस्ता महाश्रमे ॥ ८१ ॥ कालिन्द्या विमले तीरे मृग पक्षिसमन्विते ॥ श्रीकण्ठायतनस्याग्रे मया सत्यं तवोदितम् ॥ ८२ ॥ सा प्राह वानरवरं नाम्ना वेदवतीति सा ॥ न हि देववती ख्याता तदागच्छ व्रजावहे ॥ ८३ ॥ घृताच्यास्तद्वचः श्रुत्वा वानरस्त्वरितक्रमः ॥ पृष्ठतोऽस्याः समागच्छन्नदीमन्वेव कौशि कीम् ॥ ८४ ॥ प्राप्ता राजर्षिप्रवरास्त्रयस्ते चापि कौशिकीम् ॥ द्वितयं तापसाभ्यां च रथाः पञ्चाश्ववेगिभिः ॥ ८५ ॥ अवतीर्य रथेभ्यस्ते स्नातुमभ्यागमन्नदीम् ॥ घृताच्यपि नदीं स्नातुं सुपुण्यामाजगाम ह ॥ ८६ ॥ तामन्वेव कपिः प्रायाद्दृष्टो जाबालिना तथा ॥ दृष्ट्वैव पितरं प्राह पार्थिवं च महाबलम् ॥ ८७ ॥ स एष पुनरायाति वानरस्तात वेगवान् ॥ पूर्वं जटास्वेव बलाद्येन बद्धो ऽस्मि पादपे ॥ ८८ ॥ तज्जाबालिवचः श्रुत्वा शकुनिः कोपसंयुतः ॥ सशरं धनुरादाय इदं वचनमब्रवीत् ॥ ८९ ॥ ब्रह्मन्प्रदी यतां मह्यमाज्ञा तात वदस्व माम् ॥ यावदेनं निहन्म्यद्य शरेणैकेन वानरम् ॥ ९० ॥ इत्येवमुक्ते वचने सर्वभूतहिते रतः ॥ महर्षिः

श्रुत्वा शकुनिः क्रोधसंयुतः ॥ सशरं धनुरानम्य इदं वचनमब्रवीत् ॥ ८९ ॥ ब्रह्मन्ब्रूही
यतां मह्यमाज्ञा तात वदस्व माम् ॥ यावदेनं निहन्म्यद्य शरेणैकेन वानरम् ॥ ९० ॥ इत्येवमुक्ते वचने सर्वभूतहिते रतः ॥ महर्षिः



गतानि

शकुनिः प्राह हेतुयुक्तं वचो महत् ॥ ९१ ॥ न कश्चित्तात केनापि वध्यते बध्यतेऽपि वा ॥ वधबन्धौ पूर्वकर्मवशौ नृपतिन
न्दन ॥ ९२ ॥ इत्येवमुक्तः शकुनिर्ऋषिं वचनमब्रवीत् ॥ ममाज्ञा दीयतां ब्रह्मन्शाधि किं करवाण्यहम् ॥ ९३ ॥ इत्युक्तः प्राह स
मुनिस्तं वानरपतिं वचः ॥ मम पुत्रस्त्वयोद्बद्धो जटाभिर्वटपादपे ॥ ९४ ॥ न चेन्मोचयितुं वृक्षाच्छक्नुयाच्चापि यत्नतः ॥ तद
नेन नरेन्द्रेण त्रिधा कृत्वा तु शाखिनम् ॥ ९५ ॥ शाखां वहति मत्सूनुः शिरसा तां विमोचय ॥ दशवर्षशतान्यस्य शाखां वै
वहतो गताः ॥ ९६ ॥ न चास्ति पुरुषः कश्चिद्यो ह्युन्मोचयितुं क्षमः ॥ स ऋषेर्वाक्यमाकर्ण्य कपिर्जाबालिनो जटाः ॥ ९७ ॥
शनैरुन्मोचयामास क्षणादुन्मोचिताश्च ताः ॥ ततः प्रीतो मुनिश्रेष्ठो वरदोऽभूदृतध्वजः ॥ ९८ ॥ कपिं प्राह वृणीष्व त्वं वरं यन्म
नसेप्सितम् ॥ ऋतध्वजवचः श्रुत्वा इमं वरमयाचत ॥ ९९ ॥ विश्वकर्मा महातेजाः कपित्वे प्रतिसंस्थितः ॥ ब्रह्मन्भवान्वरं मह्यं
यदि दातुं यथेच्छसि ॥ १०० ॥ तच्च दत्तो महाघोरो मम शापो निवर्त्यताम् ॥ चित्राङ्गदायाः पितरं मां त्वष्टारं तपोध
नम् ॥ १०१ ॥ अभिजानीहि भवतः शापाद्वानरतां गतम् ॥ सुबहूनि च पापानि मया यानि कृतानि हि ॥ १०२ ॥ कपिचाप
ल्यदोषेण तानि मे यान्तु संक्षयम् ॥ ऋतध्वजस्ततः प्राह शापस्यान्तो भविष्यति ॥ १०३ ॥ यदा घृताच्यां तनयं जनिष्यसि
महाबलम् ॥ इत्येवमुक्तः संहृष्टः स तथा कपिसत्तमः ॥ १०४ ॥ स्नातुं तूर्णं महानद्यामवतीर्णः कृशोदरि ॥ ततस्तु सर्वे क्रमशः
स्नात्वा च पितृदेवताः ॥ १०५ ॥ जग्मुर्हृष्टा रथैर्यस्ते घृताची दिवमुत्पतत् ॥ तामन्वेव महावेगः स कपिः प्लुवतां

वरः ॥ १०६ ॥ ददृशे रूपसंपन्नां घृताचीं स प्लवङ्गमः ॥ साऽपि तं बलिनां श्रेष्ठं दृष्ट्वैव कपिकुञ्जरम् ॥ १०७ ॥ ज्ञात्वाऽथ विश्व कर्माणं कामयामास कामिनी ॥ ततोऽनु पर्वतश्रेष्ठे ख्याते कोलाहले कपिः ॥ १०८ ॥ रमयामास तां तन्वीं सा च तं वानरो त्तमम् ॥ एवं रमन्तौ सुचिरं प्राप्तौ तौ विन्ध्यपर्वतम् ॥ १०९ ॥ रथेषु चापि तत्तीर्थं संप्राप्तास्ते नरोत्तमाः ॥ मध्याह्नसमये श्रान्ताः सप्तगोदावरं जलम् ॥ ११० ॥ प्राप्ता विश्रामहेत्वर्थमवतेरुस्तृषार्दिताः ॥ तेषां सारथयोऽश्वाश्च स्नात्वा पीतोदकाः प्लुताः ॥ १११ ॥ रमणीये वनोद्देशे प्रचाराय समुत्सृजन् ॥ शाड्वलाढ्येषु देशेषु मुहूर्तादेव वाजिनः ॥११२॥ तृप्ताः समाद्रव न्सर्वे देवालयमनुत्तमम् ॥ तुरङ्गखुरनिर्घोषं श्रुत्वा ता योषितां वराः ॥ ११३ ॥ किमेतदिति चोक्त्वैव प्रजग्मुर्हाटके श्वरम् ॥ आरुह्य वलभीं तास्तु समुदैक्षन्त सर्वशः ॥११४॥ अपश्यंस्तीर्थसलिल आप्लुताङ्गान्नरोत्तमान् ॥ ततश्चित्राङ्गदा दृष्ट्वा जटा मण्डलधारिणम् ॥ हसन्ती सुरथं प्राह संरोहत्पुलका सखीम्॥११५॥ योऽसौ युवा नीलघनप्रकाशः संलक्ष्यते दीर्घभुजः सुरूपः॥ स एव नूनं नरदेवसूनुर्वृतो मया पूर्वपतिः पतिर्यः ॥ ११६ ॥ यश्चैष जाम्बूनदतुल्यवर्णः श्वेतं जटाभारमधारयिष्यत् ॥ स एष नूनं तपतां वरिष्ठ ऋतध्वजो नात्र विचारणाऽस्ति ॥११७॥ ततोऽब्रवीदथो दृष्ट्वा दमयन्ती सखीजनम् ॥ एषोऽपरोऽस्यैव सुतो जाबालिर्नात्र संशयः ॥ ११८ ॥ इत्येवमुक्त्वा वचनं वलभ्या अवतीर्य च ॥ समासन्नाऽग्रतः शंभोर्गायन्ती गीतकान्तुभान् ॥ ॥ ११९ ॥ ॐ नमोऽस्तु शर्व शंभो त्रिणेत्र चारुगात्र त्रैलोक्यनाथ उमापते दक्षयज्ञविध्वंसकारक कामाङ्गनाशन घोरपापप्रणाशन

...संशयः ॥ ११८ ॥ ... दमयन्ती सखीजनम् ॥ एषाऽपराऽस्यैव सुता
॥ ११९ ॥ इत्येवमुक्त्वा वचनं वलभ्या अवतीर्य च ॥ समासन्नाऽग्रतः शंभोर्गायन्ती गीतकाञ्शुभान् ॥
ॐ नमोऽस्तु शर्व शंभो त्रिणेत्र चारुगात्र त्रैलोक्यनाथ उमापते दक्षयज्ञविध्वंसकारक कामाङ्गनाशन ...

महापुरुष महोग्रमूर्ते सर्वसत्त्वक्षयंकर शुभंकर महेश्वर त्रिशूलधर स्मरारे गुहाधामन् दिग्वासः महाचन्द्रशेखर जटाधर कपालमालाविभूषितशरीर वामचक्षुःक्षुभितदेवप्रजाध्यक्ष भगाक्ष्णोःक्षयंकर भीमसेननाथ पशुपते कामाङ्गदाहिन् चत्वरवासिन् शिव महादेव ईशान शंकर भीम भव वृषभध्वज कटभ प्रौढमहानाटयेश्वर भूतिरत अविमुक्तक रुद्र रुद्रेश्वर स्थाणो एकलिङ्ग कालिन्दीप्रिय श्रीकण्ठ नीलकण्ठ अपराजित रिपुभयंकर संतोषपते वामदेव अघोर तत्पुरुष महाघोर अघोरमूर्ते शान्त सरस्वतीकान्त सहस्रमूर्ते महोद्भव विभो कालाग्ने रुद्र रौद्र हर महीधर प्रिय सर्वतीर्थाधिवास हंस कामेश्वर केदाराधिपते परिपूर्ण मुचुकुन्द मधुनिवास कृपाणपाणे भयंकर विद्याराज सोमराज कामराज महीधर राजकन्याहृदब्जवसते समुद्रशायिन् गयामुख गोकर्ण ब्रह्मयोने सहस्रवक्त्राक्षिचरण हाटकेश्वर नमस्ते ॥ एतस्मिन्नन्तरे प्राप्ताः सव एवर्षिपार्थिवाः ॥ द्रष्टुं त्रैलोक्यकर्तारं त्र्यम्बकं हाटकेश्वरम् ॥ १२० ॥ समारूढाश्च सुस्नाता दहशुर्योषितः शुभाः ॥ स्थितास्तु पुरतस्तस्य गायन्त्यो गेयमुत्तमम् ॥१२१॥ ततः सुदेवतनयो विश्वकर्मसुतां प्रियाम् ॥ दृष्ट्वा हृषितचित्तस्तु संरोहत्पुलको बभौ ॥ १२२ ॥ ऋतध्वजोऽपि तन्वङ्गीं दृष्ट्वा चित्राङ्गदां स्थिताम् ॥ प्रत्यभिज्ञाय योगात्मा बालां मुदितमानसः॥१२३॥ततस्तेऽपि समभ्येत्य देवेशं हाटकेश्वरम् ॥ संपूजयन्तस्त्र्यक्षं ते संस्तुवन्तः क्रमात्ततः ॥ १२४ ॥ चित्राङ्गदाऽपि तान्दृष्ट्वा ऋतध्वजपुरोगमान् ॥ समं ताभिः कृशाङ्गीभिरभ्युत्थायाभ्यवादयत् ॥ १२५ ॥ स च ताः प्रतिनन्द्यैव समं पुत्रेण तापसः ॥ समं नृपतिभिर्हृष्टः संविवेश यथासुखम् ॥ १२६ ॥ ततः कपिवरः प्राप्तो घृताच्या सह

सुन्दरि ॥ स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम् ॥ १२७ ॥ ततोऽपश्यंश्च तां तन्वीं घृताचीं शुभदर्शनाम् ॥ साऽपि तां मातरं दृष्ट्वा हृष्टाभूद्वरवर्णिनी ॥१२८॥ ततो घृताची स्वां पुत्रीं परिष्वज्य न्यपीडयत् ॥ स्नेहात्सबाष्पनयना मुहुस्तां परिजिघ्रती ॥ १२९ ॥ ऋतध्वजस्ततः श्रीमान्कपिं वचनमब्रवीत् ॥ गच्छानेतुं गुह्यकं त्वमञ्जनाद्रौ महाजनम् ॥१३०॥ पातालादपि दैत्येशं वीरं कन्दरमालिनम् ॥ स्वर्गाद्गन्धर्वराजानं पर्जन्यं शीघ्रमानय ॥ १३१ ॥ इत्येवमुक्ते मुनिना प्राह देववती कपिम् ॥ गालवं वानरश्रेष्ठ इहानेतुं त्वमर्हसि ॥१३२॥ इत्येवमुक्ते वचने कपीन्द्रोऽमितविक्रमः ॥ गत्वाञ्जनं समामन्त्र्य जगामामरपर्वतम् ॥ १३३॥ पर्जन्यं तत्र चामन्त्र्य प्रेषयित्वा महाश्रमे ॥ सप्तगोदावरीतीर्थे पातालमगमत्कपिः ॥ १३४ ॥ तत्रामन्त्र्य महावीर्यः कपिः कन्दरमालिनम् ॥ पातालादतिनिष्क्रम्य महीं पर्यचरज्जवी ॥१३५॥ गालवं तपसो योनिं दृष्ट्वा माहिष्मतीमनु ॥ तमुत्पत्यानयच्छीघ्रं सप्तगोदावरीजलम् ॥ १३६ ॥ तत्र स्नात्वा विधानेन संप्राप्तो हाटकेश्वरम् ॥ ददृशे दमयन्तीं तां स्थितां वेदवतीमपि ॥ १३७ ॥ तं दृष्ट्वा गालवं चैव समुत्थायाभ्यवादयत् ॥ ते चापि नृपतिश्रेष्ठास्तं संपूज्य तपोधनम् ॥ १३८ ॥ प्रहर्षमतुलं गत्वा उपविष्टा यथासुखम् ॥ तेषूपविष्टेषु तदा वानरेण निमन्त्रिताः ॥ १३९ ॥ समायाता महात्मानो यक्षगन्धर्वदानवाः ॥ तानागतान्समीक्ष्यैव पुत्र्यस्ताः पृथुलोचनाः ॥ १४० ॥ स्नेहार्द्रनयनास्ता वै तदा सस्वजिरे पितॄन् ॥ दमयन्त्यादिका दृष्ट्वा पितृयुक्ता वरानना ॥१४१॥ सबाष्पनयना जाता विश्वकर्मसुता तदा ॥ अथ तामाह स मुनिः सत्यं सत्यध्वजो वचः ॥१४२॥ मा विषादं कृथाः पुत्रि पिताऽयं तव

स्नेहार्द्रनयनास्ता वै तदा सस्वजिरे पितॄन् ॥ दमयन्त्यादिका दृष्ट्वा पितृमुक्ता वरानना ॥१४१॥
सबाष्पनयना जाता विश्वकर्मसुता तदा ॥ अथ तामाह स मुनिः सत्यं सत्यध्वजो वचः ॥१४२॥ मा विषादं कृथाः पुत्रि पिताऽयं तव

वानरः ॥ सा तद्वचनमाकर्ण्य व्रीडोपहतचेतना ॥ १४३ ॥ कथं तु विश्वकर्माऽसौ वानरत्वं गतोऽधुना ॥ दुष्पुत्र्यां मयि जातायां
तस्मात्त्यक्ष्ये कलेवरम् ॥१४४॥ इति संचिन्त्य मनसा ऋतध्वजमुवाच ह ॥ परित्रायस्व मां ब्रह्मन्पापोपहतचेतसम् ॥ १४५ ॥
पितृघ्नी मर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ अथोवाच मुनिस्तन्वीं मा विषादं कृथाधुना ॥१४६॥ संभाव्येन विनाशोऽस्ति तन्मा
त्याक्षीः कलेवरम् ॥ भविष्यति पिता तुभ्यं भूयोऽप्यमरवर्द्धकिः ॥ १४७ ॥ जातेऽपत्ये घृताच्यां तु नात्र कार्या विचारणा ॥
इत्येवमुक्ते वचने मुनिना भावितात्मना ॥ १४८ ॥ घृताची तां समभ्येत्य प्राह चित्राङ्गदां वचः ॥ परित्यजस्व शोकं त्वं मासै
र्दशभिरात्मजः ॥ १४९ ॥ भविष्यति पितुस्तुल्यो मत्सकाशान्न संशयः ॥ इत्येवमुक्ता संहृष्टा बभौ चित्राङ्गदा तदा ॥१५०॥
स्वं प्रत्यैक्षत चार्वङ्गी विवाहं पितृदर्शनम् ॥ सर्वास्ता अपि तावन्तं कालं सुतनुकन्यकाः ॥१५१॥ प्रत्यैक्षन्त विवाहं हि तस्या
एव प्रियप्सया ॥ ततो दशसु मासेषु समतीतेष्वथाप्सराः ॥१५२॥ तस्मिन्गोदावरीतीरे प्रसूता तनयं नलम् ॥ जातेऽपत्य कपि
त्वाच्च विश्वकर्माऽप्यमुच्यत ॥१५३॥ समभ्येत्य प्रियां पुत्रीं पर्यष्वजत चादरात्॥ततः प्रीतेन मनसा सस्मार सुरवर्द्धकिः ॥१५४॥
सुराणामधिपं शक्रं सहैव सुरकिन्नरैः ॥ त्वष्ट्राऽथ संस्मृतः प्राप्तः शक्रोऽमरगणैर्वृतः ॥१५५॥ सुरैर्महेन्द्रः संप्राप्तस्तत्तीर्थं हाटका
ह्वयम् ॥ समायातेषु देवेषु गन्धर्वेष्वप्सरस्सु च ॥१५६॥ इन्द्रद्युम्नो मुनिश्रेष्ठमृतध्वजमुवाच ह ॥जाबालेर्दीयतां ब्रह्मन्सुता कन्दरमा
लिनः ॥१५७॥ गृह्णातु विधिवत्पाणिं दत्तय तनया तव ॥ दमयन्ती च शकुनिः परिणेता स्वरूपवान् ॥१५८॥ ममेयं वेदवत्यस्तु

हुत्वा हव्यं विधानतः ॥ बाढमित्यब्रवीत्सोऽपि मुनिर्मनुसुतं नृपम् ॥ १५९ ॥ ततोऽनुजह्रुस्तं दृष्टा विवाहविधिमुत्तमम् ॥
ऋत्विजो गालवाद्याश्च हुत्वा हव्यं विधानतः ॥ १६० ॥ गायन्ति तत्र गन्धर्वा नृत्यन्त्यप्सरसस्तथा ॥ आदौ जाबालिनः पाणि
गृहीतो दैत्यकन्यया ॥ १६१ ॥ इन्द्रद्युम्नेन तदनु वेदवत्या विधानतः ॥ ततः शकुनिना पाणिर्गृहीतो यक्षकन्यया ॥ १६२ ॥
चित्राङ्गदायाः कल्याणि सुरथः पाणिमग्रहीत् ॥ एवं क्रमाद्विवाहस्तु निर्वृत्तस्तनुमध्यमे ॥१६३॥ वृत्ते मुनिर्विवाहे तु शक्रादीन्प्राह
दानवान् ॥ अस्मिंस्तीर्थे भवद्भिस्तु सप्तगोदावरे सदा ॥ १६४ ॥ स्थेयं विशेषतो मासमिमं माधवमुत्तमम् ॥ बाढमुक्त्वा सुराः सर्वे
जग्मुर्हृष्टा दिवं क्रमात् ॥१६५॥ मुनयो मुनिमादाय सपुत्रं जग्मुरादरात् ॥ भार्याश्चादाय राजानः स्वंस्वं नगरमागताः ॥१६६॥
संहृष्टाः संमुखं तस्थुर्भुञ्जाना विषयेन्द्रियान् ॥ चित्राङ्गदायाः कल्याणि पूर्ववृत्तं पुरा किल ॥ तस्मात्कमलपत्राक्षि भजस्व लल
नोत्तमे ॥१६७॥ इत्येवमुक्त्वा नरदेवसूनुस्तां भूमिदेवस्य सुतां वरोरुम् ॥ स्तुवन्मृगाक्षीं मृदुना क्रमेण सा चापि वाक्यं नृपतिं
बभाषे ॥ १६८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ अरजा उवाच ॥ नात्मानं तव
दास्यामि बहुनोक्तेन किं तव ॥ रक्षन्ती भवतः शापादात्मानं च महीपते ॥ १ ॥ प्रह्लाद उवाच ॥ इत्थं विवदमानां तां भार्गवेन्द्र
सुतां बलात् ॥ कामोपहतचित्तात्मा व्यध्वंसयत मन्दधीः ॥२॥ तां कृत्वा च्युतचारित्रां मदान्धः पृथिवीपतिः ॥ निश्चक्रामाश्र
मात्तस्माद्गतश्च नगरं निजम् ॥ ३ ॥ साऽपि शुक्रसुता तन्वी अरजा रजसा प्लुता ॥ आश्रमादथ निर्गत्य बहिस्तस्थावधोमुखी
॥४॥ चिन्तयन्ती स्वपितरं रुदती च मुहुर्मुहुः ॥ महाग्रहोपरुद्धेव रोहिणी शशिनः प्रिया ॥ ५ ॥ ततो बहुतिथे काले समाप्ते यज्ञ

मूर्खश्च तस्याप्यनुजः सुदुर्मतिः ॥ सुवर्णहारी यदुरुत्तमौजा एते विनेशुर्ह्यनयात्पुरा हि ॥ ३४ ॥ तस्माद्धर्मो न संत्याज्यो धर्मो हि परमा गतिः ॥ धर्महीना नरा यान्ति रौरवं नरकं महत् ॥ ३५ ॥ धर्मस्तु गदितः पुंभिस्तारणं दिवि चेह च ॥ पतनाय तथाऽधर्म इह लोके परत्र च ॥ ३६ ॥ त्याज्यं धर्मान्वितैर्नित्यं परदारोपसेवनम् ॥ नयन्ति परदारास्तु नरकानेकविंशतिम् ॥ सर्वेषामेव वर्णानामेष धर्म इहोच्यते ॥ ३७ ॥ परार्थपरदारेषु यस्तु वाञ्छां करिष्यति ॥ स याति नरकं घोरं रौरवं बहुलाः समाः ॥ ३८ ॥ एवं पुरा सुरपते देवर्षिरसितोऽव्ययः ॥ प्राह धर्मव्यवस्थानं खगेन्द्रायारुणाय हि ॥ ३९ ॥ तस्मात्तु दूरतो वर्जेत्परदारान्विचक्षणः ॥ नयन्ति निकृतप्रज्ञं परदाराः पराभवम् ॥ ४० ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने प्रह्लादं प्राह चान्धकः ॥ भवान्धर्मपरस्त्वेको नाहं धर्मं समाचरे ॥ ४१ ॥ इत्येवमुक्त्वा प्रह्लादमन्धकः प्राह शम्बरम् ॥ गच्छ शम्बर शैलेन्द्रं मन्दरं वद शंकरम् ॥ ४२ ॥ भिक्षो किमर्थं शैलेन्द्रं स्वर्गतुल्यं सकन्दरम् ॥ परिरक्षसि केनाद्य केन दत्तो वदस्व माम् ॥ ४३ ॥ तिष्ठन्ति शासने मह्यं देवाः शक्रपुरोगमाः ॥ तत्किमर्थं निवससे मामनादृत्य मन्दरे ॥ ४४ ॥ यदीष्टस्तव शैलेन्द्रः क्रियतां वचनं मम ॥ येयं हि भवतः पत्नी सा मे शीघ्रं प्रदीयताम् ॥ ४५ ॥ इत्युक्तः स तदा तेन शम्बरो मन्दरं द्रुतम् ॥ जगाम तत्र यत्रास्ते सह देव्या पिनाकधृक् ॥ ४६ ॥ गत्वोवाचान्धकवचो याथातथ्यं दनोः सुतः ॥ तमुत्तरं हरः प्राह शृण्वत्या गिरिकन्यया ॥ ४७ ॥ ममायं मन्दरो दत्तः सहस्राक्षेण धीमता ॥ तन्न शक्तोऽस्मि संत्यक्तुं विनाऽऽज्ञां वृत्रवैरिणः ॥ ४८ ॥ यच्चाब्रवीद्दीयतां मे गिरिपुत्रीति दानवः ॥ तदेषा यातु स्वं

वृष : प-नं वाहनमस्य ।



त्वियम् ॥ प्राकृताऽपि दहेन्नारी किमुताहोऽद्रिनन्दिनी ॥२०॥ शंकरोऽपि न दैत्येश शक्यो जेतुं सुरासुरैः ॥ न द्रष्टुमपि शक्यो ऽसौ किमु योधयितुं रणे ॥ २१ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने क्रुद्धस्ताम्रेक्षणः श्वसन् ॥ वाक्यमाह महातेजाः प्रह्लादं चान्धकासुरः ॥ २२ ॥ किं मयाऽसौ रणे योद्धुं शक्तस्त्रिणयनोऽसुर ॥ एकाकी धर्मरहितो भस्मारुणितविग्रहः ॥ २३ ॥ नान्धको बिभियादिन्द्राद्दानवेभ्यः कथंचन ॥ स कथं वृषपत्राख्याद्विभेति पुरवीक्षणात् ॥ २४ ॥ तच्छ्रुत्वाऽस्य वचो घोरं प्रह्लादः प्राह नारद ॥ सद्यं गर्ह्यं न भवता विरुद्धं धर्मतोऽर्थतः ॥ २५ ॥ हुताशनपतङ्गाभ्यां सिंहक्रोष्टुकयोरिव ॥ गजेन्द्रमशकाभ्यां च रुक्म पाषाणयोरपि ॥ २६ ॥ एतेषामेव गदितं यावदन्तरमन्धक ॥ तावदेवान्तरं नास्ति भवतो हि हरस्य च ॥ २७ ॥ वारितोऽसि मया वीर भूयोभूयश्च वार्यसे ॥ शृणुष्व वाक्यं देवर्षेरसितस्य महात्मनः ॥ २८ ॥ यो धर्मशीलो जितमानरोषो विद्याविनीतो न परोपतापी ॥ स्वदारतुष्टः परदारवर्जं न तस्य लोके भयमस्ति किंचित् ॥ २९ ॥ यो धर्महीनः कलहप्रियः सदा परोपतापी श्रुतशास्त्रवर्जितः ॥ परार्थदारेप्सुरवर्णसंगमी सुखं स विन्देन्न परत्र चेह ॥ ३० ॥ धर्मान्वितोऽभूद्भगवान्प्रभाकरः संत्यक्तरोषश्च मुनिः स वारुणिः ॥ विद्यान्वितोऽभून्मनुरर्कपुत्रः स्वदारसंतुष्टमनास्त्वगस्त्यः ॥ ३१ ॥ एतानि पुण्यानि कृतान्यमीभिर्न पाप बद्धानि कुलक्रमोत्तया ॥ तेजोऽन्विताः शापवरक्षमाश्च जातास्तु सर्वे सुरसिद्धपूज्याः ॥ ३२ ॥ अधर्मयुक्तोद्भमितो बभूव विप्रश्च नित्यं कलहप्रियोऽभूत् ॥ परोपतापी नमुचिर्दुरात्मा परावलेपी सनको हि राजा ॥ ३३ ॥ परार्थलिप्सुर्दितिजो हिरण्यहङ्कु

नित्यं कलहप्रियोऽभूत् ॥ परोपतापी नमुचिर्दुरात्मा परावलेपी सनको हि राजा ॥ २२ ॥ परार्थलिप्सुर्दितिजो हिरण्यदृङ्

मूर्खश्च तस्याप्यनुजः सुदुर्मतिः ॥ सुवर्णहारी यदुरुत्तमौजा एते विनेशुर्ह्यनयात्पुरा हि ॥ २४ ॥ तस्माद्धर्मो न संत्याज्यो धर्मो हि परमा गतिः ॥ धर्महीना नरा यान्ति रौरवं नरकं महत् ॥ ३५ ॥ धर्मस्तु गदितः पुंभिस्तारणं दिवि चेह च ॥ पतनाय तथाऽधर्म इह लोके परत्र च ॥ ३६ ॥ त्याज्यं धर्मान्वितैर्नित्यं परदारोपसेवनम् ॥ नयन्ति परदारास्तु नरकानेकविंशतिम् ॥ सर्वेषामेव वर्णानामेष धर्म इहोच्यते ॥ ३७ ॥ परार्थपरदारेषु यस्तु वाञ्छां करिष्यति ॥ स याति नरकं घोरं रौरवं बहुलाः समाः ॥ ३८ ॥ एवं पुरा सुरपते देवर्षिरसितोऽव्ययः ॥ प्राह धर्मव्यवस्थानं खगेन्द्रायारुणाय हि ॥ ३९ ॥ तस्मात्तु दूरतो वर्जेत्परदारान्विचक्षणः ॥ नयन्ति निकृतप्रज्ञं परदाराः पराभवम् ॥ ४० ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने प्रह्लादं प्राह चान्धकः ॥ भवान्धर्मपरस्त्वेको नाहं धर्मं समाचरे ॥ ४१ ॥ इत्येवमुक्त्वा प्रह्लादमन्धकः प्राह शम्बरम् ॥ गच्छ शम्बर शैलेन्द्रं मन्दरं वद शंकरम् ॥ ४२ ॥ भिक्षो किमर्थं शैलेन्द्रं स्वर्गतुल्यं सकन्दरम् ॥ परिरक्षसि केनाद्य केन दत्तो वदस्व माम् ॥ ४३ ॥ तिष्ठन्ति शासने मह्यं देवाः शक्रपुरोगमाः ॥ तत्किमर्थं निवससे मामनादृत्य मन्दरे ॥ ४४ ॥ यदीष्टस्तव शैलेन्द्रः क्रियतां वचनं मम ॥ येयं हि भवतः पत्नी सा मे शीघ्रं प्रदीयताम् ॥ ४५ ॥ इत्युक्तः स तदा तेन शम्बरो मन्दरं द्रुतम् ॥ जगाम तत्र यत्रास्ते सह देव्या पिनाकधृक् ॥ ४६ ॥ गत्वोवाचान्धकवचो याथातथ्यं दनोः सुतः ॥ तमुत्तरं हरः प्राह शृण्वत्या गिरिकन्यया ॥ ४७ ॥ ममायं मन्दरो दत्तः सहस्राक्षेण धीमता ॥ तन्न शक्तोऽस्मि संत्यक्तुं विनाऽऽज्ञां वृत्रवैरिणः ॥ ४८ ॥ यच्चाब्रवीद्दीयतां मे गिरिपुत्रीति दानवः ॥ तदेषा यातु स्वं

कामं नाहं धारयितुं क्षमः ॥ ४९ ॥ ततोऽब्रवीद्गिरिसुता शम्बरं मुनिसत्तम ॥ ब्रूहि गत्वाऽन्धकं वीर मम वाक्यं विपश्चितम् ॥५०॥ अहं पदातिः संग्रामे भवानीशस्तदा हि नौ ॥ प्राणदूतं परिस्तीर्य यो जेष्यति स लप्स्यते ॥५१॥ इत्येवमुक्तो मतिमान्शम्बरोऽन्धकमागमत् ॥ समागम्याब्रवीद्वाक्यं सर्वं गौर्या च भाषितम् ॥ ५२ ॥ तच्छ्रुत्वा दानवपतिः क्रोधदीप्तेक्षणः श्वसन् ॥ समाहूयाब्रवीद्वाक्यं दुर्योधनमिदं वचः ॥ ५३ ॥ गच्छ शीघ्रं महाबाहो भेरीं सान्नाहिकीं दृढाम् ॥ ताडयस्वाद्य विश्रब्धं दुःशीलामिव योषितम् ॥ ५४ ॥ समादिष्टोऽन्धकेनाथ भेरीं दुर्योधनो बलात् ॥ ताडयामास वेगेन यथा प्राणेन भूयसा ॥ ५५ ॥ सा ताडिता बलवता भेरी दुर्योधनेन हि ॥ सस्वान भैरवाकारं रौरवं रासभी यथा ॥५६॥ तथा तं स्वरमाकर्ण्य सर्व एव महासुराः ॥ समायाताः सभां तूर्णं किमेतदिति वादिनः ॥५७॥ याथातथ्यं च तान्सर्वानाह सेनापतिर्बली ॥ ते चापि बलिनां श्रेष्ठाः सन्नद्धा युद्धकाङ्क्षिणः ॥ ५८ ॥ सहान्धका निर्ययुस्ते गजैरुष्ट्रैर्हयै रथैः ॥ अन्धको रथमास्थाय पञ्चनल्वं प्रमाणतः ॥ ५९ ॥ त्र्यम्बकं स पराजेतुं कृतबुद्धिर्विनिर्ययौ ॥ जम्भः कुजम्भो हुण्डश्च तुहुण्डः शम्बरो बलिः ॥ ६० ॥ बाणः कार्तस्वरो हस्ती सूर्यशत्रुर्महोदरः ॥ अयःशङ्कुः शिबिः शाल्वो वृषपर्वा विरोचनः ॥ ६१ ॥ हयग्रीवः कालनेमिः संह्लादः कालनाशनः ॥ सरभश्चैव सबलो बलो वृत्रश्च वीर्यवान् ॥६२॥ दुर्योधनश्च पाकश्च विपाकः कालशम्बरौ ॥ एते चान्ये च बहवो महावीर्या महाबलाः ॥ प्रजग्मुरुत्सुका योद्धुं नानायुधधरा रणे ॥६३॥ इत्थं दुरात्मा दनुदैत्यपालस्तदाऽन्धको योद्धुमना हरेण ॥ महाचलं मन्दरमभ्युपेयिवान्स काल





इति श्रीवामनपुराणे ... अन्धकसैन्यनिर्गमनं नाम पञ्चषष्टितमो

पाशावशितो हि मन्दधीः ॥६४॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे अन्धकसैन्यनिर्गमनं नाम पञ्चषष्टितमो
ऽध्यायः॥६६॥पुलस्त्य उवाच ॥ हरोऽपि समरासन्नः समाहूयाथ नन्दिनम् ॥ प्राहाऽऽमन्त्रय शैलाद्यान्ये स्थितास्तव शासने ॥
॥१॥ ततो महेशवचनान्नन्दी तूर्णतरं गतः ॥ उपस्पृश्य जलं श्रीमान्सस्मार गणनायकान् ॥२॥ नन्दिना संस्मृताः सर्वे गणनाथाः
सहस्रशः ॥ समुत्पत्य त्वरायुक्ताः प्रणतास्त्रिदशेश्वरम् ॥ ३ ॥ आगतांश्च गणान्नन्दी कृताञ्जलिपुटोऽव्ययः ॥ सर्वान्निवेदयामास
शंकराय महात्मने ॥ ४ ॥ नन्दिरुवाच ॥ येन तान्पश्यसे शंभो त्रिनेत्राञ्जटिलाञ्छुचीन् ॥ एते रुद्रा इति ख्याताः कोट्यस्त्वे
कादशैव तु ॥ ५ ॥ वानरास्यान्पश्यसे यान्शार्दूलसमविक्रमान् ॥ एतेषां द्वारपालाश्च सज्जमाना यशोधनाः ॥६॥ षण्मुखान्प
श्यसे यांश्च शक्तिपाणीञ्छिखिध्वजान् ॥ षट् च षष्टिस्तथा कोट्यः स्कन्दनाम्नः कुमारकान् ॥ ७ ॥ एतावत्यस्तथा कोट्यः
शाखनाम्नः षडाननाः ॥ विशालास्तावदेवोक्ता नैगमेयाश्च शंकर ॥ ८ ॥ सप्तकोटिशतं शंभो अमी वै प्रमथोत्तमाः ॥ एकैकं प्रति
देवेश तावत्यो ह्यपि मातरः ॥ ९ ॥ भस्मारुणितदेहाश्च त्रिनेत्राः शूलपाणयः ॥ एते शैवा इति प्रोक्तास्तत्र चोक्ता गणेश्वराः ॥१०॥
तथा पाशुपताश्चान्ये भस्मप्रहरणा विभो ॥ एते गणास्त्वसंख्याताः साहाय्यार्थं समागताः ॥११॥ पिनाकधारिणो रौद्रा गणाः
कालमुखाः परे ॥ तव भक्ताः समायाता जटामण्डलिनोऽधुना ॥ १२ ॥ खट्वाङ्गयोधिनो वीरा रक्तचन्दनभूषिताः ॥ इमे प्राप्ता

गणा योद्धुं महाव्रतिन उत्तमाः ॥ १३ ॥ दिग्वाससो मौलिनश्च घण्टाप्रहरणाः परे ॥ निराश्रया नाम गणाः समायाताश्च

हे विभो ॥ १४ ॥ सार्धद्विनेत्राः पद्माक्षाः श्रीवत्साङ्कितवक्षसः ॥ समायाताः खगारूढा वृषभध्वजिनोऽव्ययाः ॥१५॥ महापाशुपता नाम चक्रशूलधरास्तथा ॥ भैरवो विष्णुना सार्द्धमभेदेनार्चितो हि यैः ॥१६॥ इमे मृगेन्द्रवदनाः शूलबाणधनुर्धराः ॥ गणास्त्वद्रोमसंभूता वीरभद्रपुरोगमाः ॥ १७ ॥ एते चान्ये च बहवः शतशोऽथ सहस्रशः ॥ साहाय्यार्थं तवायाता यथा प्रीत्याऽऽदिशस्व तान् ॥ १८ ॥ ततोऽभ्येत्य गणाः सर्वे प्रणेमुर्वृषकेतनम् ॥ सत्कारेणैव च गणान्समाश्वास्योपवेशयत् ॥१९॥ महापाशुपतान्दृष्ट्वा समुत्थाप्य महेश्वरः ॥ संपर्यष्वजताध्यक्षांस्ते प्रणेमुर्महेश्वरम् ॥ २० ॥ ततस्तदद्भुततमं दृष्ट्वा सर्वे गणेश्वराः ॥ सुविस्मितास्तदा ह्यासन्किमिदं चिन्तयंस्त्विति ॥ २१ ॥ विस्मिताक्षान्गणान्दृष्ट्वा शैलादिर्योगिनां वरः ॥ प्राह प्रहस्य देवेशं शूलपाणिं गणाधिपम् ॥ २२ ॥ विस्मिता हि गणा देव सर्व एव महेश्वर ॥ महापाशुपतानां यद्दत्तमालिङ्गनं यतः ॥ २३ ॥ जातं तेषां महादेव स्फुटं त्रैलोक्यबृंहकम् ॥ रूपं ज्ञानं विवेकं च तद्वदस्वेच्छया विभो ॥ २४ ॥ प्रमथाधिपतेर्वाक्यं विदित्वा भूतभावनः ॥ बभाषे तान्गणान्सर्वान्भावाभावविचारिणः ॥ २५ ॥ रुद्र उवाच ॥ भवद्भिर्भक्तिसंयुक्तैर्हरो भावेन पूजितः ॥ अहंकारविमूढैश्च निन्दद्भिर्वैष्णवं पदम् ॥ २६ ॥ तेन ज्ञानेन भवतां सादृश्यं हि निवारितम् ॥ योऽहं स भगवान्विष्णुर्यश्चासौ सोऽहमव्ययः ॥ २७ ॥ नावाभ्यां वै विशेषोऽस्ति एका मूर्तिर्द्विधा स्थिता ॥ तदमीभिर्नरव्याघ्रैर्भक्तिभावयुतैर्गणाः ॥ २८ ॥ यथाऽहं वै परिज्ञातो न भवद्भिस्तथा हरिः ॥ यथा विनिन्दितो ह्यस्माद्भवद्भिर्मूढबुद्धिभिः ॥२९॥ तेन ज्ञानं हि वो नष्टं नातस्त्वालिङ्गिता

वै परिज्ञातो न भवद्भिस्तथा हरिः ॥ यथा विनिन्दितो ह्यस्माद्भवद्भिर्मूढबुद्धिभिः ॥२९॥ तेन ज्ञानं हि वो नष्टं नातस्त्वालिङ्गिता

मया ॥ इत्येवमुक्ते वचने गणाः प्रोचुर्महेश्वरम् ॥ ३० ॥ कथं भवान्सहैक्यं हि संस्थितो ज्ञाननिर्मलः ॥ शुद्धस्फटिकसङ्काशः शान्तः शुक्लो निरञ्जनः ॥३१॥ स चाप्यञ्जनसङ्काशः कथं तेनेह युज्यते ॥ तेषां वचनमर्थाढ्यं श्रुत्वा जीमूतकेतनः ॥ ३२॥ विह स्य मेघगम्भीरं गणानेवमुवाच ह ॥ श्रूयतां सर्वमाख्यास्ये स्वयशोवर्द्धनं वचः ॥ ३३ ॥ न त्वयोग्याश्च यूयं हि महाज्ञानस्य कर्हिचित ॥ अपवादभयाद्गुह्यं भवतां हि प्रकाश्यते ॥ ३४ ॥ प्रीत्यैवमपि वै तेन यन्मे चेतसि नित्यशः ॥ एकरूपं चैकदेहं कुरुध्वं यत्र चाश्रिताः ॥ ३५ ॥ पयसा हविराद्यश्च स्नापयेत्तत्प्रयत्नतः ॥ चन्दनादिभिरेवाग्र्यैर्न मे प्रीतिः प्रजायते ॥ ३६ ॥ यत्नात्क्रकचमादाय च्छिन्दध्वं मम विग्रहम् ॥ तथापि दृश्यते विष्णुर्मम देहे सनातनः ॥ ३७ ॥ एकाहारो भवेद्यस्तु विष्णुभ क्तश्च यो भवेत् ॥ उभौ तौ सदृशौ लोके नात्र कार्या विचारणा ॥ ३८ ॥ नायं वदिष्यते लोको भेदं चैव कदाचन ॥ अतोऽर्थं न क्षिपाम्यद्य भवतो नरकेऽद्भुते ॥ ३९ ॥ यन्निन्दध्वं जगन्नाथं पुष्कराक्षं च मन्मथम् ॥ सदैव भगवान्सर्वः सर्वव्यापी गणे श्वरः ॥ ४० ॥ न तस्य सदृशो लोके विद्यते सचराचरे ॥ श्वेतमूर्तिः स भगवान्पीतो रक्तो जगत्पतिः ॥४१॥ तस्मात्परतरं लोके नान्यत्सत्यं हि विद्यते ॥ सात्त्विकं राजसं चैव तामसं मिश्रकं तथा ॥ ४२ ॥ स एव धत्ते भगवान्सर्वपूज्यः सदाशिवः ॥ शंक रस्य वचः श्रुत्वा शैलाद्याः प्रमथोत्तमाः ॥ ४३ ॥ प्रत्यूचुर्भगवन्ब्रूहि सदाशिवविशेषणम् ॥ तेषां तद्भाषितं श्रुत्वा प्रमथानां सुरे श्वरः ॥ ४४ ॥ दर्शयामास तद्रूपं स च शैवं निरञ्जनम् ॥ सहस्रचक्रचरणं सहस्रभुजमश्वरम् ॥ ४५ ॥ दण्डपाणिं सुदुर्दृश्यं लोकै

र्व्याप्तं समन्ततः ॥ दण्डसंस्थानि दृश्यन्ते देवप्रहरणानि च ॥ ४६ ॥ ततस्त्वेकमुखं भूयो ददृशुः शंकरं गणाः ॥ रौद्रैश्च वैष्णवैश्चैव धृतं चिह्नैः सहस्रशः ॥ ४७ ॥ अर्द्धेन वैष्णववपुरर्द्धेन हरविग्रहः ॥ खगध्वजं वृषारूढं खगारूढं वृषध्वजम् ॥ ४८ ॥ यथा यथा त्रिनयनो रूपं धत्ते गुणाग्रणीः ॥ तथा तथा च जायन्ते महापाशुपता गणाः ॥ ४९ ॥ ततोऽभवच्चैकरूपी शंकरो बहुरूपवान् ॥ क्षणाच्छ्वेतः क्षणाद्रक्तः पीतो नीलः क्षणादपि ॥ ५० ॥ मिश्रको वर्णहीनश्च महापाशुपतस्तथा ॥ क्षणाद्भवति रुद्रेन्द्रः क्षणाच्छंभुः प्रभाकरः ॥ ५१ ॥ क्षणार्द्धाच्छंकरो विष्णुः क्षणाच्छर्वः पितामहः ॥ ततस्तदद्भुततमं दृष्ट्वा शैलादयो गणाः ॥ ५२ ॥ अथाजानन्त चैक्येन ब्रह्मविष्णिवन्द्रभास्करम् ॥ यदा त्वभेदेनाजानन्देवदेवं सनातनम् ॥ ५३ ॥ तदा निर्धूतपापास्ते समजायन्त पार्षदाः ॥ तेष्वेवं धूतपापेषु अभिन्नेषु हरीश्वरः ॥ ५४ ॥ प्रीतात्मा विबभौ शंभुः प्रीत्या युक्तोऽब्रवीद्वचः ॥ परितुष्टोऽस्मि सर्वेषां ज्ञानेनानेन सुव्रताः ॥ ५५ ॥ वृणुध्वं वरमानन्त्यं दास्ये वो मनसेप्सितम् ॥ ऊचुस्ते देहि भगवन्वरमस्माकमीश्वर ॥ भिन्नदृष्ट्या महत्पापं यदाप्तं तत्प्रयातु नः ॥ ५६ ॥ पुलस्त्य उवाच ॥ बाढमित्यब्रवीच्छर्वश्चक्रे निर्धूतकल्मषान् ॥ संपर्यष्वजताव्यक्तस्तान्सर्वान्गणयूथपान् ॥ ५७ ॥ इति विभुना प्रणतार्तिहरेण गणपतयः सहयोपिषमेघरथेन श्रुतिगदितान्न ( ? ) गमेन विबुधावतंसेन गिरिमवेत्य ॥ ५८ ॥ आलक्ष्यादितो गिरिकाः प्रसर्वैर्घतासैराभाति शुक्लतनुरीश्वरपादजुष्टः ॥ नीलाजिनाततनुः शरदभ्रवर्णो यद्वद्विभाति बलवान्वृषभो हरस्य ॥ ५९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादु

गमन विबुधावतंसैन गिरिमवस्य ॥ ६८ ॥ आच्छादितो गिरिवरः प्रमथैर्घनाभैराभाति शुक्लतनुरा...
नीलाजिनाततनुः शरदभ्रवर्णो यद्वद्विभाति बलवान्वृषभो हरस्य ॥ ६९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादु

र्भावे सदाशिवदर्शनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ पुलस्त्य उवाच ॥ एतस्मिन्नन्तरे प्राप्तः समं दैत्यैस्तथाऽन्धकः ॥
मन्दरं पर्वतश्रेष्ठं प्रमथाश्रितकन्दरम् ॥ १ ॥ प्रमथा दानवान्दृष्ट्वा चक्रुः किलकिलाध्वनिम् ॥ प्रमथाश्चापि संरब्धा जघ्नुस्तूर्या
ण्यनेकशः ॥ २ ॥ स चावृणोन्महानादो रोदसी प्रलयोपमः ॥ शुश्राव वायुमार्गस्थो विघ्ननाथो विनायकः ॥ ३ ॥ समभ्ययात्
त्समं क्रुद्धः प्रमथैरभिसंवृतः ॥ मन्दरं पर्वतश्रेष्ठं ददृशे पितरं तथा ॥ ४ ॥ प्रणिपत्य तथा भक्त्या वाक्यमाह महेश्वरम् ॥ किं
तिष्ठसि जगन्नाथ समुत्तिष्ठ रणोत्सुक ॥ ५ ॥ ततो विघ्नेश्वरवचो जगन्नाथोऽम्बिकां प्रति ॥ प्राह यामोऽन्धकं हन्तुं स्वयमेवाप्रम
त्तया ॥ ६ ॥ ततो गिरिसुता देवं समालिङ्ग्य पुनः पुनः ॥ हरं निरीक्ष्य सस्नेहं प्राह गच्छ तथाऽन्धकम् ॥ ७ ॥ ततोऽमरगुरोर्गौरी
चन्दनं रोचनोज्ज्वलम् ॥ प्रतिवन्द्य सुसंप्रीता पादावेव त्ववन्दत ॥ ८ ॥ ततो हरः प्राह वचो वयस्यां मालिनीमिति ॥ जयां च
विजयां चैव जयन्तीं चापराजिताम् ॥ ९ ॥ युष्माभिरप्रमत्ताभिः स्थेयं गेहे सुरक्षिते ॥ रक्षणीया प्रयत्नेन गिरिपुत्री प्रमा
दतः ॥ १० ॥ इति संदिश्य ताः सर्वाः समारुह्य वृषं प्रभुः ॥ निर्जगाम गृहाद्धृष्टो जग्मुस्ते पृष्ठतो गणाः ॥ ११ ॥ अगच्छं
स्तस्य भवनादीश्वरस्य गणाधिपाः ॥ समायाताः परीवार्य जयशब्दांश्च चक्रिरे ॥ १२ ॥ रणाय निर्गच्छति लोकपाले महेश्वरे
शूलधरे महर्षे ॥ शुभानि सौम्यानि सुमङ्गलानि चिह्नानि शंसन्ति जयं हि तस्य ॥ १३ ॥ शिवा स्थिता वामतरे च भागे प्राया

त्तथाऽग्रे सुरसंनदन्ती ॥ क्रव्यादसंघाश्च तथाऽऽमिषैषिणः प्रयान्ति हृष्टास्तृषितासृगर्थे ॥ १४ ॥ दक्षिणाङ्ग नखान्तं वै समकम्पत

शूलिनः ॥ शकुनिश्चापि हारीतो मौनी याति पराङ्मुखः ॥ १५ ॥ निमित्तमीदृशं दृष्ट्वा भूतभव्यभवो विभुः ॥ शैलादिं प्राह वचनं सस्मितं शशिशेखरः ॥ १६ ॥ शशिशेखर उवाच ॥ नन्दिञ्जयो भाव्यतेऽद्य न कथंचित्पराजयः ॥ निमित्तानीह दृश्यन्ते संभूतानि गणेश्वर ॥ १७ ॥ तच्छंभुवचनं श्रुत्वा शैलादिः प्राह शंकरम् ॥ संदेहः को महादेव जय त्वं शात्रवान्बहून् ॥ १८ ॥ इत्येवमुक्त्वा वचनं नन्दी रुद्रगणांस्तथा ॥ समादिदेश युद्धाय महापाशुपतैः सह ॥ १९ ॥ तेऽभ्येत्य दानवबलं विनिघ्नन्तश्च वेगिनः ॥ नानाशस्त्रधरा वीरा वृक्षानशनयो यथा ॥ २० ॥ ते भिद्यमाना बलिभिः प्रमथैर्दैत्यदानवाः ॥ प्रवृत्ताः प्रमथान्हन्तुं कूटमुद्गरपाणयः ॥ २१ ॥ ततोऽम्बरतले देवाः सेन्द्रविष्णुपितामहाः ॥ससूर्याग्निपुरोगाश्च समायाता दिदृक्षवः ॥ २२ ॥ ततोऽम्बरतले घोषः सस्वनः समजायत ॥ गीतवाद्यादिसंमिश्रो दुन्दुभीनां कलिप्रिय ॥ २३ ॥ ततः पश्यत्सु देवेषु महापाशुपतादयः ॥ गणास्तद्दानवं सैन्यं निघ्नन्ति स्म सुकोपिताः ॥ २४ ॥ चतुरङ्गबलं दृष्ट्वा वध्यमानं गणेश्वरैः ॥ क्रोधान्वितस्तु दण्डस्तु वेगेनाभिससार ह ॥ २५ ॥ आदाय परिघं घोरं पट्टोद्बद्धमयस्मयम् ॥ राजते तस्य हस्तस्थमिन्द्रध्वजमिवोद्धृतम् ॥ २६ ॥ तं भ्रामयानो बलवान्निजघान रणे गणान् ॥ रुद्रादीन्स्कन्दपर्यन्तांस्तेऽभज्यन्त भयातुराः ॥ २७ ॥ तच्च भग्नं बलं दृष्ट्वा गणनाथो विनायकम् ॥ समाद्रवत वेगेन तद्दण्डं दनुपुंगवम् ॥ २८ ॥ आपतन्तं गणपतिं दृष्ट्वा दैत्यो दुरात्मवान् ॥ परिघं पातयामास कुम्भमध्ये महाबलः ॥ २९ ॥ विनायकस्य भिपतः परिघं वज्रभूषणम् ॥ शतधाऽन्वगमद्ब्रह्मन्मेरोः कूटमि

परिघं पातयामास कुम्भमध्ये महाबलः ॥ २९ ॥ विनायकस्य भिपतः परिघं वज्रभूषणम् ॥ शतधाऽन्वगमद्ब्रह्मन्मेरोः कूटमि
वाशनिः ॥ ३० ॥ परिघं विफलं दृष्ट्वा समायातं च पार्षदम् ॥ बबन्ध बाहुपाशेन बलादाकृष्य दानवः ॥ ३१ ॥ ॥ तं जघा
नाथ शिरसि मुद्गरेण महोदरम् ॥ परश्वधेन दैत्येन्द्रं गणेशो हि महोदरः ॥ ३२ ॥ काष्ठवत्स द्विधाभूतो निपपात धरातले ॥
तथाऽपि नात्यजद्बाहुं बलवान्दानवेश्वरः ॥ मोक्षार्थमकरोद्यत्नं न शशाक महौदरः ॥ ३३ ॥ विनायकं संयतमीक्ष्य बाहुना
कुण्डोदरो नाम गणेश्वरोऽथ ॥ प्रगृह्य तूर्णं मुशलं महात्मा बाहुं समन्तात्स जघान तस्य ॥ ३४ ॥ ततो गणेशः कलशध्वजस्तु
प्रासेन राहुं हृदये बिभेद ॥ हते तु हुण्डे विमुखे तु राहौ गणेश्वराः क्रोधविषं मुमुक्षवः ॥ ३५ ॥ पञ्चैककालानलसन्निकाशा
विशन्ति सेनां दनुपुंगवानाम् ॥ तां वध्यमानां स्वचमूं समीक्ष्य बलिर्बली मारुतवेगतुल्यः ॥ ३६ ॥ गदां समाविध्य जघान
मूर्ध्नि विनायकं कुम्भकटे करे च ॥ कुण्डोदरं भग्नकरं महोदरं शीर्णं शिरस्कन्नमहाकपालम् ॥ ३७ ॥ कुम्भध्वजं घूर्णितसंधिबन्धं
घटोदरं चोरुविपन्नसंधिम् ॥ गणाधिपांस्तान्विमुखांस्तु दृष्ट्वा बलान्वितो वीरतरः सुरेन्द्रः ॥ ३८ ॥ समेत्य धावंस्त्वरितो निह
न्तुं गणेश्वरान्स्कन्दविशाखमुख्यान् ॥ तमापतन्तं भगवान्समीक्ष्य महेश्वरः श्रेष्ठतमं गणानाम् ॥ ३९ ॥ शैलादिमामन्त्र्य तदा
बभाषे त्वं गच्छ दैत्यं जहि वीर युद्धे ॥ इत्येवमुक्तो वृषभध्वजेन चक्रं समादाय शिलादसूनुः ॥ ४० ॥ बलिं समभ्येत्य जघान
मूर्ध्नि संमोहितश्चावनिमाससाद ॥ संमोहितं भ्रातृसुतं विदित्वा बली कुजम्भं मुसलं प्रगृह्य ॥ ४१ ॥ संभ्रामयन्घूर्णतरं स वेगा
त्ससर्ज नन्दिं प्रति जातकोपः ॥ तमापतन्तं मुसलं प्रगृह्य करेण तूर्णं भगवान्स नन्दी ॥ ४२ ॥ जघान तेनैव कुजम्भमाहवे स

प्राणहीनो निपपात भूम्याम् ॥ हत्वा कुजम्भं मुसलेन नन्दी वज्रेण नन्दी शतशो जघान ॥ ४३ ॥ ते वध्यमाना गणानायकेन दुर्योधनं वै शरणं प्रपन्नाः ॥ दुर्योधनः प्रेक्ष्य गणाधिपेन वज्रप्रहारैर्निहतान्दितीशान् ॥ ४४ ॥ पाशं समाविध्य तडित्प्रकाशं नन्दिं प्रचिक्षेप हतेस्त्विति ब्रुवन् ॥ तमापतन्तं कुलिशेन नन्दी बिभेद गुह्यं पिशुनो यथा नरः ॥ ४५ ॥ तं पाशमालक्ष्य तदा तु कृत्तं संवर्त्य मुष्टिं गणमाससाद ॥ ततोऽस्य वज्री कुलिशेन तूर्णं शिरोऽच्छिनत्तालफलप्रकाशम् ॥ ४६ ॥ हतोऽथ भूमौ निपपात वेगाद्दैत्याश्च भीता विगता दिशो दश ॥ ततो हतं स्वं तनयं निरीक्ष्य हस्ती तदा नन्दिनमाजगाम ॥ ४७ ॥ प्रगृह्य बाणाशनिमुग्रवेगं बिभेद बाणैर्यमदण्डकल्पैः ॥ गणान्सनन्दीन्वृषभध्वजांस्तान्धाराभिरेवाम्बुधरास्तु शैलम् ॥ ४८ ॥ ते छाद्यमाना दनुबाणजालैर्विनायकाद्या बलिनोऽपि वीराः ॥ सिंहप्रणुन्ना वृषभा यथैव भयातुरा दुद्रुविरे समन्तात् ॥ ४९ ॥ परस्परान्प्रेक्ष्य गणान्कुमारः शक्तिं निशातामथ धारयित्वा ॥ तूर्णं समभ्येत्यरिपुंगवेषु प्रगृह्य शक्तिं हृदयं बिभेद ॥ ५० ॥ शक्तिनिर्भिन्नहृदयो हस्ती भूम्यां पपात ह ॥ समरे चापि पृतनामध्येऽसौ दनुपुंगवः ॥ ५१ ॥ तमरातिगणं दृष्ट्वा भग्नं क्रुद्धा गणेश्वराः ॥ पुरतो नन्दिनं कृत्वा जिघांसन्तश्च दानवान् ॥ ५२ ॥ ते वध्यमानाः प्रमथैर्दैत्याश्चापि पराङ्मुखाः ॥ भूयो निवृत्ता बलिनः कुर्वन्तश्च पुरो गणान् ॥ ५३ ॥ तान्निवृत्तान्समीक्ष्यैव क्रोधदीप्तेक्षणः श्वसन् ॥ नन्दिषेणो व्याघ्रमुखो निवृत्तश्चापि वेगवान् ॥ ५४ ॥ तस्मिन्निवृत्ते गणपे पट्टिशाग्रकरे तदा ॥ कान्तस्वरो निववृते गदामादाय नारद ॥ ५५ ॥ तमापतन्तं ज्वलनप्रकाशं गणः समीक्ष्यैव

वृत्ते गणपे पट्टिशाग्रकरे तदा ॥ कान्तस्वरो निववृते गदामादाय नारद ॥ ५५ ॥ तमापतन्तं ज्वलनप्रकाशं गणः समीक्ष्यैव

महासुरेन्द्रम् ॥ तं पट्टिशं भ्राम्य जघान मूर्ध्नि कान्तस्वरं विस्वरमुन्नदन्तम् ॥ ५६ ॥ तस्मिन्हते भ्रातरि मातुलेये पाशं समाविध्य तुरङ्गकध्वजः ॥ बबन्ध वीरं सह पट्टिशेन गणेश्वरं चाप्यथ नन्दिषेणम् ॥ ५७ ॥ नन्दिषेणं तथा बद्धं समीक्ष्य बलिनां वरः ॥ विशाखः कुपितोऽभ्येत्य शक्तिपाणिरुपस्थितः ॥ ५८ ॥ तं दृष्ट्वा बलिनां श्रेष्ठः पाशपाणिरयःशिराः ॥ संयोधयामास बलि विशाखं कुक्कुटध्वजम् ॥५९॥ विशाखं सन्निरुद्धं वै रणे दृष्ट्वा गणोत्तमाः ॥ शाखश्च नैगमेयश्च तूर्णं दुद्रुवतू रिपुम् ॥६०॥ एकतो नैगमेयेन भग्नः शक्त्या त्वयःशिराः ॥ एकतश्चैव शाखेन विशाखप्रियकाम्यया ॥ ६१ ॥ स त्रिभिः शंकरसुतैः पीड्यमानो जहौ रणम् ॥ संप्राप्य शम्बरं तूर्णं रक्ष मां हि गणेश्वरात् ॥ ६२ ॥ पाशं शक्त्या समाहत्य चतुर्भिः शंकरात्मजैः ॥ जगाम निलयं तूर्णमाकाशादिव भूतलम् ॥ ६३ ॥ पाशे निकृत्ते याते च शम्बरः कातरेक्षणः ॥ दिशोऽथ भेजे देवर्षे कुमारः सैन्यमार्दयत् ॥ ६४ ॥ सा वध्यमाना पृतना महर्षे सदानवा शर्वसुतैर्गणैश्च ॥ विवर्णरूपा भयविह्वलाङ्गी जगाम शुक्रं शरणं भयार्ता ॥ ६५ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे दैत्यपराजयो नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ पुलस्त्य उवाच ॥ ततः कुजम्भे च यमालयं गते हते च सैन्ये प्रमथैर्महारथः ॥ त्रस्तोऽन्धकोऽभ्येत्य गुरुं च शुक्रमिदं वचः सानुनयस्तदाऽब्रवीत् ॥ १ ॥ भगवंस्त्वां समाश्रित्य वयं बाधाम देवताः ॥ अथान्यानपि विप्रर्षे गन्धर्वसुरकिन्नरान् ॥ २ ॥ तदिमां पश्य भगवन्मम गुप्तां वरूथिनीम् ॥ अनाथेव यथा नारी प्रमथैरपि काल्यते ॥ ३ ॥ कुजम्भाद्याश्च निहता भ्रातरो मम भार्गव ॥ असंख्यातास्ते

प्रमथाः कुरुक्षेत्रफलं यथा ॥ ४ ॥ तस्मात्कुरुष्व च तथा यथा न ज्ञायतेऽपरैः ॥ जयेम च परान्युद्धे तथा त्वं कर्तुमर्हसि ॥ ५ ॥
पुलस्त्य उवाच ॥ शुक्रोऽन्धकवचः श्रुत्वा सान्त्वयन्परमो गुरुः ॥ वचनं प्राह देवर्षे हर्षयन्दानवेश्वरम् ॥ तद्धि तीर्थं गमिष्यामि
करिष्यामि तव प्रियम् ॥ ६ ॥ इत्येवमुक्त्वा वचनं विद्यां संजीवनीं कविः ॥ आवर्तयामास तदा विधानेन शुचिव्रतः ॥ ७ ॥
तस्यामावर्तमानायां विद्यायामसुरेश्वराः ॥ ये हताः प्रमथैर्युद्धे ते च सर्वे समुत्थिताः ॥ ८ ॥ कुजम्भादिषु दैत्येषु भूय एवो
त्थितेष्वथ ॥ योद्धुं समागतेष्वेव नन्दी शंकरमब्रवीत् ॥ ९ ॥ ये हताः प्रमथैर्दैत्या यथाशक्त्या रणाजिरे ॥ ते समुज्जीविता
भूयो भार्गवेणाथ विद्यया ॥ १० ॥ तदिदं यन्महादेव महत्कर्म कृतं रणे ॥ न जातं स्वल्पमेवेश शुक्रविद्याबलाश्रयात् ॥ ११ ॥
इत्येवमुक्ते वचने नन्दिनं कुलनन्दिनम् ॥ प्रत्युवाच प्रभुः प्रीत्या स्वार्थसाधनमुत्तमम् ॥ १२ ॥ गच्छ शुक्रं गणपते ममान्तिक
मुपानय ॥ अहं तं संयमिष्यामि यथा योगं समेत्य हि ॥१३॥ इत्येवमुक्तो रुद्रेण नन्दी गणपतिस्ततः ॥ समाजगाम दैत्यानां
चमूं शुक्रजिघृक्षया ॥ १४ ॥ तं ददर्शासुरश्रेष्ठो बलवांस्तु भयंकरः ॥ स रुरोध तदा मार्गं सिंहस्येव पशुर्वने ॥ १५ ॥ समुपेत्या
हनन्नन्दी चक्रेणाशनितेजसा ॥ स पपाताथ निःसंज्ञो ययौ नन्दी ततस्त्वरन् ॥ १६ ॥ ततः कुजम्भो जम्भश्च बलो वृत्रश्च
राक्षसाः ॥ स्वयं च रणशार्दूला नन्दिनं समुपाद्रवन् ॥ १७ ॥ तथाऽन्ये दानवश्रेष्ठा मयह्लादपुरोगमाः ॥ नानाप्रहरणा युद्धे गण
नाथमभिद्रवन् ॥ १८ ॥ ततो गणानामधिपं कुद्ध्यमानं महाबलैः ॥ समपश्यन्त देवास्ते पितामहपुरोगमाः ॥ १९ ॥ तं दृष्ट्वा
...सहाय्यं क्रियतां शंभोरेतदन्तरमुत्तमम् ॥ २० ॥ पितामहोक्तं वचनं श्रुत्वा देवाः सवासवाः ॥

नाथमभिद्रवन् ॥ १८ ॥ ततो गणानामधिपं क्रुध्यमानं महाबलैः ॥ समपश्यन्त देवास्तं पितामहपुरोगमाः ॥ १९ ॥ तं दृष्ट्वा

भगवान्प्राह देवाञ्छक्रपुरोगमान् ॥ साहाय्यं क्रियतां शंभोरेतदन्तरमुत्तमम् ॥ २० ॥ पितामहोक्तं वचनं श्रुत्वा देवाः सवासवाः ॥
समापतन्त वेगेन शिवसैन्यमथाम्बरात् ॥ २१ ॥ तेषामापततां वेगः प्रमथानां बले बभौ ॥ आपगानां महावेगः पतन्तीनां महा
र्णवे ॥ २२ ॥ ततो हलहलाशब्दः समजायत चोभयोः ॥ बलयोर्घोरसङ्काशोऽसुरप्रमथयोरथ ॥ २३ ॥ तदन्तरमुपागम्य नन्दी
संगृह्य वेगवान् ॥ तं भार्गवं समाक्रामत्सिंहो वनमृगं यथा ॥ २४ ॥ तमादाय हराभ्याशमागमद्गणनायकः ॥ निपात्य रक्षिणः
सर्वानथ शुक्रं न्यवेदयत् ॥ २५ ॥ तमानीतं कविं शर्वः प्राक्षिपद्वदने प्रभुः ॥ भार्गवं व्यापृतं तुण्डे ददृशुस्ते सुरारयः ॥ २६ ॥
स शंभुना कविश्रेष्ठो ग्रस्तो जठरमास्थितः ॥ तुष्टाव भगवन्तं तं वाग्भिर्भार्गव आदरात् ॥२७॥ शुक्र उवाच ॥ वरदाय नमस्तुभ्यं
हराय गुणशालिने ॥ शंकराय महेशाय विश्वेशाय नमो नमः ॥ २८ ॥ जीवनाय नमस्तुभ्यं लोकनाथ वृषाकपे ॥ मदनाग्ने काल
शत्रो वामदेवाय ते नमः ॥२९॥ सवित्रे विश्वरूपाय वामनाय सदागते ॥ महादेवाय शर्वाय ईश्वराय नमो नमः ॥३०॥ त्रिनयन
हर भव शंकर उमापते जीमूतकेतो गुहाश्मशाननिरत भूतिविलेपन शूलपाणे पशुपते गोपते तत्पुरुष सत्तम नमो नमस्ते ॥
इत्थं स्तुतः कविवरेण हरोऽथ भक्त्या प्रीतो वरं वरय भार्गव इत्युवाच ॥ तं प्राह देहि भगवंस्तु वरं ममाद्य यद्वै तवैव जठरान्मम
निर्गमोऽस्तु ॥ ३१ ॥ ततो हरोऽक्षीणि तदा निरुध्य प्राह द्विजेन्द्रं किल निर्गमस्व ॥ इत्युक्तमात्रो विभुना चचार देवोदरे भार्गव
पुंगवस्तु ॥३२॥ परिक्रमन्ददर्शासौ शङ्करोदरकोटरे ॥ भुवनार्णवपातालान्स्थितान्स्थावरजङ्गमैः ॥३३॥आदित्यवसुरुद्रांश्च विश्वे

देवगणांस्तथा ॥ यक्षान्किंपुरुषांश्चैव गन्धर्वाप्सरसां गणान् ॥ ३४ ॥ मुनीन्मनुजसाध्यांश्च पशुकीटपिपीलिकाः ॥ सरीसृपान्वृक्ष गुल्मफलमूलौषधानि च ॥ ३५ ॥ जलस्थांश्चस्थल स्थांश्चानिमेषान्निमिषानपि ॥ अव्यक्तांश्चैव व्यक्तांश्च द्विपदोऽथ चतुष्पदः ॥३६॥ स दृष्ट्वा कौतुकाविष्टः परिबभ्राम भार्गवः ॥ तत्रास्यतो भार्गवस्य दिव्यः संवत्सरो गतः ॥ ३७ ॥ न चैवान्तमसौ लेभे ततः श्रान्तोऽभवत्कविः ॥ स श्रान्तं वीक्ष्य चात्मानं न च लेभेऽथ निर्गमम् ॥ भक्तिनम्रो महादेवं ततस्तत्समुपागमत् ॥ ३८ ॥ शुक्र उवाच ॥ विश्वरूप महारूप विश्वरूपाक्ष रूपधृक् ॥ सहस्राक्ष महादेव त्वामहं शरणं गतः ॥ ३९ ॥ नमोऽस्तु ते शंकर शर्व शंभो सहस्रनेत्राङ्घ्रिभुजङ्गभूषण ॥ दृष्ट्वैव सर्वं भुवनं तवोदरे श्रान्तो भवं त्वां शरणं प्रपन्नः ॥४०॥ इत्येवमुक्ते वचने महात्मा शंभुर्वचः प्राह तदा विहस्य ॥ निर्गच्छ पुत्रोऽसि ममाधुना त्वं शिश्नेन भो भार्गववंशचन्द्र ॥४१॥नाम्ना तु शुक्रेति चराचरा स्त्वां स्तोष्यन्ति नैवात्र विचारणा स्यात् ॥ इत्येवमुक्त्वा भगवान्मुमोच शिश्नेन शुक्रः स च निर्जगाम ॥४२॥ विनिर्गतो भार्गववंशचन्द्रः शुक्र त्वमासाद्य महानुभावः ॥ प्रणम्य शंभुं स जगाम तूर्णं महासुराणां बलमुत्तमौजाः ॥ ४३ ॥ भार्गवे पुनरायाते दानवा मुदिताभवन् ॥ पुनर्युद्धाय विदधुर्मतिं सह गणेश्वरैः ॥ ४४ ॥ गणेश्वरास्तानसुरान्सहामरगणैरथ ॥ युयुधुः संकुलं युद्धं सर्व एव जयेप्सवः ॥ ४५ ॥ ततोऽसुरगणानां च युध्यतां द्वन्द्वयुद्धवत् ॥ द्वन्द्वयुद्धं समभवद्घोररूपं तपोधन ॥ ४६ ॥ अन्धको नन्दिनं युद्धे शङ्कुकर्णं त्वयःशिराः ॥ कुम्भध्वजं बलिर्धीमान्नन्दिषेणं विरोचनः ॥ ४७ ॥ अश्वग्रीवो विशाखं च शाखो वृत्रमयोधयत ॥ बाणं तथा नैगमेयो बलं राक्षसपुंगवः ॥ ४८ ॥ विनायकं महावीर्यं परश्वधधरं रणे ॥ संक्रुद्धा राक्षसश्रेष्ठा दानवाश्चैव प्रमथानथ ॥ ४९ ॥

कर्णं स्वयःशिराः ॥ कुम्भध्वजं बलिर्धीमान्नन्दिषेणं विरोचनः ॥ ४७ ॥ अश्वग्रीवो विशाखं च शाखो वृत्रमयोधयत ॥ बाणं

तथा नैगमेयो बलं राक्षसपुंगवः ॥ ४८ ॥ विनायकं महावीर्यं परश्वधधरं रणे ॥ संक्रुद्धा राक्षसश्रेष्ठा दानवाःप्रमथानथ ॥ ४९ ॥
संयोधयन्तो ब्रह्मर्षे दायादानां शतानि षट् ॥ ५० ॥ शतक्रतुं समाधीतं वज्रपाणिमवस्थितम् ॥ तं चापि दानवश्रेष्ठस्तुहुण्डः सम
योधयत् ॥५१॥ हस्ती च कुण्डजठरं ह्रादो वीरं घटोदरम् ॥ एते हि बलिनां श्रेष्ठा दानवाः प्रमथानथ ॥ संयोधयन्तो ब्रह्मर्षे दैते
यानां शतानि षट् ॥ ५२ ॥ गणोत्कटं समायान्तं वज्रपाणिमवस्थितम् ॥ वारयामास बलवाञ्जम्भो नाम महासुरः ॥ ५३ ॥
शंभुर्नामासुरपतिः स ब्रह्माणमयोधयत् ॥ ५४ ॥ मायामयः कुजम्भश्च विष्णुं दैत्याधिपस्त्वयात ॥ वैवस्वतं रणे सोल्को वरुणं
त्रिशिरास्तथा ॥ ५५ ॥ द्विमूर्धा पवनं सोमं सहमित्रं विरूपधृक् ॥ एकदृक् स रणे रौद्रः कालनेमिर्महासुरः ॥ ५६ ॥ एकादशैव
रुद्रांस्तु यच्चैकोऽपि रणोत्कटः ॥ योधयामास तेजस्वी विद्युन्माली महासुरः ॥५७॥ द्वावश्विनौ च नरको भास्करानेव शम्बरः॥
साध्यान्मरुद्गणांश्चैव निवातकवचादयः ॥ ५८ ॥ एवं द्वन्द्वसहस्राणि प्रमथानां च दानवैः ॥ संजातानां सुराब्दानां षट्छतानि
महाहुने ॥ ५९ ॥ यदा योद्धुं न शक्तास्ते दानवैरमरादयः ॥ मुखं व्यादाय वेगेन ग्रसन्ते क्रमशोऽमरान् ॥ ६० ॥ ततोऽभवच्च
तत्सैन्यं शून्यं प्रमथदैवतैः ॥ आवृतं वर्जितं सर्वैः प्रमथैरमरैरपि॥६१॥दृष्ट्वा शून्यं गिरिप्रस्थं ग्रस्तांश्च प्रमथामरान्॥ क्रोधादुत्पाद
यामास रुद्रो जृम्भाम्बिकां वशी ॥६२॥ तयाऽऽकृष्टा दनुसुता अलसा मन्दभाषिणः ॥ वदनं विकृतं कृत्वा मुक्तशस्त्रा विजृम्भिरे
॥ ६३ ॥ विजृम्भमाणेषु तदा दानवेषु गणेश्वराः ॥ सुराश्च निर्ययुस्तूर्णं दैत्यदेहेभ्य आकुलाः ॥ ६४ ॥ मेघप्रभेभ्यो देहेभ्यो

निर्गच्छन्तोऽमरोत्तमाः ॥ शोभन्ते पद्मपत्राक्षा मेघेभ्य इव विद्युतः ॥ ६५ ॥ ततोऽमरगणाः सर्वे निर्गताश्च तपोधन ॥ अयुध्यन्त महात्मानो भूय एवाभिकोपिताः॥६६॥ ततो देववरैः सर्वे दानवाः शर्वपालितैः ॥ पराजीयन्त संग्रामैर्भूयोभूयस्त्वहर्निशम् ॥६७॥ तत्र त्रिणेत्रः स्वां संध्यां सप्ताष्टशतिके गते ॥ काले ह्युपासत तदा सोऽष्टादशभुजोऽव्ययः ॥६८॥ संस्पृश्यापः सरस्वत्याः स्नात्वा च विधिना हरः ॥ कृतार्थो भक्तिमान्मूर्ध्नि पुष्पाञ्जलिमथाक्षिपत् ॥ ६९ ॥ ततो ननाम शिरसा ततश्चक्रे प्रदक्षिणम् ॥ हिरण्य गर्भेत्यादित्यमुपतस्थे जजाप ह ॥ ७० ॥ द्रष्ट्रे नमो नमस्तेऽस्तु सम्यगुच्चार्य शूलधृक् ॥ ननर्त भावगम्भीरो दोर्दण्डं भ्रामयन्बली ॥ ७१ ॥ परिनृत्यति देवेशे गणाश्चैव सुरास्तथा ॥ नृत्यन्ति भावयुक्तास्तु हरस्यानुविधायिनः ॥ ७२ ॥ संध्यामुपास्य देवेशः परिनृत्य यथेच्छया ॥ युद्धाय दानवैः सार्धं मतिं भूयः समादधे ॥ ७३ ॥ ततः सुरगणैः सर्वैस्त्रिणेत्रभुजपालितैः ॥ दानवा निर्जिताः सर्वे बलिभिर्भयवर्जितैः ॥ ७४ ॥ स्वबलं निर्जितं दृष्ट्वा मत्वाऽजेयं च शंकरम् ॥ अन्धकः सुन्दमाहूय वचनं चेदमब्रवीत ॥ ७५ ॥ अन्धक उवाच ॥ सुन्द भ्राताऽसि मे वीर विश्वास्यः सर्ववस्तुषु ॥ तत्त्वां वदामि यद्वाक्यं तच्छ्रुत्वा कुरु यत्क्षमम् ॥ ७६ ॥ दुर्जयोऽसौ रणपटुर्महात्मा कारणान्तरैः ॥ ममास्ति चापि हृदये पद्माक्षी शैलनन्दिनी ॥७७॥ तदुत्तिष्ठस्व गच्छावो यत्रास्ते चारुहासिनी ॥ तत्रैनां मोहयिष्यामि [illegible] रूपेण दानव ॥ ७८ ॥ भवान्भवस्यानुचरो भव नन्दी गणेश्वरः ॥ ततो गत्वाऽथ भुक्त्वा तां जेष्यामि प्रमथान्सुरान् ॥ ७९ ॥ इत्येवमुक्ते वचने बाढं सुन्दोऽभ्यभाषत ॥ समजायत शैलादिरन्धकः

गच्छावो यत्रास्ते चारुहासिनी ॥ तत्रनो मोहयिष्यामि शंभुरूपेण दानव ॥ ७८ ॥ भवान्भवस्यानुचरो भव नन्दी गणेश्वरः ॥
ततो गत्वाऽथ भुक्त्वा तां जेष्यामि प्रमथान्सुरान् ॥ ७९ ॥ इत्येवमुक्ते वचने बाढं सुन्दोऽभ्यभाषत ॥ समजायत शैलादिरन्धकः

शंकरोऽप्यभूत् ॥ ८० ॥ नन्दिरुद्रौ ततो भूत्वा महासुरचमूपती ॥ संप्राप्तौ मन्दरागिरिं प्रहारैः कृतविग्रहौ ॥ ८१ ॥ नन्दिनो चा हस्तमालम्ब्य ह्यन्धको हरमन्दिरम् ॥ विवेश निर्विशङ्केन चित्तनासुरसत्तमः ॥ ८२ ॥ ततो गिरिसुता दूरादायान्तं वीक्ष्य यश न्धकम् ॥ महेश्वरवपुश्छन्नं प्रहारैर्जर्जरच्छविम् ॥ ८३ ॥ सुन्दं शैलादिरूपस्थमवष्टभ्याविशत्ततः ॥ तं दृष्ट्वा मालिनीं प्राह घृत स्यां विजयां जयाम् ॥ ८४ ॥ जये पश्यस्व देवस्य मदर्थे विग्रहं कृतम् ॥ शत्रुभिर्दारुणतरैस्तदुत्तिष्ठस्व सत्वरम् ॥ ८५ ॥ कुरुष्व शीघ्रमस्य त्वं भर्तुर्व्रणविना मानय पौराणं चीरं च लवणं दधि ॥ व्रणभङ्गं करिष्यामि स्वयमेव पिनाकिनः ॥ ८६ ॥ शरपत्रेण तच्छि शनम् ॥ इत्येवमुक्त्वा वचनं समुत्थाय वरासनात् ॥ ८७ ॥ अभ्युद्ययौ तदा भक्त्या मन्यमाना वृषध्वजम् ॥ मायाच्छादितविग्र त्वा भूयश्चिह्नानि यत्नतः ॥ ८८ ॥ अन्विषेष तदाऽपश्यत्तावुभौ पार्श्वतः स्थितौ ॥ सा ज्ञात्वा दानवं रौद्रं वेगे हम् ॥८९॥ अपयानं तदा चक्रे गिरिराजसुता मुने ॥ देव्याश्चिन्तितमाज्ञाय सुन्दं त्यक्त्वाऽन्धकोऽसुरः ॥९०॥ समाद्रवत न हरकान्तां विभावरीम् ॥ समाद्रवत दैतेयो येन मार्गेण सा गता ॥९१॥ कुर्वती च तिरस्कारं पादप्लुतिनिराकुला ॥ तमापत न्तं दृष्ट्वैव गिरिजा प्राद्रवद्भयात् ॥ ९२ ॥ गृहं त्यक्त्वा ह्युपवनं सखीभिः सहिता तदा ॥ तत्राप्यनुजगामासौ मदान्धो मुनिपुं गव ॥ ९३ ॥ तथापि न शशापैनं तपसो गोपनाय यत् ॥ तद्भयादाविशद्गौरी श्वेतार्ककुसुमं शुचि ॥ ९४ ॥ विजयाद्या महा गुल्मं संप्रयाता लयं मुने ॥ नष्टायामथ पार्वत्यां भूयो हैरण्यलोचनिः ॥ ९५ ॥ सुन्दं हस्ते समादाय स्वसैन्यं पुनरागमत् ॥

अन्धके पुनरायाते स्वबलं मुनिसत्तम ॥ ९६ ॥ प्रावर्तत महायुद्धं प्रमथासुरयोरथ ॥ ततो रणे सुरश्रेष्ठो विष्णुश्चक्रगदाधरः ॥ ॥ ९७ ॥ निजघानासुरबलं शंकरप्रियकाम्यया ॥ शार्ङ्गचापच्युतैर्बाणैः संस्यूता दानवर्षभाः ॥ ९८ ॥ पञ्च षट् सप्त चाष्टौ वा अभ्रपादैर्घना इव ॥ गदया कांश्चिदवधीच्चक्रेणान्याञ्जनार्दनः ॥ ९९ ॥ खड्गेन च चकर्तान्यान्दृष्टयाऽन्यान्भस्मसात्कृतान् ॥ हलेनाकृष्य चैवान्यान्मुसलेनाप्यचूर्णयत् ॥ १०० ॥ गरुडः पक्षपाताभ्यां तुण्डेनाप्युरसाऽहनत् ॥ स चादिपुरुषो धाता पुराणः प्रपितामहः ॥ १०१ ॥ भ्रामयन्विपुलं पद्ममभ्यषिञ्चत वारिणा ॥ संस्पृष्टा ब्रह्मतोयेन सर्वतीर्थमयेन हि ॥ १०२ ॥ गणामरगणाश्वासन्नवा गणशताधिकाः ॥ दानवास्ते च तोयेन संस्पृष्टाश्चाघहारिणा ॥१०३॥ सवाहना लयं जग्मुः कुलिशेनेव पर्वताः ॥ दृष्ट्वा ब्रह्महरी युद्धे घातयन्तौ महासुरान् ॥ १०४ ॥ शतक्रतुश्च संप्राप्तो युद्धाय कृतनिश्चयः ॥ तमापतन्तं संप्रेक्ष्य बलो दानवसत्तमः ॥१०५॥ नत्वा देवं गदापाणिं विमानस्थं च पद्मजम् ॥ क्रमेण चाद्रवद्योद्धुं मुष्टिमुद्यम्य नारद ॥ बलवान्दानवपतिरजेयो देवदानवैः ॥ १०६ ॥ तमापतन्तं त्रिदशेश्वरस्तु दोष्णां सहस्रेण यथाबलेन ॥ वज्रं परिभ्राम्य बलस्य मूर्ध्नि तन्निपातयामास सुरेश्वरस्तु ॥ १०७ ॥ बाढं स चास्त्रप्रवरोऽपि वज्रो जगाम तूर्णं हि सहस्रधा मुने ॥ बलोऽद्रवद्देवपतिश्च भीतः पराङ्मुखोऽभूत्सुरराणमहर्षे ॥ १०८ ॥ तं चापि जम्भो विमुखं निरीक्ष्य भतावतो वाक्यमुवाच वेदस ॥ निवृत्स्व राजाऽसि चराचरस्य न राजधर्मे गदितं पलायनम् ॥ १०९ ॥ सहस्राक्षो जम्भवाक्यं निशम्य भीतस्तूर्णं विष्णुमागान्महर्षे ॥ उपेत्याथ श्रूयतां वाक्यमीश

धर्मे गदितं पलायनम् ॥ १०९ ॥ सहस्राक्षो जम्भवाक्यं निशम्य भीतस्तूर्णं विष्णुमागान्महर्षे ॥ उपेत्याथ श्रूयतां वाक्यमीश त्वं वै नाथो भूतभव्यस्य विष्णो॥११०॥जम्भस्तर्जयतेऽत्यर्थं मां निरायुधमादिशन् ॥ आयुधं देहि भगवंस्त्वामहं शरणं गतः ॥ १११ ॥ तमुवाच हरिः शक्रं त्यक्त्वा वज्रं व्रजाधुना ॥ प्रार्थयस्वायुधं वह्निं स ते दास्यत्यसंशयम् ॥ ११२ ॥ जनार्दनवचः श्रुत्वा शक्रस्त्वमितविक्रमः ॥ शरणं पावकमगादिदं चोवाच नारद ॥ ११३ ॥ शक्र उवाच ॥ निघ्नतो मे बलं वज्रः कृशानो शतधा गतः ॥ एष चाहूयते जम्भस्तस्माद्देह्यायुधं मम ॥ ११४ ॥ पुलस्त्य उवाच ॥ तमाह भगवान्वह्निः प्रीतोऽस्मि तव वासव ॥ यस्तु दर्पं परीहृत्य मामेव शरणं गतः ॥ ११५ ॥ इत्युच्चार्य स्वशक्त्या स शक्तिं निष्क्राम्य भावतः ॥ प्रादादिन्द्राय भगवान्प्रोचमानो दिवं गतः ॥ ११६ ॥ तामादाय तदा शक्तिं शतघण्टां सुदारुणाम् ॥ प्रत्युद्ययौ तदा जम्भं हन्तुकामोऽरिमर्दनः ॥ ११७ ॥ तयाऽभिसहितः शक्रः सह सैन्यैरभिद्रुतः ॥ क्रोधं चक्रे तदा जम्भो निजघान गजाधिपम् ॥ ११८ ॥ जम्भमुष्टिनिपातेन भग्नकुम्भकटो गजः ॥ निपपात यथा शैलः शक्रवज्रहतः पुरा ॥ ११९ ॥ पतमानं गजेन्द्रं तु शक्रश्चाप्लुत्य वेगवान् ॥ त्यक्त्वैव मन्दरगिरिं प्रयातो वसुधातले ॥ १२० ॥ तं पतन्तं हरिं सिद्धाश्चारणाश्च तदाऽब्रुवन् ॥ मा मा शक्र पतस्वाद्य भूतले तिष्ठ वासव ॥ १२१ ॥ स तेषां वचनं श्रुत्वा योगी तस्थौ क्षणं तदा ॥ प्राह चैतान्कथं योत्स्ये पतन्वै शत्रुभिः सह ॥ १२२ ॥ तमूचुर्देवगन्धर्वा मा विषादं व्रजेश्वर ॥ युध्यस्व त्वं समारुह्य प्रेषयामो जगद्रथम् ॥ १२३ ॥ इत्येवमुक्त्वा विपुलं रथं स्वस्तिकलक्षणम् ॥ वानरध्वजसंयुक्तं सहतैर्हरिभिर्युतम् ॥ १२४ ॥ शुद्धजाम्बूनदमयं किङ्किणीजालमण्डि

तम् ॥ शक्राय प्रेषयामासुर्विश्वावसुपुरोगमाः ॥ १२५ ॥ तमागतमुदीक्ष्याथ हीन सारथिना हरिः ॥ प्राह योत्स्ये कथं युद्धे संयमिष्ये कथं हयान् ॥ १२६ ॥ यदि कश्चिच्च सारथ्यं करिष्यति ममाधुना ॥ ततोऽहं घातये शत्रूनान्यथेति कथंचन ॥ १२७ ॥ ततोऽब्रुवंस्ते गन्धर्वा नास्माकं सारथिर्विभो ॥ विद्यते स्वयमेवाश्वान्स्वयं संयन्तुमर्हसि ॥ १२८ ॥ इत्येवमुक्ते भगवांस्त्यक्त्वा स्यन्दनमुत्तमम् ॥ क्ष्मातलं निपपातैव परिभ्रष्टः सुरेश्वरः ॥१२९॥ चलन्मौलिं मुक्तकचं परिभ्रष्टयुधास्पदम् ॥ तं पतन्तं सहस्राक्षं दृष्ट्वा भूः समकम्पत ॥ १३० ॥ पृथिव्यां कम्पमानायां शमीकर्षैस्तपस्विनी ॥ भार्याऽब्रवीत्प्रभो बालं बहिष्कुरु यथासुखम् ॥ ॥१३१॥ स तु भार्यावचः श्रुत्वा किमर्थमिति चाब्रवीत् ॥ सा चाह श्रूयतां नाथ दैवज्ञपरिभाषितम् ॥ १३२ ॥ यदेयं कम्पते भूमिस्तदा प्रक्षिप्यते बहिः ॥ यद्वाद्यतो मुनिश्रेष्ठ तद्भवेद्द्विगुणो मुने ॥१३३॥ एतद्वाक्यं तदा श्रुत्वा बालमादाय पुत्रकम्॥ निराशङ्को बहिः शीघ्रं प्राक्षिपत्क्ष्मातले द्विजः ॥ १३४ ॥ भूयो गोयुगलार्थाय प्रविष्टो भार्यया द्विजः ॥ निवारितो यदाऽयासीत्तव हानिर्भविष्यति ॥ १३५ ॥ इत्येवमुक्ते देवर्षिर्बहिर्निर्गम्य वेगवान् ॥ ददर्श बालद्वितयं समरूपमवस्थितम् ॥ १३६ ॥ तं दृष्ट्वा देवतापूज्यं भार्यां चाद्भुतदर्शनाम् ॥ प्राह तत्त्वं न विन्दामि यत्पृच्छामि वदस्व तत् ॥ १३७ ॥ बालस्यास्य द्वितीयस्य केऽभविष्यन् गुणाः किल ॥ गालवेन तु यच्चोक्तं कर्म तत्कथयाधुना॥१३८॥ साऽब्रवीत्राद्य वक्ष्ये वै वदिष्यामि पुनः प्रभो ॥ सोऽब्रवीद्द्य चाद्यैव नोचेन्नाश्नामि भोजनम् ॥ १३९॥ सा प्राह श्रूयतां ब्रह्मन्वदिष्ये वचनं हितम् ॥ कातरेणाद्य यत्पृष्टं भार्यं कारयि





तं किल ॥ १४० ॥ इत्युक्तवति वाक्ये च बाल एव त्वचेतनः ॥ हरेर्जगाम साहाय्यं कर्तुं रथविशारदः ॥ १४१ तं व्रजन्तं हि गन्ध

इद चाद्येव नोचेन्नाश्नामि भोजनम् ॥ १२९॥ सा प्राह श्रूयतां ब्रह्मन्वदिष्ये वचनं हितम् ॥ कातरेणाद्य यत्पुष्टं भार्यं कारयि-
तुं किल ॥ १४० ॥ इत्युक्तवति वाक्ये च बाल एव त्वचेतनः ॥ हरेर्जगाम साहाय्यं कर्तुं रथविशारदः ॥ १४१ तं व्रजन्तं हि गन्ध-
र्वा विश्वावसुपुरोगमाः ॥ ज्ञात्वेन्द्रस्यैव साहाय्यं तेजसा समवर्धयन् ॥ १४२ ॥ गन्धर्वतेजसा युक्तः शिशुः शक्रं समेत्य हि ॥
प्रोवाचाभ्येहि देवेश प्रियो यन्ता भवामि ते ॥ १४३ ॥ तच्छ्रुत्वा च हरिः प्राह कस्य पुत्रोऽसि बालक ॥ त्वं यन्तासि कथं
चाश्वान्संशयः प्रतिभाति मे ॥१४४॥ सोऽरौच्छमीकपुत्रं मां क्ष्माभवं विद्धि वासव ॥ गन्धर्वतेजसा युक्तं वाजियानविशारदम्॥
॥१४५॥ तच्छ्रुत्वा भगवाञ्छक्रः खे बभौ योगिनां वरः ॥ स चापि विप्रतनयो मातलिर्नाम विश्रुतः ॥ १४६ ॥ ततोऽधिरूढः स
रथं शक्रस्त्रिदशपुंगवः ॥ रश्मीन्शमीकतनयो मातलिः प्रगृहीतवान् ॥१४७॥ ततो मन्दरमागम्य विवेश रिपुवाहिनीम् ॥ प्रविश्य
ददृशे श्रीमान्कथितं कार्मुकं महत् ॥१४८॥ सशरं पञ्चवर्णं तत्सितरक्तासितारुणम् ॥ पाण्डुच्छायं सुरश्रेष्ठस्तज्जग्राह समार्गणम्॥
॥ १४९ ॥ ततस्तु मनसा देवान्नजःसत्त्वतमोमयान् ॥ नमस्कृत्य शरं चापे साधिज्ये विनियोजयत् ॥ १५० ॥ ततो निश्चरु
रत्युग्रं शरा बर्हिणवाससः ॥ ब्रह्मेशविष्णुनामाङ्काः सूदयन्तोऽसुरान्रणे ॥ १५१ ॥ आकाशं विदिशः पृथ्वीं दिशश्च स शरो
त्करैः ॥ सहस्राक्षोऽरिपक्षांश्च छादयामास नारद ॥ १५२ ॥ गजो विद्धो हयो भिन्नः पृथिव्यां पतितो रथी ॥ महा
मात्रो धरां प्राप्तो जम्भश्चापि शरातुरः ॥ १५३ ॥ पदातिः पतितो भूमौ शक्रमार्गणताडितः ॥ हतप्रधानं भूयिष्ठ बलं
तच्चाभवद्रणे ॥ १५४ ॥ तं शक्रबाणाभिहतं त्वसुरं सैन्यं समालक्ष्य तदा कुजम्भः ॥ जम्भासुरश्चापि सुरेशमव्ययं

प्रजग्मतुर्गृह्य गदे सुघोरे ॥ १५५ ॥ तावापतन्तौ भगवान्निरीक्ष्य सुदर्शनेनारिविनाशनेन ॥ विष्णुः कुजम्भं निजघान वेगात्स स्यन्दनाद्गां न्यपतद्गतासुः ॥ १५६ ॥ तस्मिन्हते भ्रातरि माधवेन जम्भस्ततः क्रोधवशं जगाम ॥ क्रोधान्वितः शक्रमुपाद्रवद्रणे सिंहं यथैणो हि विपन्नबुद्धिः ॥ १५७ ॥ तमापतन्तं प्रसमीक्ष्य शक्रस्त्यक्त्वैव चापं सशरं महात्मा ॥ जग्राह शक्तिं यमदण्डकल्पां पश्चात्ततो जम्भवधे ससर्ज ॥ १५८ ॥ शक्तिं च घण्टां स्वरसस्वनां वै दृष्ट्वाऽऽपतन्तीं गदया जघान ॥ गदां च कृत्वा सहसैव भस्मसाद्बिभेद जम्भं हृदये च तूर्णम् ॥ १५९ ॥ शक्त्या स भिन्नो हृदये सुरारिः पपात भूम्यां विगतासुरेव॥ तं वीक्ष्य भूमौ पतितं विसंज्ञं दैत्यास्तु भीता विमुखा बभूवुः ॥ १६० ॥ जम्भे हते दैत्यबले च भग्ने गणास्तु हृष्टा हरिमर्चयन्तः ॥ वीर्यं प्रशंसन्ति शतक्रतोश्च स गोत्रभिच्छर्वमुपेत्य तस्थौ ॥ १६१ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे जम्भकुजम्भवधो नाम नवषष्टितमोऽध्यायः ॥ ६९ ॥ पुलस्त्य उवाच ॥ तस्मिंस्तदा दैत्यबले च भग्ने शक्रोऽब्रवीदन्धकमासुरेन्द्रम् ॥ एह्येहि वीराद्य गता महासुरा योत्स्याम भूयो हरमेत्य शैलम् ॥ १ ॥ तमुवाचान्धको ब्रह्मन्सम्यक्च भवतोदितम् ॥ रणान्नैवापयास्यामि कुलं व्यपदिशन्स्वयम् ॥२॥ पश्य त्वं द्विजशार्दूल मम वीर्यं सुदुर्धरम् ॥ देवदानवगन्धर्वाञ्जेष्ये सेन्द्रमहेश्वरान् ॥ ३ ॥ इत्येवमुक्त्वा वचनं हिरण्याक्षसुतोऽन्धकः ॥ समाश्वास्याब्रवीत्क्रुद्धः सारथिं मधुराक्षरम् ॥ ४ ॥ सारथे वाहय रथं हराभ्याशं महाबल ॥ यावन्निहन्मि बाणौघैः प्रमथानथ वाहिनीम् ॥ ५ ॥ इत्यन्धकवचः श्रुत्वा सारथिस्तुरगां...मेषयामास तं मुने ॥ ६ ॥ ते यत्नतोऽपि तुरगाः प्रेर्यमाणा हरं प्रति ॥ जघनेष्वव सीदन्तः

वाहय रथं हराभ्याशं महाबल ॥ यावन्निहन्मि बाणौघैः प्रमथानथ वाहिनीम् ॥ ५ ॥ इत्यन्धकवचः श्रुत्वा सारथिस्तुरगां

स्तदा ॥ कृष्णवर्णान्महाकायान्प्रेषयामास तं मुने ॥ ६ ॥ ते यत्नतोऽपि तुरगाः प्रेर्यमाणा हरं प्रति ॥ जवनेऽप्यव सीदन्तः
संवत्सरेण साग्रेण वायुवेगसमा अपि ॥ ८ ॥ ततः
कृच्छ्रेणोढुश्च तं रथम् ॥ ७ ॥ वहन्तस्तुरगा दैत्यं प्राप्ताः प्रमथवाहिनीम् ॥ संवत्सरेण साग्रेण वायुवेगसमा अपि ॥ ८ ॥ ततः
कार्मुकमानम्य बालेन्दुसदृशं दृढम् ॥ नाराचैः सूदयामास सेन्द्रोपेन्द्रमहेश्वरान् ॥ ९ ॥ बाणैश्छादितमीक्ष्यैव बलं त्रैलोक्य
रक्षिता ॥ सुरान्प्रोवाच भगवांश्चक्रपाणिर्जनार्दनः ॥ १० ॥ विष्णुरुवाच ॥ किं तिष्ठध्वं सुरश्रेष्ठा हतेनानेन शोभनम् ॥ तस्मा
द्यत्ता भवन्त्वद्य त्वरिता विजयेप्सवः ॥ ११ ॥ शास्यन्तामस्य तुरगाः समं रथकुटुम्बिना ॥ भज्यतां स्यन्दनश्चायं विरथः
क्रियतां रिपुः ॥ १२ ॥ विरथं तु कृतं पश्चादेनं धक्ष्यति शंकरः ॥ नोपेक्ष्यः शत्रुरुद्रिक्तो देवाचार्येण धीमता ॥ १३ ॥ इत्येवमुक्ताः
प्रमथा वासुदेवेन सामराः ॥ चक्रुर्वेगं सहेन्द्रेण समं चक्रधरेण च ॥१४॥ तुरगाणां सहस्रं तु मेघाभानां जनार्दनः ॥ निमिषान्तर
मात्रेण गदया स व्यपोथयत् ॥१५॥ स महास्यन्दनात्स्कन्दः प्रगृह्य रथसारथिम् ॥ शक्त्या बिभेद हृदये गतासुर्व्यसृजद्भुवि ॥
॥ १६ ॥ विनायकाद्याः प्रमथाः समं शक्रेण दैवतैः ॥ सध्वजाक्षं रथं तूर्णमभञ्जत तपोधनाः ॥ १७ ॥ सहसा स महातेजा विर
थस्त्यक्तकार्मुकः ॥ गदामादाय बलवानभिदुद्राव देवताः ॥ १८ ॥ ततः सोऽष्टौ क्रमान्गत्वा मेघगम्भीरया गिरा ॥ उवाच
वाक्यं दैत्येन्द्रो महादेवं स हेतुमत् ॥ १९ ॥ भिक्षो भवान्सहानीकस्त्वसहायोऽस्मि साम्प्रतम् ॥ तथापि त्वां विजेष्यामि पश्य

१ संवत्सरशब्दोऽत्र दिवसपरः । सहस्रसमं दीर्घसत्रमित्यत्र समशब्दस्य वर्षपर्यायस्य दिवसपरत्वेन व्याख्यातत्वात् ।

मेऽद्य पराक्रमम् ॥२०॥ तद्वाक्यं शंकरः श्रुत्वा सेन्द्रान्सुरगणान्गणान् ॥ ब्रह्मणा सहितान्सर्वान्स्वशरीरे न्यवेशयत ॥२१॥ शरीरस्थांस्तान्प्रमथान्कृत्वा देवांश्च शंकरः ॥ प्राह एह्येहि दुष्टात्मन्नहमेकोऽपि संस्थितः ॥ २२ ॥ तद्दृष्ट्वा महदाश्चर्यं सर्वामरगणक्षयम् ॥ दैत्यः शंकरमभ्यागाद्गदामादाय वेगवान् ॥ २३ ॥ तमापतन्तं भगवान्दृष्ट्वा त्यक्त्वा वृषोत्तमम् ॥ शूलपाणिर्गिरिप्रस्थे पदातिः प्रत्यतिष्ठत ॥२४॥ वेगेनैवापतन्तं च बिभेदोरसि भैरवः ॥ दारुणं सुमहद्युद्धं कृत्वा त्रैलोक्यभीषणः ॥२५॥ दंष्ट्राकरालं रविकोटिसन्निभं मृगारिचर्माभिवृतं जटाधरम् ॥ भुजङ्गहारं मलपङ्कधारिणं शार्दूलबाहुं शिखिलोचनं हरम् ॥२६॥ एतादृशेन रूपेण भगवान्भूतभावनः ॥ बिभेद शत्रूञ्छूलेन शुभदः शाश्वतः शिवः ॥२७॥ स शूलं भैरवं गृह्य भिन्नेऽप्युरसि दानवः ॥ विजहाराति वेगेन क्रोशमात्रं महामुने ॥ २८ ॥ ततः कथंचिद्भगवान्सस्तंभ्यात्मानमात्मना ॥ तूर्णमुत्पाटयामास शूलेन सगदं रिपुम्॥२९॥ दैत्याधिपस्तु स गदां हरमूर्ध्नि न्यपातयत ॥ कराभ्यां गृह्य शूलं च समुत्पत्याथ दानवः ॥ ३० ॥ संस्थितश्च महायोगी सत्त्वाधारः प्रजापतिः ॥ गदापातक्षताद्भूरि मूर्ध्नोऽस्यासृगथापतत् ॥ ३१ ॥ पूर्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ॥ विद्याराजेति विख्यातः पद्ममालाविभूषितः ॥ ३२ ॥ अन्यस्माद्रुधिराज्जातो भैरवः शूलभूषितः ॥ रुद्रनाम्ना तु विख्यातः सर्वलोकैस्तु पूजितः ॥ ३३ ॥ अन्यरक्तात्समुद्भूतं भैरवाणां चतुष्टयम् ॥ चण्डाद्येककपाल्यन्तं ख्यातं भुवि यथा बुधैः ॥ ३४ ॥ भूमिस्थाद्रुधिराज्जातो भैरवः शूलभूषितः ॥ ख्यातो ललितराजेति शोभाञ्जनसमप्रभः ॥२५॥ एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ॥ विघ्न

धिराज्जातो भैरवः शूलभूपितः ॥ ख्यातो ललितराजेति शोभाञ्जनसमप्रभः ॥२५॥ एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ॥ विघ्न

राजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ॥ २६ ॥ एवं महात्मना दैत्यः शूलप्रोतो महासुरः ॥ छत्रवद्धारितो ब्रह्मन्निन्द्रायुधसमप्रभः ॥ ३७ ॥ तदस्रमुल्बणं ब्रह्मञ्छूलभेदादवापतत् ॥ येनाकण्ठं महादेवो मग्नोऽसौ सप्तमूर्तिमान् ॥ ३८ ॥ ततः स्वेदोऽभवद्भूरि निःश्रमाच्छंकरस्य तु ॥ ललाटफलकात्तस्माज्जाता कन्याऽसृगाप्लुता ॥ ३९ ॥ यद्भूम्यां न्यपतद्विप्र स्वेदबिन्दुर्विनाशनात् ॥ तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥ ४० ॥ स चापि तृषितोऽत्यर्थं पपौ रुधिरमान्धकम् ॥ कन्या चोत्क्षतसंजाता ह्यसृक् चावलिहद् द्रुतम् ॥४१॥ततस्तामाह देवेशो बालार्कसदृशप्रभः॥शङ्करो वरदो लोके श्रेयोऽर्थं हि वचो महत्॥४२॥त्वां पूजयिष्यन्ति सुरा महर्षिपितरस्तथा ॥ यक्षविद्याधराश्चैव मानवाश्च शुभंकरि॥४३॥त्वां स्तोष्यन्ति न संदेहो बलिपुष्पोत्करोत्करैः ॥ चर्चिकेति शुभं नाम यस्माद्रुधिरचर्चिता ॥४४॥ इत्येवमुक्त्वा वरदेन चर्चिका भूयोऽनुयाता गिरिविन्ध्यवासिनीम् ॥ महीं समन्ताद्विचचार सुन्दरी स्थानं गता हिङ्गुलकाद्रिमुत्तमम् ॥ ४५ ॥ तस्यां गतायां वरदः कुजस्य प्रादाद्वरं सर्ववरोत्तमं यत् ॥ ग्रहाधिपत्यं जगतः शुभाशुभं भविष्यते ते व्यसनं ग्रहान्तरैः ॥४६॥ हरोऽन्धकं वर्षसहस्रमात्रं दिव्यं स्वनेत्रार्कहुताशनेन ॥ चकार तं शुष्कबलं त्वशोणितं त्वगस्थिशेषं भगवान्स भैरवः ॥ ४७ ॥ तत्राग्निना शंभुसमुद्भवेन स मुक्तपापोऽसुरराड् बभूव ॥ ततः प्रजानां बहुरूपमीशं नाथं हि सर्वस्य चराचरस्य ॥ ४८ ॥ ज्ञात्वाऽथ सर्वेश्वरमीशमव्ययं त्रैलोक्यनाथं वरदं वरेण्यम् ॥ सर्वैः सुराद्यैर्नतमीड्यमाद्यं ततोऽन्धकः स्तोत्रमिदं चकार ॥४९॥ अन्धक उवाच ॥ नमोऽस्तु ते भैरव भीममूर्ते त्रैलोक्यगोप्त्रे सितशूलपाणे ॥

कपालपाणे भुजगेशहार त्रिणेत्र मां पाहि विपन्नबुद्धिम् ॥ ५० ॥ जयस्व सर्वेश्वर विश्वमूर्ते सुरासुरैर्वन्दितपादपीठ ॥ त्रैलोक्यमात गुरवे वृषाङ्क भीतः शरण्यं शरणागतोऽस्मि ॥५१॥ त्वां नाथ देवाः शिवमीरयन्ति सिद्धा हरं स्थाणुमृषीश्वराश्च ॥ भीमं च यक्षा मनुजा महेश्वरं भूतानि भूताधिपमुच्चरन्ति ॥५२॥ निशाचरास्तूग्रमुपाचरन्ति भवेति पुण्याः पितरो नमस्ते ॥ दासोऽस्मि तुभ्यं हर पाहि मह्यं पापक्षयं मे कुरु लोकनाथ ॥५३॥ भवांस्त्रिदेवस्त्रियुगस्त्रिधर्मा त्रिपुष्करश्चासि विभो त्रिणेत्र ॥ त्रय्यारुणिस्त्वं श्रुति रव्ययात्मा पुनीहि मां त्वां शरणं गतोऽस्मि ॥ ५४ ॥ त्रिणाचिकेतस्त्रिपदप्रतिष्ठः षडङ्गवित्स्त्रीविषयेष्वलुब्धः ॥ त्रैलोक्यनाथो ऽसि पुनीहि शंभो दासोऽस्मि भीतः शरणागतस्ते ॥ ५५ ॥ कृतो महाञ्शंकर तेऽपराधो मया महाभूतपते गिरीश ॥ कामारिणा निर्जितमानसेन प्रसादये त्वां शिरसा नतोऽस्मि ॥ ५६ ॥ पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ॥ त्राहि मां देवदेवेश सर्व पापहरो भव ॥५७॥ मम नैवापराधोऽस्ति त्वया चैतादृशोऽप्ययम् ॥ स्पृष्टः पापसमाचारो मां प्रसन्नो भवेश्वर ॥५८॥ त्वं कर्त्ता चैव धाता च जयस्त्वं च महाजय ॥ त्वं मङ्गल्यस्त्वमोंकारस्त्वमीशानोऽव्ययो ध्रुवः ॥ ५९ ॥ त्वं ब्रह्मा सृष्टिकृन्नाथस्त्वं विष्णु स्त्वं महेश्वरः ॥ त्वमिन्द्रस्त्वं वषट्कारो धर्मस्त्वं तुषितोत्तमः ॥ ६० ॥ सूक्ष्मस्त्वं व्यक्तरूपस्त्वं त्वमव्यक्तश्च धीवरः ॥ त्वया सर्व मिदं व्याप्तं जगत्स्थावरजङ्गमम् ॥ ६१ ॥ त्वमादिरन्तो मध्यं च त्वमेव च सहस्रपात् ॥ विजयस्त्वं सहस्राक्षश्चित्तपाख्यो महाभुजः ॥ ६२ ॥ अनन्तः सर्वगो व्यापी हंसः पुण्याधिकोऽच्युतः ॥ गीर्वाणपतिरव्यग्रो रुद्रः पशुपतिः शिवः ॥६३ ॥ त्रैविद्य

महाभुजः ॥ ६२ ॥ अनन्तः सर्वगो व्यापी हंसः पुण्याधिकोऽच्युतः ॥ गीर्वाणपतिरव्यग्रो रुद्रः पशुपतिः शिवः ॥६३ ॥ त्रैविद्य

स्त्वं जितक्रोधो जितारातिर्जितेन्द्रियः ॥ जयश्च शूलपाणिस्त्वं पाहि मां शरणागतम् ॥६४॥ पुलस्त्य उवाच ॥ इत्थं महेश्वरो ब्रह्मन्स्तुतो दैत्याधिपेन तु ॥ प्रीतियुक्तः पिङ्गलाक्षो हैरण्याक्षमुवाच ह ॥ ६५ ॥ प्रीतोऽस्मि दानवपते परितुष्टोऽस्मि चान्धक ॥ वरं वरय भद्रं ते यमिच्छसि ददामि तम् ॥ ६६ ॥ अन्धक उवाच ॥ अम्बिका जननी मह्यं भवान्वै त्र्यम्बकः पिता ॥ वन्दामि चरणौ मातुर्माननीयौ ममाधिकम् ॥ ६७ ॥ वरदो हि यदीशानस्तद्यातु विपुलं मम ॥ शारीरं मानसं वाऽपि दुष्कृतं दुर्विचिन्तितम् ॥ ६८ ॥ तथा मे दानवो भावो व्यपयातु महेश्वर ॥ स्थिरा तु तव भक्तिश्च वरमेतं प्रयच्छ मे ॥ ६९ ॥ महादेव उवाच ॥ एवं भवतु दैत्येन्द्र पापं ते यातु संक्षयम् ॥ मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥ ७० ॥ इत्येवमुक्त्वा वरदो मुदाऽग्रादवतार्य तम् ॥ निर्मार्जयित्वा हस्तेन कृत्वा निर्व्रणमन्धकम् ॥ ७१ ॥ ततश्च देवता देहाद्ब्रह्मादीनाजुहाव सः ॥ ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥ ७२ ॥ गणान्सनन्दीनाहूय संनिवेश्य तथाऽग्रतः ॥ भृङ्गिणं दर्शयामास ब्रुवन्नेषोऽन्धकेति हि ॥७३॥ तं दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ॥ गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥ ७४ ॥ ततस्तान्प्राह भगवान्संपरिष्वज्य देवताः ॥ गच्छध्वं स्वानि धिष्ण्यानि भुञ्जीध्वं त्रिविधं सुखम् ॥ ७५ ॥ सहस्राक्षोऽपि संयातु पर्वतं मलयं शुभम् ॥ तत्र स्वकार्यं कृत्वैव पश्चाद्यातु त्रिविष्टपम् ॥ ७६ ॥ इत्येवमुक्त्वा त्रिदशान्समाभाष्य व्यसर्जयत् ॥ पितामहं नमस्कृत्य परिष्वज्य जनार्दनम् ॥७७॥ महेन्द्रो मलयं गत्वा कृत्वा कार्यं दिवं गतः ॥ गतेषु शक्रप्राग्र्येषु भगवान्संस्थितः शिवः ॥

॥ ७८ ॥ विसर्जयामास गणांस्तनुमध्यपथाद्धरः ॥ गणाश्च शंकरं दृष्ट्वा स्वं स्वं वाहनमास्थिताः ॥ ७९ ॥ जग्मुस्ते शुभ लोकांश्च स्वस्वस्थानेषु नारद ॥ यत्र कामदुघा गावः सर्वकामफला द्रुमाः ॥८०॥ नद्यस्त्वमृतवाहिन्यो ह्रदाः पायसकर्दमाः ॥ स्वां स्वां गतिं प्रयातेषु प्रमथेषु महेश्वरः ॥ ८१ ॥ समादायान्धकं हस्ते नन्दीशैलं समागमत् ॥ द्वाभ्यां वर्षसहस्राभ्यां पुनरा याद्धरो गृहम् ॥ ८२ ॥ ददृशे च गिरेः पुत्रीं श्वेतार्ककुसुमस्थिताम् ॥ समायातं निरीक्ष्यैव सर्वलक्षणसंयुतम् ॥ ८३ ॥ त्यक्त्वाऽर्क कुसुमं तूर्णं सखीस्ताः समुपाह्वयत् ॥ समाहूताश्च देव्या ता जयाद्यास्तूर्णमागमन् ॥ ८४ ॥ याभिः परिवृता तस्थौ हरदर्शन लालसा ॥ ततस्त्रिणेत्रो गिरिजां दृष्ट्वा ह्यन्धकदानवम् ॥ ८५ ॥ नन्दिनं च तथा हर्षादालिङ्ग्य च गिरेः सुताम् ॥ अथोवाचैष दासस्ते कृतो देवि मयाऽन्धकः ॥ ८६ ॥ पश्य त्वं प्रतियातं हि स्वसुतं चारुहासिनि ॥ इत्युच्चार्याहान्धकं वै पुत्र एह्येहि सत्व रम् ॥ ८७ ॥ व्रजस्व शरणं मातुरेषा श्रेयस्करी तव ॥ इत्युक्तो विभुना नन्दी अन्धकश्च गणेश्वरः ॥ ८८ ॥ समागम्याम्बिका पादौ ववन्दतुरुभावपि ॥ अन्धकोऽपि तदा गौरीं भक्तिनम्रो महामुने ॥ ८९ ॥ स्तुतिं चक्रे महापुण्यां पापघ्नीं श्रुतिसंमताम् ॥ अन्धक उवाच ॥ ॐ नमस्तेऽस्तु भवानीं भूतभव्यप्रियां लोकधात्रीं जनयित्रीं स्कन्दमातरं महादेवप्रियां स्यन्दिनीं चेतनां त्रैलोक्य मातरं धरित्रीं देवतां मातरं श्रुतिं स्मृतिं दयां लज्जां [illegible] महामायां सुमायां वैजयन्तीं शुभां कालरात्रिं गोविन्दजननीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिणयनमहिषीं नमस्यामि मृडानीं शरण्यां

[illegible] प्रतिष्ठा विभावरी ॥ प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥९०॥

मातर धरित्री देवता मातर श्रुति स्मृति दया लज्जा कामसू प्रीति सदापावनी दैत्यसैन्यक्षयकरी महामाया सुमाया वैजयन्ती शुभा
कालरात्रि गोविन्दजननीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिनयनमहिषीं नमस्यामि मृडानीं शरण्यां

शरणमुपयातोऽहं नमो नमस्ते ॥ इत्थं स्तुता साऽन्धकेन परितुष्टा विभावरी ॥ प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥९०॥
भृङ्गिरुवाच ॥ पापं प्रशममायातु त्रिविधं मम पार्वति ॥ तथेश्वरे च सततं भक्तिरस्तु ममाम्बिके ॥ ९१ ॥ पुलस्त्य उवाच ॥
बाढमित्यब्रवीद्गौरी हिरण्याक्षसुतं ततः ॥ ममाग्रे पूजयन्शर्वं गणानामधिपो भव ॥ ९२॥ वपुर्दधानस्य तथा च तस्य महेश्वरेणाप्य
विरूपदृष्ट्या ॥ कृत्वैवमुच्चैर्भयदं तु भैरवं भृङ्गित्वमीशेन कृता स्वशक्त्या ॥९३॥ एतत्तवोक्तं हरकीर्तिवर्धनं पुण्यं पवित्रं शुभदं महर्षे ॥
संकीर्तनीयं द्विजसत्तमेषु धर्मायुरारोग्यधनैषिणा सदा ॥९४॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे अन्धकवर
प्रदानं नाम सप्ततितमोऽध्यायः॥७०॥नारद उवाच॥मलयेऽपि महेन्द्रेण यत्कृतं द्विजसत्तम॥ निष्पादितं स्वकं कार्यं तन्मे त्वं ख्या
तुमर्हसि ॥१॥ पुलस्त्य उवाच॥ श्रूयतां यन्महेन्द्रेण मलये पर्वते मुने॥कृतं लोकहितं कार्यमात्मनश्च तथा हितम् ॥२॥ अघासुरस्य
वचनान्मयतारपुरोगमाः ॥ ते निर्जिताः सुरगणैः पातालगमनोत्सुकाः ॥ ३ ॥ ददृशुर्मलयं विप्रसिद्धैः सेवितकन्दरम् ॥ लता
विमानसंछन्नं मत्तसत्त्वसमाकुलम् ॥ ४ ॥ चन्दनैरुरगाक्रान्तैः सुशीतैरतिसेवितम् ॥ माधवीकुसुमामोदसुगन्धितमहागिरिम् ॥
॥ ५ ॥ तं दृष्ट्वा शीतलच्छायं श्रान्ता व्यायामकर्शिताः ॥ मयतारपुरोगास्ते निवासं समरोचयन् ॥ ६ ॥ तेषु तत्र निविष्टेषु
घ्राणतृप्तिप्रदोऽनिलः ॥ विवाति शीतः शनकैर्दक्षिणो गन्धसंयुतः ॥ ७ ॥ तत्रैव च रतिं चक्रुः सर्व एव महासुराः॥ कुर्वन्तो लोक

पूज्यानां विद्वेषं सर्ववाससाम् ॥८॥ ताञ्ज्ञात्वा शंकरः शक्रं मलयं प्रेषयत्तदा ॥ स चापि ददृशे गच्छन्पथि गोमातरं हरिः ॥९॥

॥ ७८ ॥ विसर्जयामास गणांस्तनुमध्यपथाद्धरः ॥ गणाश्च शंकरं दृष्ट्वा स्वं स्वं वाहनमास्थिताः ॥ ७९ ॥ जग्मुस्ते शुभलोकांश्च स्वस्वस्थानेषु नारद ॥ यत्र कामदुघा गावः सर्वकामफला द्रुमाः ॥८०॥ नद्यस्त्वमृतवाहिन्यो ह्रदाः पायसकर्दमाः ॥ स्वां स्वां गतिं प्रयातेषु प्रमथेषु महेश्वरः ॥ ८१ ॥ समादायान्धकं हस्ते नन्दीशैलं समागमत् ॥ द्वाभ्यां वर्षसहस्राभ्यां पुनरायाद्धरो गृहम् ॥ ८२ ॥ ददृशे च गिरेः पुत्रीं श्वेतार्ककुसुमस्थिताम् ॥ समायातं निरीक्ष्यैव सर्वलक्षणसंयुतम् ॥ ८३ ॥ त्यक्त्वाऽर्ककुसुमं तूर्णं सखीस्ताः समुपाह्वयत् ॥ समाहूताश्च देव्या ता जयाद्यास्तूर्णमागमन् ॥ ८४ ॥ याभिः परिवृता तस्थौ हरदर्शनलालसा ॥ ततस्त्रिणेत्रो गिरिजां दृष्ट्वा ह्यन्धकदानवम् ॥ ८५ ॥ नन्दिनं च तथा हर्षादालिङ्ग्य गिरेः सुताम् ॥ अथोवाचैष दासस्ते कृतो देवि मयाऽन्धकः ॥ ८६ ॥ पश्य त्वं प्रतियातं हि स्वसुतं चारुहासिनि ॥ इत्युच्चार्याहान्धकं वै पुत्र एह्येहि सत्वरम् ॥ ८७ ॥ व्रजस्व शरणं मातुरेषा श्रेयस्करी तव ॥ इत्युक्तो विभुना नन्दी अन्धकश्च गणेश्वरः ॥ ८८ ॥ समागम्याम्बिकापादौ ववन्दतुरुभावपि ॥ अन्धकोऽपि तदा गौरीं भक्तिनम्रो महामुने ॥ ८९ ॥ स्तुतिं चक्रे महापुण्यां पापघ्नीं श्रुतिसंमताम् ॥

अन्धक उवाच ॥ ॐ नमस्तेऽस्तु भवानीं भूतभव्यप्रियां लोकधात्रीं जनयित्रीं स्कन्दमातरं महादेवप्रियां स्यन्दिनीं चेतनां त्रैलोक्यमातरं धरित्रीं देवतां मातरं श्रुतिं स्मृतिं दयां [illegible] दैत्यसैन्यक्षयकरीं महामायां सुमायां वैजयन्तीं शुभां कालरात्रिं गोविन्दजननीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिणयनमहिषीं नमस्यामि मृडानीं शरण्यां



... परितुष्टा विभावरी ॥ प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥९०॥

मातर धरित्री देवता मातर श्रुति स्मृति दया लज्जा कामसू प्रीति सदापावनी दैत्यसैन्यक्षयकरी महामाया सुमाया वैजयन्ती शुभा
कालरात्रि गोविन्दजननीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिणयनमहिषीं नमस्यामि मृडानीं शरण्यां

शरणमुपयातोऽहं नमो नमस्ते ॥ इत्थं स्तुता साऽन्धकेन परितुष्टा विभावरी ॥ प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥९०॥
भृङ्गिरुवाच ॥ पापं प्रशममायातु त्रिविधं मम पार्वति ॥ तथेश्वरे च सततं भक्तिरस्तु ममाम्बिके ॥ ९१ ॥ पुलस्त्य उवाच ॥
बाढमित्यब्रवीद्गौरी हिरण्याक्षसुतं ततः ॥ ममाग्रे पूजयन्शर्वं गणानामधिपो भव ॥ ९२॥ वपुर्दधानस्य तथा च तस्य महेश्वरेणाप्य
विरूपदृष्ट्या ॥ कृत्वैवमुच्चैर्भयदं तु भैरवं भृङ्गित्वमीशेन कृता स्वशक्त्या ॥९३॥ एतत्तवोक्तं हरकीर्तिवर्धनं पुण्यं पवित्रं शुभदं महर्षे ॥
संकीर्तनीयं द्विजसत्तमेषु धर्मायुरारोग्यधनैषिणा सदा ॥९४॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भैरवप्रादुर्भावे अन्धकवर
प्रदानं नाम सप्ततितमोऽध्यायः॥७०॥नारद उवाच॥मलयेऽपि महेन्द्रेण यत्कृतं द्विजसत्तम॥ निष्पादितं स्वकं कार्यं तन्मे त्वं ख्या
तुमर्हसि ॥१॥ पुलस्त्य उवाच॥ श्रूयतां यन्महेन्द्रेण मलये पर्वते मुने॥कृतं लोकहितं कार्यमात्मनश्च तथा हितम् ॥२॥ अघासुरस्य
वचनान्मयतारपुरोगमाः ॥ ते निर्जिताः सुरगणैः पातालगमनोत्सुकाः ॥ ३ ॥ ददृशुर्मलयं विप्रसिद्धैः सेवितकन्दरम् ॥ लता
विमानसंछन्नं मत्तसत्त्वसमाकुलम् ॥ ४ ॥ चन्दनैरुरगाक्रान्तैः सुशीतैरतिसेवितम् ॥ माधवीकुसुमामोदसुगन्धितमहागिरिम् ॥
॥ ५ ॥ तं दृष्ट्वा शीतलच्छायं श्रान्ता व्यायामकर्शिताः ॥ मयतारपुरोगास्ते निवासं समरोचयन् ॥ ६ ॥ तेषु तत्र निविष्टेषु
घ्राणतृप्तिप्रदोऽनिलः ॥ विवाति शीतः शनकैर्दक्षिणो गन्धसंयुतः ॥ ७ ॥ तत्रैव च रतिं चक्रुः सर्व एव महासुराः॥ कुर्वन्तो लोक
पूज्यानां विद्वेषं सर्ववाससाम् ॥८॥ ताञ्ज्ञात्वा शंकरः शक्रं मलयं प्रेषयत्तदा ॥ स चापि ददृशे गच्छन्पथि गोमातरं हरिः ॥९॥

तस्याः प्रदक्षिणां कृत्वा दृष्ट्वा शैलं च सुप्रभम् ॥ ददृशे दानवान्सर्वान्संहृष्टान्भोगसंयुतान् ॥ १० ॥ अथाजुहाव बलहा सर्वानेव महासुरान् ॥ ते चाप्याययुरव्यग्राः किरन्तश्च शरोत्करान् ॥ ११ ॥ तानागतान्बाणजालै रथस्थोऽद्भुतदर्शनः ॥ छादयामास विप्रर्षे गिरिं दृष्ट्वा यथा घनः ॥ १२ ॥ ततो बाणैरवच्छाद्य मयादीन्दानवान्हरिः ॥ पाकं जघान तीक्ष्णाग्रैर्मार्गणैः कङ्कवाससैः ॥ १३ ॥ तत्र नाम विभुर्लेभे शासनाच्च शरैर्दृढम् ॥ पाकशासन इत्येवं सर्वामरपतिर्विभुः ॥ १४ ॥ तथाऽन्यं पुरनामानं बाणासुरशतं शरैः ॥ सुपुङ्खैर्दारयामास ततोऽभूत्स पुरंदरः ॥ १५ ॥ हत्वेत्थं समरेऽजैषीद्गोत्रभिद्दानवं बलम् ॥ तच्चापि विजितं ब्रह्मन्रसातलमुपागमत् ॥ १६ ॥ एतदर्थ सहस्राक्षः प्रेषितो मलयाचलम् ॥ त्र्यम्बकेण मुनिश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥ १७ ॥ नारद उवाच ॥ किमर्थं दैवतपतिर्गोत्रभित्कथ्यते हरिः ॥ अयं मे संशयो ब्रह्मन्हृदि संपरिवर्तते ॥ १८ ॥ पुलस्त्य उवाच ॥ श्रूयतां गोत्रभिच्छक्रः कीर्तितो हि यथा मया ॥ हते हिरण्यकशिपौ यच्चकारारिमर्दनः ॥ १९ ॥ दितिर्विनष्टपुत्रा तु कश्यपं प्राह नारद ॥ विभो नाथोऽसि मे देहि शक्रहन्तारमात्मजम् ॥ २० ॥ कश्यपस्तामुवाचाथ यदि त्वमसितेक्षणे ॥ शौचाचारसमायुक्ता स्थास्यसे दशतीर्दश ॥ २१ ॥ संवत्सराणां दिव्यानां ततस्त्रैलोक्यनायकम् ॥ जनयिष्यसि तं पुत्रं शत्रुघ्नं नान्यथा प्रिये ॥ २२ ॥ इत्येवमुक्ता सा भर्त्रा दितिर्नियममास्थिता ॥ गर्भाधानमृषिः कृत्वा जगामोदयपर्वतम् ॥ २३ ॥ गते तस्मिन्सुरश्रेष्ठः सहस्राक्षोऽपि सत्वरम् ॥ तमाश्रमम्पुपागम्य दितिं वचनमब्रवीत् ॥ २४ ॥ करिष्याम्यवशुश्रूषां भवत्या यदि मन्यसे ॥ बाढमित्यब्रवीत्साऽपि भाविकर्मप्रचोदिता ॥२५॥ समिदाहरणादीनि तस्याश्चक्र पुरंदरः ॥ विनीतात्मा च ... ॥ दशवर्षशतान्ते तु शिरःस्नाता तपस्विनी ॥ २७ ॥ जानुभ्यां ... ॥ २६ ॥ एकदा सा तपोयुक्ता शोके महति संस्थिता ॥ ... ॥ २८ ॥ ... देवश्चापि सहस्र

मित्यब्रवीत्साऽपि भाविकर्मप्रचोदिता ॥२५॥ समिदाहरणादीनि तस्याश्चक्रे पुरंदरः ॥ विनीतात्मा च [illegible]
ज्ञवत् ॥ २६ ॥ एकदा सा तपोयुक्ता शोके महति संस्थिता ॥ दशवर्षशतान्ते तु शिरःस्नाता तपस्विनी ॥ २७ ॥ जानुभ्या
मुपरि स्थाप्य मुक्तकेशी निजं शिरः ॥ सुष्वाप केशप्रान्तेषु संश्लिष्टचरणाऽभवत् ॥ २८ ॥ तमन्तरमसौ ज्ञात्वा देवश्चापि सहस्र
दृक् ॥ विवेश मातुरुदरे नासारन्ध्रेण नारद ॥ २९ ॥ प्रविश्य जठरे वृद्धो दैत्यमातुः पुरंदरः ॥ ददर्शोर्ध्वमुखं बालं कटिन्यस्त
करं महत् ॥ ३० ॥ तथैवाऽऽस्येऽथ ददृशे मांसपेशीं च वासवः ॥ शुद्धस्फटिकसङ्काशां कराभ्यां जगृहे स ताम् ॥ ३१ ॥ ततः
कोपसमाध्मातो मांसपेशीं शतक्रतुः ॥ कराभ्यां मर्दयामास ततः सा कठिनाऽभवत् ॥३२॥ ऊर्ध्वेनार्धं च ववृधे त्वधोऽर्धं ववृधे
तथा ॥ शतपर्वा सकुलिशः संजातो मांसपेशितः ॥ ३३ ॥ तेनाधिगर्भं दितिजं वज्रेण शतपर्वणा ॥ चिच्छेद सप्तधा ब्रह्मन्स चारो
दीत्सुविस्तरम् ॥ ३४ ॥ ततोऽप्यबुध्यत दितिरज्ञासीच्छक्रचेष्टितम् ॥ शुश्राव वाचं पुत्रस्य रुदतो बालकस्य हि ॥ ३५ ॥ शक्रो
ऽपि प्राह मा मूढ रोदीस्त्वं चातिघर्घरम् ॥ इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा ॥ ३६ ॥ ते जाता मरुतो नाम देवभृत्याः
शतक्रतोः ॥ नानासुखोपचारेण चलन्ते ते पुरस्कृताः॥३७॥ ततः सकुलिशः शक्रो निर्गम्य जठरात्ततः ॥ दितिं कृताञ्जलिपुटः प्राह
भीतस्तु शापतः ॥३८॥ मम नैवापराधोऽयमयमासीदरिंमम ॥ अतो हतो मया देवि तन्मे न क्रोद्धुमर्हसि ॥३९॥ दितिरुवाच ॥
न तवात्रापराधोऽस्ति मन्ये दिष्टमिदं पुरा ॥ संपूर्णे त्वपि काले वै योऽसौ वधमुपागतः ॥४०॥ पुलस्त्य उवाच ॥इत्येवमुक्त्वा

वा०पु०
॥१६१॥

तान्बालान्परिसान्त्व्य दितिं त्वरन् ॥ देवराजः सहैनांस्तु प्रेषयामास भामिनी ॥४१॥ एवं पुरा स्वानपि सोदरान्स गर्भस्थितान् पातितवान्भयार्तः॥ बिभेद वज्रेण ततः सगोत्रभित्ख्यातो महर्षे भगवान्महेन्द्रः ॥ ४२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे शक्रचरिते मरुदुत्पत्तिर्नामैकसप्ततितमोऽध्यायः ॥७१॥ नारद उवाच ॥ ये त्वमी भवता प्रोक्ता मरुतो दितिजोत्तमाः ॥ ते के च पूर्वमासन्वै मरुन्मार्गेषु कथ्यताम् ॥ १ ॥ पूर्वमन्वन्तरे चैव समतीतेषु सत्तम ॥ के त्वासन्वायुमार्गस्थास्तन्मे व्याख्यातुमर्हसि॥ ॥ २ ॥ पुलस्त्य उवाच ॥ श्रूयतां पूर्वमरुतामुत्पत्तिं कथयामि ते॥ स्वायंभुवं समारभ्य यावन्मन्वन्तरं त्विदम्॥३॥स्वायंभुवस्य पुत्रोऽभून्मनुर्नाम प्रियव्रतः ॥ तस्यासीत्सवनो नाम पुत्रस्त्रैलोक्यविश्रुतः ॥ ४ ॥ स चानपत्यो देवर्षे नृपः प्रेतगतिं गतः ॥ ततोऽरुदत्तस्य पत्नी सुवेदा शोकविह्वला॥५॥न ददाति तथा दग्धुं समालिङ्ग्य स्थिता पतिम्॥नाथ नाथेति बहुशो विलपन्ती त्वनाथवत् ॥६॥ ततोऽन्तरिक्षादशरीरिणी वाक्प्रोवाच मा राजपत्नीह रोत्सीः ॥ यदस्ति ते सत्यमनुत्तमं तत्तदा व्रज त्वं पतिना सहाग्निम् ॥७॥ सा तां वाणीमन्तरिक्षान्निशम्य प्राह कान्ता राजपत्नी सुवेदा ॥ शोचाम्येनं पार्थिवं पुत्रहीनं नैवात्मानं मन्दभाग्यं विहङ्ग ॥८॥ सोऽथाब्रवीन्मा रुदस्वेति बाले पुत्रास्ते वै भूमिपालस्य सप्त ॥ भविष्यन्ति वह्निमारोह शीघ्रं सत्यं प्रोक्तं श्रद्दधस्व त्वमद्य ॥ ९ ॥ इत्येवमुक्ता खचरेण बाला चितां समारोप्य पतिं वराहम् ॥ हुताशमासाद्य पतिव्रता सा संचिन्तयन्ती ज्वलनं प्रपन्ना ॥ १० ॥ ततो मुहूर्तान्नृपतिः श्रिया युतः समुत्थितोऽसौ सहितस्तु भार्यया ॥ खमुत्पपाताथ स कामकारी समं महिष्या च सुनाभपुत्र्या ॥ ११ ॥ तस्यापरे पार्थिवपुंगवस्य जाता रजःस्था महिषी तु गच्छतः ॥ [illegible] भुवि भूमिपालाः ॥१२॥ स दिव्ययोगात्प्रतिसंस्थितोऽम्बरे भार्यासहायो दिवसांश्च पञ्च ॥ ततस्तु षष्ठेऽहनि पार्थिवेन [illegible]

॥१६१॥

सुनाभपुत्र्या ॥ ११ ॥ तस्यापरे पार्थिवपुंगवस्य जाता रजःस्था महिषी तु गच्छतः ॥ [illegible]
महान्तो भुवि भूमिपालाः ॥१२॥ स दिव्ययोगात्प्रतिसंस्थितोऽम्बरे भार्यासहायो दिवसांश्च पञ्च ॥ ततस्तु षष्ठेऽहनि पार्थिवेन
ऋतुर्न वन्ध्योऽद्य भवेद्विचिन्त्य ॥ रराम तन्व्या सह कामचारी ततोऽम्बरात्प्राच्यवतास्य शुक्रम् ॥ १३ ॥ शुक्रोत्सर्गावसाने तु
नृपतिर्भार्यया सह ॥ जगाम दिव्यया गत्या ब्रह्मलोक तपोधन ॥ पुत्रास्तस्यावसञ्छूरः कृतास्त्राः सत्यवादिनः ॥ १४ ॥ तदम्ब
रात्प्रचलितमभ्रवर्णं शुक्रं समादा नलिनी च पुष्यती ॥ चित्राविशालाहरितालिनीलाः पत्न्यो मुनीनां ददृशुर्यथेच्छया ॥ १५ ॥
तद्दृष्ट्वा पुष्करे न्यस्तं प्रत्यूचुर्न तपोधनान् ॥ मन्यमानास्तदमृतं सदा यौवनलिप्सया ॥ १६ ॥ ततः स्नात्वा तु विधिवत्संपूज्य
च निजान्पतीन् ॥ पतिभिः समनुज्ञाताः पपुः पुष्करसंज्ञितम् ॥ १७॥ तच्छुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदाऽमृतम् ॥ पीतमात्रेण
शुक्रेण पार्थिवेन्द्रोद्भवेन ताः ॥ ॥ १८ ॥ ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ॥ ततस्तु तत्यजुः सर्वे सदोषास्ते स्वप
त्नयः ॥ १९ ॥ सुषुवुः सप्त तनयान्रुदतो भैरवं मुने ॥ तेषां रुदितशब्देन सर्वमापूरितं जगत् ॥ २० ॥ अथाजगाम भगवान्ब्रह्मा
लोकपितामहः ॥ समभ्येत्याब्रवीद्बालान्मा रुदध्वं महाबलाः ॥२१॥ मरुतो नाम भवतां भविष्यति वियत्स्थिरम् ॥ इत्येवमुक्त्वा
देवेशो ब्रह्मा लोकपितामहः ॥ २२ ॥ तानादाय वियच्चारी मारुतानादिदेश ह ॥ ते त्वासन्मरुतस्त्वाद्ये मनोः स्वायंभुवेऽन्तरे ॥
॥ २३ ॥ स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद ॥ स्वारोचिषस्य पुत्रस्तु श्रीमान्नाम्ना ऋतध्वजः ॥ २४ ॥ तस्य पुत्रा बभू

वुश्च सप्तादित्यपराक्रमाः ॥ तपोऽर्थं ते गताः शैलं महामेरुं नरेश्वराः ॥ २५ ॥ आराधयन्तो ब्रह्माणं पदमैन्द्रं यथेप्सवः ॥ ततो विपश्चिन्नामाऽथ सहस्राक्षो भयातुरः ॥ २६ ॥ पूतनां सोऽप्सरोमुख्यां प्राह नारद वाक्यवित् ॥ गच्छस्व पूतने शैलं महामेरुं विलासिनि ॥ २७ ॥ तप्यन्ति तत्र हि तप ऋतध्वजसुता महत् ॥ यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ॥ २८ ॥ तथा कुरुष्व मा तेषां सिद्धिर्भवतु सुन्दरि ॥ इत्येवमुक्ता शक्रेण पूतना रूपशालिनी ॥ २९ ॥ तत्राजगाम त्वरिता यत्र तैस्तप्यते तपः ॥ आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी ॥ ३० ॥ तस्यां स्नातुं समायाताः सर्व एव सहोदराः ॥ सा तु स्नातुं सुचार्वङ्गी त्ववतीर्णा महानदीम् ॥ ३१ ॥ ददृशुस्ते नृपाः स्नातां ततश्चुक्षुभिरे मुने ॥ ततो ह्यभ्यद्रवच्छुक्रं तत्पपौ जलचारिणी ॥ ३२ ॥ शङ्खिनी ग्राहमुख्यस्य महाशङ्खस्य वल्लभा ॥ तेऽतिविभ्रष्टतपसो जग्मू राज्यं च पैतृकम् ॥ ३३ ॥ सा चाप्सराः शक्रमेत्य याथातथ्यं न्यवेदयत् ॥ ततो बहुतिथे काले सा ग्राही शङ्खरूपिणी ॥ ३४ ॥ समुद्धृता महाजालैर्मत्स्यबन्धेन जालिना ॥ स तां दृष्ट्वा महाशङ्खीं स्थलस्थां मत्स्यजीवनः ॥ ३५ ॥ निवेदयामास तदा ऋतध्वजसुतेषु वै ॥ तथाऽभ्येत्य महात्मानो योगिनां योगधारिणः ॥ ३६ ॥ नीत्वा सुमन्दिरं सर्वे पुरवाप्यां समुत्सृजन् ॥ ततः क्रमाच्छंखिनी सा सुषुवे सप्त वै शिशून् ॥ ३७ ॥ जातमात्रेषु पुत्रेषु मोक्षमार्गमगाच्च सा ॥ अमातृपितृका बाला जलमध्ये विचारिणः ॥ ३८ ॥ स्तन्यार्थिनो वै रुरुदुस्तथाभ्यागात्पितामहः ॥ मा रुदध्वमितीत्याह स्वस्तिश्चैव सुतेषु ॥ ३९ ॥ यूयं देवा भविष्यथ वायुस्कन्धविचारिणः ॥ इत्येवमुक्त्वा ह्यादाय सर्वांस्तान्देवतं प्रति ॥ ४० ॥ नियुज्य च मरुन्मार्गे विराजो भवनं गतः ॥ प्रथमाश्राम्य मरुतो मनोः स्वारोचिषेऽन्तरे ॥ ४१ ॥ उत्तमे मरुतो ये च ताञ्छृणुष्व तपोधन ॥ उत्तमस्यान्वये यस्तु राजाऽऽसी

स्तन्याथिनो वै रुरुदुरथाभ्यागात्पितामहः ॥ मा रुदध्वमितीत्याह स्वस्थास्तिष्ठत पुत्रकाः ॥ ३९ ॥ यूयं देवा भविष्यध्वं

वायुस्कन्धविचारिणः ॥ इत्येवमुक्त्वा ह्यादाय सर्वांस्तान्दैवतं प्रति ॥ ४० ॥ नियुज्य च मरुन्मार्गं विरजा भवनं गतः ॥ एवमाश्वास्य मरुतो मनोः स्वारोचिषेऽन्तरे ॥ ४१ ॥ उत्तमे मरुतो ये च ताञ्छृणुष्व तपोधन ॥ उत्तमस्यान्वये यस्तु राजाऽऽसी न्निषधाधिपः ॥ ४२ ॥ वपुष्मानिति विख्यातो वपुषा भास्करोपमः ॥ तस्य पुत्रो गुणश्रेष्ठो ज्योतिष्मान्धार्मिकोऽभवत् ॥ ॥ ४३ ॥ स पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु ॥ तस्य भार्या च सुश्रोणी देवाचार्यसुता तथा ॥ ४४ ॥ तपश्चरणयुक्तस्य बभूव परिचारिका ॥ साऽऽनयत्फलपुष्पं च समित्कुशजलादि तत् ॥ ४५ ॥ चकार पद्मपत्राक्षी सम्यक् चातिथिपूजनम् ॥ पतिं शुश्रूषमाणा सा कृशा धमनिसंतता ॥ ४६ ॥ तेजोयुक्ता सुचार्वङ्गी दृष्टा सप्तर्षिभिर्वने ॥ तां तथा चारुसर्वाङ्गीं दृष्ट्वाऽथ तपसा कृशाम् ॥ ४७ ॥ पप्रच्छुस्तपसो हेतुं तस्यास्तद्भर्तुरेव च ॥ साऽब्रवीत्तनयार्थाय आवाभ्यां तपसः क्रिया ॥४८॥ ते चास्यै वरदा ब्रह्मज्ञाताः सप्त महर्षयः ॥ व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः ॥ ४९ ॥ युवयोर्गुणसंयुक्ता महर्षीणां प्रसादतः ॥ इत्येव मुक्त्वा जग्मुस्ते सर्वं एव महर्षयः ॥ ५० ॥ स चापि राजर्षिरगात्सभार्यो नगरं निजम् ॥ ततो बहुतिथे काले सा राज्ञो महिषी प्रिया ॥ ५१ ॥ अवाप गर्भं तन्वङ्गी तस्मान्नृपतिसत्तमात् ॥ गुर्विण्यामथ भार्यायां स ममार नराधिपः ॥ ५२ ॥ सा चाप्यारो ढुमिच्छन्ती भर्तारं वै पतिव्रता ॥ निवारिता तदाऽमात्यैर्न तथाऽपि प्रतिष्ठति ॥ ५३ ॥ समारोप्याथ भर्तारं चितायामारुहच्च सा ॥ ततोऽग्निमध्यात्सलिलमाममेवापतन्मुने ॥ ५४ ॥ तदम्भसा सुशीतेन संसिक्तं सप्तधाऽभवत् ॥ तेऽजायन्ताथ मरुत औत्त

मस्यान्तरे मनोः ॥५५॥ तामसस्यान्तरे ये च मरुतोऽथाभवन्पुरा ॥ तानहं कीर्तयिष्यामि गीतवाद्यकलिप्रिय ॥५६॥ तामसस्य मनोः पुत्रो दन्तध्वज इति श्रुतः ॥ स पुत्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥ ५७ ॥ अस्थीनि रोम केशांश्च स्नायुमज्जाय कृद्धनम् ॥ शुक्रं च चित्रको राजा सुतार्थी चेति नः श्रुतम् ॥५८॥ सप्तस्वेवार्चिषु ततः शुक्रपातादनन्तरम् ॥ मा प्रक्षिपस्वेत्य भवच्छब्दः सोऽपि मृतो नृपः ॥ ५९ ॥ ततस्तस्माद्धुतवहात्सप्तधा तेजसा युताः ॥ शिशवः समजायन्त तेऽरुदन्भैरवं मुने ॥ ॥ ६० ॥ तेषां तु ध्वनिमाकर्ण्य भगवान्पद्मसंभवः ॥ समागम्य विचार्याथ स चक्रे मरुतः सुरान् ॥ ६१ ॥ ते त्वासन्मरुतो ब्रह्मंस्तामसे देवतागणाः ॥ येऽभवन्रैवते तांश्च शृणु च त्वं तपोधन ॥ ६२ ॥ रैवतस्यान्ववाये तु य आसीद्रिपुजिद्धनी ॥ रिपु जिन्नामतः ख्यातो न तस्यासीत्सुतः किल ॥ ६३ ॥ स समाराध्य तपसा भास्करं तेजसां निधिम् ॥ अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥ ६४ ॥ तस्यां पितृगृहे ब्रह्मन्वसन्त्यां स पिता मृतः ॥ साऽपि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥ ६५ ॥ ततस्तां वारयामासुर्ऋषयः सप्त नारद ॥ तस्यामासक्तचित्तास्तु सर्व एव तपोधनाः ॥ ६६ ॥ अपारयन्ती तद्दुःखं प्रज्वाल्याग्निं विवेश ह ॥ ते चापश्यन्त ऋषयस्तच्चित्ता भावितास्तथा ॥ ६७ ॥ तां मृतामृषयो दृष्ट्वा कष्टं कष्टेति वादिनः ॥ प्रजग्मुर्ज्वलनाच्चाथ सप्ताजायन्त दारकाः ॥६८॥ ते च मात्रा विनाभूता रुरुदुस्तान्पितामहः ॥ निवारयित्वा कृतवाँल्लोकनाथो मरुद्गणान् ॥ ६९ ॥ रैव तस्यान्तरे जाता मरुतोऽमी तपोधन ॥ शृणु त्वं कीर्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥ ७० ॥ आसीन्मङ्किरिति ख्यातस्तपस्वी



सत्यवाक् शुचिः ॥ सप्तसारस्वते तीर्थे सोऽतप्यत महत्तपः ॥७१॥ विघ्नार्थं तस्य सुपिता देवाः संप्रेषयन्मुने ॥ सा चाक्षुषस्य नद्यां॥ क्षोभयामास भामिनी ॥ ७२ ॥ ततोऽस्य प्राच्यवच्छुक्रं सप्तसारस्वते जले ॥ तां चैवाप्यशपन्मूढां मुनिर्मङ्कणको रिपुम् ॥७३॥

सत्यवाक् शुचिः ॥ सप्तसारस्वतं तीर्थं सोऽतप्यत महत्तपः ॥७१॥ विप्रार्थं तस्य सुषिता द्वयाः संप्रदध्यन्मुन ॥ सा चाभ्यस्य महाशीः
क्षोभयामास भामिनी ॥ ७२ ॥ ततोऽस्य प्राच्यवच्छुक्रं सप्तसारस्वते जले ॥ तां चैवाप्यशपन्मूढां मुनिर्मङ्कणको रिपुम् ॥७३॥
गच्छ वै वेत्सि मूढे त्वं पापस्यास्य महत्फलम् ॥ विध्वंसस्ते हि भविता संप्राप्ते यज्ञकर्मणि ॥ ७४ ॥ एवं शप्त्वा ऋषिः श्रीमा
ञ्जगामाथ स्वमाश्रमम् ॥ सरस्वतीभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन् ॥७५॥ एतत्तवोक्ता मरुतो हि पूर्वे जाता जगद्व्याप्तिकरा
महर्षे ॥ येषां श्रुते जन्मनि पापहानिर्भवेच्च धर्माभ्युदयो महांश्च ॥ ७६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे मरुदुत्प
त्तिर्नाम द्विसप्ततितमोऽध्यायः ॥७२॥ पुलस्त्य उवाच ॥ एतदर्थं बलिर्दैत्यः कृतो राजा कलिप्रिय ॥ मन्त्रप्रदाता प्रह्लादः शुक्र
श्चासीत्पुरोहितः ॥१॥ ज्ञात्वाऽभिषिक्तं दैतेयं विरोचनसुतं बलिम् ॥ दिदृक्षवः समायाता अमराः सर्व एव हि ॥ २ ॥ तानाग
तान्निरीक्ष्यैव पूजयित्वा यथाक्रमम् ॥ पप्रच्छ कुलजान्सर्वान्किनु श्रेयस्करं मम ॥ ३ ॥ ततस्ते प्रोचुरेवैनं शृणु चासुरसुन्दर ॥
यत्ते श्रेयस्करं कर्म यदस्माकं हितं तथा ॥ ४ ॥ पितामहस्तथैवासीद्बली दानवपालकः ॥ हिरण्यकशिपुर्वीरः स शक्रोऽभूज्जग
त्त्रये ॥ ५ ॥ तमागत्य सुरश्रेष्ठो विष्णुः सिंहवपुर्धरः ॥ प्रत्यक्षं दानवेन्द्राणां नखैर्विशकलीकृतः ॥ ६ ॥ अवकृष्टश्च राज्यात्स
त्र्यम्बकेण महात्मना ॥ अस्मदर्थे महाबाहो शंकरेण त्रिशूलिना॥७॥तथा तव पिताऽन्योऽपि जम्भः शक्रेण घातितः ॥ कुजम्भो
विष्णुना चापि प्रत्यक्षं पशुवद्धतः ॥ ८ ॥ शङ्खः पाको महेन्द्रेण भ्राता तव सुदर्शनः ॥ विरोचनस्तव पिता निहतः कथयामि ते

॥ ९ ॥ श्रुत्वा गोत्रक्षयं ब्रह्मन्कृतं शक्रेण दानवः ॥ उद्योगं कारयामास सह सर्वैर्महासुरैः ॥ १० ॥ रथैरन्ये गजैरन्ये वाजिभिश्चापरेऽसुराः ॥ पदातयस्तथाऽप्यन्ये जग्मुर्युद्धाय देवताः॥११॥ मयोऽग्रे याति बलवान्सेनानाथो भयंकरः॥ सैन्यस्य मध्ये बलिनः कालनेमिश्च पृष्ठतः ॥ १२ ॥ वामपार्श्वमवष्टभ्य शाल्वः प्रथितविक्रमः ॥ प्रयाति दक्षिणं घोरं तारकाख्यो भयंकरः ॥ १३ ॥ दानवानां सहस्राणि प्रयुतान्यर्बुदानि च ॥ संप्रयातानि युद्धाय देवैः सह कलिप्रिय ॥ १४ ॥ श्रुत्वाऽसुराणामुद्योगं शक्रः सुरपतिः सुरान् ॥ उवाच योगं दैत्यानां योद्धुं स्वबलसंयुतः ॥१५॥ इत्येवमुक्त्वा वचनं सुरराट् स्यन्दनं बली ॥ समारुरोह भगवान्यमातलिवाजिनम् ॥१६॥ समारूढे सहस्राक्षे स्यन्दनं देवता गताः ॥ स्वं स्वं वाहनमारुह्य निश्चेरुर्युद्धकाङ्क्षिणः ॥१७॥ आदित्या वसवो रुद्राः साध्या विश्वेऽश्विनौ तथा ॥ विद्याधरा गुह्यकाश्च यक्षराक्षसपन्नगाः ॥ १८ ॥ राजर्षयस्तथा सिद्धा नानाभूताश्च संघशः ॥ गजानन्ये रथानन्ये हयानन्ये समारुहन् ॥ १९ ॥ विमानानि च शुभ्राणि पक्षिवाह्यानि नारद ॥ समारुह्या द्रवन्सर्वे यतो दैत्यबलं स्थितम्॥२०॥एतस्मिन्नन्तरे धीमान्वैनतेयः समागतः ॥ तस्मिन्विष्णुः सुरश्रेष्ठस्त्वधिरूढः समभ्यगात् ॥ ॥ २१ ॥ तमागतं सहस्राक्षस्त्रैलोक्यपतिमव्ययम् ॥ ववन्द मूर्ध्नाऽवनतः सह सर्वैः सुरोत्तमैः ॥ २२ ॥ ततोऽग्रे देवसैन्यस्य कार्त्तिकेयो गदाधरः ॥ पालयञ्जघनं विष्णुर्याति मध्यं सहस्रदृक् ॥ २३ ॥ वामं पार्श्वमवष्टभ्य जयन्तो वर्तते मुने ॥ दक्षिणं वरुणः पार्श्वमवष्टभ्यागमद्बली ॥ २४ ॥ ततोऽमराणां पृतना यशस्विनी स्कन्देन्द्रविष्णूरुणसूर्यपालिता ॥ नानास्त्रशस्त्रोद्यतदोःसमूहा



समाससादारिबलं महीध्रे ॥ २५ ॥ उदयाद्रितटे रम्ये शुभे समशिलातले ॥ निर्वृक्षे पक्षिरहिते जातो देवासुरो रणः ॥ २६ ॥ सन्निधानात्तयो रौद्रः सेनयोरभवन्मुने ॥ महीध्रे शान्तरजसि तद्दानवबलं महत् ॥२७॥ अभ्यद्रवन्त सहसा समं स्कन्देन देवताः॥

समाससादाखिलं महीध्रे ॥ २५ ॥ उदयाद्रितटे रम्ये शुभे समशिलातले ॥ निवृक्षे पक्षिरहिते जातो देवासुरो रणः ॥ २६ ॥
सन्निधानात्तयो रौद्रः सेनयोरभवन्मुने ॥ महीध्रे शान्तरजसि तद्दानवबलं महत् ॥२७॥ अभ्यद्रवन्त सहसा समं स्कन्देन देवताः॥
निजघ्नुर्दानवान्देवाः कुमारभुजपालिताः ॥ २८ ॥ देवान्निजघ्नुर्दितिजा मयगुप्ताः प्रहारिणः ॥ महीधरोत्तमे पूर्वं यथा
वानरहस्तिनोः ॥ २९ ॥ रणरेणू रथोद्धूतः पिङ्गलो रणमूर्धनि ॥ संध्यानुरक्तः सदृशो मेघः खे सुरतापस ॥ ३० ॥ तदाऽऽसीत्तु
मुलं युद्धं न प्राज्ञायत किंचन ॥ श्रूयन्ते त्वनिशं शब्दाश्छिन्धि भिन्धीति वादिनाम् ॥ ३१ ॥ ततो विशसनो रौद्रो दैत्यानां
दैवतैः सह ॥ जातो रुधिरनिष्पन्दो रजसः शमनात्मकः ॥ ३२ ॥ शान्ते रजसि देवौघास्तद्दानवबलं महत् ॥ अभ्यद्रवन्नसहि
ताः समं स्कन्देन धीमता ॥ ३३ ॥ निजघ्नुर्दानवान्देवाः कुमारभुजपालिताः ॥ देवान्निजघ्नुर्दैत्याश्च मयगुप्ताः प्रहारिणः॥३४॥
ततोऽमृतरसास्वादाद्विनाभूताः सुरोत्तमाः ॥ निर्जिताः समरे दैत्यैः समं सैन्येन नारद ॥३५॥ विनिर्जितान्सुरान्दृष्ट्वा वैनतेयध्वजो
ऽरिहा ॥ शार्ङ्गमुद्यम्य बाणौघैर्निजघान ततस्ततः ॥ ३६ ॥ विष्णुना हन्यमानास्ते दानवा गरुडोऽप्यथ ॥ दैतेयाः शरणं जग्मुः
कालनेमिं महासुरम् ॥ ३७ ॥ तेभ्यः स चाभयं दत्त्वा प्रययौ यत्र माधवः ॥ विवृद्धिमगमद्ब्रह्मन्यथा व्याधिरुपेक्षितः ॥ ३८ ॥
यं यं करेण स्पृशति देवं यक्षं सकिन्नरम् ॥ तं तमादाय चिक्षेप विस्तृते वदने बली ॥ ३९ ॥ संरम्भाद्दानवेन्द्रो न्यमृदत दितिजैः
संयुगे देवसैन्यं सेन्द्रं सार्कं सचन्द्रं करचरणनखैरस्त्रहीनोऽपि वेगात् ॥ चक्रे वैश्वानराभैस्सरववनिगगनयोस्तिर्यगूर्ध्वं समन्ताद्व्याप्तं

कल्पान्तवह्नेर्जगदखिलमिदं रूपमासीद्दिधक्षोः ॥४०॥ तं दृष्ट्वा वर्धमानं रिपुमतिबलिनं देवगन्धर्वमुख्याः सिद्धाः साध्याश्च मुख्या भवतरलदृशः प्राद्रवन्दिक्षु सर्वे ॥ पोप्लूयन्ते च दैत्या हरिममरगणैरर्चितं चारुमौलिं नानाशस्त्रास्त्रपातैर्विगलितयशसं चक्रुरुत्सिक्तदर्पाः ॥ ४१ ॥ तानित्थं प्रेक्ष्य दैत्यान्मयबलिप्रमुखान्कालनेमिप्रधानान्बाणैराकृष्य शार्ङ्गात्त्वनवरतमुरोभेदिभिर्वज्रकल्पैः ॥ कोपादारक्तदृष्टिः सरथगजहयान्दृष्टिनिर्धूतवीर्यान्नाराचाख्यैः सुपुङ्खैर्जलद इव गिरिं छादयामास विष्णुः ॥ ४२ ॥ ते बाणैश्छाद्यमाना हरिकरमुचितैः कालदण्डप्रकाशैर्नाराचैरर्धचन्द्रैर्बलिमयपुरगा भीतभीतास्त्वरन्तः ॥ प्रारम्भे दानवेन्द्रं शतमखमथनं प्रेक्ष्य यन्कालनेमिं स प्रायाद्देवसैन्यप्रभुममितबलं केशवं लोकनाथम् ॥ ४३ ॥ दृष्ट्वा तं शतशीर्षमुद्यतगदं शैलेन्द्रशृङ्गाकृतिं विष्णुः शार्ङ्गमपास्य सत्वरमथो जग्राह चक्रं करे ॥ देवैनैव समेत्य दैत्यविटपप्रच्छेदनं मालिनं प्रोवाचाथ विहस्य तं च सुचिरं मेघस्वनो दानवः ॥ ४४ ॥ अयं स दनुपुत्रजिद्दनुजसैन्यवित्रासकृद्रिपुः परमकोपनो मम विघातकृत्त्वायुधी ॥ हिरण्यनयनान्तको विविधपुष्पपूजारतिः क्व याति मम गोचरे निपतितः खलोऽसदृशः ॥ ४५ ॥ यद्येष सम्प्रति ममाहवमभ्युपैति नूनं न याति निलयं निजमम्बुजाक्षः ॥ मन्मुष्टिपिष्टशिथिलाङ्गमुपान्तभस्म संद्रक्ष्यते सुरजनो भयकातराक्षः ॥४६॥ इत्येवमुक्त्वा मधुसूदनं वै स कालनेमिः स्फुरिताधरोष्ठः ॥ गदां खगेन्द्रोपरि जातरोषो मुमोच शैले कुलिशं यथेन्द्रः ॥ ४७ ॥ तामापतन्तीं प्रसमीक्ष्य विष्णुर्घोरां गदां दानवबाहुमुक्ताम् ॥ चक्रेण चिच्छेद सुदुर्गतस्य मनोरथं पूर्वकृतं हि कर्म ॥ ४८ ॥ गदां छित्त्वा तदा विष्णुर्दानवस्य सुदारुणाम् ॥





भाति दग्धः शैल इवापरः ॥ ५० ॥ ततोऽस्य माधवः कोपाच्छिरश्चक्रेण भूतले ॥ छित्त्वा निपातयामास पक्वं तालफले

णाम् ॥ समुत्पत्य भुजौ पीनौ संप्राचच्छेद भगवान् ॥ ८९ ॥ भुजाभ्यामथ कृत्ताभ्यां विष्णुना प्रभविष्णुना ॥ [illegible]
भाति दग्धः शैल इवापरः ॥ ९० ॥ ततोऽस्य माधवः कोपाच्छिरश्चक्रेण भूतले ॥ छित्त्वा निपातयामास पक्वं तालफलं
यथा ॥ ९१ ॥ तथा विबाहुर्विशिरा मुण्डतालो यथा वने ॥ तस्थौ मेरुरिवाकम्प्यः कबन्धः क्ष्माधरेश्वरः ॥ ९२ ॥ तं वैनतेयो
ऽप्युरसा खगेन्द्रो निपातयामास मुने धरण्याम् ॥ यथाऽम्बराद्बाहुशिरः प्रनष्टं धन्यं महेन्द्रः कुलिशेन भूम्याम् ॥ ९३ ॥ तस्मि
न्हते दानवसैन्यपाले संसाध्यमानास्त्रिदशैश्च दैत्याः ॥ विमुक्तशस्त्रालकवर्मवस्त्राः संप्राद्रवन्बाणमृतेऽसुरेन्द्राः ॥९४॥ इति श्रीवामन
पुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे कालनेमिवधो नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ पुलस्त्य उवाच ॥ संनिवृत्तबले
बाणे दानवाः सत्वरं पुनः ॥ प्रयाता देवतासेनां सशस्त्रायुधलालसाः ॥ १ ॥ विष्णुरप्यमितौजास्तं ज्ञात्वाऽजेयं बलेः सुतम् ॥
प्राहामन्त्र्य सुरान्सर्वान्युध्यध्वं विगतज्वराः ॥ २ ॥ विष्णुनाऽथ समादिष्टा देवाः शक्रपुरोगमाः ॥ युयुधुर्दानवैः सार्धं विष्णु
स्त्वन्तरधीयत ॥ ३ ॥ माधवं गतमाज्ञाय शुक्रो बलिमुवाच ह ॥ गोविन्देन सुरास्त्यक्तास्त्वं जयस्वाधुना बले ॥ ४ ॥ स पुरो
हितवाक्येन प्रीतो याते जनार्दने ॥ गदामादाय तेजस्वी देवसैन्यमभिद्रुतः ॥ ५ ॥ बाणो बाहुसहस्रेण गृह्य प्रहरणान्यथ ॥ देव
सैन्यमभिद्रुत्य निजघान सहस्रशः ॥ ६ ॥ मयोऽपि मायामास्थाय तैस्तै रूपान्तरैर्मुने ॥ योधयामास बलवानमराणां वरूथि
नीम् ॥ ७ ॥ विद्युज्जिह्वः परो भद्रो वृषपर्वा सितेक्षणः ॥ विपाको विक्षरः सैन्यं तेऽपि देवानुपाद्रवन् ॥ ८ ॥ ते हन्यमाना दिति

जैर्देवाः शक्रपुरोगमाः ॥ गते जनार्दने देवे प्रायशो विमुखाभवन् ॥ ९ ॥ तान्प्रभग्नान्सुरगणान्बलिबाणपुरोगमाः ॥ पृष्ठतस्त्वद्रवन्सर्वे त्रैलोक्यविजिगीषवः ॥ १० ॥ संसध्यामाना दैतेयैर्देवाः सेन्द्रा भयातुराः ॥ त्रिविष्टपं परित्यज्य ब्रह्मलोकमुपागताः ॥११॥ ब्रह्मलोकं गतेष्वित्थं सेन्द्रेष्वपि सुरेषु वै ॥ स्वर्गभोक्ता बलिर्जातः सभृत्यसुतबान्धवैः॥१२॥शक्रोऽभूद्बलवान्ब्रह्मन्बलिर्बाणो यमोऽभवत् ॥ वरुणोऽभून्मयः सोमो राहुर्ह्रादो महासुरः ॥१३॥ स्वर्भानुरभवत्सूर्यः शुक्रश्चासीद्बृहस्पतिः ॥ येऽन्येऽप्यधिकृता देवास्तेषु जाताः सुरारयः ॥१४॥ पञ्चमस्य कलेरादौ द्वापरान्ते सुदारुणे ॥ देवासुरोऽभूत्संग्रामो यत्र शक्रोऽप्यभूद्बलिः॥ ॥१५ ॥ पातालास्तस्य सप्तासन्वशे लोकत्रयं तथा ॥ भूर्भुवः स्वः परिख्यातं दशलोकाधिपो बलिः ॥१६॥ स्वर्गे स्वयं निवसति भुञ्जन्भोगान्सुदुर्लभान् ॥ तत्रोपासत गन्धर्वा विश्वावसुपुरोगमाः॥१७॥तिलोत्तमाद्या ह्यप्सरसो नृत्यन्ति सुरतापसाः॥वादयन्ति च वाद्यानि यक्षविद्याधरादयः ॥ १८ ॥ त्रैविष्टपानसौ भोगान्भुञ्जन्दैत्येश्वरो बलिः ॥ सस्मार मनसा ब्रह्मन्प्रह्लादं स पितामहम् ॥ ॥ १९ ॥ संस्मृतश्च स पौत्रेण महाभागवतोऽसुरः ॥ समभ्यागात्त्वरायुक्तः पातालात्स्वर्गमव्ययम् ॥ २० ॥ तमागतं समीक्ष्यैव त्यक्त्वा सिंहासनं बलिः ॥ कृताञ्जलिपुटो भूत्वा ववन्दे चरणावुभौ ॥ २१ ॥ पादयोः पतितं वीरं प्रह्लादस्त्वरितो बलिम् ॥ समुत्थाप्य परिष्वज्य विवेश परमासने ॥ २२ ॥ तं बलिः प्राह भो तात त्वत्प्रसादात्सुरा मया ॥ निर्जिताः शक्रराज्यं च हृतं वीर्यबलान्मया ॥ २३ ॥ तदिदं तात मद्वीर्यविनिर्जितसुरोत्तमम् ॥ त्रैलोक्यराज्यं भुङ्क्ष्व त्वं मयि भृत्ये पुरः स्थिते ॥ २४ ॥ ऐराव





तः पुण्ययुतो भविष्यामि यथाऽन्वहम् ॥ त्वदङ्घ्रिपूजाभिरतस्त्वदुच्छिष्टान्नभोजनः ॥ २५ ॥ न स पालयते राज्यं [illegible]
सत्तम ॥ न योऽनुतिष्ठति गुरून्शुश्रूषां कुरुते न यः ॥ २६ ॥ ततस्तदुक्तं बलिना वाक्यं श्रुत्वा द्विजोत्तमः ॥ प्रह्लादो वचनं प्राह

तः पुण्ययुतो भविष्यामि यथाऽन्वहम् ॥ त्वदङ्घ्रिपूजाभिरतस्त्वदुच्छिष्टान्नभोजनः ॥ २५ ॥ न स पालयते राज्यं भूतिमवाप्स
सत्तम ॥ न योऽनुतिष्ठति गुरून्शुश्रूषां कुरुते न यः ॥ २६ ॥ ततस्तदुक्तं बलिना वाक्यं श्रुत्वा द्विजोत्तमः ॥ प्रह्लादो वचनं प्राह
धर्मकामार्थसाधनम् ॥२७॥ मया कृतं राज्यमकण्टकं पुरा प्रशासितान्तःसुहृदोऽनुपूजिताः ॥ दत्तं यथेष्टं जनितास्तथाऽऽत्मजाः
स्थितो बले सम्प्रति योगसाधकः ॥ २८ ॥ गृहीतं पुत्र विधिवन्मया भूयोऽर्पितं तव॥ एवं भव गुरूणां त्वं सदा शुश्रूषणे रतः ॥
॥ २९ ॥ इत्येवमुक्त्वा वचनं करे त्वादाय दक्षिणे ॥ शाक्रे सिंहासने ब्रह्मन्बलिं तूर्णमवेशयत् ॥ ३० ॥ सोपविष्टो महेन्द्रस्य सर्व
रत्नमये शुभे ॥ सिंहासने दैत्यपतिः शुशुभे मघवानिव ॥ ३१ ॥ तत्रोपविष्टश्चैवासौ कृताञ्जलिपुटो बलिः ॥ प्रह्लादं प्राह वचनं
मेघगम्भीरया गिरा ॥३२॥ यन्मया तात कर्तव्यं त्रैलोक्यं परिरक्षता ॥ धर्मार्थकाममोक्षेभ्यस्तदादिशतु नो भवान्॥ ३३ ॥ तद्वा
क्यसमकालं च शुक्रः प्रह्लादमब्रवीत् ॥ यद्युक्तं तन्महाबाहो वदस्वास्योत्तरं वचः ॥ ३४ ॥ वचनं बलिशुक्राभ्यां श्रुत्वा भार्गव
तोऽसुरः ॥ प्राह धर्मार्थसंयुक्तं प्रह्लादो वाक्यमुत्तमम् ॥ ३५ ॥ यदायतिक्षमं राजन्वित्तं त्रिभुवनस्य च ॥ अविरोधेन धर्मस्य
अर्थस्योपार्जनं च तत् ॥३६॥ सर्वसत्त्वानुगमनं त्रिवर्गस्य फलं च यत् ॥ परत्रेह च यच्छ्रेयः पुत्र तत्कर्म चाचर ॥ ३७ ॥ यथा
श्लाघ्यं प्रयास्यद्य यथा कीर्तिर्भवेत्तव॥यथा नायशसो योगस्तथा कुरु महाद्युते॥३८॥एतदर्थं श्रियं दीप्तां काङ्क्षन्ते पुरुषोत्तमाः॥
येनैते च गृहेऽस्माकं निवसन्ति सुनिर्वृताः ॥ ३९ ॥ कुलजो व्यसने मग्नः सखिज्ञातिबहिष्कृतः ॥ वृद्धो ज्ञातिर्गुणी विप्रः कीर्तिश्च

यशसा सह॥४०॥तस्माद्यथैते निवसन्ति पुत्र राज्यस्थितस्येह कुलोद्भवस्य ॥ तथा यतस्वामलसत्त्वचेष्ट यथा यशस्वी भवितासि लोके॥४१॥भूम्यां सदा ब्राह्मणभूषितायां क्षत्रान्वितायां दृढवापितायाम्॥शुश्रूषणासक्तिसमुद्भवायामृद्धिं प्रयान्तीह नराधिपेन्द्राः॥ ॥४२॥ तस्माद् द्विजाग्र्याः श्रुतिशास्त्रयुक्ता नराधिपांस्ते प्रतियाजयन्तु ॥ यजन्तु दिव्यैः क्रतुभिर्द्विजेन्द्रा यज्ञाग्निधूमेन नृपस्य शान्तिः ॥४३॥ तपोऽध्ययनसंपन्ना यजनेऽध्यापने रताः ॥ सन्तु विप्राः क्षत्रपूज्यास्त्वत्तोऽनुज्ञामवाप्य हि ॥४४॥ स्वाध्याययज्ञनिरता दातारः शस्त्रजीविनः ॥ क्षत्रियाः सन्तु दैत्येन्द्र प्रजापालनधर्मिणः ॥४५॥ यज्ञाध्ययनसंपन्ना दातारः कृषिकारिणः॥ पाशुपाल्यं प्रकुर्वाणा वैश्या विपणिजीविनः॥४६॥ब्राह्मणक्षत्रियविशां सदा शुश्रूषणे रताः॥शूद्राः सन्तु सुरश्रेष्ठ तवाज्ञाकारिणः सदा॥४७॥ यदा वर्णाः स्वधर्मस्था भवन्ति दितिजेश्वराः॥धर्मवृद्धिस्तदा स्याद्वै धर्मवृद्धौ नृपादयः॥४८॥तस्माद्वर्णाः स्वधर्मस्थास्त्वया कार्याः सदा बले ॥ तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥४९॥ इत्थं वचः श्राव्य नराधिपेन्द्रो बलिर्महात्मा स बभूव तूष्णीम्॥ ततो यदाज्ञापयसे करिष्ये इत्थं बलिः प्राह वचो महर्षे॥५०॥इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ पुलस्त्य उवाच ॥ ततो गतेषु देवेषु ब्रह्मलोकं तपोधन ॥ त्रैलोक्यं पालयामास बलिर्धर्मान्वितः सदा ॥ ॥ १ ॥ कलिस्तदा धर्मयुतं जगद्दृष्ट्वा कृते यथा ॥ ब्रह्माणं शरणं भेजे स्वभावस्य निषेधनात् ॥ २ ॥ गत्वा स ददृशे देवं सेन्द्रं देवैः समन्वितम् ॥ स्वदीप्त्या द्योतयन्तं च स्वदेशं समराश्रमम् ॥३॥ प्रणिपत्य तमाहाथ कलिर्ब्रह्माणमीश्वरम् ॥ मम स्वभावो



बलिना नाशितो देवसत्तम ॥ ४ ॥ तं प्राह भगवान्ब्रह्मा स्वभावं जगतोऽपि हि ॥ न केवलं हि भवतो हृतस्तेन बलेन ॥ ५ ॥ न तस्य कश्चित्त्रैलोक्ये

बलिना नाशितो देवसत्तम ॥ ४ ॥ तं प्राह भगवान्ब्रह्मा स्वभावं जगतोऽपि हि ॥ न केवलं हि मघवा ... ॥
॥ ५ ॥ पश्यस्युत्तिष्ठ देवेन्द्रं वरुणं सहमारुतम् ॥ भास्करोऽपि हि दीनत्वं प्रयातो हि बलाद्बलेः ॥ ६ ॥ न तस्य कश्चित्त्रैलोक्ये
प्रतिषेद्धाऽस्ति कर्मणः ॥ ऋते सहस्रशिरसं हरिं दशशताङ्घ्रिकम् ॥७॥ स भूमिं च तथा नाकं राज्यं लक्ष्मीं यशो बलम् ॥ समा
हरिष्यति बलिः कर्ताऽसौ धर्मगोचरम् ॥ ८ ॥ इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः ॥ दीनान्दृष्ट्वा स शक्रादीन्बिभीतकवनं
गतः ॥ ९ ॥ कृतं प्रावर्तत तदा कलिर्नासीज्जगत्त्रये ॥ धर्मोऽभवच्चतुष्पादश्चातुर्वर्ण्येऽपि नारद ॥ १० ॥ तपोऽहिंसा च सत्यं च
शौचमिन्द्रियनिग्रहः ॥ दया दानं त्वानृशंस्यं शुश्रूषा यज्ञकर्म च ॥ ११ ॥ जगन्त्येतानि सर्वाणि परिव्याप्य स्थितानि हि ॥ बला
द्विचलितो ब्रह्मंस्तुष्टोऽपि हि कृतः कृतः ॥१२॥ स्वधर्मस्थायिनो वर्णा आश्रमांश्चाविशन्द्विजाः ॥ प्रजापालनधर्मस्थाः सदैव मनु
जर्षभाः ॥ १३ ॥ धर्मोत्तरे वर्तमाने ब्रह्मन्नस्मिञ्जगत्त्रये ॥ त्रैलोक्यलक्ष्मीरगमत्तदानीं दानवेश्वरम् ॥ १४ ॥ तामागतां निरीक्ष्यैव सह
स्राक्षश्रियं बलिः ॥ पप्रच्छ काऽसि मां ब्रूहि केनाप्यर्थेन चागता ॥ १५ ॥ सा तद्वचनमाकर्ण्य तदा श्रीः पद्ममालिनी ॥ बले शृणु च
यस्मात्त्वामायाता महिषी बलात् ॥ १६ ॥ अप्रतर्क्यबलो देवो योऽसौ चक्रगदाधरः ॥ तेन त्यक्तस्तु मघवांस्ततोऽहं त्वामिहा
गता ॥ १७ ॥ स निर्ममे युवत्यस्तु चतस्रो रूपसंयुताः ॥ श्वेताम्बरधरा चैव श्वेतस्रगनुलेपना ॥१८॥ श्वेतवृन्दारकारूढा सत्त्वाढ्या
श्वेतविग्रहा॥रक्ताम्बरधरा चान्या रक्तस्रगनुलेपना॥१९॥रक्तवाजिसमारूढा रक्ताङ्गी राजसी हि सा॥पीताम्बरा पीतवर्णा पीतस्रगनु

वा०पु०
॥१६८॥

लेपना ॥ २० ॥ सौवर्णस्यन्दनारूढा तामसं गुणमाश्रिता ॥ नीलाम्बरा नीलमाल्या नीलगन्धालिप्तप्रभा॥२१॥नीलवृषसमारूढा त्रिगुणा सा प्रकीर्तिता ॥ या सा श्वेताम्बरा श्वेता सत्त्वाढ्या कुञ्जरस्थिता ॥ २२ ॥ सा ब्रह्माणं समायाता चन्द्रचन्द्रानुगानपि ॥ या सा रक्ता रक्तवासा वाजिस्था रजसाऽन्विता ॥ २३ ॥ तां प्रादाद्देवराजाय मनवे तत्सुताय च ॥ पीताम्बरा या सुभगा रथस्था कनकप्रभा ॥ २४ ॥ प्रजापतिभ्यस्तां प्रादाच्छक्राय च विशत्सु च ॥ नीलवस्त्रालिप्तसदृशा या चतुर्थी वृषस्थिता ॥ २५ ॥ सा दानवान्नैर्ऋतांश्च शूद्रान्विद्याधरानपि ॥ विप्राद्याः श्वेतरूपां तां कथयन्ति सरस्वतीम् ॥२६॥ स्तुवन्ति ब्रह्मणा सार्धं मखे मन्त्रादिभिः सदा ॥ क्षत्रिया रक्तवर्णां तां जयश्रीं च शशंसिरे ॥ २७ ॥ सा चन्द्रेण सुरश्रेष्ठ मनुना च यशस्विनी ॥ वैश्यास्तां पीतवसनां कनकाङ्गीं सदैव हि ॥ २८ ॥ स्तुवन्ति लक्ष्मीमित्येव प्रजापालास्तथैव हि ॥ शूद्रास्तां नीलवर्णाङ्गीं स्तुवन्ति हि सुभक्तितः ॥ २९ ॥ प्रियदेवीति नाम्ना तां सदैत्यै राक्षसैस्तथा ॥ एवं विभक्तास्ता नार्यस्तेन देवेन चक्रिणा ॥ ३० ॥ एतासां च स्वरूपस्थास्तिष्ठन्ति निधयोऽव्ययाः ॥ इतिहासपुराणानि वेदाः साङ्गास्तथोक्तयः ॥ ३१ ॥ चतुःषष्टिकलाः श्वेता महापद्मो निधिः स्थितः ॥ रत्नानि स्वर्णरजतं गजाश्वरथभूषणम् ॥ ३२ ॥ शस्त्रास्त्रादिकवस्तूनि रक्ता पद्मो निधिः स्मृतः ॥ गोमहिष्यः खरोष्ट्राश्च सुवर्णाम्बरभूमयः ॥ ३३ ॥ ओषध्यः पशवः पीता महानीलो निधिः स्थितः ॥ सर्वासामपि जातीनां जातिरेका प्रतिष्ठिता ॥ ३४ ॥ अन्येषामपि संहर्त्री नीला शङ्खो निधिः स्थितः ॥ एताभिश्च स्थितानां च यानि

रूपाणि दानव ॥ भवन्ति पुरुषाणां च तन्निबोध वदामि ते ॥२५॥ सत्त्वशौचाभिसंयुक्ता बलदानरता [illegible] ॥ [illegible]
पते महापद्माश्रिता नराः ॥ २६ ॥ यज्विनो सुभगा हृष्टा मालिनो बहुदक्षिणाः ॥ सर्वसामान्यसुखिनो नराः पद्माश्रिताः स्थिताः
॥ २७ ॥ सत्यानृतसमायुक्ता दानाशरणयज्विनः ॥ न्यायान्यायव्ययोपेता महानीलाश्रिता नराः ॥ २८ ॥ नास्तिकाः शौच
रहिताः कृपणा भोगवर्जिताः ॥ स्तेयानृतकथायुक्ता नराः शङ्खाश्रिता बले ॥ २९ ॥ इत्येवं कथितस्तुभ्यमासां दानव निर्णयः
॥ ४० ॥ अहं सा रागिणी नाम जयश्रीस्त्वामुपागता ॥ ममास्ति दानवपते प्रतिज्ञा साधुसंमता ॥ ४१ ॥ समाश्रयामि शौर्यांशं
न च क्लीबं कथंचन ॥ न चास्ति तव तुल्योऽन्यस्त्रैलोक्येऽपि बलान्वितः ॥ ४२ ॥ त्वया बलवता राजन्प्रीतिर्मे जनिता
ध्रुवा ॥ यत्त्वया युधि विक्रम्य देवराजो विनिर्जितः ॥ ४३ ॥ अतो मे परमप्रीतिर्जाता दानव शाश्वती ॥ दृष्ट्वा ते परमं सत्त्वं
सर्वेभ्योऽपि बलाधिकम् ॥ ४४ ॥ शौण्डीर्यमानिनं वीरं ततोऽहं स्वयमागता ॥ नाश्चर्यं दानवश्रेष्ठ हिरण्यकशिपोः कुले ॥ ४५॥
प्रसूतस्यासुरेन्द्रस्य तव कर्म यदीदृशम् ॥ विशेषतस्त्वया राजन्दैतेयः प्रपितामहः ॥४६॥ विजितं च क्रमाद्येन त्रैलोक्यं वै परैर्हृ
तम् ॥ इत्येवमुक्त्वा वचनं दानवेन्द्रं जगन्मयी ॥ ४७ ॥ जयश्रीश्चन्द्रवदना प्रविष्टा द्योतयच्छुभा ॥ तस्यां चैव प्रविष्टायां
विधवा इव योषितः ॥ ४८ ॥ समाश्रयन्ति बलिनं ह्रीः कीर्तिर्द्युतिरेव च ॥ प्रभा गतिः क्षमा भूतिर्विद्या नीतिर्दया मतिः ॥४९॥
श्रुतिः स्मृतिर्बलं कीर्तिर्धृतिः शान्तिः क्रिया द्विज ॥ पुष्टिस्तुष्टिस्तथा चान्या सत्त्वश्रियमवस्थिता ॥ सर्वा बलिं समाश्रित्य विश्रा

म्यन्ति यथासुखम् ॥ ५० ॥ एवंगुणोऽभूद्दनुपुंगवोऽसौ बलिर्महात्मा शुभबुद्धिरात्मवान् ॥ यज्वा तपस्वी मृदुरेव सत्यवाग्दाता विभर्ता स्वजनान्त्सुगोप्ता ॥५१॥ त्रिविष्टपं शासति दानवेन्द्रे नासीत्क्षुधार्तो मलिनो न दीनः ॥ सदोज्ज्वलो धर्मरतोऽथ दान्तः कामोपभोगी मनुजोऽपि जातः ॥५२॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे पञ्चसप्ततितमोऽध्यायः ॥७५॥

पुलस्त्य उवाच ॥ गते त्रैलोक्यराज्ये तु दानवेषु पुरंदरः ॥ जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥ १ ॥ तत्रापश्यत्तु देवेशं ब्रह्माणं कमलोद्भवम् ॥ ऋषिभिः सार्धमासीनं पितरं स्वं च कश्यपम् ॥ २ ॥ ततो ननाम शिरसा शक्रः सुरगणैः सह ॥ ब्रह्माणं कश्यपं चैव तांस्तु सर्वांस्तपोधनान्॥३॥प्रोवाचेन्द्रः सुरैः सार्धं देवनाथं पितामहम् ॥ पितामह हृतं राज्यं बलिना बलिना मम॥ ॥ ४ ॥ ब्रह्मा प्रोवाच शक्रैतद्भुज्यते हि कृतं फलम् ॥ शक्रः पृच्छति भो ब्रूहि किं मया दुष्कृतं कृतम् ॥ ५ ॥ कश्यपोऽप्याह देवेश भ्रूणहत्या कृता त्वया ॥ त्वया गर्भो दित्युदरात्कृत्तो हि बहुधा बलात् ॥ ६ ॥ पितरं प्राह देवेन्द्रः स मातुर्दोषतो विभो ॥ तन्नूनं प्राप्तवान्गर्भो यदशौचा हि साऽभवत् ॥ ७ ॥ ततोऽब्रवीत्कश्यपस्तु मातुर्दोषः सदा सताम् ॥ गतस्ततोऽपि निहतो दासोऽपि कुलिशेन ते ॥ ८ ॥ तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम् ॥ विनाशं पाप्मनो ब्रूहि प्रायश्चित्तं प्रभो मम ॥ ९ ॥ ब्रह्मा प्रोवाच देवेशं वसिष्ठः कश्यपस्तथा ॥ सर्वस्य जगतश्चापि शक्रस्यापि विशेषतः ॥ १० ॥ शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः ॥ तं प्रपद्यस्व शरणं स ते सर्वं विधास्यति ॥ ११ ॥ सहस्राक्षोऽपि वचनं गुरूणां संनिशम्य वै ॥ प्रोवाच स्वल्पका



लेन कश्चिद्दृष्टो महोदयः ॥ १२ ॥ इत्येवमुक्तः सुरर्षिभिरश्विना ...
प्रमवाप्य तस्थौ ॥ १३ ॥ कालञ्जरस्योत्तरतः सुपुण्यस्तथा हिमाद्रेरपि दक्षिणस्थः ॥ कुशस्थलात्पूर्वत एव विश्रुतो वसोः पुरा

लेन कश्चिद्दृष्टो महोदयः ॥ १२ ॥ इत्येवमुक्तः सुरराङ्गिरश्चिना महीपपुत्रेण च कथ्यमाने ॥ [illegible]
पृष्ठमवाप्य तस्थौ ॥ १३ ॥ कालञ्जरस्योत्तरतः सुपुण्यस्तथा हिमाद्रेरपि दक्षिणस्थः ॥ कुशस्थलात्पूर्वत एव विश्रुतो वसोः पुरा
त्पश्चिमतोऽवतस्थे ॥१४॥ पूर्वं गयेन क्षितिपेन यत्र इष्टोऽश्वमेधः शतशः सुदक्षिणः ॥ मनुष्यमेधोऽपि सहस्रकृत्वस्तथा पुरा दुर्जयनः
सुरारिभिः ॥१५॥ ख्यातो महामेघ इति प्रसिद्धो यथाऽस्य चक्रे भगवान्मुरारिः ॥ द्वाःस्थत्वमव्यक्ततनुः सुमूर्तिः ख्यातिं जगामाथ
गदाधरेति ॥१६॥ यस्मिन्द्विजेन्द्राः श्रुतिशास्त्रवर्जिताः समत्वमायान्ति पितामहेन ॥ यस्मिन्भक्त्या पूजयन्ये पितॄन्स्वान्सोऽनन्य
भावेन सकृत्तु चेतसा ॥ फलं महामेधमखस्य मानवा दधत्यनन्तं भगवत्प्रसादात् ॥१७॥ महानदी यत्र सुरर्षिकन्या जलापदेशाद्वि
मशैलमेत्य ॥ चक्रे जगत्पापविमुक्तमग्र्याः संदर्शनप्राशनमज्जनेन ॥१८॥ तत्र शक्रः समभ्येत्य महानद्यास्तटेऽद्भुते ॥ आराधनाय
देवस्य कृत्वाऽऽश्रममवस्थितः ॥ १९ ॥ प्रातःस्नायी त्वधःशायी एकभुक्तोऽप्ययाचितः ॥ तपस्तेपे सहस्राक्षः स्तुवन्देवं गदा
धरम् ॥२०॥ तस्यैवं तप्यतः सम्यक् जितसर्वेन्द्रियस्य तु ॥ कामक्रोधविहीनस्य साग्रः संवत्सरो गतः ॥ २१ ॥ ततो गदाधरः
प्रीतो वासवं प्राह नारद ॥ गच्छ प्रीतोऽस्मि भवतो मुक्तपापोऽसि साम्प्रतम् ॥२२॥ निजं राज्यं च देवेश प्राप्स्यसे नचिरादिव ॥
यतिष्यामि तथा शक्र भावि श्रेयो यथा तव ॥२३॥ इत्येवमुक्तेन गदाधरेण विसर्जितः स्नाति मनोहरायाम् ॥ स्नातस्य देवस्य
तदैनसो नरास्तं प्रोचुरस्माननुशासयस्व ॥२४॥ प्रोवाच तान्भीषणकर्मकाराष्नाम्ना पुलिन्दान्मम पापसंभवाः ॥ वसध्वमेवान्तरमद्रि

मुख्ययोर्हिमाद्रिकालञ्जरयोः पुलिन्दाः ॥ २५ ॥ इत्येवमुक्त्वा सुरराट् पुलिन्दान्विमुक्तपापोऽमरसिद्धसङ्घैः ॥ संपूज्यमानोऽनुज गाम चाश्रमं मातुस्तदा धर्मनिवासमीड्यम् ॥२६॥ दृष्ट्वाऽदितिं मूर्ध्नि कृताञ्जलिस्तु विनम्रमौलिः समुपाजगाम ॥ प्रणम्य पादौ कमलोदराभौ निवेदयामास तदा तदात्मनः ॥२७॥ पप्रच्छ सा कारणमीश्वरं तमाघ्राय चालिङ्ग्य मुदा सुदृष्ट्या ॥ वक्ष्ये सुराणां सबलेः पराजयं तदात्मनो देवगणैश्च सार्द्धम् ॥२८॥ श्रुत्वैव सा शोकपरिप्लुताङ्गी ज्ञात्वा जितं दैत्यसुतैः सुतं तम् ॥ दुःखान्वि ता देवमनाद्यमीड्यं जगाम विष्णुं शरणं वरेण्यम् ॥ २९ ॥ नारद उवाच ॥ कस्मिन्जनित्री सुरसत्तमानां स्थाने हृषीकेशमनन्त माद्यम् ॥ चराचरस्य प्रभवं प्रमाणमाराधयामास मुने वदस्व ॥ ३० ॥ पुलस्त्य उवाच ॥ सुरारणिः शक्रमवेक्ष्य दीनं पराजितं दानवनायकेन ॥ सितेऽथ पक्षे मकरर्क्षगेऽर्के घृतार्चिषस्यादथ सप्तमेऽहनि ॥ ३१ ॥ दृष्ट्वैव देवं त्रिदशाधिपं तं महोदये शक्रदिशा ऽधिरूढम् ॥ निराशना संयतवाक्सुचित्ता तदोपतस्थे शरणं सुरेन्द्रम् ॥ ३२ ॥ अदितिरुवाच ॥ जयस्व दिव्याम्बुजकोशचौर जयस्व संसारतरोः कुठार ॥ जयस्व पापेन्धनजातवेद अघौघसंरोध नमो नमस्ते ॥ ३३ ॥ नमोऽस्तु ते भास्कर दिव्यमूर्ते त्रैलो क्यलक्ष्मीपतये नमस्ते ॥ त्वं कारणं सर्वचराचरस्य नाथोऽसि मां पालय विश्वमूर्ते ॥३४॥ त्वया जगन्नाथ जगन्मयेन नाथेन शक्रो निजराज्यहानिम् ॥ अवाप्तवान्शक्रपराभवं च ततो भवन्तं शरणं प्रपन्ना ॥ ३५ ॥ इत्येवमुक्त्वा सुरपूजितेन आलिप्य रक्तेन हि चन्दनेन ॥ संपूजयित्वा करवीरपुष्पैः सधूपदीपैः खलु दिव्यभोज्यैः ॥ ३६ ॥ नैवेद्यकं ज्ययुतं महार्हमन्नं ह्युपेन्द्रस्य हिताय





देवी ॥ स्तवेन पुण्येन च संस्तुवन्ती स्थिता निराहारमथोपवासम् ॥ ३७ ॥ ततो द्वितीयेऽह्नि कृतप्रणामा स्नात्वा विधानेन च पूजयित्वा ॥ दत्त्वा द्विजेभ्यः कनकं तिलाज्यं ततोऽग्रतः सा प्रयता बभूव ॥ ३८ ॥ ततः प्रीतोऽभवद्भानुर्घृतार्चिः सूर्यमण्ड

देवी ॥ स्तवेन पुण्येन च संस्तुवन्ती स्थिता निराहारमथोपवासम् ॥ २७ ॥ ततो द्वितीयेऽह्नि कृतप्रणामा स्नात्वा विधानेन च
पूजयित्वा ॥ दत्त्वा द्विजेभ्यः कनकं तिलाज्यं ततोऽग्रतः सा प्रयता बभूव ॥ २८ ॥ ततः प्रीतोऽभवद्भानुर्धृतार्चिः सूर्यमण्ड
लात् ॥ विनिसृत्याग्रतः स्थित्वा इदं वचनमब्रवीत् ॥ २९ ॥ व्रतेनानेन सुप्रीतस्तवाहं दक्षनन्दिनि ॥ प्राप्स्यसे दुर्लभं कामं
मत्प्रसादान्न संशयः ॥ ४० ॥ राज्यं त्वत्तनयानां वै दास्ये देवि सुरारणि ॥ दानवान्ध्वंसयिष्यामि संभूयैवोदरे तव ॥ ४१ ॥
तद्वाक्यं वासुदेवस्य श्रुत्वा ब्रह्मन्सुरारणिः ॥ प्रोवाच जगतां योनिं वेपमाना पुनःपुनः ॥ ४२ ॥ कथं त्वामुदरेणाहं वोढुं
शक्ष्यामि दुर्धरम् ॥ यस्योदरे जगत्सर्वं वसेत्स्थावरजङ्गमम् ॥ ४३ ॥ कस्त्वां धारयितुं नाथ शक्तस्त्रैलोक्यधार्यसि ॥ यस्य
सप्तार्णवाः कुक्षौ निवसन्ति सहाद्रिभिः ॥ ४४ ॥ तस्माद्यथा सुरपतिः शक्रः स्यात्सुरराडिह ॥ यथा वृथा न मे क्लेशस्तथा कुरु
जनार्दन ॥ ४५ ॥ विष्णुरुवाच ॥ सत्यमेतन्महाभागे दुर्धरोऽस्मि सुरासुरैः ॥ तथापि संभविष्यामि ह्यहं देव्युदरे तव ॥ ४६ ॥
आत्मानं भुवनं शैलांस्त्वां च देवि सकश्यपाम् ॥ धारयिष्यामि योगेन मा विषादं कृथा वृथा ॥ ४७ ॥ तवोदरे ह्यहं दाक्षे
संभविष्यामि वै यदा ॥ तदा निस्तेजसो दैत्याः संभविष्यन्त्यसंशयम् ॥ ४८ ॥ इत्येवमुक्त्वा भगवान्स देवस्तस्याश्च भूयोऽरि
गणप्रमर्दी ॥ स्वतेजसाऽङ्गेषु विवेश देव्यास्तदोदरे शक्रहिताय विप्रम् ॥ ४९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे
ऽदितिवरप्रदानं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ पुलस्त्य उवाच ॥ देवमातुः स्थिते देवे उदरे वामनाकृतौ ॥ निस्तेजसोऽसुरा

जाता यथोक्तं विश्वयोनिना ॥ १ ॥ निस्तेजसोऽसुरान्दृष्ट्वा प्रह्लादं दानवेश्वरम् ॥ बलिर्दानवशार्दूलं त्विदं वचनमब्रवीत् ॥ २ ॥ बलिरुवाच ॥ तात निस्तेजसो दैत्याः केन जातास्तु हेतुना ॥ कथ्यतां परमज्ञोऽसि शुभाशुभविशारद ॥ ३ ॥ पुलस्त्य उवाच ॥ तत्पौत्रवचनं श्रुत्वा मुहूर्तं ध्यानमास्थितः ॥ किमर्थं तेजसो हानिरिति कस्मादतीव वा ॥ ४ ॥ स ज्ञात्वा वासुदेवोत्थं भयं दैत्येष्वनुत्तमम् ॥ चिन्तयामास योगात्मा क्व विष्णुः साम्प्रतं स्थितः ॥ ५ ॥ अधो नाभेः सपातालान्सप्त संचिन्त्य नारद ॥ नाभेरुपरि भूरादींल्लोकांश्च क्रमशो वशी ॥ ६ ॥ भूमिं तां पङ्कजाकारां तन्मध्ये पङ्कजाकृतिम् ॥ मेरुं ददर्श शैलेन्द्रं शातकुम्भं महर्धिमत् ॥ ७ ॥ तस्योपरि महापुर्यस्त्वष्टौ लोकपतींस्तथा ॥ तेषामुपरि वैराजं ददृशे ब्रह्मणः पुरम् ॥ ८ ॥ तदधस्तान्महापुण्यमाश्रमं सुरपूजितम् ॥ देवमातुः स ददृशे मृगपक्षिगणावृतम् ॥९॥ तां दृष्ट्वा देवजननीं सर्वतेजोऽधिकां मुने ॥ विवेश दानवपतिरन्वेष्टुं मधुसूदनम् ॥ १० ॥ स दृष्टवाञ्जगन्नाथं माधवं वामनाकृतिम् ॥ सर्वभूतवरेण्यं तं देवमातुरथोदरे ॥ ११ ॥ तं दृष्ट्वा पुण्डरीकाक्षं शङ्खचक्रविनाकृतम् ॥ सुरासुरगणैः सर्वैः सर्वतो व्याप्तविग्रहम् ॥ १२ ॥ ततस्तेनैव योगेन दृष्ट्वा वामनतां गतम् ॥ दैत्यतेजोहरं विष्णुं प्रकृतिस्थोऽभवत्ततः ॥ १३ ॥ अथोवाच महाबुद्धिर्विरोचनसुतं बलिम् ॥ प्रह्लादो मधुरं वाक्यं प्रणम्य मधुसूदनम् ॥ १४ ॥ प्रह्लाद उवाच ॥ श्रूयतां सर्वमाख्यास्ये यतो वो भयमागतम् ॥ येन निस्तेजसो दैत्या जाता दैत्येन्द्र हेतुना ॥ १५ ॥ भवता निर्जिता देवाः सेन्द्ररुद्रार्कपावकाः ॥ प्रयाताः शरणं देवं हरिं त्रिभुवनेश्वरम् ॥ १६ ॥ स तेषामभयं





दत्त्वा शक्रादीनां जगद्गुरुः ॥ [illegible] ॥ १७ ॥ [illegible]
तमो विषहितुं शक्रं सूर्योदयं बले ॥ १८ ॥ पुलस्त्य उवाच ॥ प्रह्लादवचनं श्रुत्वा क्रोधेन स्फुरिताधरः ॥ प्रह्लादमाह च बलिर्भावि
[illegible] ॥ १९ ॥ बलिरुवाच ॥ तात कोऽयं हरिर्नाम यतो नो भयमागतम् ॥ सन्ति मे शतशो दैत्या वासुदेवबला

दत्त्वा शक्रादीनां जगद्गुरुः ॥ अवतीर्णो महाबाहुरदित्या जठरे हरिः ॥ १७ ॥ [illegible]
तमो विषहितुं शक्रं सूर्योदयं बले ॥ १८ ॥ पुलस्त्य उवाच ॥ प्रह्लादवचनं श्रुत्वा क्रोधेन स्फुरिताधरः ॥ प्रह्लादमाह च बलिर्भावि
कर्मप्रचोदितः ॥ १९ ॥ बलिरुवाच ॥ तात कोऽयं हरिर्नाम यतो नो भयमागतम् ॥ सन्ति मे शतशो दैत्या वासुदेवबला
धिकाः ॥ २० ॥ सहस्रशो जिता यैस्तु सेन्द्ररुद्राग्निमारुताः ॥ निर्जित्य त्याजिताः स्वर्गं भग्नदर्पा रणाजिरे ॥ २१ ॥ येन सूर्य
रथाद्वेगाच्चक्रं कृष्टं महाजवम् ॥ स विप्रचित्तिर्बलवान्मम सैन्यपुरस्सरः ॥ २२ ॥ अयःशङ्कुः शिबिः शङ्कुरसिलोमा विरू
पधृक् ॥ त्रिशिरा मकराक्षश्च वृषपर्वाऽसितेक्षणः ॥ २३ ॥ एते चान्ये च बलिनो नानाशस्त्रविशारदाः ॥ येषामेकैकशो विष्णुः
कलां नार्हति षोडशीम् ॥ २४ ॥ पुलस्त्य उवाच ॥ पुत्रस्यैतद्वचः श्रुत्वा प्रह्लादः क्रोधमूर्छितः ॥ धिग्धिगित्याह स बलिं वैकुण्ठा
क्षेपवादिनम् ॥ २५ ॥ धिक्त्वां पापसमाचार दुष्टबुद्धे सुबालिश ॥ हरिं निन्दयतो जिह्वा कथं न पतिता तव ॥ २६ ॥ शोच्य
स्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः ॥ यत्त्रैलोक्यगुरुं विष्णुमभिनिन्दसि दुर्मते ॥ २७ ॥ शोच्यश्चापि न संदेहो येन जातः
पिता तव ॥ यस्य त्वं कर्कशः पुत्रो जातो देवावमानकृत् ॥ २८ ॥ भवान्किल विजानाति तथा चामी महासुराः ॥ यथा नान्यः
प्रियः कश्चिन्मम तस्माज्जनार्दनात् ॥ २९ ॥ जानन्नपि प्रियतरं मम देवं जनार्दनम् ॥ सर्वेश्वरेश्वरं देवं कथं निन्दितवानसि ॥ ३० ॥
गुरुः पूज्यस्तत्र पिता पूज्यस्तस्याप्यहं गुरुः ॥ ममापि पूज्यो भगवान्गुरुर्लोकगुरुर्हरिः ॥ ३१ ॥ गुरोर्गुरुगुरुं मूढ पूज्यं पूज्यत

मस्य च ॥ पूज्यं निन्दसि यत्पाप कथं न पतितोऽस्यधः ॥ ३२ ॥ शोचनीया दुराचारा दानवाभी कृतास्त्वया ॥ येषां त्वं कर्कशो राजा वासुदेवविनिन्दकः ॥ ३३ ॥ यस्मात्पूज्योऽर्चनीयश्च भवता निन्दितो हरिः ॥ तस्मात्पापसमाचार राज्यनाशम वाप्नुहि ॥ ३४ ॥ यथा नान्यत्प्रियतरं विद्यते मम केशवात् ॥ मनसा कर्मणा वाचा राज्यभ्रष्टस्तथा पत ॥ ३५ ॥ यथा न तस्मा दपरं व्यतिरिक्तं हि विद्यते ॥ चतुर्दशस्तु लोकेषु राज्यभ्रष्टस्तथा पत ॥ ३६ ॥ सर्वेषामपि भूतानां नान्यल्लोके परायणम् ॥ यथा तथाऽनुपश्येयं भवन्तं राज्यविच्युतम् ॥ ३७ ॥ पुलस्त्य उवाच ॥ एवमुच्चरिते वाक्ये बलिः स त्वरितस्तदा ॥ अवतीर्यासनाद्ब्रह्म न्कृताञ्जलिपुटो बलिः ॥ ३८ ॥ शिरसा प्रणिपत्याह प्रसादं कुरु मे गुरो ॥ कृतापराधानपि हि क्षमन्ते गुरवः शिशून् ॥ ३९ ॥ तत्साधु यदहं शप्तो भवता दानवेश्वर ॥ न बिभेमि परेभ्योऽहं न च राज्यपरिक्षयात् ॥ ४० ॥ नैव दुःखं मम विभो यदहं राज्य विच्युतः ॥ दुःखं कृतापराधत्वाद्भवतो मे महत्तमम् ॥ ४१ ॥ क्षमस्व तत्तात कृतापराधं बालोऽस्मि नीचोऽस्मि सुदुर्मतिश्च ॥ कृतेऽपि दोषे गुरवः शिशूनां क्षाम्यन्ति दैन्यं समुपागतानाम् ॥ ४२ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने महात्मा विमुक्तमोहो हरिपादभक्तः ॥ चिरं विचिन्त्याद्भुतमेतदित्थमुवाच पुत्रं मधुरं वचोऽथ ॥ ४३ ॥ प्रह्लाद उवाच ॥ मोहेन मेऽधुना ज्ञानं विवेकश्च तिरस्कृतः ॥ येन सर्वगतं विष्णुं जानंस्त्वां शप्तवानहम् ॥ ४४ ॥ तन्नूनमविवेकोऽयं भवन्तं येन दानव ॥ ममापि स महाबाहो विवेकप्रतिषेधकः ॥ ४५ ॥ तस्माद्राज्यं प्रति [illegible] न विनश्यन्ति कर्हिचित ॥४६॥





पुत्रमित्रकलत्रार्थे राज्यभोगधनाय च ॥ आगमे निर्गमे प्राज्ञो न विषादं समाचरेत् ॥ ४७ ॥ यथा यथा समायान्ति पूर्वकर्मवि

विपर्ययः ॥ ४५ ॥ तस्माद्राज्यं प्रति विभो न ज्वरं कर्तुमर्हसि ॥ अवश्यभाविनो ह्यर्था न विनश्यन्ति कर्हिचित् ॥४६॥

पुत्रमित्रकलत्रार्थे राज्यभोगधनाय च ॥ आगमे निर्गमे प्राज्ञो न विषादं समाचरेत् ॥ ४७ ॥ यथा यथा समायान्ति पूर्वकर्मविधानतः ॥ सुखदुःखानि दैत्येन्द्र नरस्तानि सहेत्तथा ॥ ४८ ॥ आपदामागमं दृष्ट्वा न विषण्णो भवेद्वशी ॥ संपदं च सुविस्तीर्णां प्राप्य नो धृतिमान्भवेत् ॥४९॥ धनक्षये न मुह्यन्ति न हृष्यन्ति धनागमे ॥ धीराः कार्येषु च तदा भवन्ति पुरुषोत्तमाः॥५०॥ एवं विदित्वा दैत्येन्द्र न विषादं कथंचन ॥ कर्तुमर्हसि विद्वांस्त्वं पण्डितो नावसीदति ॥ ५१ ॥ तथाऽन्यच्च महाबाहो हितं शृणु महार्थकम् ॥ भवतोऽथ तथाऽन्येषां श्रुत्वा तच्च समाचर ॥ ५२ ॥ शरण्यं शरणं गच्छ तमेतं पुरुषोत्तमम् ॥ स ते त्राता भयादस्माद्दानव प्रभविष्यति ॥ ५३ ॥ ये संश्रयन्ति हरिमीशमनादिमध्यं विष्णुं चराचरगुरुं हरिमीशितारम् ॥ संसारगर्तपतितस्य करावलम्बं नूनं न ते भुवि नरा ज्वरिणो भवन्ति ॥ ५४ ॥ तन्मना दानवश्रेष्ठ तद्भक्तश्च भवाधुना ॥ स एष भवतः श्रेयो विधास्यति जनार्दनः ॥ ५५ ॥ अहं च पापोपशमार्थमीशमाराधयामीह च तीर्थयात्राम् ॥ विमुक्तपापश्च तदा भविष्ये वदाच्युतो लोकपतिर्नृसिंहः ॥ ५६ ॥ पुलस्त्य उवाच ॥ इत्येवमाश्वास्य बलिं महात्मा संस्मृत्य योगाधिपतिं च विष्णुम् ॥ आमन्त्र्य सर्वान्दनुसैन्यपालाञ्जगाम कर्तुं शुभतीर्थयात्राम् ॥ ५७ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे बलिशिक्षादानं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

नारद उवाच ॥ कानि तीर्थानि विप्रेन्द्र प्रह्लादोऽनुजगाम ह ॥ प्रह्लादतीर्थयात्रां मे सम्यगाख्यातुमर्हसि ॥ १ ॥ पुलस्त्य उवाच ॥ शृणु त्वं कथयिष्यामि पापपङ्कप्रणाशिनीम् ॥ प्रह्लादतीर्थयात्रां ते

सर्वपापप्रणाशिनीम् ॥ २ ॥ संत्यज्य मेरुं कनकाचलेन्द्रतीर्थं जगामामरसंघजुष्टम् ॥ ख्यातं पृथिव्यां शुभदं हि मानसं यत्र स्थितो मत्स्यवपुः पुरेशः ॥ ३ ॥ तस्मिंस्तीर्थवरे स्नात्वा संतर्प्य पितृदेवताः ॥ संपूज्य च जगन्नाथमच्युतं श्रुतिभिर्युतम् ॥ ४ ॥ उपोष्य भूयः संपूज्य देवर्षिपितृमानवान् ॥ जगाम कच्छपं द्रष्टुं कौशिक्यां पापनाशनम् ॥५॥ तस्यां स्नात्वा महानद्यां संपूज्य च जगत्पतिम् ॥ समुपोष्य शुचिर्भूत्वा दत्त्वा विप्रेषु दक्षिणाम् ॥ ६ ॥ नमस्कृत्य जगन्नाथमथ कूर्मवपुर्धरम् ॥ ततो जगाम कृष्णायां द्रष्टुं वाजिमुखं प्रभुम् ॥ तत्र देवह्रदे स्नात्वा तर्पयित्वा पितॄन्सुरान् ॥७॥ संपूज्य हयशीर्षं च जगाम गजसाह्वयम् ॥ तत्र देवं जगन्नाथं गोविन्दं चक्रपाणिनम् ॥ ८ ॥ स्नात्वा संपूज्य विधिवज्जगाम यमुनां नदीम् ॥ तस्यां स्नातः शुचिर्भूत्वा संतर्प्यर्षिसुरान्पितॄन् ॥ ददर्श देवदेवेशं लोकनाथं त्रिविक्रमम् ॥ ९ ॥ नारद उवाच ॥ साम्प्रतं भगवान्विष्णुस्त्रैलोक्याक्रमणं वपुः॥ करिष्यति जगत्स्वामी बलिबन्धनमीश्वरः॥१०॥तत्कथं पूर्वकालेऽपि विभुरासीत्त्रिविक्रमः ॥ कस्य वा बन्धनं विष्णुः कृतवांस्तच्च मे वद॥११॥ पुलस्त्य उवाच ॥ श्रूयतां कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः ॥ यस्मिन्काले बभूवाथ यं च वञ्चितवानसौ॥१२॥ आसीद्धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः ॥ दनोर्गर्भसमुद्भूतो महाबलपराक्रमः ॥ १३ ॥ स समाराध्य च तदा ब्रह्माणं तपसाऽसुरः ॥ अवध्यत्वं सुरैः सेन्द्रैः प्रार्थयन्स तु नारद ॥ १४ ॥ तस्य तं च वरं प्रादात्तपसा पङ्कजोद्भवः ॥ परितुष्टः स च बली निर्जगाम त्रिविष्टपम् ॥१५॥ चतुर्थस्य कलेरादौ जित्वा देवान्सवासवान् ॥ धुन्धुः शक्रत्वमकरोद्धिरण्यकशिपौ सति ॥१६॥ तस्मिन्काले







सबलवान्हिरण्यकशिपुस्ततः ॥ चचार मन्दरगिरौ दैत्यो धुन्धुसमाश्रितः ॥१७॥ ततोऽसुरा यथाकामं विचरन्ति त्रिविष्टपे ॥ त्रिदशा ब्रह्मलोके च संस्थिता दुःखसंयुताः ॥ १८ ॥ ततोऽमरान्ब्रह्मसदोनिवासिनः श्रुत्वाऽथ धुन्धुर्दितिजानुवाच ॥ व्रजाम दैत्या वय

सबलवान्हिरण्यकशिपुस्ततः ॥ चचार मन्दरगिरौ दैत्यो धुन्धुसमाश्रितः ॥ १७ ॥ ततोऽसुरा यथाकामं विचरन्ति त्रिविष्टपे ॥ त्रिदशा ब्रह्मलोके च संस्थिता दुःखसंयुताः ॥ १८ ॥ ततोऽमरान्ब्रह्मसदोनिवासिनः श्रुत्वाऽथ धुन्धुर्दितिजानुवाच ॥ व्रजाम दैत्या वय मग्रजस्य सदो विजेतुं त्रिदशान्सशक्रान् ॥ १९ ॥ ते धुन्धुवाक्यं तु निशम्य दैत्याः प्रोचुर्न नो विद्यति लोकपाल ॥ गतिर्ययया याम पितामहाजिरं सुदुर्गमोऽयं परतो हि मार्गः ॥ २० ॥ इतः सहस्रैर्बहुयोजनाख्यैर्लोको महर्नाम महर्षिजुष्टः ॥ येषां हि दृष्ट्या ऽर्पणचोदितेन दह्यन्ति दैत्याः सहसेक्षितेन ॥ २१ ॥ ततोऽपरो योजनकोटिरेको लोको जनो नाम वसन्ति यत्र ॥ गोमातरोऽस्मासु विनाशकारी यासां न कोऽपीह महासुरेन्द्रः ॥ २२ ॥ ततोऽपरो योजनकोटिभिस्तु त्रिंशद्भिरादित्यसहस्रदीप्तः ॥ सत्याभिधानो भगवन्निवासो वरप्रदोऽभूद्भवतो हि योऽसौ ॥ २३ ॥ यस्य वेदध्वनिं श्रुत्वा विकसन्ति सुरादयः ॥ संकोचमसुरा यान्ति ये च तेषां सधार्मिणः ॥ २४ ॥ तस्मान्मा त्वं महाबाहो मतिमेतां समादधः ॥ वैराज्यभुवनं धुन्धो दुरारोहं सदा नृभिः ॥ २५ ॥ तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान् ॥ गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरम् ॥ २६ ॥ कथं तु कर्मणा केन गम्यते दानवर्षभाः ॥ कथं तत्र सहस्राक्षः संप्राप्तः सह दैवतैः ॥ २७ ॥ ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम् ॥ न वयं विद्म तत्कर्म शुक्रस्तद्वेत्त्यसंशयम् ॥ २८ ॥ दैत्यानां तु वचः श्रुत्वा धुन्धुर्दैत्यपुरोहितम् ॥ पप्रच्छ शुक्रं किं कर्म कृत्वा ब्रह्मसदोगतिः ॥ २९ ॥ ततोऽस्मै कथयामास दैत्याचार्यः कलिप्रियः ॥ शक्रस्य चरितं श्रीमान्पुरा वृत्ररिपोः किल ॥ ३० ॥ सहस्राक्षः शतं

चैकं यज्ञानामयजत्पुरा ॥ दैत्येन्द्र वाजिमेधानां तेन ब्रह्मसदोगतिः ॥ ३१ ॥ तद्वाक्यं दानवपतिः श्रुत्वा शुक्रस्य वीर्यवान् ॥ यष्टुं गोमेधयज्ञानां चकार मतिमुत्तमाम् ॥ अथामन्त्र्यासुरगुरुं दानवांश्चाप्यनुत्तमान् ॥ ३२ ॥ प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सुदक्षिणैः ॥ तदागच्छध्वमवनीं गच्छामो वसुधाधिपान्॥३३॥ विजित्य हयमेधान्वै यथाकामगुणान्वितान् ॥ आहूयन्तां च निध यस्त्वाज्ञाप्यन्तां च गुह्यकाः ॥ ३४ ॥ आमन्त्र्यन्तां द्विजश्रेष्ठाः प्रयामो देविकातटम् ॥ सा हि पुण्या सरिच्छ्रेष्ठा सर्वसिद्धिकरी स्मृता ॥ स्थानं प्राचीनमासाद्य वाजिमेधान्यजामहे॥३५॥इत्थं सुरारेर्वचनं निशम्यासुरयाजकाः ॥ बाढमित्यब्रवीद्धृष्टो निर्धीशं संदिदेश सः ॥ ३६ ॥ ततो धुन्धुर्देविकायां प्राचीने पापनाशने ॥ भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥ ३७ ॥ सदस्या ऋत्विजश्चापि तत्रासन्भार्गवा द्विजाः ॥ शुक्रस्यानुमते ब्रह्मञ्शुक्रशिष्याश्च पण्डिताः ॥ ३८ ॥ यज्ञभागभुजस्तत्र स्वर्भानुप्रमुखा मुने ॥ कृताश्चासुरनाथेन शुक्रस्यानुमतेऽसुराः ॥ ३९ ॥ ततः प्रवृत्तो यज्ञस्तु समुत्सृष्टस्तथा हयः ॥ हयस्यानुययौ श्रीमानसि लोमा महासुरः ॥ ४० ॥ ततोऽग्निधूमेन मही सशैला व्याप्ता दिशो वै विदिशश्च पूर्णाः ॥ तेनोग्रगन्धेन दिवःस्पृशेन मरुद्वशौ ब्रह्मलोके महर्षे ॥ ४१ ॥ तं गन्धमाघ्राय सुरा विषण्णा जानन्त धुन्धुं हयमेधदीक्षितम् ॥ ततः शरण्यं शरणं जनार्दनं जग्मुः सशक्रा जगतः परायणम् ॥ ४२ ॥ प्रणम्य वरदं देवं पद्मनाभं जनार्दनम् ॥ प्रोचुः सर्वे सुरगणा भयगद्गदया गिरा ॥ ४३ ॥ भगवन्देवदेवेश चराचरपरायण ॥ विज्ञप्तिः श्रूयतां विष्णो सुराणामार्तिनाशन ॥ ४४ ॥ धुन्धुर्नामासुरपतिर्बलवान्बलसंवृतः ॥





सर्वान्सुरान्विनिर्जित्य त्रैलोक्यमहरद्बलिः ॥४५॥ ऋते पिनाकिनं देवं त्राता नोऽन्यो न विद्यते ॥ अतोऽसौ ... दीक्षितः ॥ ४७ ॥ शतं क्रतू
... ॥ ४६ ॥ साम्प्रतं ब्रह्मलोकस्थानपि जेतुं समुद्यतः ॥ शुक्रस्य मतमादाय सोऽश्वमेधाय

सर्वान्सुरान्विनिर्जित्य त्रैलोक्यमहरद्बलिः ॥४५॥ ऋते पिनाकिनं देवं त्राता नोऽन्यो न विद्यते ॥ अतोऽसौ [illegible]
रुपेक्षितः ॥ ४६ ॥ साम्प्रतं ब्रह्मलोकस्थानपि जेतुं समुद्यतः ॥ शुक्रस्य मतमादाय सोऽश्वमेधाय दीक्षितः ॥ ४७ ॥ शतं क्रतू
नामिष्ट्वाऽसौ ब्रह्मलोकं महासुरः ॥ आरोढुमिच्छति वशी विजेतुं त्रिदशानपि ॥ ४८ ॥ तस्मादकालहीनं तु चिन्तयस्व जग
द्गुरो ॥ उपायं मखविध्वंसे येन स्याम सुनिर्वृताः ॥ ४९ ॥ श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः ॥ दत्त्वाऽभयं महाबाहुः
प्रेषयामास साम्प्रतम् ॥ विसृज्य च तदा सर्वांस्त्यक्त्वाऽजेयं महासुरम् ॥ ५० ॥ बन्धनाय मतिं चक्रे धुन्धोर्धर्मध्वजस्य वै ॥
ततः कृत्वा स भगवान्वामनं रूपमीश्वरः ॥ ५१ ॥ देहं त्यक्त्वा निरालम्बं काष्ठवद्देविकाजले ॥ क्षणान्मज्जंस्तथोन्मज्ज
न्मुक्तकेशो यदृच्छया ॥ ५२ ॥ दृष्टोऽथ दैत्यपतिना दैतेयैश्च तथार्षिभिः ॥ ततः कर्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः ॥ ५३ ॥
समुत्तारयितुं विप्रमाद्रवन्त समाकुलाः ॥ सदस्या यजमानश्च ऋत्विजोऽथ महौजसः ॥ ५४ ॥ निमज्जमानमुज्जहुस्ते च ते वामन
द्विजम् ॥ समुत्तार्य प्रसन्नास्ते पप्रच्छुः सर्व एव हि ॥ किमर्थं पतितोऽसीह केनाक्षिप्तोऽसि वा वद ॥५५॥ तेषामाकर्ण्य वचनं कम्प
मानो मुहुर्मुहुः ॥ प्राह धुन्धुपुरोगांस्ताञ्छ्रूयतामत्र कारणम् ॥ ५६ ॥ ब्राह्मणो गुणवानासीत्प्रभास इति विश्रुतः ॥ सर्वशास्त्रार्थवि
त्प्राज्ञो गोत्रेणापि तु वारुणः ॥ ५७ ॥ तस्य पुत्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम् ॥ तत्र ज्येष्ठो मम भ्राता कनीयानपरस्त्व
मृह ॥ ५८ ॥ नेत्रभास इति ख्यातो ज्येष्ठो भ्राता ममाभवत् ॥ मम नाम पिता चक्रे गतिभासेति कौतुकात् ॥५९॥ रम्यश्चावस

थश्चापि शुभ आसीत्पितुर्मम ॥ त्रिविष्टपगुणैर्युक्तः स्वर्गवासोपमः शुभः ॥ ६० ॥ ततः कालेन महता आवयोः स पिता मृतः ॥ तस्यौर्ध्वदेहिकं कृत्वा गृहमावां समागतौ ॥ ६१ ॥ ततो मयोक्तः स भ्राता विभजाम गृहं वयम् ॥ तेनोक्तो नैव भवतो विद्यते भाग इत्यहम् ॥ ६२ ॥ कुब्जवामनखञ्जानां क्लीबानां श्वित्रिणामपि ॥ उन्मत्तानां तथाऽन्धानां धनभागो न विद्यते ॥ ६३ ॥ प्रियं वाक्यं गृहे वासो भोजनाच्छादनादिकम् ॥ एतावद्दीयते तेभ्यो नार्थभागहरा हि ते ॥ ६४ ॥ एवमुक्तो मया सोऽथ किमर्थं पैतृकाद् गृहात् ॥ धनार्धभागमर्हामि नाहं न्यायेन केन वै ॥ ६५ ॥ इत्युक्तो बलवान्भ्राता केशाञ्जग्राह मेऽसुर ॥ समुत्क्षिप्याक्षिपन्नद्यां न जाने ह्यवतारणम् ॥ ६६ ॥ ममास्यां निम्नगायां तु मध्येन प्लवतो गतः ॥ कालः संवत्सराख्यस्तु युष्माभिरमृतो धृतः ॥ ६७ ॥ के भवन्तोऽत्र संप्राप्ताः सस्नेहा बान्धवा इव ॥ कोऽयं शक्रप्रतीकाशो युष्मन्मध्ये प्रदृश्यते ॥ ६८ ॥ तन्मे सर्वं समाख्यात याथातथ्यं तपोधनाः ॥ महर्षिसदृशा यूयं सानुकम्पाश्च मादृशे ॥ ६९ ॥ तद्वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः ॥ प्रोचुर्वयं द्विजा ब्रह्मन्भार्गवा वंशवर्धनाः ॥ ७० ॥ असावपि महातेजा धुन्धुर्नाम महासुरः ॥ दाता भोक्ता च भर्ता च दीक्षितो यज्ञकर्मणि ॥ ७१ ॥ इत्येवमुक्त्वा देवेशं वामनं भार्गवास्ततः ॥ प्रोचुर्दैत्यपतिं सर्वे वामनार्थकरं वचः ॥ ७२ ॥ दीयतामस्य दैत्येन्द्र सर्वोपस्करसंयुतम् ॥ श्रीमदावसथं दास्यो रत्नानि विविधानि च ॥ ७३ ॥ इति द्विजानां वचनं श्रुत्वा दैत्यपतिस्ततः ॥ प्राह द्विजेन्द्र ते दद्मि यत्त्वमिच्छसि वै धनम् ॥ ७४ ॥ दासीदासं हिरण्यं च वाजिनः [illegible]गजान् ॥ गोभूमिराज्यवस्त्रादि स्वेच्छया चैव वै प्रभो ॥ ७५ ॥ तद्वाक्यं दानवपतेः श्रुत्वा देवोऽथ वामनः ॥ प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः ॥ ७६ ॥ [illegible] भ्राता विभजते यस्य संपदः ॥ किं तस्य नार्थो राजेन्द्र दीयते चार्थ एव हि ॥ ७७ ॥ दासीर्दासांश्च भृत्यांश्च गृहं

॥ ७४ ॥ दासीगृहं हिरण्यं च वाजिनः स्यन्दनान्गजान् ॥ गोभूमिराज्यवस्त्रादि

स्वेच्छया चैव वै प्रभो ॥ ७५ ॥ तद्वाक्यं दानवपतेः श्रुत्वा देवोऽथ वामनः ॥ महासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः ॥७६॥
सोदरेणापि हि भ्रात्रा ह्रियन्ते यस्य संपदः ॥ किं तस्य नार्थो राजेन्द्र दीयते चार्थ एव हि ॥ ७७ ॥ दासीदासांश्च भृत्यांश्च गृहं
रत्नं परिच्छदान् ॥ समर्थेभ्यो द्विजेन्द्रेभ्यः प्रयच्छस्व महाभुज ॥७८॥ मम प्रमाणमालोक्य मामकं च पदत्रयम् ॥ स्वं प्रयच्छस्व
दैत्येन्द्र एतदेवार्थये ह्यहम् ॥ ७९ ॥ इत्येवमुक्तं वचनं महात्मना विहस्य दैत्याधिपतिः सऋत्विजः ॥ प्रादाच्च विप्राय पदत्रयं
वशी यदा स नान्यत्प्रगृहीतवान्पुनः ॥ ८० ॥ क्रमत्रयं तावदवेक्ष्य दत्तं महासुरेन्द्रेण विभुर्यथा शशी ॥ चक्रे ततो लङ्घयितुं
त्रिलोकीं त्रिविक्रमं रूपमनन्तशक्तिः ॥ ८१ ॥ कृत्वा च रूपं दितिजांश्च हत्वा प्रणम्य चर्षींश्च स च क्रमेण ॥ महीं महीध्रैः
सहितां सहार्णवां जहार रत्नाकरपत्तनैर्युताम् ॥ ८२ ॥ भुवं स नाकां त्रिदशाधिवासं सोमार्कऋक्षैरभिमण्डितं नभः ॥ देवो
द्वितीयेन जहार वेगात्क्रमेण देवप्रियमीप्सुरीश्वरः ॥ ८३ ॥ क्रमं तृतीयं न यदाऽस्य पूरितं तदाऽतिकोपाद्दनुपुङ्गवस्य ॥ पपात
पृष्ठे भगवांस्त्रिविक्रमो मेरुप्रमाणेन तु विग्रहेण ॥ ८४ ॥ पतता वासुदेवेन दानवोपरि नारद ॥ त्रिंशद्योजनसाहस्री भूमिर्गर्ते हठी
कृता ॥ ८५ ॥ ततो दैत्यं समुत्पाद्य तस्यां प्रक्षिप्य वेगतः ॥ ववर्ष सिकतावृष्ट्या तं च गर्तमपूरयत् ॥ ८६ ॥ ततः स्वर्गं
सहस्राक्षो वासुदेवप्रसादतः ॥ सुराश्च सर्वे त्रैलोक्यमवापुर्निरुपद्रवाः ॥ ८७ ॥ भगवानपि दैत्येन्द्रं प्रक्षिप्य
सिकतार्णवे ॥ कालिन्द्या रूपमाधाय तत्रैवान्तरधीयत ॥ ८८ ॥ एवं पुरा विष्णुरभूच्च वामनो धुन्धुं विजेतुं च

त्रिविक्रमोऽभूत् ॥ यस्मिन्स दैत्येन्द्रसुतो जगाम महाश्रमे पुण्ययुते महर्षे ॥ ८९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे धुन्धुपराजयो नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ पुलस्त्य उवाच ॥ कालिन्दीसलिले स्नात्वा पूजयित्वा त्रिविक्रमम् ॥ उपोष्य रजनीमेकां लिङ्गभेदं गिरिं ययौ ॥ १ ॥ तत्र स्नात्वा च विधिवच्छिवं संपूज्य भक्तितः ॥ उपोष्य रजनीमेकां तीर्थं केदारमाव्रजेत् ॥ २ ॥ तस्मिन्स्नात्वा च विधिवत्समाराध्य जगत्पतिम् ॥ उषित्वा वासरान्सप्त कुब्जाम्रं प्रजगाम ह ॥ ३ ॥ तत्र गत्वा महाबाहुरुपवासी जितेन्द्रियः ॥ हृषीकेशं समभ्यर्च्य ययौ बदरिकाश्रमम् ॥ ४ ॥ संतोष्य नारायणमर्च्य भक्त्या स्नात्वाऽथ विद्वान्स सरस्वतीजले ॥ वाराहतीर्थे गरुडासनं स दृष्ट्वा समभ्यर्च्य सुभक्तिमांश्च ॥ ५ ॥ भद्रकर्णे ततो गत्वाऽयजच्च शशिशेखरम् ॥ ततः संपूज्य च वशी विपाशामभितो ययौ ॥ ६ ॥ तस्यां स्नात्वा समभ्यर्च्य देवदेवं द्विजप्रियम् ॥ इरावत्यां जगन्नाथं ददर्श परमेश्वरम् ॥ ७ ॥ समाराध्य द्विजश्रेष्ठ शाश्वतं जगतः प्रभुम् ॥ समवाप परं रूपमैश्वर्यं च सुदुर्लभम् ॥ ८ ॥ कुष्ठरोगाभिभूतश्च यं समाराध्य वै भृगुः ॥ आरोग्यमतुलं प्राप संतानमपि चाक्षयम् ॥९॥ नारद उवाच ॥ कथं पुरूरवा विष्णुमाराध्य द्विजसत्तम ॥ विरूपत्वं समुत्सृज्य रूपं प्राप श्रिया सह ॥ १० ॥ पुलस्त्य उवाच ॥ श्रूयतां कथयिष्यामि महापापप्रणाशनम् ॥ पूर्वं त्रेतायुगस्यादौ यथा वृत्तं तपोधन ॥ ११ ॥ मद्रदेश इति ख्यातो देशो ब्राह्मणसत्कृतः ॥ शाकलं नाम नगरं ख्यातं स्थानीयमुत्तमम् ॥ १२ ॥ तस्मिन्विपणिवृत्तिस्थः सुधर्माख्योऽभवद्वणिक् ॥ धनाढ्यो गुणवान्भोगी नानाशास्त्रविशारदः ॥१३॥





कलिप्रिय ॥ चौराणामभवद्रात्राववस्कन्दो हि दुःसहः ॥ १५ ॥ ततः स हृतसर्वस्वो वणिग्दुःखपरिप्लुतः ॥ असहायो मरौ

सर्वमाख्योऽभवद्वणिक् ॥ धनाढ्यो गुणवान्भोगी नानाशास्त्रविशारदः ॥ १४ ॥

स कदाचिन्निजाद्राष्ट्रात्सौराष्ट्रं गन्तुमुद्यतः ॥ सार्थेन महता युक्तो [illegible] ॥ १५ ॥ [illegible] कलिप्रिय ॥ चौराणामभवद्रात्राववस्कन्दो हि दुःसहः ॥ १५ ॥ ततः स हृतसर्वस्वो वणिग्दुःखपरिप्लुतः ॥ असहायो मरौ तस्मिंश्चचारोन्मत्तवद्धशी ॥ १६ ॥ चरता तदरण्यं वै दुःखाक्रान्तेन नारद ॥ आत्मनैव शमीवृक्षो महानासादितः शुभः ॥ १७ ॥ तं मृगैः पक्षिभिश्चैव हीनं दृष्ट्वा शमीतरुम् ॥ क्षान्तः क्षुत्तृट्परीतात्मा तस्य पार्श्वमुपाविशत् ॥ १८ ॥ सुप्तश्चापि सुविश्रान्तो मध्याह्ने पुनरुत्थितः ॥ समपश्यदथायातं प्रेतं प्रेतशतैर्वृतम् ॥ १९ ॥ उह्यमानं तथाऽन्येन प्रेतेन प्रेतनायकम् ॥ श्रान्तैः पुरो हि धावद्भिः प्रेतैर्वै रूक्षविग्रहैः ॥ २० ॥ अथाजगाम प्रेतोऽसौ पर्यटित्वा धरामिमाम् ॥ उपागम्य शमीमूले वणिक्पुत्रं ददर्श सः ॥ २१ ॥ स्वागतेनाभिवाद्यैनं समाभाष्य परस्परम् ॥ सुखोपविष्टश्छायायां हृष्टः कुशलमाप्तवान् ॥ २२ ॥ प्रेताधिपतिना पृष्टः स च तेन वणिक्सखे ॥ कुत आगम्यते ब्रूहि क्व वासो वा भविष्यति ॥ २३ ॥ कथं चेदं महारण्यं मृगपक्षिविवर्जितम् ॥ समापन्नोऽसि भद्रं ते सर्वमाख्यातुमर्हसि ॥ २४ ॥ एवं प्रेताधिपतिना वणिक्पृष्टः समासतः ॥ सर्वमाख्यातवान्ब्रह्मन्स्वदेशधनविच्युतिम् ॥ २५ ॥ तस्य श्रुत्वा स वृत्तान्तं तस्य दुःखेन दुःखितः ॥ वणिक्पुत्रं ततः प्राह प्रेतपालः स्वबन्धुवत् ॥ २६ ॥ एवं गतेऽपि मा शोकं कर्तुमर्हसि सुव्रत ॥ भूयोऽप्यर्था भविष्यन्ति यदि भाग्यबलं तव ॥ २७ ॥ भाग्यक्षयेऽर्थाः क्षीयन्ते भवन्त्यभ्युदये पुनः ॥ क्षीणस्यास्य शरीरस्य चिन्तया नोदयो भवेत् ॥ २८ ॥ इत्युच्चार्य समाहूय स्वान्भृत्यान्वाक्यमब्रवीत् ॥ अद्यातिथिरयं

पूज्यः सहजो देशजो मम ॥२९॥ अस्मिन्दृष्टे वणिक्पुत्रे हृष्टाः स्वजनबान्धवाः ॥ अस्मिन्समागते प्रेताः प्रीतिर्जाता ममातुला॥ ॥ ३० ॥ एवं हि वदतस्तस्य मृत्पात्रं सुदृढं नवम् ॥ दध्योदनेन संपूर्णमाजगाम यथेप्सितम् ॥ ३१ ॥ तथा नवा च सुदृढा संपूर्णा परमाम्भसा ॥ वारिधानी च संप्राप्ता प्रेतानामग्रतः स्थिता ॥ ३२ ॥ तामागतां ससलिलां सान्नां वीक्ष्य महामतिः ॥ प्राहोत्तिष्ठ वणिक्पुत्र त्वमाह्निकमुपाचर ॥ ३३ ॥ ततस्तु वारिधान्यास्तौ सलिलेन विधानतः ॥ कृताह्निकावुभौ जातौ वणिक्प्रेतप्रभुस्तथा ॥ ३४ ॥ ततो वणिक्सुतायासौ दध्योदनमथेच्छया ॥ दत्त्वा तेभ्यश्च सर्वेभ्यः शेषमन्नमथात्ततः ॥ ३५ ॥ भुक्तवत्सु च सर्वेषु कामतोऽम्भसि सेविते ॥ अनन्तरं स बुभुजे प्रेतपालो वराशनम् ॥ ३६ ॥ तृप्ते प्रेते प्रकामं तु वारिधान्योदनं तथा ॥ अन्तर्धानमगाद्ब्रह्मन्वणिक्पुत्रस्य पश्यतः ॥ ३७ ॥ ततस्तदद्भुततमं दृष्ट्वा स मतिमान्वणिक् ॥ पप्रच्छ तं प्रेतपालं कौतूहलमना वशी ॥ ३८ ॥ अरण्ये निर्जने साधो कुतोऽन्नस्य समुद्भवः ॥ कुतश्च वारिधानीयं संपूर्णा परमाम्भसा ॥ ३९ ॥ तथाऽपि तव ये भृत्यास्त्वत्तस्ते वर्णतः कृशाः ॥ भवानपि च तेजस्वी किंचित्पुष्टवपुः शुभः ॥ ४० ॥ शुक्लवस्त्रपरीधानो बहूनां परिपालकः ॥ सर्वमेतन्ममाचक्ष्व को भवान्का शमी त्वियम् ॥ ४१ ॥ इत्थं वणिग्वचः श्रुत्वा ततोऽसौ प्रेतनायकः ॥ शशंस सर्वमस्याथ यथावृत्तं पुरातनम् ॥ ४२ ॥ अहमासं पुरा विप्र शाकले नगरोत्तमे ॥ सोमशर्मेति विख्यातो बहुलागर्भसंभवः ॥ ४३ ॥ ममास्ति च वणिक् श्रीमान्[illegible] महाधनः ॥ [illegible] विष्णुभक्तो महायशाः ॥ ४४ ॥



सोऽहं कदर्यो मूढात्मा धनेऽपि सति दुर्मतिः ॥ न ददामि द्विजातिभ्यो न चाऽश्नाम्यन्नमुत्तमम् ॥४५॥ [illegible] ॥ ततो रात्रौ त्रिभिर्घोरैस्ताड्यमानश्च यष्टिभिः ॥ ४६ ॥ प्रातर्भवति मे घोरा मृत्युतुल्या विषूचिका ॥ न च

॥ ४२ ॥ ममास्ति च वणिक् श्रीमान्प्रातिवेश्यो महाधनः ॥ स तु सामश्रवा नाम विष्णुभक्तो महायशाः ॥ ४४ ॥

सोऽहं कदर्यो मूढात्मा धनेऽपि सति दुर्मतिः ॥ न ददामि द्विजातिभ्यो न चाऽश्राम्यन्नसुसमम् ॥४५॥ ... क्षीरघृतान्वितम् ॥ ततो रात्रौ त्रिभिर्घोरैस्ताड्यमानश्च यष्टिभिः ॥ ४६ ॥ प्रातर्भवति मे घोरा मृत्युतुल्या विषूचिका ॥ न च कश्चिन्ममाभ्याशे तत्र तिष्ठति बान्धवः ॥ ४७ ॥ कथं कथमपि प्राणा मया वै संप्रधारिताः ॥ एवमेतादृशः पापी निवसाम्यति निर्घृणः ॥ ४८ ॥ सौवीरतिलपिण्याकतुषशाकादिभोजनैः ॥ क्षपयामि कदन्नाद्यैरात्मानं कालयापनैः ॥ ४९ ॥ एवं तत्र सतो मित्र महान्कालोऽभ्यगादथ ॥ श्रवणद्वादशी नाम मासि भाद्रपदेऽभवत् ॥ ५० ॥ ततो नागरिको लोको गतः स्नातुं हि संगमम् ॥ इरावत्या नड्वलाया ब्रह्मक्षत्रपुरस्सरः ॥ ५१ ॥ प्रातिवेश्यप्रसङ्गेन तत्राप्यनुगतोऽस्म्यहम् ॥ कृतोपवासः शुचिमानेकादश्यां यतव्रतः ॥ ५२ ॥ ततः संगमतोयेन वारिधानीं दृढां नवाम् ॥ संपूर्णां वस्तुसंवीतां छत्रोपानत्सुसंयुताम् ॥ ५३ ॥ मृत्पात्रमतिमृष्टस्य पूर्णं दध्योदनस्य वै ॥ प्रदत्तं ब्राह्मणायोच्चैः शुचये जातिकर्मणा ॥ ५४ ॥ तदेव जीवता दत्तं मया दानं वणिक्सुत ॥ वर्षाणां सप्ततीनां वै नान्यद्दत्तं हि किंचन ॥ ५५ ॥ मृतः प्रेतत्वमापन्नो दत्त्वा प्रेतान्नमेव हि ॥ अमी चादत्तदानास्तु मद्दत्तान्नोपजीविनः ॥ ५६ ॥ एतत्ते कारणं प्रोक्तं यत्तदन्नं पयोऽम्भसा ॥ दत्तं तदिदमायाति मध्याह्नेऽपि दिने दिने ॥ ५७ ॥ यावन्नाहं च भुञ्जेऽन्नं न तावत्क्षयमेति च ॥ मयि भुक्ते च पीते च सर्वमन्तर्हितं भवेत् ॥ ५८ ॥ आतपत्रप्रदानाच्च सोऽयं जातः शमीतरुः ॥ उपानद्युगले दत्ते प्रेतो मे वाहनं भवेत् ॥ ५९ ॥ इदं तवोक्तं सर्वं च यथा कीनाशताऽऽत्मनः ॥ श्रवणद्वादशी

पुण्या तथोक्तं पुण्यवर्धनम् ॥ ६० ॥ इत्येवमुक्ते वचने वणिक्पुत्रोऽब्रवीद्वचः ॥ यन्मया तात कर्त्तव्यं तदनुज्ञातुमर्हसि ॥ ६१ ॥ ततस्य वचनं श्रुत्वा वणिक्पुत्रस्य नारद ॥ प्रेतपालो वचः प्राह स्वार्थसिद्धिकरं ततः ॥ ६२ ॥ यत्त्वया तात कर्तव्यं मद्धितार्थं महामते ॥ कथयिष्यामि सम्यक्ते तव श्रेयस्करं मम ॥६३ ॥ गयातीर्थे तु जुहुयात्स्नात्वा शौचसमन्वितः ॥ मम नाम समुद्दिश्य पिण्डनिर्वपणं कुरु ॥ ६४ ॥ तत्र पिण्डप्रदानेन प्रेतभावादहं सखे ॥ मुक्तस्तु सर्वदातॄणां यास्यामि सहलोकताम् ॥ ६५ ॥ तिथिर्या द्वादशी पुण्या मासि प्रौष्ठपदे सिता ॥ बुधश्रवणसंयुक्ता साऽतिश्रेयस्करी स्मृता ॥ ६६ ॥ इत्येवमुक्त्वा वणिजं प्रेतराजोऽनुगैः सह ॥ स च मेने यथान्यायं सम्यगाख्यातवाञ्छुचिः ॥ ६७ ॥ प्रेतस्कन्धे समारोप्य त्याजितो मरुमण्डलम् ॥ रम्येऽथ शूरसेनाख्ये देशे प्राप्तः स वै वणिक् ॥ ६८ ॥ स्वकर्मधर्मयोगेन धनमुच्चावचं बहु ॥ उपार्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥ ६९ ॥ पिण्डनिर्वपणं तत्र प्रेतानामनुपूर्वकम् ॥ चकाराथ स्वबन्धूनां पितॄणां तदनन्तरम् ॥ ७० ॥ आत्मनश्च समा बुद्धिर्महच्छ्राद्धं तिलैर्विना ॥ पिण्डनिर्वपणं चक्रे तथाऽन्यानपि गोत्रजान् ॥ ७१ ॥ एवं प्रदत्तेष्वथ च पञ्च पिण्डेषु भावतः ॥ विमुक्तास्ते द्विजाः प्राप्य ब्रह्मलोकं ततो गताः ॥ ७२ ॥ स चापि हि वणिक्पुत्रो निजमालयमाव्रजत् ॥ श्रवणद्वादशीं कृत्वा कालधर्ममुपेयिवान् ॥ ७३ ॥ गन्धर्वलोके सुचिरं भोगान्भुक्त्वा सुदुर्लभान् ॥ जन्म मानुष्यमासाद्य स चाभूत्सकले विराट् ॥ ७४ ॥ स्वधर्मकर्माभिवृत्तिस्थः श्रवणद्वादशीरतः ॥ कालधर्ममवाप्यासौ गुह्यकावासमाश्रयत् ॥ ७५ ॥

तत्रोष्य सुचिरं कालं भोगान्भुक्त्वा च कामतः ॥ मर्त्यलोकमनुप्राप्य [illegible]
रतो वशी ॥ गोग्रहेऽरिगणं जित्वा कालधर्ममुपेयिवान् ॥ शक्रलोकमवाप्याथ देवैः सर्वैः सुपूजितः ॥ ७७ ॥ पुण्यक्षयात्परिभ्रष्टः
शाकले सोऽभवद्द्विजः ॥ ततो विकटरूपोऽसौ सर्वशास्त्रस्य पारगः ॥ ७८ ॥ व्यवाहयद्द्विजसुतां रूपेणानुपमां द्विज ॥ सा च मेने
च भर्तारं सुशीलमपि भामिनी ॥ ७९ ॥ विरूपमिति मन्वानस्ततः सोऽभूत्सुदुःखितः ॥ ततो निर्वेदसंयुक्तो गत्वाऽऽश्रमपदं
महत् ॥ ८० ॥ इरावत्यास्तटे श्रीमान्रूपधारिणमासदत् ॥ तमाराध्य जगन्नाथं नक्षत्रपुरुषेण हि ॥ ८१ ॥ सरूपतामवाप्यायं
तस्मिन्नेव च जन्मनि ॥ ततः प्रियोऽभूद्भार्याया भोगवांश्चाभवद्वशी ॥ ८२ ॥ श्रवणद्वादशीभक्तः पूर्वाभ्यासादजायत ॥ ८३ ॥
एवं पुराऽसौ द्विजपुङ्गवस्तु कुरूपरूपो भगवत्प्रसादात् ॥ अनङ्गरूपप्रतिमो बभूव मृतश्च राजा स पुरूरवाऽभूत् ॥ ८४ ॥ इति
श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे प्रह्लादतीर्थयात्रायां पुरूरवस उपाख्यानं नाम नवसप्ततितमोऽध्यायः ॥७९॥
नारद उवाच ॥ पुरूरवा द्विजश्रेष्ठ यथा देवं श्रियः पतिम् ॥ नक्षत्रपुरुषाख्येन आराधयत तद्वद ॥ १ ॥ पुलस्त्य उवाच ॥ श्रूय
तां कथयिष्यामि नक्षत्रपुरुषव्रतम् ॥ नक्षत्राङ्गानि देवस्य यानि यानीह नारद ॥ २ ॥ मूलर्क्षं चरणौ विष्णोर्जङ्घे द्वे रोहिणी
स्थिते ॥ कबन्धिनी तथाऽश्विन्यौ संस्थिते रूपधारिणः ॥ ३ ॥ आषाढे च तथैव स्फिग्गुह्यस्थं फाल्गुनीद्वयम् ॥ कटिस्थाः
कृत्तिकाश्चैव वासुदेवस्य संस्थिताः ॥ ४ ॥ ऊरुसंस्था चानुराधा धनिष्ठा पृष्ठसंस्थिता ॥ विशाखा भुजयोर्हस्तः करद्वयमनुत्त

मम् ॥ ५ ॥ पुनर्वसुरथो गुल्फौ नखे सार्पं तथोच्यते ॥ ज्येष्ठा ग्रीवा स्थिता तस्य श्रवणं कर्णयोः स्थितम् ॥ ६ ॥ ओष्ठसंस्थ
स्तथा पुष्यः स्वातिर्दन्तेषु कीर्तिता ॥ हनौ पुनर्वसुश्चोक्तो नासा मैत्रमुदाहृतम् ॥ ७ ॥ प्राजापत्यं नेत्रयुग्मे रूपधारि प्रतिष्ठि
तम् ॥ ८ ॥ शिरोरुहास्तथैवेन्द्रं नक्षत्राङ्गमिदं हरेः ॥ विधानं संप्रवक्ष्यामि यथान्यायेन नारद ॥ ९ ॥ संपूजितो हरिर्धीमान्विद
धाति यथेप्सितम् ॥ चैत्रमासेऽसिताष्टम्यां यदा मूलगतः शशी ॥ १० ॥ तदा तु भगवत्पादौ पूजयेच्च विधानतः ॥ नक्षत्रपुरुषे
दद्याद्विप्रेन्द्राय च भोजनम् ॥११॥ जानुनी रोहिणीयोगे पूजयेदथ भक्तितः ॥ दोहदे वै हविष्यान्नं पूर्वं च द्विजभोजनम् ॥ १२ ॥
आषाढाभ्यां तथा द्वाभ्यां स्फिग्रूपं पूजयेद् बुधः ॥ सलिलं शिशिरं तत्र दोहदे च प्रकीर्तितम् ॥ १३ ॥ फाल्गुनीद्वितये गुह्यं
पूजनीयं विचक्षणैः ॥ दोहदं च पयो गव्यं देयं च द्विजभोजनम् ॥ १४ ॥ कृत्तिकासु कटिः पूज्या सोपवासैर्जितेन्द्रियैः ॥ दोहदं
च विभोर्देयं सुगन्धं कुसुमोदकम् ॥ १५ ॥ पार्श्वौ भाद्रपदायुग्मे पूजयित्वा विधानतः ॥ गुडं शालेयकं दद्याद्दोहदं देवप्रीतिदम्
॥१६॥ द्वे कुक्षी रेवतीयोगे दोहदे मुद्गमोदकः ॥ अनुराधासु वक्षोऽथ षष्टिकान्नं च दोहदे ॥१७॥ धनिष्ठायां तथा पूज्यः शालिभक्त
च दोहदे ॥ भुजयुग्मं विशाखासु दोहदे परमौदनम् ॥१८॥ हस्ते हस्तौ तथा पूज्यौ यावकं दोहदे स्मृतम् ॥ पुनर्वस्वङ्गुलीयुग्मं पटो
लस्तत्र दोहदे ॥ १९ ॥ नखाश्लेषासु संपूज्या दोहदे तित्तिरामिषम् ॥ ज्येष्ठायां पूजयेद्ग्रीवां दोहदे तिलमोदकः ॥ २० ॥ श्रवणे
श्रवणौ पूज्यौ दधिभक्तं च दोहदे ॥ पुष्ये मुखं तु संपूज्य दोहदे घृतपायसम् ॥२१॥ स्वातियोगे च दशना दोहदे तिलशष्कुली॥





॥ २३ ॥ मघासु नासिका पूज्या मधुराज्यं च दोहदे ॥ मृगोत्तमाङ्गे नयने मृगमांसं च दोहदे ॥२४॥ चित्रायोगे ललाटं च दोहदे

... दर्शनो दोहदे तिलशष्कुली॥

दातव्यं केशवप्रीत्यै ब्राह्मणेभ्यश्च भोजनम् ॥२२॥ [illegible]

॥ २३ ॥ मघासु नासिका पूज्या मधुराज्यं च दोहदे ॥ मृगोत्तमाङ्गं नयने मृगमांसं च दोहदे ॥२४॥ चित्रायोगे ललाटं च दोहदे चारु भोजनम् ॥ भरणीषु शिरः पूज्यं चारु भक्ष्यं च दोहदे ॥ २५ ॥ संपूजनीया विद्वद्भिरार्द्रायोगे शिरोरुहाः ॥ विप्रांश्च भोजयेद्भक्त्या दोहदे च गुडार्द्रकम् ॥ २६ ॥ नक्षत्रयोगेष्वेतेषु संपूज्य जगतः पतिम् ॥ पूजिते दक्षिणां दद्याद्ब्राह्मणे वेदपारगे ॥ २७ ॥ छत्त्रोपानद्वस्त्रयुगं सप्तधान्यं सकाञ्चनम् ॥ घृतपात्रं च गां दोग्ध्रीं ब्राह्मणेभ्यो निवेदयेत् ॥ २८ ॥ प्रतिनक्षत्रयोगेन पूजनीया द्विजातयः ॥ नक्षत्रज्ञाय विप्राय पृथग्दद्याच्च दक्षिणाम् ॥ २९ ॥ नक्षत्रपुरुषाख्यं हि व्रतानामुत्तमं व्रतम् ॥ पूर्वं कृतं हि भृगुणा सर्वपातकनाशनम् ॥३०॥ अङ्गोपाङ्गानि देवर्षे पूजनीयानि वै प्रभोः ॥ सुरूपाण्यभिजायन्ते प्रत्यङ्गाङ्गानि चैव हि ॥ ३१ ॥ सप्तजन्मकृतं पापं कलिसङ्गागतं च यत् ॥ पितृमातृसमुत्थं च तत्सर्वं हन्ति केशवः ॥ ३२ ॥ सर्वाणि भद्राण्याप्नोति शरीरारोग्यमुत्तमम् ॥ अनन्तां मनसः प्रीतिं रूपं चातीव शोभनम् ॥ ३३ ॥ वाङ्माधुर्यं तथा कान्तिं यच्चान्यदभिवाञ्छितम् ॥ ददाति नक्षत्रपुमान्पूजितस्तु जनार्दनः ॥ ३४ ॥ उपोष्य सम्यगेतेषु क्रमेणर्क्षेषु नारद ॥ अरुन्धती महाभागा ख्यातिमग्र्यां जगाम ह ॥३५॥ अदितिस्तनयार्थाय नक्षत्राङ्गं जनार्दनम् ॥ पूजयित्वा तु गोविन्दं रैवते पुत्रमाप्तवान् ॥ ३६ ॥ रम्भा रूपं तथा लेभे वाङ्माधुर्यं तिलोत्तमा ॥ कान्तिं शशिवदग्र्यां च राज्यं राजा पुरूरवाः ॥ ३७ ॥ एवं विधानतो ब्रह्मन्नक्षत्राङ्गो जनार्दनः ॥ पूजितो रूपधारी

यैस्तैः प्राप्ता तु स्वकामिता ॥ ३८ ॥ एवं पवित्रं च शुभप्रदायि यशस्यमारोग्यकरं तु पुंसाम् ॥ नक्षत्रपुंसः परमं विधानं शृणुष्व पुण्यामिह तीर्थयात्राम् ॥ ३९ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे प्रह्लादतीर्थयात्रायां नक्षत्रपुरुषो नामाशीतितमोऽध्यायः ॥ ८० ॥ पुलस्त्य उवाच ॥ इरावतीमनुप्राप्य पुण्यां तामृषिकन्यकाम् ॥ स्नात्वा संपूजयामास चैत्राष्टम्यां जनार्दनम् ॥ १ ॥ नक्षत्रपुरुषं कृत्वा व्रतं पुण्यप्रदं शुचि ॥ जगाम स कुरुक्षेत्रं प्रह्लादो दानवेश्वरः ॥ २ ॥ ऐराव तेन मन्त्रेण चक्रतीथ सुदर्शनम् ॥ उपामन्त्र्य ततः सस्नौ वेदोक्तविधिना मुने ॥ ३ ॥ उपोष्य क्षणदां भक्त्या पूजयित्वा कुरुध्वजम् ॥ कृतशौचस्तु तं द्रष्टुं ययौ पुरुषकेसरी ॥ ४ ॥ स्नात्वा तु देविकायां तु नृसिंहं प्रतिपूज्य च ॥ उपोष्य रजनी मेकां गोकर्णं दानवो ययौ ॥ ५ ॥ तस्मिन् स्नात्वाऽथ प्राचीने पूज्येशं विश्वकारकम् ॥ प्राचीने चापरे दैत्यो द्रष्टुं कामेश्वरं ययौ ॥६॥ तत्र स्नात्वा च दृष्ट्वा च पूजयित्वा च शंकरम् ॥ द्रष्टुं ययौ च प्रह्लादः पुण्डरीकं महाम्भसि ॥ ७ ॥ महाम्भसि ततः स्नात्वा संतर्प्य पितृदेवताः ॥ पुण्डरीकं च संपूज्य उपोष्य दिवसत्रयम् ॥ ८ ॥ विशाखरूपे तदनु दृष्ट्वा देवं तथाऽजितम् ॥ स्ना त्वा तथा कृष्णतीर्थे त्रिरात्रं न्यवसद्भुवि ॥ ९ ॥ ततो हंसपदे हंसं दृष्ट्वा संपूज्य चेश्वरम् ॥ जगामासौ पयोष्ण्यां तु अखण्डं द्रष्टुमच्युतम् ॥ १० ॥ स्नात्वा पयोष्णीसलिले पूज्याखण्डं जगत्पतिम् ॥ द्रष्टुं जगाम मतिमान्वितस्तायां कुमारिलम् ॥ ११ ॥ तत्र स्नात्वाऽर्च्य देवेशं वालखिल्यैमरीचिभिः ॥ आराध्यमानोऽप्ययुतं व्रतं पापप्रणाशनम् ॥ १२ ॥ यत्र सा सुरभी देवी स्वसुतां



कपिलां शुभाम् ॥ देवप्रियार्थमसृजद्धितार्थं जगतस्तथा ॥ १३ ॥ ... ॥ ... प्राप्य मणिमन्तं ततो ययौ ॥१४॥ तत्र तीर्थवरे स्नात्वा प्राजापत्ये महामतिः ॥ ददर्श शंभुं ब्रह्माणं देवेशं च प्रजापतिम्॥१५॥

पापप्रणाशनम् ॥ १२ ॥ यत्र सा सुरभी देवी स्वसुता
कपिलां शुभाम् ॥ देवप्रियार्थमसृजद्धितार्थं जगतस्तथा ॥ १३ ॥ तत्र देवह्रदं स्नात्वा शंभुं संपूज्य भक्तितः ॥ [illegible]
प्राप्य मणिमन्तं ततो ययौ ॥१४॥ तत्र तीर्थवरे स्नात्वा प्राजापत्ये महामातिः ॥ ददर्श शंभुं ब्रह्माणं देवेशं च प्रजापतिम्॥१५॥
विधानतस्तु तान्देवान्पूजयित्वा तपोधनः ॥ षड्रात्रं तत्र च स्थित्वा जगाम मधुनन्दिनीम् ॥ १६ ॥ मधुसलिले स्नात्वा च
देवं चक्रधरं हरम् ॥ शूलबाहुं च गोविन्दं ददर्श दनुपुङ्गवः ॥ १७ ॥ नारद उवाच ॥ किमर्थं भगवाञ्शंभुर्दधाराथ सुदर्शनम् ॥
शूलं तथा वासुदेवो ममैतद् ब्रूहि पृच्छतः ॥ १८ ॥ पुलस्त्य उवाच ॥ श्रूयतां कथयिष्यामि कथामेतां पुरातनीम् ॥ कथयामास
तां विष्णुर्भविष्याम्यवनौ सुराः ॥ १९ ॥ जलोद्भवो नाम महासुरेन्द्रो घोरं स तप्त्वा तप उग्रवीर्यः ॥ आराधयामास विरञ्चिमा
रात्स तस्य तुष्टो वरदो बभूव ॥ २० ॥ देवासुराणामजयो महाहवे निजैश्च शस्त्रैरमरैरवध्यः ॥ अनन्यलङ्घ्यैर्न तु ब्रह्मणः पुरा न
याति शापैः शममेष शत्रुः ॥ २१ ॥ एवंप्रभावो दनुपुङ्गवोऽसौ देवान्महर्षीन्नृपतीन्समग्रान् ॥ प्रबाधमानो विचचार भूम्यां सर्वाः
क्रियाः प्राक्षिपदुग्रमूर्तिः ॥ २२ ॥ ततोऽमरा भूमितटं निषण्णा जग्मुः शरण्यं हरिमीशितारम् ॥ तैश्चापि सार्धं भगवाञ्जगाम
हिमालयं यत्र हरस्त्रिणेत्रः ॥ २३ ॥ संमन्त्र्य देवर्षिहितं च कार्यं मतिं च कृत्वा निधनाय शत्रोः ॥ निरायुधौ तावपि पर्यटन्तौ
देवाधिपौ चक्रतुरुग्रकम ॥ २४ ॥ ततश्चासौ दानवौ विष्णुशर्वौ समायातौ हन्तुकामौ सुरेशौ ॥ मत्वाऽजेयौ शत्रुभि
र्घोररूपैर्भयात्तोये निम्नगायां विवेश ॥ २५ ॥ ज्ञात्वा प्रविष्टं त्रिदिवेन्द्रशत्रुं नदीं विशालां द्विजमत्स्यपूर्णाम् ॥ तीरं

समाश्रित्य स्थितौ हि देवौ प्रच्छन्नमूर्ती सहसा बभूवतुः ॥ २६ ॥ दिवं समीक्षन्सहसा कातराक्षो दुर्गं हिमाद्रिं सहसा विवेश ॥ महीध्रशृङ्गोपरि विष्णुशंभू बम्भ्रम्यमाणं स्वरिपुं च मत्वा ॥ २७ ॥ वेगादुभौ दुद्रुवतुः सशस्त्रौ विष्णुस्त्रिशूली गिरिशश्च चक्री ॥ ताभ्यां स दृष्टस्त्रिदशोत्तमाभ्यां चक्रेण शूलेन विभिन्नदेहः ॥ २८ ॥ पपात शैलात्तपनीयवर्णो यथाऽन्तरिक्षाद्धि मनुष्यताराः ॥ एवं त्रिशूलं च दधार विष्णुश्चक्रं त्रिनेत्रोऽप्यरिसूदनार्थम् ॥ २९ ॥ यत्राप्यसौ शूलभवाभिघाताद्धरां पपात धराचलेन्द्रात् ॥ जलोद्भवश्चापि जलं विमुच्य ज्ञात्वा गतौ शंकरवासुदेवौ ॥ ३० ॥ तत्प्राप्य तीर्थं त्रिदशाधिपाभ्यामुपोषितं दैत्यपतिः स्वशुद्ध्ये ॥ उपोष्य भक्त्या हिमवन्तमागाद्द्रष्टुं गिरीशं शिवविष्णुमार्गम् ॥ ३१ ॥ तं समभ्यर्च्य विधिवद्दत्त्वा दानं द्विजातिषु ॥ वितस्ताहिमवत्योश्च भृगुतुङ्गं जगाम सः ॥ ३२ ॥ यत्रेश्वरो देववरस्य विष्णोः प्रादाद्रथाङ्गं प्रवरायुधं वै ॥ चिच्छेद येनारिबलं च शंकरो विज्ञायमानोऽस्त्रबलं महात्मा ॥ ३३ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे प्रह्लादतीर्थयात्रायां जलोद्भववधो नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ नारद उवाच ॥ भगवँल्लोकनाथाय विष्णवे विषमेक्षणः ॥ किमर्थमायुधं चक्रं दत्तवाँल्लोकपूजितम् ॥ १ ॥ पुलस्त्य उवाच ॥ शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् ॥ चक्रप्रदानसंबद्धां शिवमाहात्म्यवर्धिनीम् ॥ २ ॥ आसीद्द्विजातिप्रवरो वेदवेदाङ्गपारगः ॥ गृहाश्रमी महाभागो वीतमन्युरिति स्मृतः ॥ ३ ॥ तस्यात्रेयी महाभागा भार्याऽऽसीच्छीलसंमता ॥ पतिव्रता पतिप्राणा धर्मशीलेति विश्रुता ॥ ४ ॥ मुनेस्तस्यानपत्यस्य ऋतुकालाभिगामिनः ॥ संबभूव सुतः

श्रीमानुपमन्युरिति श्रुतः ॥ ५ ॥ तं माता मुनिशार्दूल शालिपिष्टरसेन च ॥ [illegible]
नोऽस्य क्षीरस्य स्वादुतां पय इत्यथ ॥ संभावनामप्यकरोच्छालिपिष्टरसेऽपि हि ॥ ७ ॥ स त्वेकदा समं पित्रा कुत्रचिद्द्विजवेश्म
नि ॥ क्षीरौदनं च बुभुजे श्रद्धया प्राणिपुष्टिदम् ॥ ८ ॥ स लब्ध्वाऽनुपमं स्वादु क्षीरं च ऋषिपुत्रकः ॥ मात्रा दत्तं द्वितीयेऽह्नि
नादत्ते पिष्टकारितम् ॥९॥ रुरोद च तथा बाल्यात्पाथोऽर्थं चातको यथा ॥ माता रुदन्तं तं प्राह बाष्पगद्गदया गिरा ॥ १० ॥
उमापतौ पशुपतौ शूलधारिणि शंकरे ॥ अप्रसन्ने विरूपाक्षे कुतः क्षीरेण भोजनम् ॥११॥ यदीच्छसि पयो भोक्तुं सद्यः पुष्टिकरं
सुत ॥ तमाराधय देवेशं विरूपाक्षं त्रिशूलिनम् ॥ १२ ॥ तस्मिंस्तुष्टे जगद्धाम्नि सर्वकल्याणदायिनि ॥ प्राप्यतेऽमृतपायित्वं किं
पुनः क्षीरभोजनम् ॥ १३ ॥ स मातुर्वचनं श्रुत्वा वीतमन्युस्ततोऽब्रवीत् ॥ कोऽयं विरूपाक्ष इति त्वयाऽऽराध्यस्तु कीर्तितः
॥ १४ ॥ ततः सुतं धर्मशीला धर्माढ्यं वाक्यमब्रवीत् ॥ १५ ॥ योऽयं विरूपाक्ष इति श्रूयतां कथयामि तम् ॥ आसीन्महासुरप
तिः श्रीदाम इति विश्रुतः ॥ १६ ॥ येनाक्रम्य जगत्सर्वं श्रीदाम्ना विष्णुवत्पुरा ॥ १७ ॥ निःश्रीकास्तु त्रयो लोकाः कृतास्तेन दुर
त्मना ॥ श्रीवत्सं वासुदेवस्य हर्तुमिच्छन्महासुरः ॥ १८ ॥ तस्य दुष्टं स भगवानभिप्रायं जनार्दनः ॥ ज्ञात्वा तस्य वधकाङ्क्षी
महेश्वरमुपागमत् ॥ १९ ॥ एतस्मिन्नन्तरे शंभुर्योगमूर्तिधरोऽव्ययः ॥ तस्थौ हिमाचलप्रस्थमाश्रित्य श्लक्ष्णभूषितम् ॥ २० ॥ अथा
भ्येत्य जगन्नाथः सहस्रशिरसं विभुम् ॥ आराधयामास हरिः स्वयमात्मानमात्मना ॥ २१ ॥ आसीद्वर्षसहस्रं तु पादाङ्गुष्ठेन तद्गिरा ॥

गृणन्सनातनं ब्रह्म योगिध्येयमलक्षणम् ॥२२॥ ततः प्रीतः प्रभुः प्रादाद्विष्णवे परमं पदम् ॥ प्रत्यक्षतेजसा युक्तं दिव्यं चक्रं सुदर्शनम् ॥ २३॥ तद्दत्त्वा देवदेवाय सर्वभूतमयः प्रभुः ॥ कालचक्रनिभं चक्रं शंकरो विष्णुमब्रवीत् ॥ २४ ॥ वरायुधं हि देवेश सर्वायुधनिबर्हणम् ॥ सुदर्शनं द्वादशारं षण्णाभि द्विजवज्जवे ॥२५॥ आरासंस्थास्त्वमी तत्र देवा मासाश्च राशयः ॥ शिष्टानां रक्षणार्थाय संस्थिता ऋतवश्च षट् ॥ २६ ॥ अग्निः सोमस्तथा मित्रो वरुणश्च शचीपतिः ॥ इन्द्राग्नी वाऽप्यथो विश्वे प्रजापतय एव तु ॥ २७ ॥ वायुश्च बलवान्देववैद्यौ धन्वन्तरिस्तथा ॥ तपस्यश्च तपश्चोग्रो द्वादशेति प्रतिष्ठिताः ॥ २८ ॥ चैत्राद्याः फाल्गुनान्ताश्च मासास्तत्र प्रतिष्ठिताः ॥ २९ ॥ तदेनदादाय विभो रथायुधं शत्रुं सुराणां जहि मा विशङ्किथाः ॥ अमोघ एषोऽमरराजपूजितो धृतो मया मन्त्रगतस्तपोबलात् ॥ ३० ॥ इत्युक्तः शंभुना विष्णुस्ततो वचनमब्रवीत् ॥ कथं शंभो विजानीयाममोघं मोघमेव च ॥ ३१ ॥ यथाऽमोघं विभो चक्रं सर्वत्राप्रतिमं ततः ॥ जिज्ञासार्थं तवैवेह प्रक्षिप्यामि प्रतीच्छ मे ॥ ३२ ॥ तद्वाक्यं वासुदेवस्य निशम्याह पिनाकधृक् ॥ यद्येवं प्रक्षिपस्वेति निर्विशङ्केन चेतसा ॥ ३३ ॥ तन्महेशानवचनं श्रुत्वा विष्णुः सुदर्शनम् ॥ मुमोच तेजो जिज्ञासुः शंकरं प्रति वेगवान् ॥ ३४ ॥ मुरारिकरविभ्रष्टं चक्रमभ्येत्य शूलिनम् ॥ त्रिधा चकार विश्वेशं यज्ञेशं यज्ञयाजकम् ॥ ३५ ॥ हरं हरिस्त्रिधाभूतं दृष्ट्वा तूर्णं महाभुजः ॥ व्रीडोपप्लुतदेहस्तु प्रणिपातपरोऽभवत् ॥ ३६ ॥ पादप्रणामनिरतं वीक्ष्य दामोदरं ततः प्राह प्रीतमना [illegible] ॥ ३७॥ प्राकृतोऽयं महाभाग विकारो



ब्रह्मणो मम ॥ निकृत्तो न स्वभावो मे अच्छेद्योऽदाह्य एव हि ॥ २८ ॥ तदेतानीह चक्रेण त्रीण्यङ्गानीह केशव ॥ कृतानि तानि

... पादेन दामोदर ततः ॥ प्राह प्रीतमनाः श्रीमान्नुत्तिष्ठेति पुनः पुनः ॥ २७ ॥ प्राकृतोऽयं महाभाग विकारो ब्रह्मणो मम ॥ निकृत्तो न स्वभावो मे अच्छेद्योऽदाह्य एव हि ॥ २८ ॥ तदेतानीह चक्रेण त्रीण्यङ्गानीह केशव ॥ कृत्तानि तानि पुण्यानि भविष्यन्ति न संशयः ॥ २९ ॥ हिरण्याक्षस्ततो ह्येष सुवर्णाक्षस्तथाऽपरः ॥ तृतीयो विश्वरूपाक्षस्त्रयो मे पुण्यदा नृणाम् ॥ ४० ॥ उत्तिष्ठ गच्छ च विभो निहन्तुं च ममाहितम् ॥ श्रीदामानं हतं ज्ञात्वा नन्दयिष्यन्ति देवताः ॥ ४१ ॥ इत्येव मुक्तो भगवान्हरेण गरुडध्वजः ॥ गत्वा सुरगिरिप्रस्थं श्रीदामानं ददर्श ह ॥४२॥ तं दृष्ट्वा देवदर्पघ्नं दैत्यं देववरो हरिः ॥ मुमोच चक्रं वेगाढ्यं हतोऽसीति ब्रुवन्विभुः ॥ ४३ ॥ ततस्तु तेनाप्रतिपौरुषेण चक्रेण दैत्यस्य शिरो निकृत्तम् ॥ संछिन्नशीर्षो निपपात शैलाद्वज्राहतं शैलशिरो यथैव ॥ ४४ ॥ तस्मिन्हते देवरिपौ मुरारिरीशं समाराध्य विरूपनेत्रम् ॥ लब्ध्वा च चक्रं प्रवरं महायुधं जगाम देवो निलयं तपोनिधिम् ॥ ४५ ॥ सोऽयं पुत्र विरूपाक्षो देव देवो महेश्वरः ॥ तमाराधय चेतसाधो क्षीरेणेच्छसि भोजनम् ॥ ४६ ॥ तन्मातुर्वचनं श्रुत्वा वीतमन्युः सुतो बली ॥ तमाराध्य विरूपाक्षं प्राप्स्ये क्षीरेण भोजनम् ॥ ४७ ॥ एतत्त्वयोक्तं परमं पवित्रं संछेदनं पापतरोर्मुरारेः ॥ तीर्थं च तत्रैव महासुरो वै समाससादाथ सुपुण्यहेतोः ॥ ४८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे श्रीदामचरितं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ पुलस्त्य उवाच ॥ ॥ तस्मिंस्तीर्थवरे स्नात्वा दृष्ट्वा देवं त्रिलोचनम् ॥ पूजयित्वा सुवर्णाक्षं नैमिषं प्रययौ ततः ॥ १ ॥ तत्र तीर्थसहस्राणि त्रिंशत्पापहराणि च ॥ गोमत्याः काञ्चनाक्ष्याश्च शुभदायाश्च मध्यतः ॥२॥ तेषु स्नात्वाऽर्च्य देवेशं पीतवाससमच्युतम् ॥

ऋषीनपि च संपूज्य नैमिषारण्यवासिनः ॥ ३ ॥ देवदेवं तथेशानं संपूज्य विधिना ततः ॥ गयायां गोपतिं द्रष्टुं जगाम स महासुरः ॥ ४ ॥ स्नात्वा ब्रह्मतडागे तु कृत्वा चास्य प्रदक्षिणाम् ॥ पिण्डनिर्वपणं पुण्यं पितॄणां स चकार ह ॥ ५ ॥ उदपाने तथा स्नात्वा तत्राभ्यर्च्य पितॄन्वशी ॥ गदापाणिं समभ्यर्च्य गोपतिं चापि शंकरम् ॥ ६ ॥ इन्द्रतीर्थे तथा स्नात्वा संतर्प्य पितृदेवताः ॥ महानदीजले स्नात्वा सरयूं च जगाम सः ॥ ७ ॥ तस्यां स्नात्वा समभ्यर्च्य गोप्रतारं कुशेशयम् ॥ उपोष्य रजनीमेकां विनयावनतो ययौ ॥ ८ ॥ स्नात्वा चार्च्य रजस्तीर्थे दत्त्वा पिण्डं पितॄंस्तथा ॥ दर्शनार्थं ययौ श्रीमानजितं पुरुषोत्तमम् ॥९॥ तं दृष्ट्वा पुण्डरीकाक्षमक्षरं परमं शुचिः ॥ षड्रात्रं समुपोष्यैव महेन्द्रं दक्षिणं ययौ ॥ १० ॥ तत्र देववरं शुभ्रमर्धनारीधरं हरम् ॥ दृष्ट्वा च संपूज्य पितॄन्महेन्द्रे चोत्तरं गतः ॥ ११ ॥ तत्र देववरं शंभुं गोपालं सोमपीडितम् ॥ दृष्ट्वा स्नात्वा सोमतीर्थे सह्याचलमुपागतः ॥ १२ ॥ तत्र स्नात्वा महोदक्यां वैकुण्ठं चार्च्य भक्तितः ॥ सुरान्पितॄंश्च संतर्प्य पारियात्रं गिरिं गतः ॥ १३ ॥ तत्र स्नात्वा लाङ्गलिन्यां पूजयित्वाऽपराजितम् ॥ कशेरुदेशं चाभ्येत्य विश्वरूपं ददर्श सः ॥ १४ ॥ यत्र देववरः शंभुर्गणानां तु सुपूजितः ॥ विश्वरूपमथात्मानं दर्शयामास योगवित् ॥ १५ ॥ तत्र मङ्कुरणिकातोये स्नात्वाऽभ्यर्च्य महेश्वरम् ॥ जगाम नित्यसौगन्धं प्रह्लादो मलयाचलम् ॥ १६ ॥ महाह्रदे ततः स्नात्वा पूजयित्वा च शंकरम् ॥ ततो जगाम योगात्मा द्रष्टुं विन्ध्ये सदाशिवम् ॥ १७ ॥ ततो विपाशासलिले स्नात्वाऽभ्यर्च्य सदाशिवम् ॥ त्रिरात्रं समुपोष्याथ अवन्तीं नगरीं ययौ ॥





॥ १८ ॥ तत्र क्षिप्राजले स्नात्वा विष्णुं संपूज्य भक्तितः ॥ श्मशानस्थं जगामाथ महाकालवपुर्धरम् ॥ १९ ॥

विन्ध्ये सदाशिवम् ॥ १७ ॥ ततो विपाशासलिले स्नात्वाऽभ्यर्च्य सदाशिवम् ॥ त्रिरात्रं समुपोष्याथ अवन्तीं नगरीं ययौ ॥

॥ १८ ॥ तत्र क्षिप्राजले स्नात्वा विष्णुं संपूज्य भक्तितः ॥ श्मशानस्थं जगामाथ महाकालवपुर्धरम् ॥ १९ ॥ [illegible] भूतानां तेन रूपेण शंकरः ॥ तामसं रूपमास्थाय संहारं कुरुते वशी ॥२०॥ तत्रस्थेन सुरेशेन श्वेतकिर्नाम भूपतिः ॥ रक्षितस्त्व न्तकं दग्ध्वा सर्वभूतापहारिणम्॥२१॥ तत्रातिहृष्टो वसति नित्यं वै सर्वदा भवः ॥ वृतः प्रमथकोटीभिस्त्रिदशार्चितविग्रहः ॥२२॥ तं दृष्ट्वाऽथ महाकालं कालकालान्तकान्तकम् ॥ यमसंयमनं मृत्योर्मृत्युं चित्रविचित्रकम् ॥२३॥ श्मशाननिलयं शंभुं भूतनाथं जगत्प तिम् ॥ पूजयित्वा शूलधरं जगाम निषधान्प्रति ॥२४॥ तत्रामरेश्वरं देवं दृष्ट्वा संपूज्य भक्तितः ॥ महोदयं समभ्येत्य हयग्रीवं ददर्श सः ॥२५॥ अश्वतीर्थे ततः स्नात्वा दृष्ट्वा च तुरगाननम् ॥ श्रीधरं च विभुं पूज्य पाञ्चालविषयं ययौ ॥ २६ ॥ तत्रेश्वरगुणैर्युक्तं पुत्रमर्थपते रथ ॥ पाञ्चलिकं वशी दृष्ट्वा प्रयागं प्रयतो ययौ ॥२७॥ प्रयागे शुभदे तीर्थे यामुने लोकविश्रुते ॥ दृष्ट्वा वटेश्वरं रुद्रं माधवं योगशा यिनम् ॥२८॥ द्वावेव भक्तिसंपूज्यौ पूजयित्वा महासुरः ॥ माघमासमथोपोष्य ततो वाराणसीं गतः॥२९॥ समासाद्य च तां पुण्यां तीर्थेषु च पृथक्पृथक् ॥ सर्वपापहरा ह्येषा स्नात्वाऽर्च्य पितृदेवताः ॥३०॥ प्रदक्षिणीकृत्य पुरीं संपूज्याभुक्तकेशवौ ॥ लोलं दिवा करं दृष्ट्वा ततो मधुवनं ययौ ॥ ३१ ॥ तत्र स्वायंभुवं देवं ददर्शासुरसत्तमः ॥ तमभ्यर्च्य महातेजाः पुष्करारण्यमागमत् ॥ तेषु त्रिष्वपि तीर्थेषु स्नात्वाऽर्च्य पितृदेवताः ॥ ३२ ॥ एतत्पवित्रं परमं पुराणं प्रोक्तं त्वगस्त्येन महर्षिणा च ॥ धन्यं यशस्यं बहुपापनाशनं संकीर्तनाच्छ्रवणात्संस्मृतेश्च ॥ ३३ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे प्रह्लादतीर्थयात्रा नाम त्र्यशीतितमोऽध्यायः ॥८३॥

पुलस्त्य उवाच ॥ गते च तीर्थयात्रायां प्रह्लादे दानवेश्वरे ॥ कुरुक्षेत्रं समभ्यागाद्द्रष्टुं वैरोचनो मुने ॥ १ ॥ तस्मिन्महाधर्मयुते तीर्थे ब्राह्मणपुङ्गवः ॥ शुक्रो द्विजातिप्रवरानामन्त्रयत भार्गवः ॥ २ ॥ भृगुणाऽऽमन्त्र्यमाणास्ते श्रुत्वाऽऽत्रेयसगौतमाः ॥ कौशिकाङ्गिरसश्चैव तत्त्वज्ञाः कुरुजाङ्गलम् ॥ ३ ॥ उत्तराशां प्रजग्मुस्ते नदीमनु शतद्रवीम् ॥ शातद्रवे जले स्नात्वा विवासं प्रययुस्ततः ॥ ४ ॥ विज्ञाय तत्रास्य रतिं स्नात्वाऽर्च्य पितृदेवताः ॥ ततोऽपि किरणां पुण्यां दिनेशकिरणच्युताम् ॥ ५ ॥ तस्यां स्नात्वा च देवर्षे सर्व एव महर्षयः ॥ सुपुण्योदां वेगवतीं स्नात्वा जग्मुरथेश्वरीम् ॥ ६ ॥ देविकाया जले स्नात्वा पयोष्णायां च तापसाः ॥ अवतीर्णा मुने स्नातुं माधवाद्याः सुभानवीम् ॥७॥ ततो निमग्ना ददृशुः प्रतिबिम्बमथात्मनः ॥ अन्तर्जले द्विजश्रेष्ठ महदाश्चर्यकारकम् ॥ ८ ॥ उन्मज्जन्तश्च ददृशुः पुनर्विस्मितमानसाः ॥ ततः स्नात्वा समुत्तीर्णा ऋषयः सर्व एव हि ॥ ९ ॥ पुष्कराक्षमयोगंन्धि ब्रह्माणं चाप्यपूजयन् ॥ ततो भूयः सरस्वत्यास्तीर्थे त्रैलोक्यविश्रुते ॥१०॥ कोटितीर्थे रुद्रकोटिं ददर्श वृषभध्वजम् ॥ नैमिषेया द्विजवरा मागधेयाः ससैन्धवाः ॥ ११ ॥ धर्मारण्याः पुष्करेया दण्डकारण्यकास्तथा ॥ चाम्पेयास्तारकच्छेया देविकातीर्थकाश्च ये ॥ १२ ॥ ते तत्र शंकरं द्रष्टुं समायाता द्विजातयः ॥ कोटिसंख्यास्तपःसिद्धा हरदर्शनलालसाः ॥ १३ ॥ अहं पूर्वमहं पूर्वमित्येवंवादिनो मुने ॥ तानाकुलान्हरो दृष्ट्वा महर्षीन्दग्धकिल्बिषान् ॥ १४ ॥ तेषामेवानुकम्पार्थं कोटिमूर्तिरभूच्छिवः ॥ ततस्ते मुनयः प्रीताः सर्व एव महेश्वरम् ॥ [illegible] ॥ इत्येवं रुद्रकोटीभिर्नाम शंभोरजायत ॥ १६ ॥ तं ददर्श महातेजाः प्रह्लादो भक्तिमान्वशी ॥ कोटितीर्थे ततः स्नात्वा [illegible] ॥ [illegible] ॥ १७ ॥ ततो देववरं स्थाणुं शंकरं पार्वतीप्रियम् ॥ सरस्वतीजले मग्नं ददर्श सुरपूजितम् ॥ १८ ॥ सारस्व

मुनयः प्रीताः सर्व एव महेश्वरम् ॥ १५ ॥ संपूजयन्तस्तं तस्थुस्तीर्थं कृत्वा पृथक्पृथक् ॥ इत्येवं रुद्रकोटीभिर्नाम शंभोरजायत

॥ १६ ॥ तं ददर्श महातेजाः प्रह्लादो भक्तिमान्वशी ॥ कोटितीर्थं ततः स्नात्वा तर्पयित्वा पितॄन्देवान् ॥ [illegible]
जगाम कुरुजाङ्गलम् ॥ १७ ॥ ततो देववरं स्थाणुं शंकरं पार्वतीप्रियम् ॥ सरस्वतीजले मग्नं ददर्श सुरपूजितम् ॥ १८ ॥ सारस्व
तेऽम्भसि स्नात्वा स्थाणुं संपूज्य भक्तितः ॥ स्नात्वा दशाश्वमेधे च संपूज्य च सुरान्पितॄन् ॥१९॥ सहस्रलिङ्गं संपूज्य स्नात्वा
तस्मिन्ह्रदे शुचिः ॥ अभिवाद्य गुरुं शुक्रं सोमतीर्थं जगाम ह ॥ २० ॥ तत्र स्नात्वाऽभ्यर्च्य पितॄन्सोमं संपूज्य भक्तितः ॥
क्षीरिकावासमभ्येत्य स्नानं चक्रे महामतिः ॥ २१ ॥ प्रदक्षिणीकृत्य तरुं वरुणं चार्च्य बुद्धिमान् ॥ भूयः कुरुध्वजं दृष्ट्वा
पद्माक्षीं नगरीं गतः ॥ २२ ॥ तत्राचर्य मित्रावरुणौ भास्करौ लोकपूजितौ ॥ कुमारधारामभ्येत्य ददर्श स्वामिनं वशी ॥
॥ २३ ॥ स्नात्वा कपिलधारायां संतर्प्यर्षीन् पितॄन्सुरान् ॥ दृष्ट्वा स्कन्दं समभ्यर्च्य नर्मदायां जगाम ह ॥ २४ ॥ तस्यां
स्नात्वा समभ्यर्च्य वासुदेवं श्रियः पतिम् ॥ जगाम भूधरं द्रष्टुं वाराहं चक्रधारिणम् ॥ २५ ॥ स्नात्वा कोकामुखे तीर्थे
संपूज्य धरणीधरम् ॥ त्रिसौवर्णं महादेवं मधुदेशं जगाम ह ॥ २६ ॥ तत्र नारीह्रदे स्नात्वा पूजयित्वा च शंकरम् ॥
कालञ्जरं समभ्येत्य नीलकण्ठं ददर्श च ॥ २७ ॥ नीलतीर्थजले स्नात्वा पूजयित्वा ततः शिवम् ॥ जगाम सागरानूपे प्रभासे
द्रष्टुमीश्वरम् ॥ २८ ॥ स्नात्वा च संगमे नद्याः सरस्वत्यार्णवस्य च ॥ सोमेश्वरं लोकपातिं स ददर्श कपर्दिनम् ॥ २९ ॥ यो
दक्षशापनिर्दग्धः क्षयी ताराधिपः शशी ॥ आप्यायितः शंकरेण विष्णुना सकपर्दिना ॥ ३० ॥ तावाचर्य देवप्रवरौ स जगाम

महालयम् ॥ तत्र रुद्रं समभ्यर्च्य प्रजगामोत्तरान्कुरून् ॥ ३१ ॥ पद्मनाभं स तत्रार्च्य सप्तगोदावरं ययौ ॥ तत्र स्नात्वाऽऽर्च्य देवेशं भीमं त्रैलोक्यवन्दितम् ॥ ३२ ॥ गत्वा दारुवने श्रीमाञ्श्रीलिङ्गं प्रददर्श ह ॥ तमार्च्य ब्राह्मणीं गत्वा स्नात्वाऽऽर्च्य त्रिदशेश्वरम् ॥ ३३ ॥ प्लक्षावतरणं गत्वा श्रीनिवासमपूजयत् ॥ ततश्च कुण्डिनं गत्वा संपूज्य प्राणतृप्तिदम् ॥ ३४ ॥ शूर्पारकं चतुर्बाहुं पूजयित्वा विधानतः ॥ मागधारण्यमासाद्य ददर्श वसुधाधिपम् ॥३५॥ तमर्चयित्वा विश्वेशं स जगाम प्रजासुखम् ॥ महीतीर्थे ततः स्नात्वा वासुदेवं प्रणम्य च ॥ ३६ ॥ शोणं संप्राप्य संपूज्य रुक्मधर्माणमीश्वरम् ॥ भक्तिमानथ ॥ ३७ ॥ पूजयित्वा जगन्नाथं सैन्धवारण्यमुत्तमम् ॥ तं दृष्ट्वाऽऽर्च्य हरिं चासौ तीर्थं कनखलं ययौ ॥ ३८ ॥ तत्रार्च्य भद्रकालीशं वीरभद्रं च दानवः ॥ धनाधिपं च मेर्वर्कं ययावथ गिरिव्रजम् ॥ ३९ ॥ तत्र देवं पशुपतिं लोकनाथं महेश्वरम् ॥ संपूजयित्वा विधिवत्कामरूपं जगाम ह ॥ ४० ॥ शशिप्रभं देववरं त्रिनेत्रं संपूजयित्वा सहितं मृडान्या ॥ जगाम तीर्थंप्रवरं महाख्यं तस्मिन्महादेवमपूजयच्च ॥ ४१ ॥ ततस्त्रिकूटं गिरिमद्रिपुत्रं जगाम द्रष्टुं सहचक्रपाणिम् ॥ तमार्च्य भक्त्या तु गजेन्द्रमोक्षणं जजाप जाप्यं परमं पवित्रम् ॥ ४२ ॥ तुतोष दैत्येश्वरसूनुरादरान्मासत्रयं मूलफलाम्बुभक्षी ॥ निवेद्य विप्रप्रवरेषु काञ्चनं जगाम घोरं स हि दण्डकं वनम् ॥ ४३ ॥ तत्र दिव्यं महाशाखं वनस्पतिवपुर्धरम् ॥ ददर्श पुण्डरीकाक्षं महास्वापदवारणम् ॥ ४४ ॥ तस्याधस्थं त्रिरात्रं स महाभागवतोऽसुरः ॥ स्थितः स्थण्डिलशायी च पठन्सारस्वतं स्तवम् ॥ ४५ ॥

वारणम् ॥ ४४ ॥ तस्याधस्थं त्रिरात्रं स महाभागवतोऽसुरः ॥ स्थितः स्थण्डिलशायी च पठन्सारस्वतं स्तवम् ॥ ४५ ॥

तस्मात्तीर्थवरं विद्वान्सर्वपापप्रणाशनम् ॥ जगाम दानवो द्रष्टुं सर्वपापहरं हरिम् ॥ ४६ ॥ तस्याग्रतो जगादासौ स्तवौ पापप्रमोचनौ ॥ यौ पुरा भगवान्प्राह क्रोडरूपी जनार्दनः ॥ ४७ ॥ तस्माद्यथागद्दैत्येन्द्रः शालग्रामं महाफलम् ॥ यत्र संनिहितो विष्णुः स्तस्नेषु स्थावरेषु च ॥४८॥ तत्र सर्वगतं विष्णुं मत्वा चक्रे रतिं बली ॥ पूजयन्भगवत्पादौ महाभागवतो मुने॥४९॥ इयं तवोक्ता मुनिसंघजुष्टा प्रह्लादतीर्थानुगतिः सुपुण्या ॥ यत्कीर्तनाच्छ्रवणात्स्पर्शनाच्च विमुक्तपापा मनुजा भवन्ति ॥ ५० ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे प्रह्लादतीर्थयात्रा नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ नारद उवाच ॥ याञ्जप्यान्भगवद्भक्त्या प्रह्लादो दानवोऽजपत् ॥ गजेन्द्रमोक्षणादींस्त्वं चतुरस्तान्वदस्व मे ॥१॥ पुलस्त्य उवाच ॥ शृणुष्व कथयिष्यामि जप्यानेतांस्तपोधन ॥ दुःस्वप्ननाशो भवति यैरुक्तैः संस्मृतैः श्रुतैः ॥ २ ॥ गजेन्द्रमोक्षणं त्वादौ शृणु त्वं तदनन्तरम् ॥ सारस्वतौ ततः पुण्यौ पापप्रशमनौ स्तवौ ॥ ३ ॥ सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः ॥ सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः ॥ ४ ॥ क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः ॥ उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥ ५ ॥ अप्सरोभिः परिवृतः श्रीमान्प्रस्रवणाकुलः ॥ गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणगुह्यकैः ॥ ६ ॥ विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः ॥ वृकद्वीपगजेन्द्रैश्च वृतगात्रो विराजते ॥७॥ पुन्नागैः कर्णिकारैश्च बिल्वामलकपाटलैः ॥ चूतनीपकदम्बैश्च चन्दनागरुचम्पकैः ॥८॥ शालैस्तालैस्तमालैश्च सरलार्जुनपर्पटैः ॥ तथाऽन्यैर्विविधैर्वृक्षैः सर्वतः समलंकृतः ॥९॥ नानाधातुत्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः ॥

शोभितो रुचिरप्रस्थैस्त्रिभिर्विस्तीर्णसानुभिः ॥ १० ॥ मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः ॥ जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः॥११॥तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः॥ नानापुष्पसमाकीर्णं नानागन्धाधिवासितम्॥१२॥ द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः ॥ पाण्डुराम्बुदसङ्काशं तथा रत्नचयोपमम्॥१३॥वज्रेन्द्रनीलवैडूर्यतेजोभिर्भासयन्दिशः॥ तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम् ॥ १४ ॥ न तत्कृतघ्नाः पश्यन्ति नृशंसा नैव राक्षसाः ॥ नातप्ततपसो लोके ये च पापकृतो जनाः ॥ १५ ॥ तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम् ॥ कारण्डवसमाकीर्णं राजहंसोपशोभितम् ॥ १६ ॥ कुमुदोत्पलकह्लारैः पुण्डरीकैश्च शोभितम् ॥ कमलैः शतपत्रैश्च काञ्चनैः समलंकृतम् ॥ १७ ॥ पत्रैर्मरकतप्रख्यैः पुष्पैः काञ्चनसन्निभैः ॥ गुल्मैः कीचकरेणूनां समन्तात्परिवेष्टितम् ॥ १८ ॥ तस्मिन्सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः ॥ आसीद्ग्राहो गजेन्द्राणां दुराधर्षो महाबलः ॥ ॥ १९ ॥ अथ दन्तोज्ज्वलवपुः कदाचिद्गजयूथपः ॥ मदस्रावी जलाकाङ्क्षी पादचारीव पर्वतः ॥ २० ॥ वासयन्मदगन्धेन गिरिमैरावतोपमः ॥ स गजोऽञ्जनसङ्काशो मदाघूर्णितलोचनः ॥ २१ ॥ तृषितः स्नातुकामोऽसाववतीर्णश्च तज्जलम् ॥ सलीलः पङ्कजवने यूथमध्यगतस्त्वरन् ॥ २२ ॥ गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना ॥ पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम् ॥ २३ ॥ ह्रियते पङ्कजवने ग्राहेणातिबलीयसा ॥ गज आकर्षते तीरं ग्राह आकर्षते जलम् ॥ २४ ॥ तयोर्दिव्यं महायुद्धं जातं वर्षसहस्रकम् ॥ वारुणैः संयुतः पाशैर्निष्प्रयत्नगतिः कृतः ॥ २५ ॥ वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा ॥

॥१७६॥



विस्फूर्य च यथाशक्ति विक्रोशंश्च महारवान् ॥ २६ ॥ व्यथितः सन्निरुच्छ्वासो गृहीतो घोरकर्मणा ॥ परमामापदं प्राप्य मनसा

महाशुद्धं जातं वर्षसहस्रकम् ॥ वारुणैः संयुतः पाशैर्निष्प्रयत्नगतिः कृतः ॥ २५ ॥ वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा ॥
विस्फूर्य च यथाशक्ति विक्रोशंश्च महारवान् ॥ २६ ॥ व्यथितः सन्निरुद्धश्वासो गृहीतो घोरकर्मणा ॥ परमामापदं प्राप्य मनसा
ऽचिन्तयद्धरिम् ॥ २७ ॥ स तु नागवरः श्रीमान्नारायणपरायणः ॥ तमेव शरणं देवं गतः सर्वात्मना तदा ॥ २८ ॥
एकात्मा निगृहीतात्मा विशुद्धेनान्तरात्मना ॥ जन्मजन्मान्तराभ्यासाद्भक्तिमान्गरुडध्वजे ॥ २९ ॥ आद्यं देवं महादेवं पूजया
मास केशवम् ॥ मथितामृतफेनाभं शङ्खचक्रगदाधरम् ॥ ३० ॥ सहस्रशुभनामानमादिदेवमजं विभुम् ॥ प्रगृह्य पुष्कराग्रेण
काञ्चनं कमलोद्भवम् ॥ आपद्विमोक्षमन्विच्छन्गजः स्तोत्रमुदैरयत् ॥ ३१ ॥ गजेन्द्र उवाच ॥ ॐ नमो मूलप्रकृतये अजिताय
महात्मने ॥ अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते ॥ ३२ ॥ नम आद्याय वामाय आर्षायादिप्रवर्तिने ॥ अनन्तराय
चैकाय अव्यक्ताय नमो नमः ॥ ३३ ॥ नमो गुह्या य गूढाय गुणाय गुणवर्तिने ॥ अतर्क्यायाप्रमेयाय अतुलाय नमो नमः ॥
॥ ३४ ॥ नमः शिवाय शान्ताय निश्चिन्ताय यशस्विने ॥ सनातनाय पूर्वाय पुराणाय नमो नमः ॥ ३५ ॥ नमोऽस्तु तस्मै
देवाय निर्गुणाय गुणात्मने ॥ नमो जगत्प्रतिष्ठाय गोविन्दाय नमो नमः ॥ ३६ ॥ नमोऽस्तु पद्मनाभाय सांख्ययोगोद्भवाय
च ॥ विश्वेश्वराय देवाय शिवाय हरये नमः ॥ ३७ ॥ नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने ॥ नारायणाय विश्वाय देवाय
परमात्मने ॥ ३८ ॥ नमो नमः कारणवामनाय नारायणायामितविक्रमाय ॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै
पुरुषोत्तमाय ॥ ३९ ॥ गुह्याय वेदनिलयाय महोरगाय सिंहाय दैत्यनिधनाय चतुर्भुजाय ॥ ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय देवो-

माय सकलाय नमोऽच्युताय ॥४०॥ नागेन्द्रभोगशयनाय च सुप्रियाय गोक्षीरहेमशुकनीलघनोपमाय ॥ पीताम्बराय मधुकैटभनाशनाय विश्वाद्यचारुमुकुटाय नमोऽक्षराय ॥४१॥ नाभिप्रजातकमलस्थचतुर्मुखाय क्षीरोदकार्णवनिकेतयशोधराय ॥ नानाविचित्रकनकाङ्गदभूषणाय सर्वेश्वराय वरदाय नमो वराय ॥४२॥ भक्तिप्रियाय वरदीप्तसुदर्शनाय देवेन्द्रविघ्नशमनोद्यतपौरुषाय ॥ फुल्लारविन्दविमलायतलोचनाय योगेश्वराय वरदाय नमो वराय ॥४३॥ ब्रह्मायनाय त्रिदशायनाय लोकायनायात्महितायनाय ॥ नारायणात्मविकाशनाय महावराहाय नमः सुरोऽसि ॥ ४४ ॥ कूटस्थमव्यक्तमचिन्त्यरूपं नारायणं कारणमादिदेवम् ॥ युगान्तशेषं पुरुषं पुरातनं तं देवदेवं शरणं प्रपद्ये ॥ ४५ ॥ योगेश्वरं चारुविचित्रमौलिमज्ञेयमग्र्यं प्रकृतेः परस्थम् ॥ क्षेत्रज्ञमात्मप्रभवं वरेण्यं तं वासुदेवं शरणं प्रपद्ये ॥ ४६ ॥ अदृश्यमव्यक्तमचिन्त्यमव्ययं ब्रह्मर्षयो ब्रह्ममयं सनातनम् ॥ वदन्ति यं वै पुरुषं सनातनं तं देवगुह्यं शरणं प्रपद्ये ॥ ४७ ॥ यदक्षरं ब्रह्म वदन्ति सर्वगं निशम्य यं मृत्युमुखात्प्रमुच्यते ॥ तमीश्वरं तृप्तमनुत्तमैर्गुणैः परायणं विष्णुमुपैमि शाश्वतम् ॥४८॥ कार्यं क्रियाकारणमप्रमेयं हिरण्यनाभं वरपद्मनाभम् ॥ महाबलं देवनिधिं सुरेशं व्रजामि विष्णुं शरणं जनार्दनम् ॥४९॥ किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमालंकृतसर्वगात्रम्॥ पीताम्बरं काञ्चनभक्तिचित्रं मालाधरं केशवमभ्युपैमि॥ ॥५०॥ तारोद्भवं वेदविदां वरिष्ठं योगात्मनां सांख्यविदां वरिष्ठम् ॥ आदित्यरुद्राश्विवसुप्रभावं प्रभुं प्रपद्येऽच्युतमादिभूतम्॥५१॥ श्रीवत्साङ्कं महादेवं देवगुह्यं मनोरमम् ॥ प्रपद्ये सूक्ष्ममतुलं वरेण्यमभयप्रदम् ॥५२॥ प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम् ॥ प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम् ॥ ५३ ॥ भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम् ॥ शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम् ॥

...महादेवं देवगुह्यं मनोरमम् ॥ प्रपद्ये सूक्ष्ममतुलं वरेण्यमभयप्रदम् ॥५२॥ प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम् ॥ प्रपद्ये
मुक्तसङ्गानां यतीनां परमां गतिम् ॥ ५३ ॥ भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम् ॥ शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम्
॥ ५४ ॥ त्रिविक्रम त्रिलोकेशं सर्वेषां प्रपितामहम् ॥ योगात्मान महात्मानं प्रपद्येऽहं जनार्दनम् ॥ ५५ ॥ आदिदेवमजं
शंभुं व्यक्ताव्यक्तं सनातनम् ॥ नारायणमणीयांस प्रपद्ये ब्राह्मणप्रियम् ॥ ५६ ॥ नमो हराय देवाय नमः सर्वमहाय च ॥
प्रपद्ये देवदेवेशमणीयांसं तनोः सदा ॥ ५७ ॥ एकाय लोकतत्त्वाय परतः मरमात्मने ॥ नमः सहस्रशिरसे अनन्ताय महात्मने ॥
॥ ५८ ॥ त्वमेव शरणं देवमृषयो वेदपारगाः ॥ कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम् ॥ ५९ ॥ नमस्ते पुण्डरीकाक्ष भक्ताना
मभयप्रद ॥ अब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम् ॥६०॥ पुलस्त्य उवाच ॥ भक्तिं तस्यानुसंचिन्त्य नागस्यामोघसंभवः ॥
प्रीतिमानभवद्विष्णुः शङ्खचक्रगदाधरः ॥६१॥ सान्निध्य कल्पयामास तस्मिन्सरसि केशवः॥गरुडस्थो जगत्स्वामी लोकाधारस्तपो
धनः ॥ ६२ ॥ ग्राहग्रस्तं गजेन्द्र तं तं च ग्राहं जलाशयात् ॥ उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ॥ ६३ ॥ जलस्थं दार
यामास ग्राहं चक्रेण माधवः ॥ मोक्षयामास नागेन्द्र पाशेभ्यः शरणागतम् ॥६४॥ एवं हि देवशापेन हूहूर्गन्धर्वसत्तमः ॥ ग्राहत्व
मगमत्कृष्णान्मोक्षं प्राप्य दिवं गतः ॥ ६५ ॥ गजोऽपि विष्णुना पृष्टो जातो दिव्यवपुः पुमान् ॥ पापाद्विमुक्तौ युगपद्गजगन्धर्व
सत्तमौ ॥ ६६ ॥ प्रीतिमान्पुण्डरीकाक्षः शरणागतवत्सलः ॥ अभवत्त्वथ देवेशस्ताभ्यां चैव प्रपूजितः ॥ ६७ ॥ इदं च भगवा
न्योगी गजेन्द्रं शरणागतम् ॥ प्रोवाच मुनिशार्दूल मधुरं मधुसूदनः ॥ ६८ ॥ श्रीभगवानुवाच ॥ यो मां त्वां च सरश्चेदं ग्राहस्य

च विदारणम्॥गुल्मकीचकरेणूनां रूपं मेरुसुतस्य च ॥६९॥ अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च॥ संस्मरिष्यन्ति मनुजाः प्रयाताः स्थिरबुद्धयः॥७०॥कीर्तयिष्यन्ति भक्त्या च श्रोष्यन्ति च शुचिव्रताः॥दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति॥७१॥ मात्स्यं कौर्म च वाराहं वामनं तार्क्ष्यमेव च ॥ नारसिंहं च नागेन्द्रं सृष्टिप्रलयकारकम्॥७२॥ एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः ॥ ॥ सर्वपापैः प्रमुच्यन्ते पुण्याँल्लोकानवाप्नुयुः ॥ ७३ ॥ पुलस्त्य उवाच ॥ एवमुक्त्वा हृषीकेशो गजेन्द्रं गरुडध्वजः ॥ स्पर्शयामास हस्तेन गजं गन्धर्वमेव च ॥ ७४ ॥ ततो दिव्यवपुर्भूत्वा गजेन्द्रो मधुसूदनम् ॥ जगाम विष्णुं शरणं नारायणपरायणः ॥ ७५ ॥ ततो नारायणः श्रीमान्मोक्षयित्वा गजोत्तमम् ॥ पापं बन्धाच्च शापाच्च ग्राहं चाद्भुतकर्मकृत् ॥ ७६ ॥ ऋषिभिः स्तूयमानश्च देवगुह्यपरायणैः ॥ ततः स भगवान्विष्णुर्दुर्विज्ञेयगतिः प्रभुः॥७७॥गजेन्द्रमोक्षणं दृष्ट्वा देवाः शक्रपुरोगमाः॥ ववन्दिरे महात्मानं प्रभुं नारायणं हरिम् ॥ ७८ ॥ महर्षयश्चारणाश्च दृष्ट्वा गजविमोक्षणम् ॥ विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम् ॥ ७९ ॥ प्रजापतिपतिर्ब्रह्मा चक्रपाणेर्विचेष्टितम् ॥ गजेन्द्रमोक्षणं दृष्ट्वा इदं वचनमब्रवीत् ॥ ८० ॥ य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः ॥ प्राप्नुयात्परमां सिद्धिं दुःस्वप्नश्च विनश्यति ॥८१॥ गजेन्द्रमोक्षणं पुंसां सर्वपापप्रणाशनम् ॥ कथितेन स्मृतेनाथ श्रुतेन च तपोधन ॥ ८२ ॥ एतत्पवित्रं परमं सुपुण्यं संकीर्तनीयं चरितं मुरारेः ॥ यस्मिन्किलोक्ते बहुपापबन्धनाल्लभेत मोक्षं द्विरदो नु यद्वत् ॥८३॥ अजं वरेण्यं वरपद्मनाभं नारायणं ब्रह्मनिधिं सुरेशम् ॥ तं देवगुह्यं पुरुषं पुराणं वन्दाम्यहं लोकपतिं वरेण्यम ॥८४॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे गजेन्द्रमोक्षणं नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ पुलस्त्य उवाच ॥





कश्चिदासीद् द्विजद्रोग्धा पिशुनः क्षत्रियाधमः ॥ परपीडारुचिः क्षुद्रः स्वभावादेव निर्घृणः॥१॥ नोपासिताः सदा तेन पितृदेवद्विजा

…गजेन्द्रमोक्षणं नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ पुलस्त्य उवाच ॥

कश्चिदासीद् द्विजद्रोग्धा पिशुनः क्षत्रियाधमः ॥ परपीडारुचिः क्षुद्रः स्वभावादेव निर्घृणः॥१॥ नोपासिताः सदा तेन पितृदेवद्विजा तयः ॥ स त्वायुषि परिक्षीणे जज्ञे घोरनिशाचरः ॥ २ ॥ तेनासौ कर्मदोषेण स्वेन पापकृतां वरः ॥ क्रूरैश्चक्रे तदा वृत्तिं राक्षसत्वा द्विशेषतः ॥ ३ ॥ तस्य पापरतस्यैवं जग्मुर्वर्षशतानि तु ॥ तेनैव कमदोषेण नान्या वृत्तिररोचत ॥ ४ ॥ यं यं पश्यति सत्त्वं स तं तमादाय राक्षसः ॥ चखाद रौद्रकर्माऽसौ बाहुगोचरमागतम् ॥ ५ ॥ एवं तस्यातिदुष्टस्य कुर्वतः प्राणिनां वधम् ॥ जगाम सुमहान्कालः परिणामं तथा वयः ॥ ६ ॥ स कदाचित्तपस्यन्तं ददर्श सरितस्तटे ॥ महाभाग ह्यूर्ध्वभुजं यथावत्संजितेन्द्रियम् ॥ ॥ ७ ॥ अनया रक्षया ब्रह्मन्कृतरक्षं तपोनिधिम् ॥ योगाचार्यं शुचिं दक्षं वासुदेवपरायणम् ॥ ८ ॥ विष्णुः प्राच्यां स्थितश्चक्री विष्णुर्दक्षिणतो गदी ॥ प्रतीच्यां शार्ङ्गधृग्विष्णुर्विष्णुः खड्गी ममोत्तरे ॥ ९ ॥ हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः ॥ क्रोड रूपी हरिर्भूमौ नरसिंहोऽम्बरे मम ॥ १० ॥ क्षुरान्तममलं चक्रं भ्रमत्येतत्सुदर्शनम् ॥ तस्यांशुमाला दुष्प्रेक्ष्या हन्ति प्रेतनिशाच रान् ॥ ११ ॥ गदा चेयं सहस्रार्चिरूर्ध्वं हन्तुं वृकांस्तथा ॥ रक्षोभूतपिशाचानां डाकिनीनां च शातनी ॥ १२ ॥ शार्ङ्गं विस्फू र्जितं चैव वासुदेवस्य मद्रिपून् ॥ तिर्यङ्मनुष्यकूष्माण्डप्रेतादीन्हन्त्वशेषतः ॥ १३ ॥ खड्गधाराजलज्योत्स्नानिर्धूता ये ममा हिताः ॥ ते यान्तु सौम्यतां सद्यो गरुडेनेव पन्नगाः ॥ १४ ॥ ये कूष्माण्डास्तथा दैत्या यक्षा ये च निशाचराः ॥ प्रेता विना

यकाः क्रूरा मनुष्या जृम्भकाः खगाः ॥१५॥ सिंहादयो य पशवो दन्दशूकाश्च पन्नगाः ॥ सर्वे भवन्तु ते सौम्या विष्णुशङ्खरवा हताः ॥ १६ ॥ चित्तवृत्तिहरा ये च ये जनाः स्मृतिहारकाः ॥ बलौजसां च हर्तारश्छायाविभ्रंशकाश्च ये ॥ १७ ॥ ये चोपभोग हर्तारो ये च लक्षणनाशकाः ॥ कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररयाहताः ॥१८॥ बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैन्द्रियकं तथा ॥ ममास्तु वासुदेवस्य देवदेवस्य कीर्तनात् ॥ १९ ॥ पृष्ठे पुरस्तादथ दक्षिणोत्तरे विकोणतश्चास्तु जनार्दनो हरिः ॥ तमी ड्यमीशानमनन्तमच्युतं जनार्दनं प्राणपतिं न सीदति ॥ २० ॥ यथा परं ब्रह्म हरिस्तथा परं जगत्स्वरूपं च स एव केशवः ॥ ऋतेन तेनाच्युतनामकीर्तनात्प्रणाशमेतत्त्रिविधं ममाशुभम् ॥ २१ ॥ इत्येवं चात्मरक्षार्थं कृत्वा वै विष्णुपञ्जरम् ॥ संस्थितोऽसा वपि बली राक्षसः समुपाद्रवत् ॥२२॥ ततो द्विज नियुक्तया रक्षया रजनीचरः ॥ निर्धूतवेगः सहसा तस्थौ मासचतुष्टयम् ॥ २३॥ यावद्द्विजस्य देवर्षे समाप्तिर्वै समाधितः ॥ ततो जप्यावसानेऽसौ त ददर्श निशाचरम् ॥ २४ ॥ दीनं हतबलोत्साहं कान्दिशीकं हतौजसम् ॥ तं दृष्ट्वा कृपयाऽऽविष्टः समाश्वास्य निशाचरम्॥२५॥पप्रच्छाऽऽगमने हेतुं समाचष्टे यथागतम् ॥ स्वभावमात्मनो द्रष्टुं रक्षया तेजसो हतिम् ॥२६॥ कथयित्वा च तद्रक्षः कारणं विधिवत्ततः ॥ प्रसीदेत्यब्रवीद्विप्रं निर्विण्णः स्वेन कर्मणा ॥२७॥ बहूनि पापानि मया कृतानि तथा च सन्तो बहवो मया हताः ॥ २८ ॥ कृताः स्त्रियो मया बह्व्यो विधवाः पुत्रवर्जिताः ॥ अना गसां च सत्त्वानामनेकानां क्षयः कृतः ॥ २९ ॥ तस्मात्त्वत्तोऽहमिच्छामि त्वत्प्रसादतः ॥ तत्पापप्रशमायालं कुरु मे धर्म





नाशनम् ॥ ३० ॥ पापस्यास्य क्षयकरमुपदेशं प्रयच्छ मे ॥ वचनं प्राह धर्मार्थहेतुमच्च स्वभाषितम् ॥ ३१ ॥ तस्य तद्वचनं श्रुत्वा

...क्षयः कृतः ॥ २९ ॥ तस्मात्पापादहं मोक्षमिच्छामि त्वत्प्रसादतः ॥ तत्पापप्रशमायालं कुरु मे धर्म ॥१७

नाशनम् ॥ ३० ॥ पापस्यास्य क्षयकरमुपदेशं प्रयच्छ मे ॥ वचनं प्राह धर्मार्थहेतुमच्च स्वभाषिनम् ॥ ३१ ॥ तस्य तद्वचनं श्रुत्वा
निशाटस्य द्विजोत्तमः ॥ कथं क्रूरस्वभावस्यासतस्तव निशाचर ॥ सहसैव समायाता जिज्ञासा धर्मवर्त्मनि ॥ ३२ ॥ राक्षस
उवाच ॥ त्वां वै समागतोऽस्म्यद्य क्षिप्तोऽहं रक्षया बलात् ॥ तव संसर्गतो ब्रह्मज्ञानो निर्वेद उत्तमः ॥३३॥ का सा रक्षा न तां वेद्मि
वेद्मि नास्याः परायणम् ॥ यस्याः संसर्गमासाद्य निर्वेदं प्रापितो वरम्॥३४॥त्वं कृपां कुरु धर्मज्ञ मय्यनुक्रोशमावह ॥ यथा पापा
पनोदो मे भवत्यार्य तथा कुरु ॥ ३५ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्तः स मुनिस्तदा तेन च राक्षसम् ॥ प्रत्युवाच महाभाग
विमृश्य सुचिरं बहु ॥ ३६ ॥ ऋषिरुवाच ॥ यन्मामाहोपदेशाथ निर्विण्णः स्वेन कर्मणा ॥ युक्तमेतद्धि पापानां निवृत्तिरुपका
रिका ॥ ३७ ॥ करिष्ये यातुधानानां न त्वहं धर्मदेशनम् ॥ तान्संपृच्छ द्विजान्सौम्य ये वै प्रवचने रताः ॥ ३८ ॥ एवमुक्त्वा
ययौ विप्रांश्चिन्तामाप च राक्षसः ॥ कथं पापापनोदः स्यादिति चिन्ताकुलेन्द्रियः ॥ ३९ ॥ न चखाद स सत्त्वानि क्षुधासं
बाधितोऽपि सन् ॥ षष्ठे षष्ठे तदा काले जन्तुमेकमभक्षयत् ॥ ४० ॥ स कदाचित्क्षुधाविष्टः पर्यटन्विपुले वने ॥ ददर्शाथ फला
हारमागतं ब्रह्मचारिणम् ॥ ४१ ॥ गृहीतो रक्षसा तेन स तदा मुनिदारकः ॥ निराशो जीविते प्राह सामपूर्वं निशाचरम् ॥४२॥
ब्राह्मण उवाच ॥ भोऽनघ ब्रूहि तत्कार्यं गृहीतो येन हेतुना ॥ तदेवं ब्रूहि भद्रं ते स्वयमस्म्यनुशाधि माम् ॥ ४३ ॥ राक्षस
उवाच ॥ षष्ठे काले त्वमाहारः क्षुधितस्य समागतः ॥ निष्ठुरस्यातिपापस्य निर्घृणस्य द्विजद्रुहः ॥ ४४ ॥ ब्राह्मण उवाच ॥

यद्यवश्यं त्वया चाहं भक्षितव्यो निशाचर ॥ आयास्यामि तवाद्यैव निवेद्य गुरवे फलम् ॥ ४५ ॥ गुर्वर्थमेतदागत्य यत्फलग्रहणं कृतम् ॥ ममात्र निष्ठां प्राप्तस्य फलानि विनिवेदितुम् ॥ ४६ ॥ स त्वं मुहूर्तमात्रं मामत्रैवमनुपालय ॥ निवेद्य गुरवे यावदिहागच्छाम्यहं फलम् ॥ ४७ ॥ राक्षस उवाच ॥ षष्ठे काले न मे ब्रह्मन्कश्चिद् ग्रहणमागतः ॥ प्रतिमुच्येत देवोऽपि इति मे पापजीविका ॥ ४८ ॥ एक एवात्र मोक्षस्य तव हेतुः शृणुष्व तम् ॥ मुञ्चाम्यहमसंदिग्धं यदि तत्कुरुते भवान् ॥ ४९ ॥ ब्राह्मण उवाच ॥ गुरोर्यन्न विरुद्धं स्याद्यन्न धर्मोपरोधकम् ॥ तत्करिष्याम्यहं रक्षो यन्न व्रतहरं मम ॥ ५० ॥ राक्षस उवाच ॥ मया निसर्गतो ब्रह्मञ्जातिदोषाद्विशेषतः ॥ निर्विवेकेन चित्तेन पापकर्म सदा कृतम् ॥ ५१ ॥ आबाल्यान्मम पापेषु न धर्मेषु रतं मनः ॥ तत्पापसंक्षयान्मोक्षं प्राप्नुयां येन तत्त्वतः ॥ ५२ ॥ यानि यानि च कर्माणि बालत्वाच्चरितानि च ॥ दुष्टां योनिमिमां प्राप्य तन्मुक्तिं कथय द्विज ॥ ५३ ॥ यद्येतद्द्विजपुत्र त्वं समाख्यास्यस्यशेषतः ॥ ततः क्षुधार्तान्मत्तस्त्वं नियतं मोक्षमाप्स्यसि ॥ ५४ ॥ न चैतत्पापशीलोऽहमद्म्यन्नं क्षुत्पिपासितः ॥ षष्ठे षष्ठे नृशंसात्मा भक्षयिष्यामि निर्घृणः ॥ ५५ ॥ एवमुक्तो मुनिसुतस्तेन घोरेण रक्षसा॥चिन्तामवाप महतीमशक्तस्तदुदीरणे॥५६॥स विमृश्य चिरं विप्रः शरणं जातवेदसम्॥जगाम ज्ञानदानाय संशयं परमं गतः॥५७॥ यदि शुश्रूषितो वह्निर्गुरुशुश्रूषणादनु॥व्रतानि वा सुचीर्णानि सप्तार्चिः पातु मां ततः॥५८॥ न मातरं न पितरं गौरवेण यथा गुरुम्॥ यथाऽहमवगच्छामि तथा मां पातु पावकः ॥५९॥ यथा गुरुं न मनसा कर्मणा मनसाऽपि च ॥



अवजानाम्यहं तेन पातु मां तेन पावकः ॥ ६० ॥ इत्येवं मनसा सत्यं कुर्वतः शपथान्मुने ॥ सप्तार्चिषा समादिष्टा ... ॥ मा भैर्द्विजसुताहं त्वां मोक्षयाम्यद्य संकटात् ॥ ६२ ॥

अवजानाम्यहं तेन पातु मां तेन पावकः ॥ ६० ॥ इत्येवं मनसा सत्यं कुर्वतः शपथान्मुने ॥ ततोऽपा ...
रासीत्सरस्वती ॥ ६१ ॥ सा प्रोवाच द्विजसुतं राक्षसग्रहणाकुलम् ॥ मा भैर्द्विजसुताहं त्वां मोक्षयाम्यद्य संकटात् ॥ ६२ ॥
यदस्य रक्षसः श्रेयो जिह्वाग्रे संस्थिता तव ॥ तत्सर्वं कथयिष्यामि ततो मोक्षमवाप्स्यसि ॥ ६३ ॥ अदृश्या रक्षसा तेन प्रोक्त्वे
त्थं च सरस्वती ॥ अदर्शनं गता सोऽपि द्विजः प्राह निशाचरम् ॥ ६४ ॥ ब्राह्मण उवाच ॥ श्रूयतां तव यच्छ्रेयस्तथाऽन्येषां च
पापिनाम् ॥ समस्तपापशुद्ध्यर्थं पुण्योपचयदं च यत् ॥ ६५ ॥ प्रातरुत्थाय जप्तव्यं मध्याह्नेऽह्नः क्षयेऽपि वा ॥ असंशयं
सदाजापो जपतां पुष्टिशान्तिदः ॥ ६६ ॥ ॐ हरिं कृष्णं हृषीकेशं वासुदेवं जनार्दनम् ॥ प्रणतोऽस्मि जगन्नाथं स मे पापं
व्यपोहतु ॥ ६७ ॥ चराचरगुरुं नाथं गोविन्दं शेषशायिनम् ॥ प्रणतोऽस्मि परं देवं स मे पापं व्यपोहतु ॥ ६८ ॥ शङ्खिनं चक्रिणं
शार्ङ्गधारिणं स्रग्धरं परम् ॥ प्रणतोऽस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥ ६९ ॥ दामोदरमुदारं तं पुण्डरीकाक्षमच्युतम् ॥
प्रणतोऽस्मि स्तुतं स्तुत्यैः स मे पापं व्यपोहतु ॥ ७० ॥ नारायणं नरं शौरिं माधवं मधुसूदनम् ॥ प्रणतोऽस्मि धराधारं स
मे पापं व्यपोहतु ॥७१॥ केशवं केशिहन्तारं कंसारिष्टनिषूदनम् ॥ प्रणतोऽस्मि महाबाहुं स मे पापं व्यपोहतु॥७२॥ श्रीवत्सवक्षसं
श्रीशं श्रीधरं श्रीनिकेतनम् ॥ प्रणतोऽस्मि श्रियः कान्तं स मे पापं व्यपोहतु ॥७३॥ यमीशं सर्वभूतानां ध्यायन्ति यतयोऽक्षरम् ॥
वासुदेवमनिर्देश्यं तमस्मि शरणं गतः॥७४॥समस्तालम्बनेभ्यो यं व्यावृत्य मनसो गतिम्॥ध्यायन्ति वासुदेवाख्यं तमस्मि शरणं

गतः॥७५॥सर्वगं सर्वभूतं च सर्वस्याधारमीश्वरम्॥वासुदेवं परं ब्रह्म तमस्मि शरणागतः॥७६॥परमात्मानमव्यक्तं यं यान्ति च सुमे
धसः॥कर्मक्षयेऽक्षयं देवं तमस्मि शरणं गतः॥७७॥पुण्यपापविनिर्मुक्तो यं प्राप्य च पुनर्भवम् ॥ न योगिनः प्राप्नुवन्ति तमस्मि शरणं
गतः॥७८॥ब्रह्म भूत्वा जगत्सर्वं सदेवासुरमानुषम् ॥ यः सृजत्यच्युतो देवांस्तमस्मि शरणं गतः ॥७९॥ ब्रह्मत्वं यस्य वक्त्रेभ्यश्चतुर्वेद
मयं वपुः॥ वपुः प्रभोः परो जज्ञे तमस्मि शरणं गतः ॥८०॥ ब्रह्मरूपधरं देवं जगद्योनिं जनार्दनम् ॥ स्रष्टृत्वे संस्थितं सृष्टौ तं नतो
ऽस्मि जनार्दनम् ॥८१॥ धृता मही हता दैत्याः परित्रातास्तथाऽमराः ॥ येन तं विष्णुमादेश्य प्रणतोऽस्मि जनार्दनम्॥८२॥यज्ञैर्य
जन्ति यं विप्रा यज्ञेशं यज्ञभावनम् ॥ तं यज्ञपुरुषं विष्णुं प्रणतोऽस्मि जनार्दनम् ॥८३॥ पातालवीथीभूतानि तथा लोकान्निहन्ति
यः॥तमन्तपुरुषं रुद्रं प्रणतोऽस्मि जनार्दनम् ॥८४॥ संभक्षयित्वा सकलं यथासृष्टमिदं जगत्॥ यो वै नृत्यति रुद्रात्मा प्रणतोऽस्मि
जनार्दनम् ॥८५॥ सुरासुराः पितृगणा यक्षगन्धर्वराक्षसाः ॥ यस्यांशभूता देवस्य सर्वगं तं नमाम्यहम् ॥८६॥ समस्तदेवाः सकला
मनुष्याणां च जातयः ॥ यस्यांशभूता देवस्य सर्वगं तं नमाम्यहम् ॥ ८७ ॥ वृक्षगुल्मादयो यस्य तथा पशुमृगादयः ॥ एकांश
भूता देवस्य सर्वगं तं नमाम्यहम् ॥ ८८ ॥ यस्मान्नान्यत्परं किंचिद्यस्मिन्सर्वं महात्मनि ॥ यः सर्वमव्ययोऽनन्तः सर्वगं तं नमाम्य
हम् ॥ ८९ ॥ यथा सर्वेषु भूतेषु गूढोऽग्निरिह दारुषु ॥ विष्णुरेवं तथा पापं ममाशेषं प्रणश्यतु ॥९०॥ यथा सर्वमयं विष्णुं ब्रह्मादि
सचराचरम् ॥ यच्च ज्ञानपरिच्छेद्यं पापं नश्यतु मे तथा ॥ ९१ ॥ शुभाशुभानि कार्याणि रजःसत्त्वतमांसि च ॥ अनेकजन्म



कर्मोत्थं पापं नश्यतु मे तथा ॥ ९२ ॥ यन्निशायां च यत्प्रातर्यन्मध्याह्नापराह्णयोः ॥ संध्ययोश्च कृतं पापं कर्मणा मनसा गिरा
॥९३॥ यत्तिष्ठता यच्च गच्छता यच्च शय्यागतेन मे ॥ कृतं यदशुभं कर्म कायेन मनसाऽपि वा ॥ ९४ ॥ अज्ञानतो ज्ञानतो वा

॥ ९१ ॥ शुभाशुभानि कर्माणि रजःसत्त्वतमांसि च ॥ अनेकजन्म

कर्मोत्थं पापं नश्यतु मे तथा ॥ ९२ ॥ यन्निशायां च यत्प्रातर्यन्मध्याह्नापराह्णयोः ॥ संध्ययोश्च कृतं पापं कर्मणा मनसा गिरा ॥९३॥ यत्तिष्ठता यद्व्रजता यच्च शय्यागतेन मे ॥ कृतं यदशुभं कर्म कायेन मनसाऽपि वा ॥ ९४ ॥ अज्ञानतो ज्ञानतो वा मदाच्चलितमानसैः॥ तत्क्षिप्रं विलयं यातु वासुदेवस्य कीर्तनात्॥९५॥परदारपरद्रव्यवाञ्छाद्रोहोद्भवं च यत् ॥ परपीडोद्भवां निन्दां कुर्वता यन्महात्मनाम् ॥ ९६ ॥ यच्च भोज्ये तथा पेये भक्ष्ये चोष्ये विलेह्यने ॥ तद्यातु विलयं तोये यथा लवणभाजनम् ॥ ९७॥ यद्बाल्ये यच्च कौमारे यत्पापं यौवने मम ॥ वयःपरिणतौ यच्च यच्च जन्मान्तरे कृतम् ॥ ९८ ॥ तन्नारायण गोविन्द हरे कृष्णेति कीर्तनात्॥प्रयातु विलयं तोये यथा लवणभाजनम् ॥९९॥ विष्णवे वासुदेवाय हरये केशवाय च ॥ जनार्दनाय कृष्णाय नमो भूयो नमो नमः ॥ १०० ॥ भविष्यन्नरकघ्नाय नमः कंसविघातिने ॥ अरिष्टकेशिचाणूरदेवारिक्षयिणे नमः ॥ १०१ ॥ कोऽन्यो बलेर्वञ्चयिता त्वामृते वै भविष्यति ॥ कोऽन्यो बलान्नाशयिता दर्पं हैहयभूपतेः ॥१०२॥ कः करिष्यति चान्यो वै सागरे सेतुबन्धनम् ॥ वधिष्यति दशग्रीवं कः सामात्यपुरःसरम् ॥ १०३ ॥ कस्त्वामृतेऽन्यो नन्दस्य गोकुले रतिमेष्यति ॥ प्रलम्बपूतनादीनां त्वामृते मधुसूदन ॥ नियन्ताऽप्यथवा शास्ता देवदेव भविष्यति ॥ १०४ ॥ जपत्येवं नरः पुण्यं वैष्णवं धर्ममुत्तमम् ॥ इष्टानिष्टप्रसङ्गेभ्यो ज्ञानतोऽज्ञानतोऽपि वा ॥ १०५ ॥ कृतं तेन तु यत्पापं सप्तजन्मान्तरेण वै ॥ महापातकसंज्ञं वा तथा चैवोपपातकम् ॥ १०६ ॥ यज्ञादीनि च पुण्यानि जपहोमव्रतानि च ॥ नाशयेद्योगिनां सर्वमामपात्रमिवाम्भसि॥१०७॥नरः संवत्सरं पूर्णं तिलपात्राणि षोडश॥

मुमुक्षूणां स्वर्गादिरूपाणि तत्फलानि नाशयेदित्यर्थः ।

अहन्यहनि यो दद्यात्पठत्येतच्च तत्समम् ॥ १०८ ॥ अविप्लुतब्रह्मचर्यं संप्राप्य स्मरणं हरेः ॥ विष्णुलोकमवाप्नोति सत्यमेतन्मयोदितम् ॥ १०९ ॥ तदेतत्सत्यमुक्तं मे न ह्यल्पमपि वै मृषा ॥ राक्षसग्रस्तसर्वाङ्गं तथा मामेष मुञ्चतु ॥११०॥ पुलस्त्य उवाच॥ एवमुच्चारिते तेन मुक्तो विप्रस्तु रक्षसा ॥ अकामेन द्विजो भूयस्तमाह रजनीचरम् ॥ १११ ॥ ब्राह्मण उवाच ॥ एतद्भद्र मयाऽऽख्यातं तव पातकनाशनम् ॥ विष्णोः सारस्वतं स्तोत्रं यदुवाच सरस्वती ॥ ११२ ॥ हुताशनेन दीप्ता च मम जिह्वाग्रसंस्थिता ॥ जगादेमं स्तवं विष्णोः सर्वेषां चोपशान्तिदम् ॥ ११३ ॥ अनेनैव जगन्नाथं त्वमाराधय केशवम् ॥ ततः शापापनोदं तु स्तुते लप्स्यसि केशवे ॥ ११४ ॥ प्रत्यहं त्वं हृषीकेशस्तवेनानेन राक्षस ॥ स्तुत्वा भक्तिं दृढां कृत्वा ततः पापात्प्रमोक्ष्यसे ॥ ११५ ॥ स्तुतो हि सर्वपापानि नाशयिष्यत्यसंशयम् ॥ स्तुतो हि भक्त्या नृणां स सर्वपापहरो हरिः ॥ ११६ ॥ पुलस्त्य उवाच ॥ ततः प्रणम्य तं विप्रमासाद्य च निशाचरः ॥ तदैव तपसे श्रीमान्शालिग्राममगाद्बली ॥ ११७ ॥ अहर्निशं स एवैनं जपन्सारस्वतं स्तवम् ॥ देवक्रियारतिर्भूत्वा तपस्तेपे निशाचरः ॥ ११८ ॥ समाराध्य जगन्नाथं स तत्र पुरुषोत्तमम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकमगाच्छुभम् ॥११९॥ एतत्ते कथितं ब्रह्मन्विष्णोः सारस्वतं स्तवम्॥ विप्रवक्त्रस्थया सम्यक्सरस्वत्या समीरितम् ॥ १२० ॥ य एतत्परमं स्तोत्रं वासुदेवस्य मानवः ॥ पठिष्यति स सर्वेभ्यो दुःखेभ्यो मोक्षमाप्स्यति॥१२१॥इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे सारस्वतस्तोत्रं नाम षडशीतितमोऽध्यायः ॥८६॥





पुलस्त्य उवाच ॥ नमस्तेऽस्तु जगन्नाथ देवदेव नमोऽस्तु ते ॥ वासुदेव नमस्तेऽस्तु बहुरूप नमोऽस्तु ते ॥ १ ॥ एकशृङ्ग नम

पुलस्त्य उवाच ॥ नमस्तेऽस्तु जगन्नाथ देवदेव नमोऽस्तु ते ॥ वासुदेव नमस्तेऽस्तु बहुरूप नमोऽस्तु ते ॥ १ ॥ एकशृङ्ग नम
स्तुभ्यं नमस्तुभ्यं वृषाकपे ॥ श्रीनिवास नमस्तेऽस्तु नमस्ते भूतभावन ॥ २ ॥ विष्वक्सेन नमस्तुभ्यं नारायण नमोऽस्तु ते ॥
वृषध्वज नमस्तेऽस्तु सत्यध्वज नमोऽस्तु ते ॥३॥ यज्ञध्वज नमस्तुभ्यं धर्मध्वज नमोऽस्तु ते ॥ तालध्वज नमस्तेऽस्तु नमस्ते गरु
डध्वज ॥ ४ ॥ वरेण्य विष्णो वैकुण्ठ नमस्ते पुरुषोत्तम ॥ नमो जयन्त विजय जयानन्तापराजित ॥ ५ ॥ कृतावर्त महावर्त महा
देव नमोऽस्तु ते ॥ अनाद्याद्यन्तमध्यान्त नमस्ते पद्मजप्रिय ॥ ६ ॥ पुरञ्जय नमस्तुभ्यं शत्रुञ्जय नमोऽस्तु ते ॥ धनञ्जय
नमस्तेऽस्तु शुभञ्जय नमोऽस्तु ते ॥ ७ ॥ सृष्टिगर्भ नमस्तुभ्यं शुचिश्रवः पृथुश्रवः ॥ नमो हिरण्यगर्भाय पद्मगर्भाय ते नमः ॥८॥
नमः कमलनेत्राय कालनेत्राय वै नमः॥कालनाभ नमस्तुभ्यं महानाभ नमोऽस्तु ते ॥९॥ वृष्णिमूल महामूल मूलावास नमोऽस्तु ते॥
धर्मावास जलावास श्रीनिवास नमोऽस्तु ते॥१०॥ धर्माध्यक्ष प्रजाध्यक्ष लोकाध्यक्ष नमोऽस्तु ते॥सेनाध्यक्ष नमस्तुभ्यं कालाध्यक्ष
नमोऽस्तु ते ॥ ११ ॥ गदाधर श्रुतिधर चक्रधारिञ्छ्रियो धर ॥ वनमालाधर हरे नमस्ते धरणीधर ॥ १२ ॥ आर्ष्णिषेण महासेन
नमस्तेऽस्तु पुरुष्टुत ॥ बहुकल्प महाकल्प नमस्ते कल्पनामुख ॥ १३ ॥ सर्वात्मन्सर्वग विभो विरिञ्चे श्वेत केशव ॥ नमो
नील महानील अनिरुद्ध नमोऽस्तु ते ॥ १४ ॥ द्वादशात्मक कालात्मन्सामात्मन्परमात्मक ॥ व्योमार्कात्मक सुब्रह्मन्सूक्ष्मात्मक
नमोऽस्तु ते ॥ १५ ॥ हरिकेश महाकेश गुडाकेश नमोऽस्तु ते ॥ मुञ्जकेश हृषीकेश सर्वनाथ नमोऽस्तु ते ॥ १६ ॥

सूक्ष्म स्थूल महास्थूल महासूक्ष्म भयंकर ॥ श्वेत पीताम्बरधर नीलवासो नमोऽस्तु ते ॥ १७ ॥ कुशेशय नमस्तेऽस्तु पद्मेशय जलेशय ॥ गोविन्द प्रीतिकर्तश्च हंस पीताम्बरप्रिय ॥ १८॥ अधोक्षज नमस्तेऽस्तु शार्ङ्गध्वज जनार्दन ॥ वामनाय नमस्तुभ्यं नमस्ते मधुसूदन ॥ १९ ॥ सहस्रशीर्षाय नमो ब्रह्मशीर्षाय वै नमः ॥ नमः सहस्रनेत्राय सोमसूर्यानलेक्षण ॥ २० ॥ नमश्चाथर्वशिरसे महाशीर्षाय ते नमः ॥ नमस्ते धर्मनेत्राय महानेत्राय ते नमः ॥ २१ ॥ नमः सहस्रपादाय सहस्रभुजमन्यवे ॥ नमो यज्ञवराहाय महारूपाय ते नमः ॥२२॥ नमस्ते विश्वदेवाय विश्वात्मन्विश्वसंभव ॥ विश्वरूप नमस्तेऽस्तु त्वत्तो विश्वमभूदिदम् ॥२३॥ न्यग्रोधस्त्वं महाशाखस्त्वं मूलकुसुमार्चितः ॥ स्कन्धपत्राङ्कुरलतापल्लवाय नमोऽस्तु ते ॥२४॥ मूलं ते ब्राह्मणाः स्कन्धाः क्षत्रिया भवतः प्रभो ॥ वैश्याः शाखास्त्वचः शूद्रास्ते नमोऽस्तु वनस्पते ॥ २५ ॥ ब्राह्मणाः साग्नयो वक्त्रात्सायुधा बाहुतो नृपाः ॥ पार्श्वाद्विशश्चोरुयुगाज्जाताः शूद्राश्च पादतः ॥ २६ ॥ नेत्राद्भानुरभूत्त्वत्तः पद्भ्यां भूः श्रोत्रयोर्दिशः ॥ नाभ्याश्चाभूदन्तरिक्षं शशाङ्को मनसस्तव ॥ २७ ॥ प्राणाद्वायुः समभवत्कामाद्ब्रह्मा पितामहः ॥ क्रोधात्त्रिणयनो रुद्रः शीर्ष्णो द्यौः समवर्तत ॥ २८ ॥ इन्द्राग्नी वदनाज्जातौ पशवो मलसंभवाः ॥ ओषध्यो रोमसंभूता विरजास्त्वं नमोऽस्तु ते ॥ २९ ॥ पुष्पहास नमस्तेऽस्तु महाहास नमोऽस्तु ते ॥ ॐकारस्त्वं वषट्कारो वौषट् त्वं च सुधा स्वधा ॥ ३० ॥ स्वाहाकार नमस्तुभ्यं हन्तकार नमोऽस्तु ते ॥ सर्वाकार निराकार वेदाकार नमोऽस्तु ते ॥ ३१ ॥ त्वं हि वेदमयो देवः सर्वदेवमयस्तथा ॥ सर्वतीर्थमयश्चैव सर्वयज्ञमयो रसः ॥ ३२ ॥ नमस्ते यज्ञपुरुष यज्ञभागभुजे नमः ॥ नमः सहस्रधाराय शतधारा[illegible]

नमोऽस्तु ते ॥ सर्वाकार निराकार वेदाकार नमोऽस्तु ते ॥ २१ ॥ त्वं हि वेदमयो देवः सर्ववेदमय

स्तथा ॥ सर्वतीर्थमयश्चैव सर्वयज्ञमयो रसः ॥ २२ ॥ नमस्ते यज्ञपुरुष यज्ञभागभुजे नमः ॥ नमः सहस्रधाराय शतधारा

य ते नमः ॥ २३ ॥ भूर्भुवःस्वःस्वरूपाय गोदायामृतदायिने ॥ सुवर्णब्रह्मदात्रे च सर्वधात्रे च ते नमः ॥ २४ ॥ ब्रह्मेशाय नम

स्तुभ्यं ब्रह्मणे ब्रह्मरूपधृक् ॥ परं ब्रह्म नमस्तेऽस्तु शब्दब्रह्म नमोऽस्तु ते ॥ २५ ॥ विद्या त्वं वेद्यरूपस्त्वं वन्दनीयस्त्वमेव च ॥

बुद्धिस्त्वमपि बोध्यश्च बोद्धा त्वं च नमोऽस्तु ते ॥ २६ ॥ होता होमश्च हव्यं च हूयमानश्च हव्यवाट् ॥ पाता पोता च पूतश्च

पावनीयश्च ॐ नमः ॥२७॥ हन्ता च हन्यमानश्च क्रियमाणस्त्वमेव च ॥ हर्ता नेता च नीतिश्च पूज्योऽग्र्यो विश्वधार्यपि ॥२८॥

स्रुक्स्रुवौ विश्वधामाऽसि कपालोलूखलोऽरणिः ॥ यज्ञपात्रारणे यस्त्वमेकधा बहुधा त्रिधा ॥ २९ ॥ यज्ञस्त्वं यजमानस्त्वमीड्य

स्त्वमसि याजकः ॥ ज्ञाता ज्ञेयस्तथा ज्ञानं ध्याता ध्येयोऽसि चेश्वर ॥ ३० ॥ ध्यानयोगश्च योगी च गतिर्मोक्षो धृतिः सुखम् ॥

योगाङ्गानि त्वमीशानः सर्वगस्त्वं नमोऽस्तु ते ॥ ३१ ॥ ब्रह्मा होता तथोद्गाता सोमयूपोऽथ दक्षिणा ॥ दीक्षा त्वं त्वं पुरोडाश

स्त्वं पशुः पशुहा ह्यसि ॥ ३२ ॥ गुह्यो धाता परमसि नरो नारायणस्तथा ॥ महाजनो निरयणः सहस्रार्केन्दुरूपवान् ॥ ३३ ॥

द्वादशारोऽथ षण्णाभिस्त्रिव्यूहो द्विगुणस्तथा ॥ कालचक्रो महामेधाः शंभुः शक्रः प्रभञ्जनः ॥ ३४ ॥ मित्रावरुणमूर्तिस्त्वममूर्ति

रनघः शुभः ॥ प्राग्वंशकायो भूतादिर्महाभूतोऽच्युतो द्विजः ॥३५॥ त्वमूर्ध्वकेतोर्ध्वधर ऊर्ध्वरेता नमोऽस्तु ते ॥महापातकहा त्वं

च उपपातकहा तथा ॥ ३६ ॥ मुनीशः सर्वपापघ्नस्त्वामहं शरणं गतः ॥ इत्येतत्परमं स्तोत्रं सर्वपापप्रमोचनम् ॥ ३७ ॥ महेश्व

रेण कथितं वाराणस्यां पुरा मुने ॥ केशवस्याग्रतो गत्वा स्नात्वा तीर्थोदके शुभे ॥ ४८ ॥ उपशान्तस्तदा जातो रुद्रः पापोपशा
न्तिदम् ॥ एतत्पवित्रं त्रिपुरघ्नभाषितं पठन्नरो विष्णुपुरे महर्षे ॥ विमुक्तपापोऽप्युपशान्तमूर्तिः संपूज्यते देववरैः ससिद्धैः ॥४९॥
इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे पापप्रशमनस्तवो नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ पुलस्त्य
उवाच ॥ द्वितीयं पापशमनं स्तवं वक्ष्यामि ते मुने ॥ येन सम्यगधीतेन पापनाशं तु गच्छति ॥ १ ॥ मत्स्यं नमस्ये देवेशं
कूर्मं देवेशमेव च ॥ हयशीर्षं नमस्येऽहं भवं विष्णुं त्रिविक्रमम् ॥२॥ नमस्ये माधवेशानौ हृषीकेशकुमारिलौ ॥ नारायणं नमस्ये
ऽहं नमस्ते गरुडासनम् ॥ ३ ॥ जयेशं नरसिंहं च रूपधारं कुरुध्वजम् ॥ कामपालमखण्डं च नमस्ये ब्राह्मणप्रियम् ॥४॥ अजितं
विश्वकर्माणं पुण्डरीकं द्विजप्रियम् ॥ हरिं शंभुं नमस्ये च ब्रह्माणं सप्रजापतिम् ॥ ५ ॥ नमस्ये शूलबाहुं च देवं चक्रधरं तथा ॥
शिवं विष्णुं सुवर्णाक्षं गोपतिं पीतवाससम् ॥ ६ ॥ नमस्ये च गदापाणिं नमस्ये च कुशेशयम् ॥ अर्धनारीश्वरं देवं नमस्ये
पापनाशनम् ॥ ७ ॥ गोपालं च सवैकुण्ठं नमस्ये चापधारिणम् ॥ नमस्ये विष्णुरूपं च ज्येष्ठेशं पश्चिमं तथा ॥ ८ ॥ उपशान्तं
नमस्येऽहं मार्कण्डेयं सजम्बुकम् ॥ नमस्ये पद्मकिरणं नमस्ये वडवामुखम् ॥ ९ ॥ कार्त्तिकेयं नमस्येऽहं बाह्लिकं शङ्खिनं तथा ॥
नमस्ये पद्मकिरणं नमस्ये च कुशेशयम् ॥ १० ॥ नमस्ये स्थाणुमनघं नमस्ये वनमालिनम् ॥ नमस्ये लाङ्गलीशं च नमस्ये
ऽहं श्रियः पतिम् ॥ ११ ॥ नमस्ये च त्रिणयनं नमस्ये हव्यवाहनम् ॥ नमस्ये च त्रिसौवर्णं नमस्ये धरणीधरम् ॥ १२ ॥



त्रिणाचिकेतं ब्रह्माणं नमस्ये शशिभूषणम् ॥ कपर्दिनं नमस्ये च सर्वामयविनाशनम् ॥ १३ ॥ नमस्ये शशिनं सूर्यं ध्रुवं रुद्रं महौजसम् ॥
पद्मनाभं हिरण्याक्षं नमस्ये स्कन्दमव्ययम् ॥ १४ ॥ नमस्येऽहं भीमहंसौ नमस्ये हाटकेश्वरम् ॥ सदाहंसं नमस्ये च नमस्ये प्राणतर्पणम् ॥

नमस्ये च त्रिणयनं नमस्ये हव्यवाहनम् ॥ नमस्ये च त्रिसौवर्णं नमस्ये धरणीधरम् ॥ १२ ॥
त्रिणाचिकेतं ब्रह्माणं नमस्ये शशिभूषणम्॥कपर्दिनं नमस्ये च सर्वामयविनाशनम् ॥१३॥ नमस्ये शशिनं सूर्यं ध्रुवं रुद्रं महौजसम्॥
पद्मनाभं हिरण्याक्षं नमस्ये स्कन्दमव्ययम्॥१४॥नमस्येऽहं भीमहंसौ नमस्ये हाटकेश्वरम्॥ सदाहंसं नमस्ये च नमस्ये प्राणतर्पणम्॥
॥ १५ ॥ नमस्ये रुक्मकवचं महायोगिनमीश्वरम् ॥ नमस्ये श्रीनिवासं च नमस्ये पुरुषोत्तमम् ॥१६॥ नमस्ये च चतुर्बाहुं नमस्ये
च सुधाधिपम् ॥ वनस्पतिं मधुपतिं नमस्ये मनुमव्ययम् ॥१७॥श्रीकण्ठं वासुदेवं च नीलकण्ठं सदाशिवम् ॥ नमस्ये शर्वमनघं
गौरीशं लकुडेश्वरम्॥१८॥ मनोहरं च कृष्णेशं नमस्ये चक्रपाणिनम् ॥ यशोधनं महाबाहुं नमस्ये च कुशप्रियम् ॥१९॥ भूधरं छादि
तगदं सुनेत्रं सुरशंसितम् ॥ भद्राक्षं वीरभद्रं च नमस्ये शङ्कुकर्णिनम् ॥२०॥ वृषध्वज महेशं च विश्वमित्रं शशिप्रभम् ॥ उपेन्द्रं च सगो
विन्दं नमस्ये पङ्कजप्रियम् ॥२१॥ सहस्रशिरसं देवं नमस्ये कुन्दमालिनम् ॥ कालाग्निं रुद्रदेवेशं नयस्ये कृत्तिवाससम् ॥ २२ ॥
नमस्ये छागलेशं च नमस्ये पङ्कजासनम् ॥ सहस्राक्षं कोकनदं नमस्ये हरिशंकरम् ॥ २३ ॥ अगस्त्यं गरुडं विष्णुं कपिलं ब्रह्म
वाङ्मयम् ॥ सनातनं च ब्रह्माणं नमस्ये ब्रह्म तत्परम् ॥ २४ ॥ अप्रतर्क्यं चतुर्बाहुं सहस्रांशुं तपोमयम् ॥ नमस्ये धर्मराजानं
देवं गरुडवाहनम् ॥ २५ ॥ सर्वभूतगतं शान्तं निर्मलं सर्वलक्षणम् ॥ महायोगिनमव्यक्तं नमस्ये पापनाशनम् ॥ २६ ॥ निरञ्जनं
निराकारं निर्गुणं निलयं पदम् ॥ नमस्ये पापहर्तारं शरण्यं शरणं व्रजे ॥ २७ ॥ एतत्पवित्रं परमं पुराणं प्रोक्तं त्वगस्त्येन मह
र्षिणा च ॥ धन्यं यशस्यं बहुपापनाशनं संकीर्तनात्स्मरणात्स्पर्शनाच्च ॥ २८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामन

प्रादुर्भावे प्रह्लादतीर्थयात्रायां द्वितीयः पापनाशनस्तवो नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ पुलस्त्य उवाच ॥ गतेऽथ तीर्थ
यात्रायां प्रह्लादे दानवेश्वरे ॥ कुरुक्षेत्रं समभ्यागाद्द्रष्टुं वरोचनो बलिः ॥ १ ॥ तस्मिन् महाधर्मयुते तीर्थे ब्राह्मणपुंगवः ॥ शुक्रो द्विजा
तिप्रवरानामन्त्रयत भार्गवः ॥ २ ॥ भृगुणाऽऽमन्त्र्यमाणा वै श्रुत्वाऽऽत्रेयाः सगौतमाः ॥ कौशिकाङ्गिरसश्चैव तत्यज्ञाः कुरुजाङ्ग
लान् ॥ ३ ॥ उत्तराशां प्रजग्मुस्ते नदीमनु शतद्रवीम् ॥ शातद्रवे जले स्नात्वा विप्रास्ते प्रययुस्ततः ॥ ४ ॥ विधाय तत्र सुस्नानं
संपूज्य पितृदेवताः ॥ प्रजग्मुः किरणां पुण्यां दिनेशकिरणच्युताम् ॥ ५ ॥ तस्यां स्नात्वा च देवर्षे सर्व एव महर्षयः ॥ ऐरावतीं
सुपुण्योदां स्नात्वा जग्मुरथेश्वरीम् ॥ ६ ॥ देविकाया जले स्नात्वा पयोष्ण्याश्चैव तापसाः ॥ अवतीर्णा मुने स्नातुमात्रेयाद्या
स्तु तां नदीम् ॥ ७ ॥ ततो निमग्ना ददृशुः प्रतिबिम्बमथात्मनः ॥ अन्तर्जले द्विजश्रेष्ठ महदाश्चर्यकारकम् ॥ ८ ॥ उन्मज्जन्तश्च
ददृशुः पुनर्विस्मितमानसाः ॥ ततः स्नात्वा समुत्तीर्णा ऋषयः सर्व एव हि ॥ ९ ॥ जग्मुस्ततोऽपि ते ब्रह्मन्कथयन्तः परस्परम् ॥
चिन्तयन्तश्च सततं किमेतदिति विस्मिताः ॥ १० ॥ ततोऽदूरादपश्यंस्ते वनषण्डं सुविस्तृतम् ॥ घनं घनदलश्यामं खगश्रमवि
नाशनम् ॥ ११ ॥ अतितुङ्गतया व्योम आवृण्वानं नरोत्तम ॥ विस्तृताभिर्लताभिस्तु अन्तर्भूमिं च नारद ॥ १२ ॥ काननं पुष्पि
तैर्वृक्षैः फलितैश्च ततस्ततः ॥ दशार्धबाणसदृशैर्नभस्तारागणैरिव ॥ १३ ॥ तद् दृष्ट्वा कमलैर्व्याप्तं पुण्डरीकैश्च शोभितम् ॥ तद्वत्को
कनदैर्व्याप्तं वनं पद्मवनं यथा ॥ १४ ॥ प्रजग्मुस्तुष्टिमतुलां ते ह्लादं परमं ययुः ॥ विविशुः प्रीतमनसो हंसा इव महासरः ॥ १५ ॥
तन्मध्ये ददृशुः पुण्यमाश्रमं लोकपूजितम् ॥ चतुर्णां लोकपालानां वर्गाणां मुनिसत्तमाः ॥ १६ ॥ धर्माश्रमं प्राङ्मुखं तु पलाश

...वनं पद्मवनं यथा ॥१४॥ प्रजग्मुस्तुष्टिमतुलां ते ह्लादं परमं ययुः ॥ विविशुः प्रीतमनसो हंसा इव महासरः ॥ १५ ॥

तन्मध्ये ददृशुः पुण्यमाश्रम लोकपूजितम् ॥ चतुर्णां लोकपालानां वर्गाणां मुनिसत्तमाः ॥ १६ ॥ धर्माश्रमं प्राङ्मुखं तु पलाश विटपावृतम् ॥ प्रतीच्यभिमुखं ब्रह्मन्नथ पुण्यवनावृतम् ॥१७॥ दक्षिणाभिमुखं काम्यं रम्भाशोकवनावृतम्॥ उदङ्मुखं च मोक्षस्य शुद्धस्फटिकसन्निभम्॥१८॥कृतान्ते त्वाश्रमी मोक्षः कामस्त्रेतायुगे स्थितः ॥ आश्रम्यर्थो द्वापरान्ते तिष्यान्ते धर्म आश्रमी॥१९॥ तमाश्रमं हि मुनयो दृष्ट्वाऽऽत्रेयास्ततोऽव्ययाः ॥ तत्रैव हि रतिं चक्रुरखण्डे सलिलाप्लुते ॥ २० ॥ धर्माद्यो भगवान्विष्णुरखण्ड इति विश्रुतः ॥ चतुर्मूर्तिर्जगन्नाथः पूर्वमेव प्रतिष्ठितः ॥ २१ ॥ तमर्चयन्ति ऋषयो योगात्मानो बहुश्रुताः ॥ शुश्रूषया च तपसा ब्रह्मचर्येण नारद ॥ २२ ॥ एवं ते न्यवसंस्तत्र समेता भार्गवेण हि ॥ असुरेभ्यस्तदा भीतास्त्वाश्रिताः खण्डपर्वताः ॥ २३ ॥ तथाऽन्ये ब्राह्मणा ब्रह्मन्नश्मकुट्टा मरीचिपाः ॥ स्नात्वा जले हि कालिन्द्याः प्रजग्मुर्दक्षिणामुखाः ॥ २४ ॥ अवन्तीविषयं प्राप्य विष्णुमासाद्य संस्थिताः ॥ विष्णोरपि प्रसादेन दुष्प्रवेशं महासुरैः ॥ २५ ॥ वालखिल्यादयो जग्मुरवशा दानवाद्भ याद् ॥ रुद्रकोटिं समाश्रित्य स्थितास्ते ब्रह्मचारिणः ॥ २६ ॥ एवं गतेषु विप्रेषु गौतमाङ्गिरसादिषु ॥ शुक्रस्तु भार्ग वान्सर्वान्निन्ये यज्ञविधौ मुने ॥ २७ ॥ अधिष्ठितो भार्गवेण महायज्ञेऽमितद्युतेः ॥ यज्ञदीक्षां बलेः शुक्रश्चकार विधिना स्वयम् ॥ २८ ॥ श्वेताम्बरधरो दैत्यः श्वेतमाल्यानुलेपनः ॥ मृगाजिनास्तृतपृष्ठो बर्हपत्रविचित्रकः ॥ २९ ॥ समास्ते वितते यज्ञे सदस्यैरभिसंवृतः ॥ हयग्रीवक्षुराद्यैस्तु मयबाणपुरोगमैः ॥ ३० ॥ पत्नी विन्ध्यावली तस्य दीक्षिता यज्ञ

कर्मणि ॥ ललनानां सहस्रस्य प्रधानमृषिकन्यका ॥ ३१ ॥ शुक्रेणाश्वः श्वेतवर्णो मधुमासे सुलक्षणः ॥ महीं चरि तुमुत्सृष्टस्तारकाक्षस्त्वगाच्च तम् ॥ ३२ ॥ एवमश्वे समुत्सृष्टे वितते यज्ञकर्मणि ॥ गते च मासत्रितये ह्रियमाणे च पावके ॥३३॥ पूज्यमानेषु दैत्येषु मिथुनस्थे दिवाकरे ॥ सुषुवे देवजननी माधवं वामनाकृतिम् ॥ ३४ ॥ संजातमात्रं भगवन्त मीशं नारायणं लोकपतिं पुराणम् ॥ ब्रह्मा समभ्येत्य समं महर्षिभिः स्तोत्रं जगादाथ समं महर्षे ॥३५॥ नमोऽस्तु ते माधव सत्त्व मूर्ते नमोऽस्तु ते सात्वतविश्वरूप॥नमोऽस्तु ते शत्रुवनेन्धनाग्ने नमोऽस्तु ते पापमहादवाग्ने ॥३६॥ नमोऽस्तु पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ नमस्ते जगदाधार नमस्ते पुरुषोत्तम ॥ ३७ ॥ नारायण जगन्मूर्ते जगन्नाथ गदाधर ॥ पीतवासः श्रियः कान्त जनार्दन नमोऽस्तु ते ॥ ३८ ॥ भवांस्त्राता च गोप्ता च विश्वात्मा सर्वगोऽव्ययः ॥ सर्वधारिन्धराधारिन्रूपधारिन्नमोऽस्तु ते ॥ ३९ ॥ वर्धिष्णो वर्द्धिताशेषत्रैलोक्य सुरपूजित ॥ कुरुष्व त्वं देवपते मघोनोऽश्रुप्रमार्जनम् ॥४०॥ त्वं धाता च विधाता च संहर्ता त्वं महे श्वर ॥ महालयो महायोगी योगशायी नमोऽस्तु ते ॥ ४१ ॥ इत्थं स्तुतो जगन्नाथः सर्वात्मा सर्वगो हरिः ॥ प्रोवाच भगवान्मह्यं कुरूपनयनं विभो ॥ ४२ ॥ ततश्चकार देवस्य जातकर्मादिकाः क्रियाः ॥ भारद्वाजो महातेजा बार्हस्पत्यस्तपोधनः ॥ ४३ ॥ व्रतबन्धं तथेशस्य कृतवान्सर्वशास्त्रवित् ॥ ततो ददुः प्रीतियुताः सर्व एव यथाक्रमम् ॥४४॥ यज्ञोपवीतं पुलहः पुलस्त्यः सित वाससी ॥ मृगाजिनं कुम्भयोनिर्भरद्वाजस्तु मेखलाम् ॥४५॥ पालाशमदण्डं भगवान्मरीचिर्ब्रह्मणः सुतः ॥ अक्षसूत्रं वारुणिस्तु कौश





चीरमथाङ्गिराः ॥ ४६ ॥ छत्रं ददौ ह्युराजश्च उपानद्युगलं भृगुः ॥ कमण्डलुं बृहत्तेजाः प्रादाद्विष्णोर्बृहस्पतिः ॥४७॥ एवं कृतोप

॥ पौलीशमददादण्ड मरीचिर्ब्रह्मणः सुतः ॥ अक्षसूत्रं वारुणिस्तु कौश ॥ १८

चीरमथाङ्गिराः ॥ ४६ ॥ छत्रं ददौ सुराजश्च उपानद्युगलं भृगुः ॥ कमण्डलुं बृहत्तेजाः प्रादाद्विष्णोर्बृहस्पतिः ॥४७॥ एवं कृतोप नयनो भगवान्भूतभावनः ॥ संस्तूयमान ऋषिभिर्वेदान्साङ्गानधीतवान् ॥ ४८ ॥ भारद्वाजात्साङ्गिरसात्सामवेदं महास्वरम् ॥ महदाख्यानसंयुक्तं गान्धर्वसहितं मुने ॥ ४९ ॥ मासेनैकेन भगवाञ्ज्ञातश्रुतिमहार्णवः ॥ लोकाचारप्रवृत्त्यर्थमभूत्स तु विशारदः ॥ ५० ॥ सर्वशास्त्रेषु नैपुण्यं गत्वा देवोऽक्षयोऽव्ययः ॥ प्रोवाच ब्राह्मणश्रेष्ठं भारद्वाजमिदं वचः ॥ ५१ ॥ श्रीवामन उवाच ॥ ब्रह्मन्व्रजामि देह्याज्ञां कुरुक्षेत्रं महोदयम् ॥ तत्र दैत्यपतेः पुण्यो हयमेधः प्रवर्त्तते ॥ ५२ ॥ समाविष्टानि पश्य त्वं तेजांसि पृथिवी तले ॥ ये संविधानाः सततं मदंशाः पुण्यवर्धनाः ॥ तेनाहं प्रतिजानामि कुरुक्षेत्रं गतो बलिः ॥ ५३ ॥ भारद्वाज उवाच ॥ स्वेच्छया तिष्ठ गच्छामो नाहमाज्ञापयामि ते ॥ गमिष्यामो वयं विष्णो बलेरध्वरमाश्रितः ॥ ५४ ॥ यद्भवन्तमहं देव परिपृच्छामि तद्वद ॥ केषु केषु विभो नित्यं स्थानेषु पुरुषोत्तम ॥ सान्निध्यं भवतो ब्रूहि ज्ञातुमिच्छामि तत्त्वतः ॥ ५५ ॥ विष्णुरुवाच ॥ श्रूयतां कथयिष्यामि येषु येषु गुरो त्वहम् ॥ निवसामि सुपुण्येषु स्थानेषु बहुरूपवान् ॥ ५६ ॥ ममावतारैर्वसुधा नभस्तलं पाताल मम्भोनिधयो दिवं च ॥ दिशः समस्ता गिरयोऽम्बुदाश्च व्याप्ता भरद्वाज ममानुरूपैः ॥ ५७ ॥ ये दिव्या ये च भौमा जलगगनचराः स्थावरा ये च ब्रह्मन्सेन्द्राः सार्काः सचन्द्रा यमवसुवरुणा ह्यग्नयः सर्वपालाः ॥ ब्रह्माद्याः स्थावरान्ता द्विजखगसहिता मूर्तिमन्तो ह्यमूर्तेस्ते सर्वे मत्प्रसूता बहुविविधगुणाः पूरणार्थं पृथिव्याम् ॥ ५८ ॥ एते हि पुण्याः सुरसिद्धदानवैः पूज्या नराः सन्निहिता महीतले ॥

यैर्दृष्टमात्रैः सहसैव नाशं प्रयाति पापं द्विजवर्य कीर्तितैः ॥८९॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे प्रह्लादतीर्थयात्रायां वामन प्रादुर्भावे वामनजन्म नाम नवाशीतितमोऽध्यायः ॥८९॥ श्रीभगवानुवाच॥आद्यं हि मत्स्यरूपं मे संस्थितं मानसे ह्रदे॥सर्वपापक्षय करं कीर्तनस्पर्शनादिभिः ॥ १ ॥ कौर्ममन्यत्सन्निधाने कौशिक्याः पापनाशनम्॥हयशीर्षं च कृष्णायां गोविन्दं हस्तिनापुरे ॥२॥ त्रिविक्रमं च कालिन्द्यां लिङ्गभेदे भवं विभुम् ॥ केदारे माधवे शौचकुब्जाम्रे कृष्णमूर्द्धजम् ॥३॥ नारायणं बदर्यां च वाराहे गरुड ध्वजम् ॥ जयेशं भद्रकर्णे च विपाशायां द्विजप्रियम् ॥ ४ ॥ रूपधारमिरावत्यां कुरुक्षेत्रे कुरुध्वजम् ॥ कृतशौचे नृसिंहं च गोकर्णे विश्वधारणम् ॥५॥ प्राचीने कामपालं च पुण्डरीकं महाम्भसि ॥ विशाखयूपे ह्यजितं हंसं हंसपदे तथा ॥६॥ पयोष्ण्यां यमखण्डं च वितस्तायां कुमारिलम्॥ मणिमत्या ह्रदे शंभुं ब्रह्मण्ये च प्रजापतिम् ॥७॥ मधुनद्यां चक्रधरं शूलबाहुं हिमाचले ॥ विद्धि विष्णुं मुनि श्रेष्ठ स्थितमौषधसानुनि ॥ ८ ॥ भृगुतुङ्गे सुवर्णाख्यं नैमिषे पीतवाससम् ॥ गयायां गोपतिं देवं गदापाणिं तमीश्वरम् ॥ ९ ॥ त्रैलोक्यनाथं वरदं गोप्रचारं कुशेशयम् ॥ अर्द्धनारीश्वरं चक्रे महीध्रं दक्षिणे गिरौ ॥ १० ॥ गोपालमुत्तरे नित्यं महेन्द्रे सोमपीथि नम् ॥ वैकुण्ठमपि सह्याद्रौ पारियात्रेऽपराजितम् ॥ ११ ॥ कशेरुदेशे देवेशं विश्वरूपं तपोधनम् ॥ मलयाद्रौ च सौगन्धि विन्ध्यपादे सदाशिवम् ॥ १२ ॥ अवन्तिविषये धिष्ण्यं निषधेष्वमरेश्वरम् ॥ पाञ्चालिकं च ब्रह्मर्षे पाञ्चालेषु सदा स्थितम् ॥ ॥ १३ ॥ महोदये हयग्रीवं प्रयागे योगशायिनम् ॥ स्वयंभुवं मधुवने [illegible] च पुष्करे ॥ १४ ॥ तथैव विप्रप्रवरं वारा णस्यां च केशवम् ॥ अविमुक्तं च तत्रैव गीयते सुरकिन्नरैः ॥ १५ ॥ पम्पायां पद्मकिरणं समुद्रे वडवामुखम् ॥ कुमारधारे बाह्लीशं

णस्यां च केशवम् ॥ अविमुक्तं च तत्रैव गीयते सुरकिन्नरैः ॥ १५ ॥ पम्पायां पद्मकिरणं समुद्रे वडवामुखम् ॥ कुमारधारे [illegible]
कार्त्तिकेयं च बर्हिणे ॥ १६ ॥ ओजसे शम्भुमनघं स्थाणुं च कुरुजाङ्गले ॥ वनमालिनमाहुर्मां किष्किन्धावासिनो जनाः ॥१७॥
वीरं कुवलयारूढं शङ्खचक्रगदाधरम् ॥ श्रीवत्साङ्कमुदाराङ्गं नर्मदायां श्रियः पतिम् ॥ १८ ॥ माहिष्मत्यां त्रिणयनं तत्रैव च
हुताशनम् ॥ अर्बुदे च त्रिसौपर्णं क्ष्माधरं सूकराचले ॥ १९ ॥ त्रिणाचिकेतं ब्रह्मर्षे प्रभासे च कपर्दिनम् ॥ तत्रैवात्रापि च ख्यातं
तृतीयं शशिशेखरम् ॥ २० ॥ उदये शशिनं सूर्यं ध्रुवं च त्रितयस्थितम् ॥ हेमकूटे हिरण्याक्षं स्कन्दं शरवणे मुने ॥ २१ ॥ महा
लये स्मृतं रुद्रमुत्तरेषु कुरुष्वथ ॥ पद्मनाभं मुनिश्रेष्ठ सर्वसौख्यप्रदायकम् ॥ २२ ॥ सप्तगोदावरे ब्रह्मन्विख्यातं हाटकेश्वरम् ॥
तत्रैव च महाहंसं प्रयागेऽपि महेश्वरम् ॥ २३ ॥ शोणे च रुक्मकवचं कुण्डिने घ्राणतर्पणम् ॥ भिल्लीवने महायोगं मन्त्रेषु पुरुषो
त्तमम् ॥ २४ ॥ प्लक्षावतरणे विश्वं श्रीनिवास द्विजोत्तमम् ॥ सूर्यारके चतुर्बाहुं मगधायां सुधापतिम् ॥ २५ ॥ गिरिव्रजे पशुपतिं
श्रीकण्ठं यमुनातटे ॥ वनस्पतिं समाख्यातं दण्डकारण्यवासिनम् ॥२६॥ कालञ्जरे नीलकण्ठं सरय्वामप्य नुत्तमम् ॥ हंसयुक्तं महा
कोश्यां सर्वपापप्रणाशनम् ॥ २७ ॥ गोकर्णे दक्षिणे शर्वं वासुदेवं प्रजामुखे ॥ विन्ध्यशृङ्गे महागौरं कन्थायां मधुसूदनम् ॥
॥ २८ ॥ त्रिकूटशिखरे ब्रह्मंश्चक्रपाणिनमीश्वरम् ॥ लोहदण्डे हृषीकेशं कौशलायां महोदयम् ॥ २९ ॥ महावासं सुराष्ट्रे च नव
राष्ट्रे यशोधरम् ॥ भूधरं देविकानद्यां विदेहायां कुशप्रियम् ॥३०॥ गोमत्यां छादितगदं शङ्खोद्धारे च शङ्खिनम् ॥ सुनेत्रं सैन्ध

वारण्ये शूरं शूरपुरे स्थितम् ॥३१॥ रुद्राख्यं च हिरण्वत्यां वीरभद्रं त्रिविष्टपे ॥ शङ्कुकर्णं च नीलाभं भीमं शालवने विदुः॥३२॥ विश्वामित्रं च घटिते कैलासे वृषभध्वजम् ॥ महेशं महिलाशैले कामरूपं शशिप्रभम् ॥३३॥ वलभ्यामपि गोमित्रं कटाहं ब्राह्मणप्रियम् ॥ उपेन्द्रं सिंहलद्वीपे शक्राह्वे कुन्दमालिनम् ॥३४॥ रसातले च विख्यातं सहस्रशिरसं मुने ॥ कालाग्निं कपिलं चैव तथाऽन्यं कृत्तिवाससम् ॥ ३५ ॥ सुतले कूर्ममचलं वितले पङ्कजाननम् ॥ महातले गुरुं ख्यातं देवेशं वृषलेश्वरम् ॥३६॥ तले सहस्रचरणं सहस्रभुजमीश्वरम् ॥ सहस्राख्यं परिख्यातं मुसलाकृष्टदानवम् ॥ ३७ ॥ पाताले योगिनामीशं संस्थितं हरिशंकरम् ॥ धरातलं कोकनदं मेदिन्यां चक्रपाणिनम् ॥३८॥ भुवर्लोके च गरुडं स्वर्लोके विष्णुमव्ययम् ॥ महर्लोके तथाऽगस्त्यं कपिलं च जनेस्थितम् ॥ ३९ ॥ तपोलोकेऽखिलं ब्रह्मन्वाङ्मयं सप्तसंयुतम् ॥ ब्रह्माणं ब्रह्मलोके च सप्तमेव प्रतिष्ठितम् ॥४०॥सनातनं तथा शैवे परं ब्रह्म च वैष्णवे ॥ अप्रतर्क्यं निरालम्बे निराकारे तपोमयम् ॥४१॥ जम्बूद्वीपे चतुर्बाहुं कुशद्वीपे कुशेशयम् ॥ प्लक्षद्वीपे मुनिश्रेष्ठ ख्यातं गरुडवाहनम् ॥ ४२ ॥ पद्मनाभं तथा क्रौञ्चे शाल्मले वृषभध्वजम् ॥ सहस्राक्षः स्थितः शाके वामनः पुष्करे स्थितः ॥ ४३ ॥ तथा पृथिव्यां ब्रह्मर्षे शालिग्रामे स्थितोऽप्यहम् ॥ सजलस्थलपर्यन्तमशेषस्थावरेषु च ॥ ४४ ॥ एतानि पुण्यानि महालयानि ब्रह्मन्पुराणानि सनातनानि ॥ ब्रह्मप्रदानीह महौजसानि संकीर्तनीयान्यघनाशनानि ॥ ४५ ॥ सकीर्तनान्नाशमुपैति पापं संदर्शनादेव च देवतायाः ॥ धर्मोऽर्थकामावपवर्गमेव देवा लभन्ते मनुजाः ससाध्याः ॥४६॥ एतानि तुभ्यं विनिवेदितानि महालयानीह मया निजानि ॥ उत्तिष्ठ गच्छामि महासुरस्य यज्ञं सुराणां हि हिताय विप्र॥४७॥ पुलस्त्य उवाच ॥ इत्थमुक्त्वा वचनं

लयानीह मया निजानि ॥ उत्तिष्ठ गच्छामि महासुरस्य यज्ञं सुराणां हि हिताय विप्र॥४७॥ पुलस्त्य उवाच ॥ इत्येवमुक्त्वा वचनं महर्षे विष्णुर्भरद्वाजमृषिं महात्मा ॥ विलासलीलागमनो गिरीन्द्रात्स चाभ्यगच्छत्कुरुजाङ्गलं हि ॥ ४८ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे स्वस्थानकथनं नाम नवतितमोऽध्यायः ॥ ९० ॥ पुलस्त्य उवाच ॥ ततः समागच्छति वासुदेवे मही चकम्पे गिरयश्च चेलुः ॥ क्षुब्धाः समुद्रा दिवि सर्वलोको बभौ विपर्यस्तगतिर्महर्षे ॥१॥ यज्ञः समागात्परमाकुलत्वं न वेद्मि किं मां मधुहा करिष्यति ॥ यथा प्रदग्धोऽस्मि महेश्वरेण किं मां न संवक्ष्यति वासुदेवः ॥ २ ॥ ऋक्सामन्त्राहुतिभिर्हुतास्तु तेऽप्यासुरीया ज्वलनास्तु भागान् ॥ भक्ष्यान् द्विजेन्द्रैरपि संप्रदत्तान्नैव प्रतीच्छन्ति विभोर्भयेन ॥३॥ तं दृष्ट्वा घोररूपं तु निमित्तं दानवेश्वरः ॥ पप्रच्छौशनसं शुक्रं प्रणिपत्य कृताञ्जलिः॥४॥ किमर्थमाचार्य मही सशैला रम्भेव वाताभिहता चचाल॥ किमासुरीयाश्च हुतानपीह भागान्न गृह्णन्ति हुताशनाश्च ॥ ५ ॥ क्षुब्धाः किमर्थं मकरालया विभो ऋक्षाणि खे नैव चरन्ति पूर्ववत् ॥ दिशः किमर्थं तमसा परिप्लुता दोषेण कस्याद्य वदस्व मे गुरो॥६॥ पुलस्त्य उवाच ॥ शुक्रस्तद्वाक्यमाकर्ण्य विरोचनसुतेरितम् ॥ अथो ज्ञात्वा कारणं च ततो वचनमब्रवीत् ॥ ७ ॥ शुक्र उवाच ॥ शृणवद्य दैत्येश्वर येन भागान्नामी प्रयच्छन्ति महासुरेभ्यः ॥ हुताशना मन्त्रहुतास्त्वमीभिर्नूनं समागच्छति वासुदेवः ॥ ८ ॥ तदङ्घ्रिविक्षेपमपारयन्ती मही सशैला चलिता दिशश्च ॥ तस्यां वलन्त्यां मकरालयाश्च नूनं वेला दितिजाद्य जाताः ॥९॥ पुलस्त्य उवाच ॥ शुक्रस्य वचनं श्रुत्वा बलिर्भार्गवम

ब्रवीत्॥धर्मं सत्यं च पथ्यं च सत्त्वोत्साहसमन्वितम्॥१०॥बलिरुवाच॥आयाते वासुदेवे वद मम भगवन्धर्मकामार्थयुक्तं किं कार्यं किं च देयं मणिकनकमथो राज्यमुर्वीं धनं वा॥किं वा वाच्यं मुरारेर्निजहितमथवा तद्धितं वा प्रयुञ्जे तथ्यं पथ्यं प्रियं भो वद मम शुभदं तत्करिष्ये न चान्यत् ॥११॥ पुलस्त्य उवाच ॥ तद्वाक्यं भार्गवः श्रुत्वा दैत्यनाथेरितं महत् ॥ विचिन्त्य नारद प्राह भूतभव्यार्थमीश्वरः ॥ १२ ॥ शुक्र उवाच ॥ त्वया कृता यज्ञभुजोऽसुरेन्द्रा बहिष्कृता ये श्रुतिदृष्टमार्गाः ॥ श्रुतिः प्रमाणं मखभागभाजिनः सुरास्तदर्थं हरिरभ्युपैति ॥ १३ ॥ तस्याध्वरं दैत्य समागतस्य कार्यं शृणु त्वं परिपृच्छसे यत् ॥ कार्यं न देयं हि विभो तृणाग्रं यदध्वरं भूकनकादिकं वा ॥१४॥ वाच्यं तथा साम निरर्थकं विभो कस्त्वां वरं दातुमलं हि शक्नुयात् ॥ यस्योदरे भूर्भुवनाकपालरसातलेशा निवसन्ति नित्यशः ॥१५॥ बलिरुवाच ॥ मया तवोक्तं वचनं हि भार्गव न चार्थिने किंचन दातुमुत्सहे ॥ समागतेऽप्यर्थिनि हीनवृत्ते तद्वद्धि देवे कथमागते हि ॥ १६ ॥ जनार्दने लोकपतौ महर्षे समागते नास्ति कथं नु वच्मि ॥ एवं च श्रूयते लोके सतां कथयतां विभो ॥ १७ ॥ सद्भावो ब्राह्मणेष्वेव कर्तव्यो भूतिमिच्छता ॥ दृश्यतेऽपि तथा तच्च सत्यं ब्राह्मणपुंगव ॥ १८ ॥ पूर्वाभ्यासेन कर्माणि संभवन्ति नृणां स्फुटम् ॥ वाक्कायमानसानीह योन्यन्तरगतान्यपि ॥ १९ ॥ किं वा त्वया द्विजश्रेष्ठ पौराणी न श्रुता कथा ॥ या वृत्ता मलये पूर्वं कोशकारसुतस्य च ॥ २० ॥ शुक्र उवाच ॥ कथयस्व महाबाहो कोशकारसुताश्रयाम् ॥ कथां पौराणिकीं ब्रह्मन्महाकौतूहलं हि मे ॥ २१ ॥ बलिरुवाच ॥ शृणुष्व कथयिष्यामि कथामेतां मखान्तरे ॥ पूर्वाभ्यासेन विद्वान्हि सत्यं भृगुकुलोद्वह ॥ २२ ॥ मुद्गलस्य मुनेः पुत्रो ज्ञानविज्ञानपारगः ॥ कोशकार इति

महाकौतूहलं हि मे ॥ २१ ॥ बालरुवाच ॥ शृणुष्व कथयिष्यामि कथा

मेतां मखान्तरे ॥ पूर्वाभ्यासेन विद्वान्हि सत्यं भृगुकुलोद्वह ॥ २२ ॥ मुद्गलस्य मुनेः पुत्रो ज्ञानविज्ञानपारगः ॥ कोशकार इति ख्यात आसीद्ब्रह्मंस्तपोधनः ॥ २३ ॥ तस्यासीद्दयिता साध्वी धर्मिष्ठा नामतः श्रुता ॥ सती वात्स्यायनसुता धर्मशीला पतिव्रता ॥ २४ ॥ तस्यामस्य सुतो जातः प्रकृत्या वै जडाकृतिः ॥ नासौ ब्रूते मूर्खवच्च नासौ पश्यति चान्धवत् ॥ २५ ॥ तं जातं ब्राह्मणी पुत्रं जडं मूकं विचक्षुषम् ॥ सा च माता गृहद्वारि षष्ठेऽह्नि तमवासृजत् ॥ २६ ॥ ततोऽगाच्च दुराचारा राक्षसी जातहारिणी ॥ स्वं शिशुं कृशमादाय शूर्पाक्षी नाम नामतः ॥ २७ ॥ तत्रोत्सृज्य स्वपुत्रं सा जग्राह द्विजनन्दनम् ॥ तमादाय जगामाथ भोक्तुं शालोदरे गुरौ ॥ २८ ॥ ततस्तामागतां वीक्ष्य तस्या भर्ता घटोदरः ॥ नेत्रहीनः प्रत्युवाच किमानीतं त्वया प्रिये ॥२९॥ साऽब्रवीद्राक्षसपते मयाऽऽस्थाप्य शिशुं निजम् ॥ कोशकारद्विजगृहे तस्यानीतः प्रभो सुतः ॥३०॥ स प्राह न त्वया भद्रे भद्रमाचरितं त्विदम् ॥ महाज्ञानी द्विजेन्द्रोऽसौ स नः शप्स्यति कोपितः ॥३१॥ तस्माच्छीघ्रमिमं त्यक्त्वा तन्नूनं घोररूपिणम् ॥ अन्यस्य कस्यचित्पुत्रं क्षिप्रमानय सुन्दरि ॥३२॥ इत्येवमुक्ता सा रौद्री राक्षसी कामरूपिणी ॥ समाजगाम त्वरिता समुत्पत्य विहायसा ॥ ३३ ॥ स चापि राक्षससुतो निसृष्टो गृहबाह्यतः ॥ रुरोद सत्वरं ब्रह्मन्प्रक्षिप्याङ्गुष्ठमानने ॥ ३४ ॥ सा शब्दं तं चिराच्छ्रुत्वा धर्मिष्ठ पतिमब्रवीत् ॥ पश्य स्वयं मुनिश्रेष्ठ सुशब्दस्तनयस्तव ॥ ३५ ॥ त्रस्ता सा निर्जगामाथ गृहमध्यात्तपस्विनी ॥ स चापि ब्राह्मणश्रेष्ठः समपश्यच्च तं शिशुम् ॥ ३६ ॥ वर्णरूपादिसंयुक्तं तद्रूपस्वतनयं यथा ॥ ततो विहस्य प्रोवाच कोश

कारो निजां प्रियाम् ॥ ३७ ॥ एवमाविश्य धार्मिष्ठे भाव्यं भूतेन साम्प्रतम् ॥ कोऽप्यस्माकं छलयितुं स्वरूपी भुवि संस्थितः ॥ ॥ ३८॥ इत्युक्त्वा वचनं पत्नीं मन्त्रैस्तं राक्षसात्मजम् ॥ बबन्धोल्लिख्य वसुधां सकुशेनाथ पाणिना ॥३९॥ एतस्मिन्नन्तरे प्राप्ता शूर्पाक्षी विप्रबालकम् ॥ अन्तर्द्धानं गता भूमौ गृहे चिक्षेप दूरतः ॥ ४० ॥ स क्षिप्तमात्रं जग्राह कोशकारस्तु पुत्रकम् ॥ सा चाभ्येत्य ग्रहीतुं स्वं नाशकद्राक्षसी सुतम् ॥ ४१ ॥ इतश्चेतश्च विभ्रष्टा सा भर्तारमुपागता ॥ कथयामास यद्वृत्तं स्वकीयात्मजहारिणम् ॥ ॥ ४२ ॥ एवं गतायां राक्षस्यां ब्राह्मणेन महात्मना ॥ स राक्षसशिशुर्ब्रह्मन्भार्यायै विनिवेदितः ॥ ४३ ॥ कपिलायाः सवत्सायाः पित्राऽऽत्मतनयस्तदा ॥ दध्ना संतोषितोऽत्यर्थं क्षीरेणेक्षुरसेन च ॥ ४४ ॥ द्वावेव वर्द्धितौ बालौ संजातौ सप्तवार्षिकौ ॥ पित्रा च कृतनामानौ निशाकरदिवाकरौ ॥४५॥ नैशाकरिर्दिवाकीर्तिर्निशाकीर्तिः स्वपुत्रकः॥ तयोश्चकार विप्रोऽसौ व्रतबन्धक्रियां क्रमात्॥ ॥ ४६ ॥ व्रतबन्धे कृते वेदं पपाठासौ दिवाकरः ॥ निशाकरो जडतया न पपाठेति नः श्रुतम् ॥ ४७ ॥ तं बान्धवाः स्वपितरौ माता भ्राता गुरुस्तथा ॥ पर्यनिन्दंस्तथाऽन्ये च जना मलयवासिनः ॥ ४८ ॥ ततः स पित्रा क्रुद्धेन क्षिप्तः कूपे तु निर्जले ॥ महाशिलां तदुपरि पिता तस्याथ व्यक्षिपत् ॥ ४९ ॥ एवं क्षिप्तस्तदा कूपे बहुवर्षगणान्स्थितः ॥ तत्रास्त्यामलकीगुल्मः पोषाय फलितोऽभवत् ॥ ५० ॥ ततो दशसु वर्षेषु समतीतेषु भार्गव ॥ तस्य माताऽगमत्कूपं तमपश्यच्छिलान्वितम् ॥ ५१ ॥ सा दृष्ट्वा निचितं कूपे शिलया गिरिकल्पया ॥ उच्चैः प्रोवाच केनेयं कूपोपरि शिला कृता ॥ ५२ ॥ कूपान्तस्थः सुतो वाणीं श्रुत्वा मातु



निशाकरः ॥ प्राहाम्ब दत्ता तातेन कूपोपरि शिला त्वियम् ॥ ५३ ॥ साऽतिभीताऽब्रवीत्कोऽसि कूपान्तःस्थोऽद्भुतस्वरः ॥ सो

... कूपोपरि शिला कृता ॥ ५२ ॥ कूपान्तस्थः सुतो वाणीं श्रुत्वा मातु

निशाकरः ॥ प्राहाम्ब दत्ता तातेन कूपोपरि शिला त्वियम् ॥ ५३ ॥ साऽतिभीताऽब्रवीत्कोऽसि कूपान्तःस्थोऽद्भुतस्वरः ॥ सोऽप्याह तव पुत्रोऽस्मि निशाकर इति श्रुतः ॥ ५४ ॥ साऽब्रवीत्तनयो मेऽस्ति नाम्ना ख्यातो दिवाकरः ॥ निशाकरेति नाम्ना च न कश्चित्तनयोऽस्ति मे ॥५५॥ स च तत्पूर्वचरितं मातुर्निरवशेषतः ॥ कथयामास पुत्रोऽसौ यद्वृत्तं पूर्वमेव हि ॥५६॥ सा श्रुत्वा तां शिलां सुभ्रूः समुत्क्षिप्यान्यतोऽक्षिपत् ॥ स तु कूपात्समुत्तीर्य मातुः पादौ ववन्द च ॥५७॥ सा स्वानुरूपं तनयं दृष्ट्वा स्वजनमग्रतः ॥ ततस्तमादाय सुतं धर्मिष्ठा पतिमेत्य च ॥५८॥ कथयामास तत्सर्वं चेष्टितं स्वसुतस्य च ॥ ततो ह्यपृच्छद्विप्रोऽसौ किमिदं पातकारणम् ॥ ५९ ॥ प्रोक्तवान्यदभूत्पूर्वं महत्कौतूहलं मम ॥ तच्छ्रुत्वा वचनं धीमान्कोशकारं द्विजोत्तमम् ॥ प्राह पुत्रोऽद्भुतं वाक्यं मातरं पितरं तथा ॥ ६० ॥ निशाकर उवाच ॥ श्रूयतां कारणं तात येन मूकत्वमाश्रितम् ॥ मया जडत्वमनघ तथाऽन्धत्वं स्वचक्षुषा ॥ ६१ ॥ पूर्वमासमहं विप्र कुले वृन्दारकस्य तु ॥ वृषाकपेश्च तनयो मालागर्भसमुद्भवः ॥ ६२ ॥ ततः पिताऽपाठयन्मां शास्त्रं धमार्थकामदम् ॥ मोक्षमार्गपरं तात सेतिहासं श्रुतिं तथा ॥ ६३ ॥ सोऽहं तात महाज्ञानी परपारविशारदः ॥ जातो मदान्धस्तेनाहं दुष्कर्माभिरतोऽभवम् ॥ ६४ ॥ मदात्समभवल्लोभस्तेन नष्टा प्रगल्भता ॥ विवेको नाशमगन्मदो मे मोहमागतः ॥ ६५ ॥ मूढभावतया चाथ जातः पापरतोऽस्म्यहम् ॥ परदारपरार्थेषु सदा मे मानसं स्थितम् ॥ ६६ ॥ परदाराभिमर्शित्वात्परार्थहरणादपि ॥ मृतो ह्युद्बन्धनेनाहं नरकं रौरवं गतः ॥ ६७ ॥ तस्माद्वर्ष

सहस्रान्ते भुक्तशिष्टे तदागसि ॥ अरण्ये मृगहा पापः संजातोऽहं मृगाधिपः ॥ ६८ ॥ व्याघ्रत्वे संस्थितस्तावद्बद्धः पञ्जरगः कृतः ॥ नराधिपेन विभुना नीतश्च नगरं द्विज ॥ ६९ ॥ बद्धस्य पञ्जरस्थस्य व्याघ्रत्वेऽपि स्थितस्य च ॥ धर्मार्थकाम शास्त्राणि प्रत्यभासन्त सर्वशः ॥ ७० ॥ ततो नृपतिशार्दूलो गदापाणिः कदाचन ॥ एकवस्त्रपरीधानो नगरान्निर्ययौ बहिः ॥ ७१ ॥ तस्य भार्याऽजिता नाम रूपेणाप्रतिमा भुवि ॥सा निर्गते भर्तरि तु समान्तिकमुपागता ॥ ७२ ॥ तां दृष्ट्वा ववृधे चित्ते पूर्वाभ्यासान्मनोभवः ॥ यथैव कामशास्त्रेषु ततोऽहमवदं च ताम् ॥ ७३ ॥ राजपुत्रि सुकल्याणि नवयौवनशालिनि ॥ चित्तं हरसि मे भीरु कोकिला ध्वनिना यथा ॥ ७४ ॥ सा तद्वचनमाकर्ण्य प्रोवाच तनुमध्यमा ॥ कथमेवावयोर्व्याघ्र रतियोग उपैष्यति ॥ ७५ ॥ ततोऽहमब्रवं तात राजपुत्रीं सुमध्यमाम् ॥ द्वारमुद्घाटयाद्य त्वं निर्गमिष्यामि सत्वरम् ॥ ७६ ॥ साऽप्यब्रवी द्दिवा व्याघ्र लोकोऽयं परिपश्यति ॥ रात्रावुद्धाटयिष्यामि ततो रंस्याव चेच्छया॥७७॥तामेवाहमवोचं वै कालक्षेपो न मे क्षमः॥ तस्मादुद्घाटय द्वारं मां बन्धाच्च विमोचय ॥ ७८ ॥ ततः साऽपि वरश्रोणी द्वारमुद्धाटयच्छनैः ॥ उद्घाटिते ततो द्वारे निर्गतोऽहं बहिः क्षणात् ॥ ७९ ॥ निगडादिकपाशाश्च च्छिन्ना बलवता मया ॥ सा तदा नृपतेर्भार्या गृहीता रन्तुमिच्छता ॥ ८० ॥ ततो दृष्टोऽस्मि नृपतेर्भृत्यैरतुलविक्रमैः ॥ शस्त्रहस्तैः सर्वतश्च तैरहं परिवेष्टितः ॥ ८१ ॥ महापाशैः शृङ्खलाभिः समाहृत्य च मुद्गरैः ॥ बद्धस्तानब्रवं मैवं मां हन्तुं यूयमर्हथ ॥८२॥ ते च मद्वचनं श्रुत्वा मामेवं रजनीचरम् ॥ वटवृक्षे दृढं बद्धाऽघातयन्वै तपो



धन ॥ ८३ ॥ भूयस्ततश्च नरकं परदारनिषेवणात् ॥ गतो वर्षसहस्रान्ते जातोऽहं श्वेतगर्दभः ॥ ८४ ॥ ब्राह्मणस्याभिवस्यस्य

धन ॥ ८३ ॥ भूयस्ततश्च नरकं परदारनिषेवणात् ॥ गतो वर्षसहस्रान्ते जातोऽहं श्वेतगर्दभः ॥ ८४ ॥ ब्राह्मणस्याग्निवेश्यस्य
गृहे बहुकलत्रिणः ॥ तत्रापि सर्वविज्ञानं प्रत्यभासत मे तदा ॥ ८५ ॥ उपवाह्यः कृतश्चास्मि द्विजयोषिद्भिरादरात् ॥ एकदा
नवराष्ट्रीया भार्या तस्याग्रजन्मनः ॥ ८६ ॥ विमतिर्नामतः ख्याता गन्तुमैच्छद्गृहे पितुः ॥ तामुवाच पतिर्गच्छ आरुह्यैनं च
गर्दभम् ॥ ८७ ॥ मासेनागमनं कार्यं न स्थेयं परतस्ततः ॥ इत्येवमुक्ता सा भर्त्रा तन्वी चारुह्य गर्दभम् ॥ ८८ ॥ बन्धनादवमु
च्याथ जगाम त्वरिता मुने ॥ ततोऽर्द्धपथि सा तन्वी मत्पृष्ठादवरुह्य वै ॥ ८९ ॥ अवतीर्णा नदीं स्नातुं सुरूपामार्द्रवाससम् ॥
सर्वैरङ्गैः रूपवतीं दृष्ट्वा तामहमाद्रवम् ॥ ९० ॥ मया चाभिहता तूर्णं पतिता पृथिवीतले ॥ तस्या उपरि भो तात पतितोऽहं तदा
ऽऽतुरः ॥ ९१ ॥ दृष्टोऽभवं तदा तस्या नृणा तदनुसारिणा ॥ तदोद्यम्य स यष्टिं मां समधावत्त्वरान्वितः ॥ ९२ ॥ तद्भयात्तां
परित्यज्य प्रद्रुतो दक्षिणामुखः ॥ ततोऽभिद्रवतस्तूर्णं खलीनरशना मुने ॥ ९३ ॥ समासन्ना तदा ब्रह्मन्ममासौ प्राणनाशने ॥ तत्रा
सक्तस्य षड्गात्रादभून्मे जीवितक्षयः ॥ ९४ ॥ ततोऽस्मि नरकं भूयस्तस्मान्मुक्तोऽभवं शुकः ॥ महारण्ये ततो बद्धः शबरेण दुरा
त्मना ॥ ९५ ॥ पञ्जरे न्यस्य विक्रीतो वणिक्पुत्राय शालिने ॥ तेनाप्यन्तःपुरतरे युवतीनां समीपतः ॥ ९६ ॥ सर्वशास्त्रविदि
त्येव दोषघ्नश्चेत्यवस्थितः ॥ तत्रासतस्तरुण्यस्ता ओदनादिफलादिभिः ॥ ९७ ॥ पक्वैश्च दाडिमफलैः पोषयन्त्यो दिने दिने ॥
एकदा पद्मपत्राक्षी श्यामा पीनपयोधरा ॥ ९८ ॥ सुश्रोणी तनुमध्या च वणिक्पुत्री प्रिया शुभा ॥ नाम्ना चन्द्रावली नाम समु

द्वृष्ट्वाथ पञ्जरम् ॥ ९९ ॥ मां जग्राह सुचार्वङ्गी कराभ्यां चारुहासिनी ॥ चकारोपरि पीनाभ्यां स्तनाभ्यां सा तदा च माम् ॥ ॥१००॥ ततोऽहं कृतवान्भावं तस्यां विलसितुं प्लुवन् ॥ ततोऽनुप्लुवमानोऽहं हारे मर्कटबन्धने ॥ १ ॥ तत्राहं पापसंयुक्तो मृतश्च तदनन्तरम् ॥ भूयोऽपि नरकं घोरं प्रपन्नोऽस्मि सुदुर्मतिः ॥ २ ॥ तस्मान्मृतो वृषत्वं च गतश्चाण्डालपक्कणे ॥ स चैकदा मां शकटे नियोज्य स्वां विलासिनीम् ॥ ३ ॥ समारोप्य महातेजा गन्तुं कृतमतिर्वनम् ॥ तत्राग्रतः स चाण्डालो गतः सा चास्य पृष्ठतः ॥ ४ ॥ गायन्ती यानि तच्छ्रुत्वा जातोऽहं व्यथितेन्द्रियः ॥ पृष्ठतस्तु समालोक्य विपर्यस्तस्तथा प्लुतः ॥ ५ ॥ पतितो भूमिमगमं क्षणेन क्षणविभ्रमात् ॥ योक्त्रेण बद्ध एवास्मि पञ्चत्वमगमं ततः ॥ ६ ॥ भूयो निमग्नो नरके दशवर्षशतान्यहम् ॥ जातस्तव गृहे तात सोऽहं जातिमनुस्मरन् ॥ तावन्त्येवाद्य जन्मानि स्मरामि चानुपूर्वशः ॥ ७ ॥ पूर्वाभ्यासाच्च शास्त्राणां वचनं चागतं मम ॥ तदहं ज्ञातविज्ञानो नाचरिष्ये कथंचन ॥ ८ ॥ पापानि घोररूपाणि मनसा कर्मणा गिरा ॥ शुभं वाऽप्यशुभं वाऽपि स्वाध्यायः शास्त्रजीविका ॥ ९ ॥ बन्धनं वा वधो वाऽपि पूर्वाभ्यासेन जायते ॥ जातिं यदा पौर्विकीं तु स्मरते तात मानवः ॥ तदा स तेभ्यः पापेभ्यो निवृत्तिं हि करिष्यति ॥११०॥ तस्माद्गमिष्ये शुभवर्धनाय पापक्षयायाथ मुने ह्यरण्यम् ॥ भवान्दिवाकीर्तिमिमं सुपुत्रं गृहस्थधर्मे विनियोजयस्व ॥ ११ ॥ बलिरुवाच ॥ इत्येवमुक्तः स निशाकरस्तदा प्रणम्य मातापितरौ महर्षे ॥ जगाम पुण्यं सदनं मुरारेः ख्यातं बदर्याश्रममाद्यमैशम् ॥ १२ ॥ एवं पुराऽभ्यासरतस्य पुंसो भवन्ति दाना





ध्ययनादिकानि ॥ तस्माच्च पूर्वं द्विजवर्य वै मया त्वभ्यस्तमासीन्न तु ते ब्रवीमि ॥ १३ ॥ दानं तपो वाऽध्ययनं महर्षे स्तेयं महा

ध्ययनादिकानि ॥ तस्माच्च पूर्वं द्विजवर्य वै मया त्वभ्यस्तमासीन्न तु ते ब्रवीमि ॥ १३ ॥ दानं तपो वाऽध्ययनं महर्षे स्तेयं महा
पातकमग्निदाहः ॥ ज्ञानानि चैवाभ्यसनाच्च पूर्वं भवन्ति धर्मार्थयशांसि नान्यथा ॥ १४ ॥ इत्येवमुक्तो बलवान्स शुक्रं दैत्येश्वरः
स्वं गुरुमीशितारम् ॥ ध्यायंस्तदा तं मधुकैटभारिं नारायणं चक्रगदासिपाणिम् ॥१५॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे
शुक्रबलिसंवादो नामैकनवतितमोऽध्यायः ॥ ९१ ॥ पुलस्त्य उवाच ॥ एतस्मिन्नन्तरे प्राप्ते भगवान्वामनाकृतिः ॥ यज्ञवाट
समीपे स उच्चैर्वचनमब्रवीत् ॥ १ ॥ ॐकारपूर्वाः श्रुतयो मखेऽस्मिंस्तिष्ठन्ति रूपेण तपोधनानाम् ॥ यज्ञोऽश्वमेधः प्रवरः क्रतूनां
युक्तं यथा स्यात्कुरु दैत्यनाथ ॥२॥ इत्थं वचनमाकर्ण्य दानवाधिपतिर्वशी ॥ सार्घ्यपात्रः समभ्यागाद्यत्र देवः स्थितोऽभवत् ॥
॥ ३ ॥ ततः स देवदेवेशं पूजयित्वा विधानतः ॥ प्रोवाच भगवन्ब्रूहि किं ददामि तव मानद ॥ ४ ॥ ततोऽब्रवीन्मधुरिपुर्दैत्यराजं
तमव्ययः ॥ विहस्य सुचिरं कालं भरद्वाजमवेक्ष्य च ॥ ५ ॥ गुरोर्मदीयस्य गुरुस्तस्यास्त्यग्निपरिग्रहः ॥ न स धारयते
भूम्यां पारक्यायां च पावकम् ॥ ६ ॥ तदर्थमभियाचेऽयं मम दानवपार्थिव ॥ मच्छरीरप्रमाणेन देहि राजन्क्रमत्रयम् ॥ ७ ॥
मुरारिवचनं श्रुत्वा बलिर्भार्यामवेक्ष्य च ॥ बाणं च तनयं वीक्ष्य इदं वचनमब्रवीत् ॥ ८ ॥ न केवलं प्रमाणेन वामनोऽयं लघु
प्रियः ॥ येन क्रमत्रयं चोक्तं याचते मद्विधेऽपि च ॥ ९ ॥ प्रायो विधाताऽल्पधियां नराणां बहिष्कृतानां खलु दिव्यपुण्यैः ॥
वनादिकं भूरि न वै ददाति तथैव विष्णुर्न बहुप्रयासः ॥ १० ॥ न ददाति विधिस्तस्य यस्य भाग्यविपर्ययः ॥ मयि दाता

यश्चायं याचते च क्रमत्रयम् ॥ ११ ॥ इत्येवमुक्त्वा वचनं महात्मा भूयोऽप्युवाचाथ हरिं सुरारिः ॥ यावच्च विष्णो गजवा
जिभूमिदासीर्हिरण्यं यदपीप्सितं च ॥ १२ ॥ भवांश्च याचिता विष्णो त्वहं दाता जगत्पतिः ॥ दातुं वै मम लज्जेयं कथं न
स्यात्पदत्रये ॥ १३ ॥ रसातलं स्वां पृथिवीं भुवं नाकमथापि वा ॥ एतेभ्यः कतमं दद्यां स्वस्थो याचस्व वामन ॥ १४ ॥
वामन उवाच ॥ गजाश्वभूहिरण्यादि तदर्थिभ्यः प्रदीयताम् ॥ एतावदेव संप्रार्थी देहि राजन्पदत्रयम् ॥ १५ ॥ इत्येवमुक्ते वचने
वामनेन महात्मना ॥ बलिर्भृङ्गारमादाय ददौ विष्णोः क्रमत्रयम् ॥ १६ ॥ पाणौ तु पतिते तोये दिव्यं रूपं चकार ह ॥ त्रैलोक्य
क्रमणार्थाय वज्ररूपं जगन्मयम् ॥ १७ ॥ पादे भूमिस्तथा जङ्घे नभस्त्रैलोक्यवन्दितम् ॥ सत्यं तपो जानुयुग्मे ऊरू स्तो मेरु
मन्दरौ ॥ १८ ॥ विश्वेदेवाः कटीभागे मरुतो बस्तिशीर्षयोः ॥ लिङ्गस्थितो मन्मथश्च वृषणस्थः प्रजापतिः ॥ १९ ॥ कुक्षि
स्था अर्णवाः सप्त जठरे भुवनान्यथो ॥ वलिषु त्रिषु नद्यश्च यज्ञोऽन्तर्जठरे स्थितः ॥२०॥ इष्टापूर्तादयः सर्वाः क्रियामन्त्राश्च संस्थि
ताः ॥ पृष्ठस्था वसवो देवाः स्कन्धो रुद्रैरधिष्ठितः ॥ २१ ॥ बाहवश्च दिशः सर्वा वसवोऽष्टौ कराः स्मृताः ॥ हृदये संस्थितो ब्रह्मा
कुलिशो हृदयास्थिषु ॥ २२ ॥ श्रीसहस्रमुरोमध्ये चन्द्रमा मनसि स्थितः ॥ ग्रीवाऽदितिर्देवमाता विद्यास्तद्वलये स्थिताः ॥ २३ ॥
मुखे तु साग्नयो विप्राः संस्कारा दशनच्छदाः ॥ धर्मकामार्थमोक्षाश्च शास्त्रैश्चैव समन्विताः ॥ २४ ॥ लक्ष्म्या सह ललाटस्थौ
श्रवणस्थौ हि चाश्विनौ ॥ श्वासस्थो मातरिश्वा च मरुतः सर्वसंधिषु ॥ २५ ॥ सर्वसूक्तानि दशना जिह्वा देवी सरस्वती ॥



चन्द्रादित्यौ च नयने पक्ष्मस्थाः कृत्तिकादयः ॥ २६ ॥ विशाखा देवदेवस्य भ्रुवोर्मध्ये व्यवस्थिताः ॥ तारका रोमकूपेभ्यो

चन्द्रादित्यौ च नयने पक्ष्मस्थाः कृत्तिकादयः ॥ २६ ॥ विशाखा देवदेवस्य भ्रुवोर्मध्ये व्यवस्थिताः ॥ तारका रोमकूपेभ्यो रोमाणि च महर्षयः ॥ २७ ॥ गुणैः सर्वमयो भूत्वा भगवान्भूतभावनः ॥ क्रमेणैकेन जगतीं जहार सचराचराम् ॥ २८ ॥ ऊर्ध्वं विक्रममाणस्य महारूपस्य तस्य वै ॥ दक्षिणोऽभूत्ततश्चेन्दुः सूर्योऽभूत्सव्यतस्तथा ॥ २९ ॥ तृतीयक्रमणेनाथ स्वर्महर्जनतापसाः ॥ क्रान्तास्त्वर्द्धेन वै राजन्नर्द्धेनापूर्यताम्बरम् ॥ ३० ॥ ततः प्रवर्धितो ब्रह्मन्विष्णुर्वै दक्षिणान्तरे ॥ ब्रह्माण्डोदरमाहत्य निरालोकं जगाम सः ॥३१॥ विश्वाङ्घ्रिणा प्रसरता कटाहे भेदितेऽम्बरात् ॥ कुटिला विष्णुपादात्तु ससाराकुलिता ततः ॥३२॥ तस्माद्विष्णुपदीत्येवं तां स्तुवन्ति च तापसाः ॥ भगवानप्यसंपूर्णे तृतीयेऽनुक्रमे विभुः ॥ ३३ ॥ समभ्येत्य बलिं प्राह ईषत्प्रस्फुरिताधरः ॥ ऋणे भवसि दैत्येन्द्र बन्धनं घोरदर्शनम् ॥ त्वं पूरय पदं तन्मे नोचेद्बन्धं प्रतीच्छ मे ॥ ३४ ॥ तन्मुरारिवचः श्रुत्वा विहस्याथ बलेः सुतः ॥ बाणः प्राहामरपतिं वचनं हेतुसंयुतम् ॥३५॥ बाणासुर उवाच ॥ कृत्वा महीमल्पतरां जगत्पते स्वयं विधाता भुवनेश्वराणाम् ॥ कथं बलिं प्रार्थयसे सुविस्तृतां यां प्राग्भवान्नो विपुलां चकार ॥ ३६ ॥ विभो मही यावती च त्वयाऽद्य सृष्टा समेता भुवनान्तराले ॥ दत्ता च तातेन हि तावतीयं किंवाक्छलेनैष निबध्यतेऽद्य॥३७॥यथैव शक्त्या भवता हि पूर्वं तथैव शक्त्या दितिजेश्वरोऽसौ ॥ शक्तस्तु सम्पूजयितुं मुरारे प्रसीद मा बन्धनमादिशस्व ॥ ३८ ॥ प्रोक्तं श्रुतौ भवताऽपीश वाक्यं दानं पात्रे जायते सौख्यदायि ॥ देशे पुण्ये तद्वदेवापि काले तच्चाशेषं दृश्यते चक्रपाणौ ॥ ३९ ॥ दानं भूमिः सर्वकामप्र

दाता भवान्पात्रं देवदेवोऽजितात्मा ॥ कालो ज्येष्ठामूलयोगे मृगाङ्कः कुरुक्षेत्रं पुण्यदेशः प्रसिद्धः ॥ ४० ॥ किं वा देवैर्मद्विधैर्बुद्धिहीनैः शिक्षां नेयः साधु वाऽसाधु चैव ॥ स्वयं श्रुतीनामपि चादिकर्ता व्यवस्थितः सदसद्यो जगद्वै ॥४१॥ कृत्वा प्रमाणं स्वयमेव हीनं पदत्रयं याचितवांस्तु यच्च ॥ किं त्वं हि गृह्णासि विभो महात्मा रूपेण लोकप्रतिवन्दितेन ॥ ४२ ॥ नात्राश्चर्यं यज्जगद्वै समग्रं क्रमत्रयेणैव पूर्णं तवाद्य ॥ क्रमेण भो लङ्घयितुं समर्थो महीं समग्रां ननु लोकनाथ ॥ ४३ ॥ प्रमाणहीनां स्वयमेव कृत्वा वसुंधरां माधव पद्मनाभ ॥ विष्णो निबध्नासि कथं बलिं त्वं विभुर्यदेवेच्छसि तत्कुरुष्व ॥ ४४ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्ते वचने बलिना बलिसूनुना ॥ प्रोवाच भगवान्वाक्यं ह्यादिकर्ता जनार्दनः ॥ ४५ ॥ त्रिविक्रम उवाच ॥ यान्युक्तानि वचांसीत्थं त्वया बालेय साम्प्रतम् ॥ तेषां वै हेतुसंयुक्तं शृणु प्रत्युत्तरं मम ॥ ४६ ॥ पूर्वमुक्तस्तव पिता मया राजन्पदत्रयम् ॥ देहि मह्यं प्रमाणेन तदेतत्समनुष्ठितम् ॥ ४७ ॥ किं न वेत्ति प्रमाणं मे बलिस्तव पिताऽसुरः ॥ प्रायच्छद्येन निःशङ्कं मम मानं पदत्रयम् ॥ ॥ ४८ ॥ सत्यं क्रमेण चैकेन क्रमेयं भूर्भुवादिकम् ॥ बलेरपि हितार्थाय कृतमेतत्क्रमद्वयम् ॥ ४९ ॥ तस्माद्यन्मम बालेय त्वत्पित्राऽम्बु करे महत् ॥ दत्तं तेनायुरेतस्य कल्पं यावद्भविष्यति ॥ ५० ॥ इदमुक्त्वा बलिसुतं बाणं देवस्त्रिविक्रमः ॥ प्रोवाच बलिमभ्येत्य वचनं मधुराक्षरम् ॥५१॥ श्रीभगवानुवाच ॥ आपूरणाद्दक्षिणाया गच्छ राजन्महाफलम् ॥ सुतलं नाम पातालं वस तत्र निरामयः ॥ ५२ ॥ बलिरुवाच ॥ सुतले वसतो नाथ मम भोगाः कुतोऽव्ययाः ॥ भविष्यन्ति तु येनाहं वसिष्यामि निरामयः ॥ ५३ ॥ त्रिविक्रम उवाच ॥ सुतलस्थस्य दैत्येन्द्र यानि भोग्यानि तेऽधुना ॥ भविष्यन्ति महार्हाणि तानि वक्ष्यामि सर्वशः ॥

॥ ५३ ॥ त्रिविक्रम उवाच ॥ सुतलस्थस्य दैत्येन्द्र यानि भोग्यानि तेऽधुना ॥ भविष्यन्ति महार्हाणि तानि वक्ष्यामि सर्वशः ॥
॥ ५४ ॥ दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ॥ तथाऽधीतान्यव्रतिभिर्दास्यन्ति भवतः फलम् ॥ ५५ ॥ तथाऽन्यमुत्स
वं पुण्यं वृत्ते शक्रमहोत्सवे ॥ दीपप्रदाननामाऽसौ तव भावी महोत्सवः ॥ ५६ ॥ तत्र त्वां नरशार्दूला हृष्टाः पुष्टाः स्वलंकृताः ॥
पुष्पदीपप्रदानेन अर्चयिष्यन्ति यत्नतः ॥ ५७ ॥ तत्रोत्सवो मुख्यतमो भविष्यति स चापि लोके तव नामचिह्नितः ॥ यथैव
राज्ये भवतस्तु साम्प्रतं तथैव सा भाव्यथ कौमुदीति ॥ ५८ ॥ इत्येवमुक्त्वा मधुहा दितीश्वरं विसर्जयित्वा ससुतं
सभार्यम् ॥ उर्वीं समादाय जगाम तूर्णं सशक्रब्रह्मामरसंघजुष्टः ॥ ५९ ॥ दत्त्वा मघोने मधुजित्त्रिविष्टपं कृत्वा च देवान्मखभाग
भोगिनः ॥ अन्तर्दधे विश्वपतिर्महेशः संपश्यतामेव सुराधिपानाम् ॥ ६० ॥ स्वर्गं गते धातरि वासुदेवे शाल्वोऽसुराणां महता
बलेन ॥ कृत्वा पुरं सौभमिति प्रसिद्धं तदाऽन्तरिक्षे विचचार कामात् ॥ ६१ ॥ मयश्च कामात्त्रिपुरं महात्मा सुवर्णताम्रायस
मुग्रसौख्यम् ॥ स तारकाख्यः सह वैद्युतेन संतिष्ठते मित्रकलत्रवांश्च ॥ ६२ ॥ बाणोऽपि देवेऽथ गते त्रिविष्टपं बद्धे बलौ चापि
रसातलस्थे ॥ कृत्वा सुगुप्तं भुवि शोणिताख्यं पुरं स चास्ते सह दानवेन्द्रैः ॥ ६३ ॥ एवं पुरा चक्रधरेण विष्णुना बद्धो बलिर्वा
मनरूपधारिणा ॥ शक्रप्रियार्थं सुरकार्यसिद्धये हिताय विप्रर्षभगोद्विजानाम् ॥ ६४ ॥ प्रादुर्भवस्ते कथितो महर्षे पुण्यः शुचि
र्वामनस्याघहारी ॥ श्रुते यस्मिन्कीर्तिते संस्मृते च पापं याति प्रक्षयं पुण्यमेति ॥ ६५ ॥ एतत्प्रोक्तं वामनीयं चरित्रं बद्धो बलिः
पुण्यकीर्तिर्यथाऽसौ ॥ यच्चैवान्यच्छ्रोतुकामोऽसि विप्र तत्ते वक्ष्ये ब्रूहि ब्रह्मन्नशेषम् ॥ ६६ ॥ इति श्रीवामनपुराणे पुलस्त्यनारद

संवादे बलिबन्धनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ नारद उवाच ॥ श्रुतं यथा भगवता बलिर्बद्धो महात्मना ॥ किमन्य त्त्विह प्रष्टव्यं तच्छ्रुत्वा कथयामि ते ॥ १ ॥ भगवान्देवराजाय विष्णुर्दत्त्वा त्रिविष्टपम् ॥ अन्तर्धाय गतः क्वासौ सर्वात्मा तात कथ्यताम् ॥ २ ॥ परिचर्याऽथ विधिना ब्रह्मा पूजादिना हरिम् ॥ पप्रच्छ किं चिरेणाथ भवताऽऽगमनं कृतम् ॥ ३ ॥ अथोवाच जगत्स्वामी मया कार्यं महत्कृतम् ॥ सुराणां रिपुभोगार्थं स्वयं भो बलिबन्धनम् ॥४॥ पितामहस्तद्वचनं श्रुत्वा मुदितमानसः ॥ कथं कथमिति प्राह त्वं मां द्रष्टुमिहार्हसि ॥५॥ इत्येवमुक्ते भगवान्वचने गरुडध्वजः ॥ दर्शयामास तद्रूपं सर्वदेवमयं लघु ॥६॥ तं दृष्ट्वा पुण्डरीकाक्षं योजनायतविस्तृतम् ॥ तावानेवोर्ध्वमानेन ततोऽयं प्रणतोऽभवत् ॥ ७ ॥ सम्यक्सुचरितं साधु साधु साध्वि त्युदीर्य च ॥ भक्तिं गतो महादेवे पद्मजः स्तोत्रमैरयत् ॥ ८ ॥ ॐनमस्ते देवाधिदेव वासुदेव एकशृङ्ग बहुरूप वृषाकपे भूतभावन सुरासुरवृष सुरासुरमथन सुरपतिवास सुरनिर्माण अविघ्न कपिल महाकपिल विष्वक्सेन नारायण ध्रुवध्वज सालध्वज वैकुण्ठ पुरुषोत्तम वरेण्य विष्णो अपराजित जय जयन्त विजय कृतावर्त महादेव अनादे अनन्त अनाद्यन्तमध्यनिधन पुरंजय धनंजय सुरस्तुत पृथुश्रवः पृश्निगर्भ हिरण्यगर्भ कमलगर्भ कमलायताक्ष कमलालयप्रिय. वृष्णिमूल भूताधिवास वर्गाध्यक्ष गदाधर श्रीधर वनमालाधर लक्ष्मीधर धरणीधर पद्मनाभ विरिञ्चे आर्ष्णिषेण महासेन सेनाध्यक्ष परिष्टुत बहुकल्प महाकल्प कल्पना मुख अनिरुद्ध सर्वग सर्वात्मक द्वादशात्मक शर्वात्मक सोमात्मक कलात्मक भूतात्मक रमात्मक सनातन मुञ्जकेश हरिकेश हृषी





केश गुडाकेश केतुमन् नील सूक्ष्म स्थूल पीत रक्त श्वेत श्वेताधिवास रक्ताम्बरप्रिय प्रीतिकर प्रीतिवास हंस सीरध्वज नील वासः सर्वलोकाधिवास कुशेशय अधोक्षज गोविन्द जनार्दन मधुसूदन वामन नमस्तेऽस्तु ॥ ॐ सहस्रशीर्षा असि सहस्रदृगसि

केश गुडाकेश केतुमन् नील सूक्ष्म स्थूल पीत रक्त श्वेत श्वेताधिवास रक्ताम्बरप्रिय प्रीतिकर प्रीतिवास हंस सीरध्वज नील
वासः सर्वलोकाधिवास कुशेशय अधोक्षज गोविन्द जनार्दन मधुसूदन वामन नमस्तेऽस्तु ॥ ॐ सहस्रशीर्षा असि सहस्रदृगसि
सहस्रपादोऽसि अधोमुखोऽसि महापुरुषोऽसि सहस्रबाहुरसि सहस्रमूर्तिरसि त्वां वेदाः प्राहुः सहस्रवदनं नमस्ते नमस्ते ॥ ॐ
नमस्ते विश्वदेवेश विश्वभृत विश्वात्मक विश्वरूप विश्वसंभव त्वत्तो विश्वमिदमभवद् ब्राह्मणस्ते मुखमासीत् क्षत्रियो दोः समभूदू
रुयुग्माद्विशोऽभवन् शूद्राश्चरणकमलेभ्यः ॥ नाभेस्तथाऽन्तरिक्षं च इन्द्राग्नी वक्रपङ्कजात् ॥ मनसस्तु शशी जातः प्रसा
दात्तव चाप्यहम् ॥ क्रोधाज्जातस्तु त्र्यम्बकः प्राणाज्जातो मातरिश्वा शिरसो द्यौरजायत श्रोत्रादिशोऽभवन् स्वयंभो ॥ भूरियं
चरणाज्जाता गोत्रोद्भवाऽतिशोभिता ॥ त्वं नभस्त्वं च नक्षत्रं स्वेदोद्भिज्जास्तथाऽण्डजाः ॥ मूर्ताश्चैवाप्यमूर्ताश्च सर्वे त्वत्तः समु
द्भवाः ॥ अतो विश्वात्मनाऽऽद्योऽसि ॐ नमस्ते पुष्पहासोऽसि परमोऽसि महाहासोऽसि ॐकारोऽसि वषट्कारोऽसि स्वाहा
कारोऽसि मातरिश्वाऽसि यज्ञचरोऽसि त्रिकोशिरसि होताऽसि होमोऽसि हूयमानोऽसि पाताऽसि पठिताऽसि हन्ताऽसि
हन्यमानोऽसि नीतिरसि मेधाऽसि अग्निरसि विश्वधामाऽसि अर्घोऽसि परमधामाऽसि स्रुग्भाण्डोऽसि अरणिरसि
अरणीयोऽसि ज्ञानमयोऽसि ध्यानमसि ध्येयोऽसि यज्ञोऽसि इष्टोऽसि यष्टाऽसि दानमसि पशुरसि पूज्योऽसि इज्योऽसि
होताऽसि गीतोऽसि उद्गाताऽसि यजमानोऽसि गतिमानसि ज्ञानिनां ज्ञानमसि योगिनां योगोऽसि मोक्षगामिनां मोक्षोऽसि

श्रीमतां श्रीरसि गृह्योऽसि धाताऽसि परमसि सोमोऽसि सूर्योऽसि दक्षिणाऽसि दीक्षितोऽसि नरोऽसि त्रिनयनोऽसि आदित्य प्रभोऽसि शुचिरसि शुक्रोऽसि नभोऽसि नभस्योऽसि यज्ञोऽसि सहोऽसि सहस्योऽसि तपोऽसि तपस्योऽसि मधुरसि माधवोऽसि कालोऽसि संक्रमोऽसि विक्रमोऽसि पराक्रमोऽसि अश्वग्रीवोऽसि महामेघोऽसि शंकरोऽसि हरीश्वरोऽसि सत्त्वमसि ब्रह्मचार्यसि स्वरसि मित्रावरुणोऽसि प्राग्वंशप्रकाशोऽसि भूतादिरसि महाभूतोऽसि ऊर्ध्वकर्मान्तकर्ताऽसि व्याप्तोऽसि सर्वपापविमोचनोऽसि त्रिविक्रमोऽसि नमस्ते ॥ पुलस्त्य उवाच ॥ इत्थं स्तुतोऽसौ प्रपितामहेन विष्णुः सदैवाद्भुतकर्मचारी ॥ प्रोवाच चेदं प्रपितामहं तु वरं वृणीष्वामलसत्त्ववृत्त ॥ ९ ॥ तमब्रवीत्प्रीतियुतः पितामहो वरं ममेहाद्य विभो प्रयच्छ ॥ रूपेण पुण्येन विभोरनेन संस्थीयतां मद्भवने मुरारे ॥ १० ॥ इत्थं वृते तेन वरे वरेण्ये देवोऽप्यथाचिन्तितमव्ययात्मा ॥ तस्थौ स्वरूपेण हि वामनेन संपूज्यमानः सदने स्वयंभोः ॥ ११ ॥ नृत्यन्ति तत्राप्सरसां समूहा गायन्ति गीतानि सुरेन्द्रनार्यः ॥ विद्याधरास्तूर्यमवादयन्त स्तुवन्ति देवासुरसिद्धसंघाः ॥ १२ ॥ ततः समाराध्य विभुं मुरारिं पितामहो धौतमलः सुशुद्धः ॥ स्वर्ग विरिञ्चेः सदनात्सुपुण्यादानीय पूजां प्रचकार विष्णोः ॥ १३ ॥ स्वर्गे सहस्रं स तु योजनानां विष्णुः प्रमाणेन हि वामनोऽभूत ॥ तत्रास्य शक्रः प्रचकार पूजां स्वयंभुवस्तुल्यगुणां महर्षे ॥ १४ ॥ एतत्तवोक्तं भगवांस्त्रिविक्रमश्चकार यद्देवहितं महात्मा ॥ रसातलस्थं दितिजं हि कुर्वन्निवेदितं तेऽद्य मया हि विप्र॥१५॥इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनप्रादुर्भावे ब्रह्मोक्तस्तवो नाम त्रिनवतितमोऽध्यायः॥९३॥



पुलस्त्य उवाच ॥ गत्वा रसातलं दैत्यो महामणिविचित्रितम् ॥ शुद्धस्फटिकसोपानं कारयामास वै पुरम् ॥ १ ॥ ... निर्मितो विश्वकर्मणा ॥ २ ॥ तत्रास्ते विविधान्भोगान्भुञ्जन्दि

पुलस्त्य उवाच ॥ गत्वा रसातलं दैत्यो महामणिविचित्रितम् ॥ शुद्धस्फटिकसोपानं कारयामास वै पुरम् ॥ १ ॥
तत्र मध्ये सुविस्तीर्णे प्रासादो बहुवेदिकः ॥ मुक्ताजालान्तरद्वारो निर्मितो विश्वकर्मणा ॥ २ ॥ तत्रास्ते विविधान्भोगान्भुञ्जन्दि
व्यान्स मानुषान् ॥ नाम्ना विन्ध्यावलीत्येवं भार्याऽस्य दयिताऽभवत् ॥ ३ ॥ युवतीनां सहस्रस्य प्रधाना शीलमण्डना ॥ तया
सह महातेजा रेमे वैरोचनिर्मुने ॥ ४ ॥ भोगासक्तस्य दैत्यस्य वसतः सुतले तदा ॥ दैत्यतेजोहरं प्राप्तं पातालं वै सुदर्शनम् ॥ ५ ॥
चक्रे प्रविष्टे पाताले दानवानां भयं महत् ॥ अभूद्धलहलाशब्दः क्षुभितार्णवसंनिभः ॥ ६ ॥ तं श्रुत्वा सुमहच्छब्दं बलिः खड्गं
समाददे ॥ आः किमेतदितीत्थं च पप्रच्छासुरपुंगवः ॥ ७ ॥ ततो विन्ध्यावलिः प्राह सान्त्वयन्ती निजं पतिम् ॥ कोशे खड्गं
समाधाय धर्मपत्नी शुचिव्रता ॥ ८ ॥ उवाच मधुरं वाक्यं दैत्यराजं सुनिश्चितम् ॥ एतद्भागवतं चक्रं दैत्यचक्रक्षयंकरम् ॥ ९ ॥
संपूजनीयं दैत्येन्द्र वामनस्य महात्मनः ॥ इत्येवमुक्त्वा चार्वङ्गी प्रयता सा विनिर्ययौ ॥ १० ॥ अथाभ्यागात्सहस्रारं विष्णोश्चक्रं
सुदर्शनम् ॥ ततोऽसुरपतिः प्राह कृताञ्जलिपुटो मुने ॥ संपूज्य विधिवच्चक्रमिदं स्तोत्रमुदैरयत् ॥ ११ ॥ बलिरुवाच ॥ नमस्यामि
हरेश्चक्रं दैत्यचक्रविदारणम् ॥ सहस्रांशुं सहस्राभं सहस्रारं सुदर्शनम् ॥ १२ ॥ नमस्यामि हरेश्चक्रं यस्य नाभ्यां पितामहः ॥ तुङ्ग
त्रिशूलधृक्शर्व अरामूले महाद्रयः ॥ १३ ॥ अरासु संस्थिता देवाः सेन्द्रार्काश्च सपावकाः ॥ जवे यस्य स्थितो वायुरापोऽग्निः
पृथिवी नभः ॥ १४ ॥ अरासंधिषु जीमूताः सौदामन्यृक्षाणि तारकाः ॥ बाह्यतो मुनयो यस्य वालखिल्यादयस्तथा ॥ १५ ॥

तदायुधवरं देवं वासुदेवस्य भक्तितः ॥ त्रिधा पापं शरीरोत्थं वाग्जं मानसमेव च ॥ १६ ॥ तन्मे दहस्व दीप्तांशो विष्णोश्चक्रं सुदर्शनम् ॥ यत्कलौ बहुलं पापं पैतृकं मातृकं तथा ॥ १७ ॥ तन्मे हरस्व तरसा नमस्तेऽस्त्वच्युतायुध ॥ आपदो मम नश्यन्तु व्याधयो यान्तु संक्षयम् ॥ त्वन्नामकीर्तनाच्चक्र दुरितं यातु संक्षयम् ॥ १८ ॥ इत्येवमुक्त्वा मतिमान्समभ्यर्च्याथ भक्तितः ॥ संस्मरन्पुण्डरीकाक्षं सर्वपापविनाशनम् ॥ १९ ॥ पूजितं बलिना चक्रं कृत्वा निस्तेजसोऽसुरान् ॥ निश्चक्रामाथ पातालाद्विषुवे दक्षिणे मुने ॥ २० ॥ सुदर्शने विनिष्क्रान्ते बलिर्विक्लवतां गतः ॥ परमामापदं प्राप्य सस्मार स्वं पितामहम् ॥ २१ ॥ स चापि संस्मृतः प्राप्तः सुतलं दानवेश्वरः ॥ दृष्ट्वा तस्थौ महातेजाः सार्घ्यपात्रो बलिस्तदा ॥ २२ ॥ स तमभ्यर्च्य विधिना पितुः पितरमीश्वरम् ॥ कृताञ्जलिपुटो भूत्वा इदं वचनमब्रवीत् ॥ २३ ॥ संस्मृतोऽपि समायातः सुविषण्णेन चेतसा ॥ तन्मे हितं च पथ्यं च श्रेयांसि त्वं तदा शुभम् ॥ २४ ॥ किं कार्यं तात संसारे वसता पुरुषेण हि ॥ कृतेन येन वै नास्य बन्धः समुपजायते ॥ २५ ॥ संसारार्णवमग्नानां नराणामल्पचेतसाम् ॥ तारणाय भवेद्यस्तु तन्मे व्याख्यातुमर्हसि ॥ २६ ॥ पुलस्त्य उवाच ॥ एतद्वचनमाकर्ण्य तत्पौत्राद्दानवेश्वरः ॥ विचिन्त्य प्राह वचनं संसारे यद्धितं परम् ॥ २७ ॥ प्रह्लाद उवाच ॥ साधु दानवशार्दूल यत्ते जाता मतिस्त्वियम् ॥ प्रवक्ष्यामि हितां तेऽद्य तथाऽन्येषां नृणामपि ॥ २८ ॥ भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ॥ विषयविषमतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥२९॥



॥१९७

ये संश्रिता हरिमनन्तमनिन्द्यमाद्यं नारायणं सुरगुरुं शुभदं वरेण्यम् ॥ शुद्धं खगेन्द्रगमनं कमलालयेशं ते धर्मराजशरणं न विशन्ति

ये संश्रिता हरिमनन्तमनिन्द्यमाद्यं नारायणं सुरगुरुं शुभदं वरेण्यम् ॥ शुद्धं खगेन्द्रगमनं कमलालयेशं ते धर्मराजशरणं न विशन्ति धीराः ॥ ३० ॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ॥ परिहर मधुसूदनप्रसन्नान्प्रभुरहमन्य नृणां न वैष्णवानाम् ॥३१॥ तथाऽन्यदुक्तं नरसत्तमेन इक्ष्वाकुणा भक्तियुक्तेन नूनम् ॥ ये विष्णुभक्ताः पुरुषाः पृथिव्यां यमस्य ते निर्विषया भवन्ति ॥ ३२ ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ॥ तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकृतौ करौ ॥ ३३ ॥ नूनं न तौ करौ प्रोक्तौ वृक्षशाखाग्रपल्लवौ ॥ न यौ पूजयितुं शक्तौ हरिपादाम्बुजद्वयम् ॥ ३४ ॥ नूनं तत्कण्ठशालूकमथवा प्रतिजिह्विका ॥ रोगश्चान्यो न सा जिह्वा या न वक्ति हरेर्गुणान् ॥ ३५ ॥ शोचनीयः स बन्धूनां जीवन्नपि मृतो नरः ॥ यः पादपङ्कजं विष्णोर्न पूजयति भक्तितः ॥ ३६ ॥ ये नरा वासुदेवस्य सततं पूजने रताः ॥ मृता अपि न शोच्यास्ते सत्यं सत्यं मयोदितम् ॥ ३७ ॥ शारीरं मानसं वाग्जं मूर्तामूर्तं चराचरम् ॥ दृश्यं स्पृश्यमदृश्यं वा तत्सर्वं केशवात्मकम् ॥३८॥ येनार्चितो हि भगवांश्चतुर्द्धाऽपि त्रिविक्रमः ॥ तेनार्चिता न संदेहो लोकाः सामरदानवाः ॥ ३९ ॥ यथा रत्नानि जलधेरसंख्येयानि पुत्रक ॥ तथा गुणाश्च देवस्य त्वसंख्येया हि चक्रिणः ॥ ४० ॥ ये शङ्खचक्राब्जकरं च शार्ङ्गिणं खगेन्द्रकेतुं वरदं श्रियः पतिम् ॥ समाश्रितास्ते न भवन्ति दुःखिताः संसारगर्ते न पतन्ति ते पुनः ॥ ४१ ॥ येषां मनसि गोविन्दो निवासी सततं भवेत् ॥ न ते परिभवं यान्ति न मृत्योरुद्विजन्ति च ॥ ४२ ॥ देवं शार्ङ्गधरं विष्णुं ये प्रपन्नाः परायणम् ॥ न तेषां यमलोकोऽस्ति न च ते नरकौकसः ॥ ४३ ॥ सतां गतिं प्राप्नुवन्ति श्रुतिशास्त्रविशारदाः ॥ यान्ति दानवशार्दूल विष्णुभक्ता व्रजन्ति

ताम् ॥ ४४ ॥ या गतिर्दैत्यशार्दूल संग्रामे निहतात्मनाम् ॥ ततोऽधिकां गतिं यान्ति विष्णुभक्ता नरोत्तमाः ॥ ४५ ॥ या गति धर्मशीलानां सात्त्विकानां महात्मनाम् ॥ सा गतिर्गदिता दैत्य भगवद्भेदिनामपि ॥ ४६ ॥ सर्वावासं वासुदेवं सूक्ष्ममव्यक्तविग्रहम् ॥ प्रपश्यन्ति महात्मानस्तीर्थभूता भवच्छिदम् ॥ ४७ ॥ प्रणिपत्य यथान्यायं संसारे न पुनर्भवेत् ॥ कृतेषु वसते नित्यं क्रीडन्नास्तेऽमितद्युतिः ॥ ४८ ॥ आसीनः सर्वदेहेषु कर्मभिर्न स बध्यते ॥ येषां विष्णुः प्रियो नित्यं ते विष्णोः सततं प्रियाः ॥ ४९ ॥ न ते पुनः संभवन्ति तद्भक्तास्तत्परायणाः ॥ ध्यायेद्दामोदरं यस्तु भक्तिनम्रस्तथाऽर्चयेत् ॥ ५० ॥ न हि संसारपङ्केऽस्मिन्मज्जते दानवेश्वर ॥ कल्यमुत्थाय ये भक्त्या स्मरन्ति मधुसूदनम् ॥ ५१ ॥ श्रावयन्ति च शृण्वन्ति दुर्गाण्यतितरन्ति ते ॥ ५२ ॥ हरिगाथामृतं पीत्वा बले वै श्रोत्रभाजनैः ॥ प्रहृष्यति मनो येषां दुर्गाण्यतितरन्ति ते ॥ ५३ ॥ येषां चक्रगदापाणौ भक्तिरव्यभिचारिणी ॥ ते यान्ति नियतं स्थानं यत्र योगेश्वरो हरिः ॥ ५४ ॥ विष्णुधर्मप्रसक्तानां तेषां या परमा गतिः ॥ सा तु जन्मसहस्रेण न तपोभिरवाप्यते ॥ ५५ ॥ किं जप्यैस्तस्य मन्त्रैर्वा किं तपोभिः किमाश्रमैः ॥ यस्य नास्ति परा भक्तिः सततं मधुसूदने ॥ ५६ ॥ वृथा यज्ञो वृथा दानं वृथा धर्मो वृथाऽऽश्रमः ॥ वृथा तपश्च कीर्तिश्च यो द्वेष्टि मधुसूदनम् ॥ ५७ ॥ किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्दने ॥ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥ ५८ ॥ विष्णुर्येषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ५९ ॥ सर्वमङ्गलमाङ्गल्यं वरेण्यं वरदं प्रभुम् ॥ नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥ ६० ॥ विष्टयो व्यतिपाताश्च येऽन्ये दुर्नीतिसंभवाः ॥ ते नामस्मरणाद्विष्णोर्नाशं यान्ति





महासुर ॥ ६१ ॥ तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ॥ नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥ ६२ ॥ पृथिव्यां
यानि तीर्थानि पुण्यान्यायतनानि च ॥ तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्तनात् ॥६३॥ प्राप्नुवन्ति न ताँल्लोकान्व्रतिनो वा

महासुर ॥ ६१ ॥ तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ॥ नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥ ६२ ॥ पृथिव्यां
यानि तीर्थानि पुण्यान्यायतनानि च ॥ तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्तनात् ॥६३॥ प्राप्नुवन्ति न तांल्लोकान्व्रतिनो वा
तपस्विनः ॥ प्राप्यन्ते ये तु कृष्णस्य नमस्कारपरैर्नरैः ॥ ६४ ॥ योऽप्यन्यदेवताभक्तो मिथ्याऽर्चयति केशवम् ॥ सोऽपि गच्छति
साधूनां स्थानं पुण्यकृतां महत् ॥ ६५ ॥ सुसत्येन हृषीकेशं पूजयित्वा तु यत्फलम् ॥ नृणां सुचीर्णे तपसि तत्फलं न कदाचन
॥ ६६ ॥ त्रिसंध्यं पद्मनाभं तु ये स्मरन्ति सुमेधसः ॥ लभन्ते तूपवासस्य फलं नास्त्यत्र संशयः ॥ ६७ ॥ सततं शास्त्रदृष्टेन
कर्मणा हरिमर्चय ॥ तत्प्रसादात्परां सिद्धिं बले प्राप्स्यसि शाश्वतीम् ॥ ६८ ॥ तन्मना भव तद्भक्तस्तद्याजी तं नमस्कुरु ॥
तमेवाश्रित्य देवेशं सुखं प्राप्स्यसि पुत्रक ॥ ६९ ॥ आद्यं ह्यनन्तमजरं हरिमव्ययं च सर्वत्रगं परमब्रह्मपरं पुराणम् ॥ ते यान्ति
वैष्णवपदं ध्रुवमक्षयं च ये मानवा विगतरागपरा भवन्ति ॥ ७० ॥ नारायणं सुरवरं सततं स्मरन्ति ते धौतपाडरपटा इव राज
हंसाः ॥ संसारसागरजलस्य तरन्ति पारं ध्यायन्ति ये सततमच्युतमीशितारम् ॥ ७१ ॥ निष्कल्मषं सपदि पद्मदलायताक्षं
ध्यानेन तेन हतकिल्बिषचेतनास्ते ॥ मातुः पयोधररसं न पुनः पिबन्ति ये कीर्तयन्ति वरदं वरपद्मनाभम् ॥ ७२ ॥ शङ्खाब्जच
क्रवरचापगदासिहस्तं पद्मालयावदनपङ्कजषट्पदाख्यम् ॥ नूनं प्रयान्ति सदनं मधुघातिनस्ते शृण्वन्ति ये सुदृढभक्तिपरा मनुष्याः
॥ ७३ ॥ संकीर्त्यमानं भगवन्तमाद्यमाजन्म पापं यदकारि यैस्तु ॥ ते मुक्तपापाः सुखिनो भवन्ति यथाऽमृतप्राशनतर्पिताश्च
॥ ७४ ॥ तस्माद्ध्यानं स्मरणं कीर्तनं वा नाम्नामपि श्रवणं पठतां सज्जनानाम् ॥ कार्यं विष्णोः श्रद्दधानैर्मनुष्यैः पूजातुल्यं तत्प्र

शंसन्ति देवाः ॥७५॥ बाह्येन चान्तःकरणेन योगिष्वथार्चयेत्केशवमीशितारम् ॥ पुष्पैश्च पत्रैर्ऋतुसंभवैश्च नूनं स पूज्यो विधि
वन्नरेण ॥७६॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे भगवत्प्रशंसा नाम चतुर्नवतितमोऽध्यायः ॥९४॥ बलिरुवाच ॥ भवता
कथितं सर्वं समाराध्य जनार्दनम् ॥ या गतिः प्राप्यते लोके स चाराध्यः कथंचन ॥१॥ केनार्चनेन देवस्य प्रीतिः समुपजायते ॥
कानि दानानि शस्तानि प्रीणनाय जगद्गुरोः ॥ २ ॥ उपवासादिकं कार्यं कस्यां तिथ्यां महोदयम् ॥ कानि पुण्यानि शस्तानि
विष्णुतुष्टिकराणि वै ॥ ३ ॥ यच्चान्यदपि कर्तव्यं हृष्टरूपैरनालसैः ॥ तदप्यशेषं दैत्येन्द्र ममाख्यातुमिहार्हसि ॥ ४ ॥ प्रह्लाद उवाच॥
श्रद्दधानैर्भक्तिपरैः समुद्दिश्य जनार्दनम् ॥ दीयन्ते यानि दानानि तानि यान्ति न वै क्षयम् ॥ ५ ॥ ता एव तिथयः शस्ता
यास्वभ्यर्च्य जगत्पतिम् ॥ तच्चित्तस्तन्मयो भूत्वा उपवासी नरो भवेत् ॥ ६ ॥ पूजितेषु द्विजेन्द्रेषु पूजितस्तु जनार्दनः ॥ यस्ता
न्द्वेष्टि स मूढात्मा स याति नरकं ध्रुवम् ॥ ७॥ तानर्चयेन्नरो भक्त्या ब्राह्मणान्विष्णुतत्परः ॥ एवमाह हरिः पूर्वं ब्राह्मणा मामकी
तनुः ॥ ८ ॥ ब्राह्मणो नावमन्तव्यो बुधो वाऽप्यबुधोऽपि वा ॥ सोऽपि दिव्या तनुर्विष्णोस्तस्मात्तं ह्यर्चयेन्नरः ॥ ९ ॥ तान्येव च
प्रशस्तानि कुसुमानि महासुर ॥ यानि स्युर्वर्णयुक्तानि रसगन्धयुतानि च ॥ १० ॥ विशेषतः प्रवक्ष्यामि पुण्यानि तिथिभिः
सह ॥ दानानीह प्रशस्तानि माधवप्रीणनाय तु ॥ ११ ॥ जाती शताह्वा सुमनाः कुन्दं बहुपुटं तथा ॥ बाणं च चम्पकाशोकं
करवीरं च यूथिका ॥ १२ ॥ पारिभद्रं पाटला च बकुलं गिरिशालिनी ॥ तिलकं च जपापुष्पं पीतकं तगरं त्वपि ॥ १३ ॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने ॥ सुरभीणि तथाऽन्यानि वर्जयित्वा तु केतकीम् ॥१४॥ बिल्वपत्रं शमीपत्रं पत्रं भृङ्ग



मृगाङ्कयोः ॥ तमालमालतीपत्रं शस्तं च हरिपूजने ॥ १५ ॥ एषामपि हि पुष्पाणि प्रशस्तान्यर्चने विभोः ॥ पल्लवान्यपि तेषां
... विधौ हरेः ॥१६॥ वीरुधां च प्रवालेन बर्हिषां चार्चयेन्नरः ॥ नानारूपैश्चानुभावैः कमलेन्दीवरादिभिः ॥१७॥ प्रवालैः

मृगाङ्कयोः ॥ तमालमालतीपत्रं शस्तं च हरिपूजने ॥ १५ ॥ एषामपि हि पुष्पाणि प्रशस्तान्यर्चने विभोः ॥ पल्लवान्यपि तथा स्युः पत्राण्यर्चाविधौ हरेः॥१६॥वीरुधां च प्रवालेन बर्हिषां चार्चयेन्नरः ॥ नानारूपैश्चानुभावैः कमलेन्दीवरादिभिः ॥१७॥प्रवालैः शुचिभिः सूक्ष्मजलप्रक्षालितैर्बले॥ वनस्पतीनामर्चेत तथा दूर्वाग्रपल्लवैः ॥१८॥तथैव प्रतिपूज्योऽसौ पत्रकुड्मलपल्लवैः॥ चन्दनेनानुलिम्पेत कुङ्कुमेन च यत्नतः॥१९॥ उशीरपद्मकाभ्यां स तथा कालीयकादिना ॥ महिषाख्यं कणं दारुसिह्लकं नागरं तथा॥२०॥ शङ्खजातीफलं श्रीशे धूपने स्युः प्रियाणि वै॥हविषा संस्कृता ये तु यवगोधूमशालयः॥२१॥तिलमुद्गादयो माषा व्रीहयश्च प्रिया हरेः॥गोदानानि पवित्राणि भूमिदानानि यानि च ॥२२॥ वस्त्रान्नस्वर्णदानानि प्रीतये मधुघातिनः॥ माघमासे तिलाः शस्तास्तिलधेनुश्च दानव ॥ २३ ॥ इन्धनानि च देयानि माधवः प्रीयतामिति ॥ फाल्गुने व्रीहयो वस्त्रं तथा कृष्णाजिनादिकम् ॥ २४ ॥ गोविन्दप्रीणनार्थं च दातव्यं पुरुषर्षभैः ॥ चैत्रे विचित्रवस्त्राणि शयनान्यासनानि च ॥ २५ ॥ विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणेषु च ॥ गन्धशालीनि वस्तूनि वैशाखे सुरभीणि च ॥ २६ ॥ देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥ उदकुम्भाढ्यधेनुं च तालवृन्तं सचन्दनम् ॥ त्रिविक्रमस्य प्रीत्यर्थ दातव्यं साधुभिः सदा ॥ २७ ॥ सदा भवत्पुत्रधनेन भार्यया युतश्च यो विष्णुगतः सदा भवेत् ॥ शृणोति नित्यं विधिवच्च भक्त्या संपूजयन्यः प्रणतश्च विष्णुम् ॥ २८ ॥ स चाश्वमेधस्य सदक्षिणस्य फलं समग्रं किल हीनपापः ॥ प्राप्नोति दत्तस्य सुवर्णभूमेरश्वस्य गोनागरथस्य चैव ॥ २९ ॥ नारी नरश्चापि च पादमेकं शृण्वञ्शुचिः पुण्यतमः पृथिव्याम् ॥ स्नाने कृते तीर्थवरे सुपुण्ये गङ्गाजले नैमिषपुष्करे वा ॥ ३० ॥ कोकामुखे यत्प्रवदन्ति विप्राः प्रयागमासाद्य

च माघमासे ॥ स तत्फलं प्राप्य च वामनस्य संकीर्तयन्नान्यमनाः पदं हि ॥ ३१ ॥ गच्छेन्मया नारद तेऽद्य चोक्तं यद्राजसुय स्य फलं प्रयच्छेत् ॥ यद्भूमिलोके सुरलोकलभ्ये महत्सुखं प्राप्य नरः समग्रम् ॥ ३२ ॥ प्राप्नोति चास्य श्रवणान्महर्षे सौत्राम णेर्नास्ति च संशयो मे ॥ रत्नस्य दानस्य च यत्फलं भवेद्यत्सूर्यचन्द्रग्रहणे च राहोः ॥ ३३ ॥ अन्नस्य दानेन फलं यथोक्तं बुभुक्षिते प्राप्तवरे च साग्निके ॥ दुर्भिक्षसंपीडितपुत्रभार्ये ज्ञातौ सदा पोषणतत्परे च ॥ ३४ ॥ देवाग्निविप्रर्षिरते च पित्रोः सुते तथा भ्रातरि ज्येष्ठके च ॥ यत्ते फलं तत्प्रवदन्ति देवाः स तत्फलं लभते चास्य पाठात् ॥ ३५ ॥ चतुर्दशं वामनमाहुरग्र्यं श्रुते च यस्याघचयाश्च नाशम् ॥ प्रयान्ति नास्त्यत्र च संशयो मे महान्ति पापान्यपि नारदाशु ॥ ३६ ॥ पाठात्संश्रवणाद्विप्र श्राव णादपि कस्यचित् ॥ नश्यन्ति सर्वपापानि वामनस्य सदा मुने ॥ ३७॥ उपानद्युगलं छत्रं लवणामलकादिकम् ॥ आषाढे वामन प्रीत्यै दातव्यानि विपश्चिता ॥ ३८ ॥ मासि भाद्रपदे दद्यात्पायसं मधुसर्पिषी ॥ हृषीकेशप्रीणनार्थं लवणं सगुडौदनम् ॥ ३९ ॥ नीलं तुरङ्गं वृषभं दधि ताम्रायसादिकम् ॥ प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैः ॥ ४० ॥ रजतं कनकं दीपान्मणिमुक्ताफला दिकम् ॥ दामोदरस्य तुष्ट्यर्थं प्रदद्यात्कार्त्तिके नरः ॥ ४१ ॥ खरोष्ट्राश्वतरान्नागान्शकटाद्यमजाविकम् ॥ दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैः ॥ ४२ ॥ प्रासादनगरादीनि गृहप्रावरणादिकम् ॥ वामनस्य च तुष्ट्यर्थं पौषे देयानि भक्तितः ॥ ४३ ॥ दासीदासमलंकारमन्नं षड्रससंयुतम् ॥ पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्वकामिकम् ॥४४॥ यद्यदिष्टतमं किंचिद्यद्वाऽप्यस्य गृहे शुचि ॥ तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः ॥ ४५ ॥ यः कारयेन्मन्दिरं केशवस्य पुण्याँल्लोकान्स जयेच्छाश्वतान्वा ॥ दत्त्वाऽऽरामा



न्पुष्पफलाभिपन्नान्भोगान्स भुङ्क्ते कामतः श्लाघनीयान् ॥ ४६ ॥ पितामहस्य पुरतः कुलान्यष्टोत्तराणि तु ॥ तारयेदात्मना ... इमाश्च पितरो देवा गाथा गायन्ति योगिनः ॥ पुरतो यदुसिंहस्य द्रुमोघस्य तपस्विनः

न्पुष्पफलाभिपन्नान्भोगान्स भुङ्क्ते कामतः श्लाघनीयान् ॥ ४६ ॥ पितामहस्य पुरतः कुलान्यष्टोत्तराणि तु ॥ तारयदात्मना
सार्धं विष्णोर्मन्दिरकारकः ॥ ४७ ॥ इमाश्च पितरो देवा गाथा गायन्ति योगिनः ॥ पुरतो यदुसिंहस्य ह्यमोघस्य तपस्विनः
॥ ४८ ॥ अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति ॥ हरिमन्दिरकर्ता यो भविष्यति शुचिव्रतः ॥ ४९ ॥ अपि नः सन्ततौ
जायेद्विष्णवालयविलेपनः ॥ संमार्जनं च धर्मात्मा करिष्यति च भक्तितः ॥ ५० ॥ अपि नः सन्ततौ जातो ध्वजं केशवम
न्दिरे ॥ दास्यते देवदेवाय दीपं पुष्पानुलेपनम् ॥ ५१ ॥ अपि नः स कुले भूयादेकादश्यां हि यो नरः ॥ करिष्यत्युपवासं
च सर्वपातकहानिदम् ॥ ५२ ॥ महापातकयुक्तो वा पातकी चोपपातकी ॥ विमुक्तपापो भवति विष्ण्वावसथचित्रकृत्
॥ ५३ ॥ इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तमः ॥ देवतायतनं भूम्यां स्वयं चाकारयद्बले ॥ ५४ ॥ विभूतिभिः केश
वस्य केशवायतनान्यथ ॥ चित्रयामास शुचिभिः पञ्चवर्णैस्तु चित्रकैः ॥ ५५ ॥ दीपपात्राणि विधिवद्वासुदेवालये बले ॥
सुवर्णं तैलपूर्णानि घृतपूर्णानि च स्वयम् ॥ ५६ ॥ नानावर्णा वैजयन्त्यो महारजनरञ्जिताः ॥ मञ्जिष्ठा नवरङ्गीयाः श्वेतपाटलिका
श्रिताः ॥ ५७ ॥ आरामा विविधा हृद्याः पुष्पाढ्याः फलशालिनः ॥ लतापल्लवसंछन्ना देवदारुभिरावृताः ॥ ५८ ॥ कारितालं
कृता मञ्चाधिष्ठिताः कुशलैर्जनैः ॥ गन्धर्वविद्यारागज्ञै रत्नसंस्कारिभिर्दृढैः ॥ ५९ ॥ तेषु नित्यं प्रपूज्यन्ते यतयो ब्रह्मचारिणः ॥
श्रोत्रिया दानसंपन्ना दीनान्धविकलादयः ॥ ६० ॥ इत्थं स नृपतिर्भूत्वा श्रद्दधानो जितेन्द्रियः ॥ ज्यामघो विष्णुनिलयं गत
इत्यनुशुश्रुम ॥ ६१ ॥ सर्षपस्य स तैलेन मधुकातसिसंभवैः ॥ दीपप्रज्वालनान्नरकानन्धतामिस्रसंज्ञकान् ॥ तीर्त्वा स भार्यया राजा

विष्णुलोकमगात्ततः ॥ ६२ ॥ तमेव चाद्यापि बले मार्गं ज्यामघकारितम् ॥ व्रजन्ति नरशार्दूला विष्णुलोकं जिगीषवः ॥६३॥ तस्मात्त्वमपि राजेन्द्र कुरु देवालयं हरेः॥ तमर्चयस्व यत्नेन ब्राह्मणांश्च बहुश्रुतान् ॥६४॥ पौराणिकान्विशेषेण सदाचाररतान्शुचीन् ॥ वासोभिर्भूषणै रत्नैर्गोभिर्भूकनकादिभिः ॥ ६५ ॥ विभवे सति देवस्य प्रीणनं कुरु चक्रिणः ॥ ६६ ॥ एवं क्रियायोगरतस्य तेऽद्य नूनं मुरारिः शुभदो भविष्यति ॥ नरा न सीदन्ति बले समाश्रिता विभुं जगन्नाथमनन्तमच्युतम् ॥ ६७ ॥ प्रह्लादः स तदा चोक्त्वा पुनर्नगरमध्यगात् ॥ ६८ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्त्वा वचनं दितीश्वरो वैरोचनं सत्यमनुत्तमं हि ॥ संपूजितस्तेन विमुक्तिमाययौ संपूर्णकामो हरिपादभक्तः ॥ ६९ ॥ गते हि तस्मिन्मुदिते पितामहे बलबैभौ मन्दिरमिन्दुवर्णम् ॥ महेन्द्रशिल्पिप्रवरोऽथ केशवं स कारयामास महामहीयान् ॥७०॥ स्वयं स्वभार्यासहितश्चकार देवालये मार्जनलेपनादिकाः ॥ क्रियामहात्मा यवशर्कराद्या बलिं चकाराप्रतिमं मधुद्रुहः ॥ ७१ ॥ दीपप्रदानं स्वयमायताक्षी विन्ध्यावली विष्णुगृहे चकार ॥ गेयं सधर्मग्रहणं च धीमान्पौराणिकैर्विप्रवरैरकारयत् ॥ ७२ ॥ तथाविधस्यासुरपुंगवस्य धर्मानुमार्गे प्रतिसंस्थितस्य ॥ जगत्पतिर्दिव्यवपुर्जनार्दनस्तस्थौ महात्मा बलिरक्षणाय ॥७३॥ सूर्यायुताभं मुसलं प्रगृह्य निघ्नन्स दुष्टान्नरयूथपालान् ॥ द्वारि स्थितो न प्रददौ प्रवेशं प्राकारगुप्तौ बलिनो गृहे तु ॥ ७४ ॥ द्वारि स्थिते धातरि रक्षपाले नारायणे सर्वगुणाभिरामे ॥ प्रासादमध्ये हरिमीशितारमभ्यर्चयामास सुरर्षिमुख्यम्॥७५॥ स एवमास्तेऽसुरराड् बलिस्तु समर्चयन्वै हरिपादपङ्कजे ॥ सस्मार नित्यं हरिभाषितानि स तस्य जातो विनयाङ्कुशस्तु ॥७६॥ इदं च वृत्तं स पपाठ देत्यराट् स्मरन्सुवाक्यानि गुरोः शुभानि॥ तथ्यानि पथ्यानि

तानि स तस्य जातो विनयाङ्कुशस्तु ॥७६॥ इदं च वृत्तं स पपाठ दैत्यराट् स्मरन्सुवाक्यानि गुरोः शुभानि॥ तथ्यानि पथ्यानि

॥ ७७ ॥ ये वृद्धवाक्यानि समाचरन्ति श्रुत्वा दुरुक्तान्यपि वृद्धतस्तु ॥ [illegible]

परत्र चेह पितामहस्येन्द्रसमस्य वीरः ॥ ७७ ॥ ये वृद्धवाक्यानि समाचरन्ति श्रुत्वा दुरुक्तान्यपि वृद्धतस्तु ॥ [illegible]

नवनीतशुद्धा मोदन्ति ते नात्र विचार्यमस्ति ॥ ७८ ॥ आपद्भुजङ्गदष्टस्य मन्त्रहीनस्य सर्वदा ॥ वृद्धवाक्यौषधान्येव कुर्वन्ति किल निर्विषम् ॥ ७९ ॥ बृहद्वाक्यामृतं पीत्वा तदुक्तान्यनुमन्य च ॥ या तृप्तिर्जायते पुंसां सोमपाने कुतस्तथा ॥ ८० ॥ आपत्सौ पतितानां येषां वृद्धा न सन्ति शास्तारः ॥ ते शोच्या बन्धूनां जीवन्तोऽपीह मृततुल्याः स्युः॥८१॥ आपद्ग्राहगृहीतानां वृद्धाः सन्ति न पण्डिताः ॥ येषां मोचयितारो वै तेषां शान्तिर्न विद्यते ॥८२॥ आपज्जलनिमग्नानां ह्रियतां व्यसनोर्मिभिः ॥ वृद्धवाक्यैर्विना नूनं नैवोत्तारः कथंचन॥८३॥पुलस्त्य उवाच ॥ तस्माद्यो वृद्धवाक्यानि शृणुयाद्विदधाति वा ॥ स सद्यः सिद्धिमाप्नोति यथा वैरोचनिर्बलिः ॥८४॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे श्रीत्रिविक्रमचरितं समाप्तम् ॥ पुलस्त्य उवाच ॥ एतन्मया पुण्यतमं पुराणं तुभ्यं तथा नारद कीर्तितं वै ॥ श्रुत्वा च कीर्त्या परया समेतो भक्त्या च विष्णोः परमभ्युपैति ॥ ८५ ॥ यथा पापानि पूयन्ते गङ्गावारिविगाहनात् ॥ तथा पुराणश्रवणाद्दुरितानां विनाशनम् ॥ ८६ ॥ न तस्य रोगा जायन्ते न विषं चाभिचारिकम् ॥ शरीरे च कुले ब्रह्मन्यः शृणोतीह वामनम् ॥८७॥ इदं रहस्यं परमं तवोक्तं न वाच्यमेवं हरिभक्तिवर्जिते ॥ द्विजस्य निन्दारतिहीनतारते स हेतुवाक्याहतपापसत्त्वे ॥ ८८ ॥ नमो नमः कारणवामनाय नारायणायामितविक्रमाय ॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ८९ ॥ इत्थं वदेद्यो नियतं मनुष्यः कृष्णभावनः ॥ तस्य विष्णुः पदं मोक्षं

वा॰पु॰

॥२०२॥

ददाति सुरपूजितः ॥ ९० ॥ वाचकाय प्रदातव्यं गोभूस्वर्णविभूषणम् ॥ वित्तशाठ्यं न कर्तव्यं कुर्वञ्छ्रवणनाशकः ॥ ९१ ॥ त्रिसंध्यं च पठञ्शृण्वन्सर्वपापप्रणाशनम् ॥ असूयारहितं विप्रः सर्वसंपत्प्रदायकम् ॥ ९२ ॥ इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे पञ्चनवतितमोऽध्यायः ॥ ९५ ॥ ॐ ॥ शुभमस्तु ॥ श्रीकृष्णार्पितमस्तु ॥

इति वामनपुराणं संपूर्णम् ।

मुद्रक और प्रकाशक–खेमराज श्रीकृष्णदास, मालिक–"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

सं. १९८६, शके १८५१



पुस्तक मिलनेका ठिकना–

खेमराज–श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम् प्रेस–बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" प्रेस कल्याण–बम्बई.

# अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास-वैद्यक-मन्त्र-स्तोत्र-कोश-काव्य-चम्पू-नाटकालंकार-संगीत-नीति-कथाग्रन्थाः बहवः, स्त्रीणां चोपयुक्ता ग्रन्थाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः संस्कृतभाषया, हिन्दीमार्वाड्यन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानि च मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय । येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि मुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारा तैः बोधनीयोऽस्मि ।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम् ।

क्षेमराजश्रीकृष्णदासः, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः खेतवाड़ी–मुंबईस्थः.

॥ इति वामनपुराणं समाप्तम् ॥